PREFACE.

This is almost entirely a new work, and retains only the faintest traces of the first edition, which was compiled by V. G. Apte, the late Marathi scholar. The bulk has been more than doubled; practically all the old lexical material has been excised; the typography is different. I am, however, very far from claiming that I have succeeded in keeping out mistakes and misprints. But in this matter, a lexicographer, however humble, can only gloss over his *peccavi* by pointing to the super-dictionaries, produced by great syndicates of scholars, which are not without their corrigenda.

I have made use of my predecessors in the field, Monier-Williams, Borooah, V. S. Apte. The last has been of the greatest use to me. For English I have mainly followed Cassell's *New English Dictionary.*

Confident that an English-Sanskrit Dictionary is generally used by persons conversant with lexicographical technique, I have employed several devices to make the presentment as concise as possible. But I am sure none of these will impede quick reference.

Finally I should like to refer to one important point. *All masculine Sanskrit nouns ending in* अ (*e. g.* अश्व, सिंह, *etc.*) *have been entered unmarked.* These words form the majority of Sanskrit words, and the context makes misunderstanding impossible. On the other hand, this device makes for much typographical economy.

ABBREVIATIONS, ETC.

a. = adjective.
adv = adverb.
c. = causal.
conj. = conjunction.
desid. = desiderative.
exp. = expressed.
f. = feminine.
ind. = indeclinable.
m. = masculine.
mf = masculine & feminine.
mn. = masculine & neuter.
n. = noun.
neu. = neuter.
plu. = plural.
prep. = preposition.
pron. = pronoun.

NOUNS :—Where the word by itself clearly shows the gender (*e. g.* नदी, कमलं), this is not marked. *All Sanskrit masculine nouns ending in* अ (*e. g.* अश्व, सिंह, *etc.*) *have been left unmarked, i. e. they do not carry either the Vigraha or the abbreviation m.* In other cases the gender has been nearly marked ; हरि *m.*, मति *f.*, वारि *neu* , गुरु *m.*, मधु *neu*, संपद् *f.*, *etc*.

VERBS :—The conjugation and pada are always given with the roots ; *e. g.* भू 1 P (Parasmaipada), लभ् 1 A (Atmanepada), कृ 8 U (Ubhayapada). Where *c* is given, it means that the causal form is to be used.

There are other abbreviations, but these are only sparingly used and are self-explanatory.

Brackets are chiefly used to give variant forms and to denote some qualification of the principal meaning ; *e. g.* अरघट्ट (क) means that there are two forms अरघट्ट and अरघट्टक; (शब्दादिकानां) ओघ for 'volley' means that the general use of ओघ here should be with शब्द, आलाप. *etc.*

THE

HANDY ENGLISH-SANSKRIT DICTIONARY.

A

A, An, *ind. art.* एक; किं with अपि, चन, or चित्.

Aback, *adv.* पश्चात् । Be taken a. सहसा विस्मयाकुल-भू 1 P.

Abandon, *vt.* उज्झ् 6 P, उत्सृज् 6 P, त्यज्. 1 P, परित्यज् 1 P, मुच् 6 P, विधू 5. 10U, 6P, विसृज् 6 P, समुज्झ् 6 P, । *n.* अनियतत्वं.

Abandoned, *a.* क्ष्वेड, दुर्वृत्त, धर्मभ्रष्ट.

Abandonment, *n.* उत्सर्ग, त्याग, परित्याग, विसर्जनं । A. of worldly connections संन्यास.

Abase, *vt.* अपकृष् 1 P, 6 U, अभिभू 1 P, आत्तगंधं कृ 8 U, निराकृ 8 U, लघूकृ 8 U । -ment, *n.* अपकर्ष, अभिभव, मानभंग.

Abash, *vt.* त्रप् *c.* लज् *c,* ह्री *c.*

Abate, *vt* अवसद् *c,* शम् *c,* ह्रस् *c*। *vi.* क्षि 1 P, मंदीभू 1 P, ह्रस् 1 P, । -ment *n.* क्षय, ह्रास.

Abattoir *n.* वधागारं.

Abbey *n.* मठ, विहार.

Abbot *n.* मठगुरु, मठाध्यक्ष, महंत.

Abbreviate, *v t.* संहृ 1 P, संक्षिप् 6 P, संग्रह् 9 U, समाहृ 1 P । -tion, *n.* संक्षेप. संग्रह, समाहार.

ABC, *n.* तत्त्वानि *pl.*, प्रथमारंभ, वर्णमाला.

Abdicate, *vi.* राजदंड त्यज् 1 P, स्वाधिकारं त्यज् 1 P । -tion *n.* पदत्याग.

Abdomen, *n.* उदरं, कुक्षि, जठर *m.n.*, तुंदं, फंड, मलुक.

Abduction, *n.* अपहरणं.

Abed, *a.* पर्यंकस्थ .

Aberration, *n.* उन्मार्गगमनं, भ्रंश.

Abet, *vt.* प्रवृत् *c,* प्रोत्साहृ *c* । -tor, *n.* प्रवर्तक, प्रोत्साहक.

Abeyance, *n* अनिश्चय, व्याक्षेप.

Abhor, *vt.* जुगुप्स् Den. A । -rence, *n.* घृणा, जुगुप्सा, धिक्कार । -rent, *a.* जुगुप्सित.

Abide, *vi.* वृत् 1 A. स्था 1 P । A. by one's word, वचनं अनुवृत् 1 A *or* प्रतिपाल् 10 U.

Abiding, *a.* चिरकाल, स्थायिन्.

Abigail, *n.* दासी, परिचारिका.

Ability *n.* क्षमता, सामर्थ्यं; बुद्धिवैभवं.

Abject, *a.* अधम, निहीन, नीच, हीन.
Abjure, *vt.* प्रत्याख्या 2 P, सशपथं त्यज् 1 P.
Ablative, *n.* अपादानं, पंचमी.
Ablaze, *a.* प्रज्वलित, प्रदीप्त; क्षुब्ध.
Able, *a.* क्षम, समर्थ; कुशल, निपुण, निष्णात, साधक । -bodied, *a.* दृढकाय.
Ablution, क्षालनं, धावनं, प्रक्षालनं, मज्जनं, स्नानं.
Abnegation, *n.* निरसनं, निराकृति *f.*, प्रत्याख्यानं.
Abnormal, *a.* नियमातिरिक्त.
Abode, *n.* आलय *mn.*, आवसथ, निलय, निवास, स्थानं; अवस्थानं, वास.
Abolish, *vt.* उच्छिद् *c*, नश् *c*, विलुप् *c*.
Abolition, *n.* उच्छेद, विलोप.
Abominable, *a.* अवद्य, कुपूय, घृणार्ह, जघन्य.
Abominate, *vt.* गर्ह् 1 A, द्विष् 2 U । -tion, *n.* गर्हा, घृणा, जुगुप्सा, विद्वेष.
Aboriginal, *a.* आदिम, आदिमवासिन्.
Aborigines *n.* आदिमवासिनः *pl.*
Abortion, *n.* गर्भक्षय, गर्भपात, गर्भास्राव; निष्फलता.
Abortive, *a.* अकालज, निष्फल, मोघ.
Abound, *vi.* संकृ *pass.*, बहुलीभू 1 P. । -ing, *a.* अधिक, आढ्य, प्रचुर, प्रभूत, प्राज्य, बहुल, भूयिष्ठ.
About, *prep.* इतस्ततः, परितः, समीपं (*all ind.*) Be a. a business कार्योद्यत-भू 1 P.
Above, *prep.* अधि, उपरि । *a.* उत्तर, पूर्वोक्त । A. all प्रधानतः *ind.*
Abrasion, *n.* घर्षणं; घृष्टत्वच् *f.*
Abreast, *adv.* पार्श्वापार्श्वि *ind.*
Abridge, *vt.* संहृ 1 P, संक्षिप् 6 P, संग्रह् 9 U, समाहृ 1 P । -ment, *n.* संक्षेप, संग्रह, सार *mn.*
Abroad, *adv.* बहिः, विदेशे (*both ind.*)
Abrogate, *vt.* निरस् 4U, निराकृ 8 U. विलुप् *c* । -tion, *n.* निराकरणं, लोप.
Abrupt, *a.* असंबंध, आकस्मिक, भग्न । -ly, *adv.* अकस्मात्, सहसा (*both ind.*)
Abscess, *n.* गंड, विद्रधि, विस्फोट, स्फोट.
Abscond, *vi* (दंडभयात्)पलाय् 1 A.
Absence, *n.* अनुपस्थिति *f.* अभाव, विप्रयोग, वियोग, विरह । A. of mind, अनवधानं, अन्यमनस्कता । In one's a., परोक्षे *ind.*
Absent, *a.* अनुपस्थित, अविद्यमान । A.-minded, *a.* विमनस्क, शून्यमानस.
Absolute, *a.* अबाधित, ऐकांतिक, केवल; निर्गुण; स्वाधीन; अप्रतिबन्द्ध, निःसीम । *n.* केवलात्मन् *m.* परमात्मन् *m.* । -ly, *adv.* केवलं, सर्वथा (*both ind.*).

Absolution, *n.* क्षमा, पापमोचनं; अपवर्ग, कैवल्यं, निर्वाणं, निर्वृति *f.*, मुक्ति *f.*, मोक्ष.

Absolutism, *n.* अनियतशासनं.

Absolve, *vt.* अपवृज् *c*, उद्धृ 1 P. 10 U, (पापं) क्षम् 1 A., (पापात्) मुच् 6 P.

Absonant, *a.* कटुस्वन.

Absorb, *vt.* शुष् *c*; ग्रस् 1 A, निगॄ 6 P। -ent, *a.* शोषक.

Absorption, *n.* शोषणं; निगरणं। A. of mind, *n.* एकतान, ऐकाग्र्यं, तद्गतचित्तता.

Abstain, *vi.* निवृत् 1 A, विरम् 1 P; उपवस् 1 P.

Abstemious, *a.* मिताचारिन्. मिताहारिन्.

Abstinence, *n.* मिताहार; निवृत्ति *f.* संयम। -nent, *a.* मिताहारिन्; संयतात्मन्, संयमिन्.

Absterge, *vt.* प्रक्षल् 10 U, शुध् *c.*

Abstract, *vt.* अपहृ 1 P; संहृ 1 P, संक्षिप् 6 P, संग्रह् 9 U, समाहृ 1 P। *n.* संक्षेप, संग्रह, सार *mn.* *a.* केवल; निगूढ; पृथक्; भाववाचक.

Abstraction, *n.* अपहरणं; चौर्यं; पृथक्करणं; प्रत्यय; विचारमग्नता.

Abstruse, *a.* निगूढ; गूढ, दुरवगम, दुरूह, दुर्बोध.

Absurd, *a.* अनुपपन्न, अयुक्त, असंगत। -ity. *n.* अनुपपत्ति *f.*, असंगति *f.*

Abundance, *n.* प्राचुर्यं, बाहुल्यं, भूयस्त्वं, वैपुल्यं.

Abundant, *a*, अधिक, आढ्य, प्रचुर, प्रभूत, प्राज्य, बहुल, भूयिष्ठ विपुल.

Abuse, *vt.* अपभाष् 1 A, अपवद् 1 U, कुत्स् 10 A; निंद् 1 P; अपव्यय् 1 P। *n.* अपभाषा, अपवाद, कुत्सनं, गालि *f*, निंदा; अपव्यय, दुरुपयोग.

Abysmal, *a.* अगाध, अतलस्पर्श, अस्थान.

Abyss, *n* अगाध *mn*, अतलस्पर्श, खातं.

Academic, *a.* विद्याविषयक; तात्त्विक.

Academy, *n.* विद्यालय; विद्वत्परिषद् *f.*

Accede, *vi.* अनुज्ञा 9 U, अनुमन् 4 A, स्वीकृ 8 U.

Accelerate, *vt.* त्वर् *c*, शीघ्रं कृ 8 U.

Accent, *n.* स्वर; आघात। -ed, *a.* स्वरयुक्त.

Accept, *vt.* स्वीकृ 8 U; आदा 3 A, अनुमन् 4 A; ग्रह् 9 U, प्रतिग्रह् 9 U। -or, *n.* ग्राहक, प्रतिग्राहिन्.

Acceptable, *a.* ग्रहणीय, ग्राह्य, प्रतिग्राह्य; आदेय; रुचिर.

Acceptance, *n.* आदानं; स्वीकार, प्रतिग्रह.

Acceptation, *n.* अर्थ, आशय Popular a., *n.* रूढार्थ.

Access, *a.* उपागम, प्रवेश.

Accessible, *a.* उपगम्य, प्राप्य, सुगम, सुलभ.

Accession, *n.* प्राप्ति *f*; वृद्धि *f*; राज्यारोहणं; राज्याभिषेक.

Accessory, *n.a.* सहकारिन्; प्रवर्तक.

Accidence, *n.* विभक्तिशासनं.

Accident, *n.* दुर्घटना; दैवगति *f*., यदृच्छा; आहार्यधर्म। By a., अकस्मात्, यदृच्छया (*Both ind.*)

Accidental, *a.* आकस्मिक; नैमित्तिक। -ly, *adv.* अकस्मात्, दैवात्, यदृच्छया (*all ind.*)

Acclaim, *vt.* उच्चैः घुष् 10 U; प्रशंस् 1 P.

Acclamation, *n.* जयघोष; धन्यवाद; प्रणाद; संमतिघोष.

Acclivity, *n.* उत्संग, कटक; नितंब.

Accommodate, *vt.* युज् 10 U, संधा 3 U; वसतिस्थानेन उपकृ 8 U.

Accomodation, *n.* उपकरणं, उपयोगिता, संयोजनं.

Accompaniment, *n.* अनुषंग, उपकरणं, संगति *f*.

Accompany, *vt.* अन्वि 2 P, व्रज् 1 P, सह चर् 1 P.

Accomplice, *n.* पापसहाय.

Accomplish, *vt.* अनुष्ठा 1 P, कृ 8 U, संपद् *c*, साध् *c*। -able, *a.* संपादनीय, साध्य.

Accomplished, *a.* संस्थित, संपन्न, साधित, सिद्ध; समाप्त.

Accomplishment, *n.* सिद्धि *f*; समाप्ति *f*; कृतार्थता; कलाप्रावीण्यं.

Accord, *vi.* युज् *pass.*; एकचित्तीभू 1 P.

Accord, *n.* एकताल, ऐकमत्यं, संमति *f*.। Of one's own a., यदृच्छया, स्वयं, स्वेच्छया। With one a., एकमतेन.

Accordance, *n.* अनुरोध, अनुसार, योग। In a. with, अनुसारेण.

According, *adv.* अनुरूपं, यथा। -ly, *adv.* तथैव, तदनुरोधात्.

Accost, *vt.* संबुध् *c*, संभाष् 1 A; अभिधा 3 U.

Accouchement, *n.* प्रसव, प्रसूति *f*.

Acconcheur, *n.* प्रसूतिसाधक.

Account, *vt.* गण् 10 U, संख्या 2 P; चिंत् 10 U, मन् 4. 8 A, संभू *c*। *vi.* बीजानिर्देशं कृ 8 U, वृत्तांतं ज्ञा *c*.

Account, *n.* गणना, संख्यानं; मूल्यं; वृत्तांत; हेतुकथनं, निर्वचनं; मात्रा; निमित्तं। On a. of, अर्थे, कृते, वशात्, हेतोः (*all ind*)। On this a., अतः। On no a., न कथंचन। To take into a., गण् 10 U, समीक्ष् 1 A.

Accountable, *a.* आख्यापनीय, प्रष्टव्य, वाच्य। -ness, *n.* दायित्वं.

Accountant, *n.* गणक.

Accouplement, *n.* युग्लीकरणं.

Accoutre, *vt.* प्रसाध् *c*. सज्जीकृ 8 U, संनह् 4 A.

Accoutrement, *n.* प्रसाधनं, वेष; (military dress, mail, etc.) कंकट, कवच *mn.* दशनं, वर्मन् *neu.*, सज्जा, संनाह.

Accredit, *vt.* विश्रंभ् 1 A, विश्वस् 2 P । -ed प्रतिनिधीकृत, मान्य.
Accretion, *n.* उपचय, वृद्धि *f.*
Accrue, *vi.* उपचि *pass*, एध् 1 A. वृध् 1 A.
Accumulate, *vt.* संग्रह् 9 P, संचि 5 U । *vi.* एध् 1 A, वृध् 1 A.
Accumulation, *n.* राशि *m.* संग्रह, संचय.
Accuracy, *n.* यथार्थता, विशुद्धता, सूक्ष्मता.
Accurate, *a.* यथार्थ, सत्य, सूक्ष्म । -ly, *adv.* यथाभूतं, यथार्थतः, सम्यक् (*all ind.*)
Accursed, *a.* अभिशप्त, दग्ध, निंद्य, हत (*1st member of* a *comp.*); हतक (*final member of* a *comp.*)
Accusation, *n.* अपवाद, अवर्णवाद, निर्वाद, विरूक्षणं ; अभियोग.
Accusative, *n.* कर्मपदं; द्वितीया.
Accuse, *vt.* अपवद्, 1 U, अभियुज्, 7 A, अभिशंस् 1 P, दुष् *c.*
Accuser, *n.* अपवादक, अभियोक्तृ.
Accustom, *vt.* अभ्यस् 4 P, परिचयं नी 1 P. शिक्ष् *c.*
Ace, *n.* एकांक (क्रीडापत्रविशेषस्तन्मुद्रितचिन्हं च) । Within an A., प्रायः.
Acephalous, *a.* अशिरस्क.
Acerbity, *n.* अम्लता, कटुता.
Ache, *n.* आर्ति *f.*, पीडा, वेदना, व्यथा, शूल । -*vi.* पीड् *pass.*, व्यथ् 1 A.

Achieve, *vt.* समाप् *c.* संपद्, *c*; प्राप् 5 P.
Achievement, *n.* निष्पत्ति *f.*, साधनं, सिद्धि *f.*; पराक्रम, सुकृति *f.*; (*Ironic*) चेष्टितं.
Achromatic, *a.* निर्वर्ण, रंगहीन.
Acid, *a.* अम्ल, कटु । *n.* अम्ल, द्रावकं.
Acidity, *n.* अम्लता, शुक्तता । A. (of the stomach) अम्लपित्तं.
Acidulate, *vt.* अम्लीकृ 8 U.
Acknowledge, *vt.* उररीकृ 8 U, स्वीकृ 8 U; ग्रह् 9 U; प्रतिपद्, 4 A.
Acknowledgment, *n* उररीकार, स्वीकार, प्रतिपत्ति *f.*; अभ्युपगमपत्रं; कृतज्ञता.
Acme, *n.* पराकाष्ठा, पराकोटि ; ऊर्ध्वसीमा.
Acne, *n.* यौवनकंटक, यौवनपिटका.
Acolyte, *n.* परिचारक.
Acoustic, *a.* श्रवणविषयक.
Acoustics, *n.* ध्वनिशास्त्रं, नादविद्या.
Acquaint, *vt.* ज्ञा *c*, बुध् *c*; परिचयं कृ 8 U.
Acquaintance, *n.* परिचय; विज्ञानं; परिचित.
Acquiesce, *vi.* उररीकृ 8 U; अनुज्ञा 9 U; तुष् 4 P; अभिमतं मन् 4 A.
Acquiescence, *n.* अनुमति *f*, उररीकार, संमति *f.*
Acquire, *vt.* अधिगम् 1 P, अर्ज् 1 P., आप् 5 P, उपार्ज् 1 P, प्रतिपद् 4 A, प्राप् 5 P, लभ् 1 A.

Acquirement, *n.* अधिगम, अर्जनं, प्रतिपत्ति *f.*, प्राप्ति *f.*, लाभ; (अमुक) वस्तुसिद्धि ।

Acquisition, *n.* प्राप्ति *f.*, लाभ; अर्जनं.

Acquit, *vt.* (अमुकं) निर्दोषं ज्ञा *c*; मुच् *c*; (अनुष्ठितं) कर्म निर्वह् *c*.

Acquittal, *n.* मुक्ति *f.*, शुद्धि *f.*; दोषमुक्तता.

Acquittance, *n.* ऋणमोचनं; निस्तार; अव्याहति *f*.

Acre, *n.* क्षेत्रफलमानविशेष। God's a., श्मशानं.

Acrid, *a.* उग्र, कटु, तिग्म, तीक्ष्ण.

Acrimonious, *a.* अरुंतुद, कटु, दंशिन्, निष्ठुर, परुष, प्रखर, रूक्ष.

Acrimony, *n.* कटुता, पारुष्यं.

Acrobat, *n.* पूरक; रज्जुनर्तक; व्यायामकारिन्.

Acropolis, *n.* दुर्गं; नगरोच्च *m.*

Across, *prep.* पारं। To come a., अधिगम् 1 P.

Acrostic, *n.* विवक्षिताक्षरबंध.

Act, *n.* कर्मन् *neu.*, कृति *f.*, क्रिया, व्यापार; वियमानता; अंक; विधि; सूत्रं.

Act, *vt.* आचर् 1 P, विधा 3 U, वृत् 1 A; अभिनी 1 P, नट् 10 U.। A. one's part, स्वकर्म संपद् *c*; भूमिकायां वृत् 1 A.

Acting, *n.* अंगविक्षेप, अभिनय, व्यंजक.

Action, *n.* क्रिया, चेष्टनं, प्रवर्तनं, प्रवृत्ति *f.*; संयोग; अभिनय; अभियोग, व्यवहार; युद्धं.

Actionable, *a*, अभियोज्य, व्यवहार्य.

Active, *a.* अनलस, कर्मोद्युक्त; सकर्मक; कर्तृवाच्य.

Activity, *n.* उत्साह; उद्योगिता कार्यशक्ति *f.*; प्रवृत्ति *f.*; द्रुतता.

Actor, *n.* अभ्रफुल्लक, कृशाश्विन्, जायाजीव, नट, नंड, नप्र, नर्तक, नृतु, भरत, रंगाजीव, रंगावतारक, शैलालिन्, शैलूष, सर्ववेशिन्; कर्तृ। A. in a female rôle, भ्रूकुंश, भ्रूकुंस.

Actress, *n.* नटी, नर्तकी, शैलूषिकी; कर्त्री.

Actual, *a.* यथार्थ, वास्तविक, विद्यमान, सिद्ध.

Actually, *adv.* प्रत्यक्षं, साक्षात्; वस्तुतः कर्मतः, (*all ind.*)

Actuate, *vt.* प्रवृत् *c*, प्रेर् 10 U.

Acumen, *n.* चतुरता, तीक्ष्णता, निपुणता, प्रज्ञा, मेधा.

Acute, *a.* तीक्ष्ण, प्रखर; लघु, सूक्ष्म.

Acuteness, *n.* तीक्ष्णता, शीघ्रग्राहित्वं; लघुत्वं, सूक्ष्मता.

Adage, *n.* वृद्धवचनं, आभाणक, न्याय.

Adamant, *n.* वज्र *mn.*, हीरक। *a.* दुर्भेय; अतिकठिन.

Adapt, *vt.* युज् 10 U, संधा 3 U।-ation, *n.* संयोजनं.

Adaptability, *n.* योग्यता, संयोजनीयता.

Add, *vt.* परिसंख्या 2 P, वृध् *c*, संकल् 10 U.
Addendum, *n.* परिशिष्टं.
Addicted, *a.* आसक्त; परायण.
Addiction, *n.* अनुरति *f.*, अनुराग, आसक्ति *f.*
Addition, *n.* परिसंख्या, पिंडकरणं, मिश्रणं, संकलनं, संयोजनं; आधिक्यं.
Additional, *a.* अतिरिक्त, अधिक.
Addle, *a.* पूत; नष्ट; मूढ; विक्लव.
Address *vt.* अभिधा 3 U, आलप् 1 P, संभाष् 1 A। *n.* आलाप, निवेदनं, संबोधनं; वक्तृता; नैपुण्यं; योजना; पत्रसंज्ञा.
Adduce, *vt.* अवतॄ *c*, उपन्यस् 4 P, उपानी 1 P, निर्दिश् 6 P.
Adducible, *a.* उपानेय.
Adept, *n.* निपुण, निष्णात; अभिज्ञ; पारदर्शिन्.
Adequate, *a.* पर्याप्त; क्षम; तावन्मात्र; समान.
Adequately, *adv.* निकामं, पर्याप्तं, यथेप्सितं (*all ind.*).
Adhere, *vi.* संलग् 1 P, सञ्ज् 1 P, अनुबंध् 9 P.
Adherence, *n.* अनुषंग, आसक्ति *f.*
Adherent, *a.* संलग्न, संसक्त। *n.* अनुगामिन्, आश्रित, सपक्ष.
Adhesive, *a.* संलग्नशील.
Adieu, स्वस्ति । Bid a. गमने संभाष् 1 A.
Adipose, *a.* पीन, पीवर, मांसल.
Adjacent, *a.* संनिकृष्ट, संसक्त; आसन्न.
Adjective, *n.* निघ्नं, विशेषणपदं.
Adjoin, *vt.* लग् 1 P, समीपे वृत् 1 A। -ing, *a.* पार्श्ववर्तिन्, संलग्न; अव्यवहित.
Adjourn, *vt.* विरम् *c*, व्याक्षिप् 6P.
Adjournment, *n.* (निरूपितकाल-पर्यंतं) विराम.
Adjudge, *vt.* निर्णी 1 P.
Adjudicate, *vt.* *see* Adjudge.
Adjudication, *n.* दापनं, विचारणं.
Adjunct, *n.* अनुबंध, अनुषंग; विशेषणं । *a.* अनुबद्ध, अनुबंधिन्, अनुयोगिन्, अनुषक्त, अनुषंगिन्, संयुक्त.
Adjunction, *n.* अन्वय, संयोग.
Adjuration, *n.* शपथ, प्रतिज्ञा.
Adjure, *vt.* सशपथं आज्ञा *c*; आग्रहातिशयेन प्रार्थ् 10 U.
Adjust, *vt.* समाधा 3 U; समीकृ 8 U। -ment, *n.* व्यवस्थापनं, संस्थापनं, समाधानं, समीकरणं.
Adjutant, *n* सहकारिन्, सहायक (सैनिककार्येषु नेतुः).
Adjuvant, *a.* सहकारिन्, सहायक (*also m.*).
Admeasure, *vt.* परिमा 2 P. 3, 4A.
Administer, *vt.* प्रशास् 2 P, शास् 2 P; दा 3 U; व्यवस्था *c.*
Administration, *n.* शासनं, शिष्टि *f.*; कार्यनिर्वाह, व्यवस्था.
Administrator, *n.* शासितृ *m.*; कार्यनिर्वाहक.
Admirable, *a.* प्रशंसनीय; विस्मयकारक.

Admiral, *n*. नौसेनापति *m*.
Admiration, *n*. प्रशंसा; विस्मय, सानंदाश्चर्य.
Admire, *vt*. प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U.
Admissible, *a*. उपादेय, प्रतिग्राह्य, स्वीकार्य.
Admission, *n*. उररीकार, प्रतिग्राह; मान्यता; प्रवेश; प्रतिपत्ति *f*.
Admit, *vt*. उररीकृ 8 U, स्वीकृ 8U; प्रविश् *c*.
Admittance, *n*. प्रवेशाधिकार.
Admittedly, *adv*. स्पष्टं *ind*.
Admix, *vt*. संकॄ 6 P, संमिश्र् 10 U.
Admixture, *n*. संकर, संमिश्रणं.
Admonish, *vt*. अनुयुज् 7 U; उपालभ् 1 A; निर्भर्त्स् 10 A.
Admonition, उद्बोध, उपदेश; उपालंभ.
Ado, *n*. दीर्घायास; कोलाहल.
Adolescence, *n*, कौमारं, पौगंडं, यौवनं.
Adolescent, *a*. युवन् (युनी *f*.).
Adopt, *vt*. परिग्रह् 9 P; पुत्रीकृ 8 U, अनुवृत् 1 A.
Adopted, *a*. दत्तक; गृहीत; कृतक.
Adoption, *n*. (दत्तक)ग्रहणं; परिग्रह; स्वीकार
Adorable, *a*. अर्चनीय, पूज्य, वंद्य.
Adoration, *n*. अर्चा, आराधना, उपासना, पूजा.
Adore, *vt*. अर्च् 1 P, उपास् 2 A, पूज् 10 U.
Adorer, *n*. आराधक, उपासक, पूजक.
Adorn, *vt* अलंकृ 8 U, परिष्कृ 8 U, प्रसाध् *c*, भूष् 10 U. मंड् 10 U.
Adornment, *n*. अलंक्रिया, परिष्क्रिया; अलंकार, आभरणं, परिष्कार, प्रसाधनं, भूषणं, मंडनं.
Adrift, *adv*. इतस्ततः प्लवमान; *a*. अनाथ.
Adroit, *a*. कुशल, चतुर, दक्ष, निपुण, पटु, पेशल। -ness, *n*. कौशलं, चातुर्यं, नैपुण्यं, पाटवं.
Adulation, *n*. अतिस्तुति *f*.; चाटूक्ति *f*.
Adult, *n*. प्रौढ, वयःस्थ.
Adulterate, *vt*. अपद्रव्येण संमिश्र 10 U.
Adulteration, *n*. अशुद्धीकरणं.
Adulterer, *n*. उपपति, जार, परतल्पग, पारदारिक, भुजंग, व्याभिचारिन्.
Adulteress, *n*. असती, इत्वरी, कुलटा, जारिणी, परगामिनी, पुंश्चली, बंधकी, व्यभिचारिणी, स्वैरिणी.
Adultery, *n*. जारकर्मन् *neu*., परगमनं, व्यभिचार.
Adumbration, *n*. प्रतिच्छाया; दिग्दर्शनं.
Advance, *vi*. अग्रे गम् 1 P; वृध् 1 A। *vt*. उपन्यस् 4 A; प्राक् दा 3 U.
Advancement, *n*. उत्कर्ष, प्रगति *f*.; पुरस्कार; संवर्धनं.

Advantage, *n.* लाभ, हितं: प्राधान्यं; अवसर। With a. सलाभं, सुविधं (*both ind.*)

Advantageous, *a.* उपकारिन्, फलिन्, लाभकर, हितप्रद। -ly, *adv.* सफलं, सलाभं (*both ind.*).

Advent, *n.* आगमनं; आरंभ.

Adventitious, *a.* असहज, आहार्य, औपाधिक.

Adventure, *n.* साहसं; दैवयोग.

Adventurous, *a.* साहसिक, निर्भय.

Adverb, *n* क्रियाविशेषणं.

Adversary, *n.* अमित्र, अराति, अरि, अहित, जिघांसु, द्विषत्, द्वेषण, प्रत्यनीक, रिपु, विपक्ष, वैरिन्, शत्रु, सपत्न.

Adverse, *a.* प्रतिकूल, प्रतीप; विपरीत; विषम.

Adversity, *n.* आपद् *f.*, विपत्काल, विपद् *f.*, वैकल्यं.

Advert, *vi.* अनुलक्ष् 10 U, अवेक्ष् 1 A, उद्दिश्य वच् 2 P.

Advertence, *n.* अनुसंधानं, अवधानं; मनोयोग; अवेक्षा.

Advertise, *vt.* उद्घुष् 10 U., निविद् *c*, विज्ञा *c*.

Advertisement, *n.* प्रसिद्धीकरणं; निवेदनं, विज्ञापना; संवादपत्रं.

Advice, *n.* उपदेश, मंत्र.

Advisable, *a.* उपदेष्टव्य; उचित, युक्त, योग्य.

Advise, *vt.* उपदिश् 6 P; अनुशास् 2 P। -edly, *adv.* बुद्धिपूर्वकं, सावधानं (*both ind.*)

Adviser, *n.* उपदेष्टृ, *m.* मंत्रिन् *m.* सचिव.

Advocacy, *n.* पुरस्कार; पक्षधारणं.

Advocate, *vt.* पक्षं समर्थ् 10 U, परार्थे वद् 1 P। *n.* पक्षसमर्थक; पुरस्कर्तृ; उत्तरवादिन्; प्रतिनिधि.

Adytum, *n.* गर्भागारं.

Adze, *n.* टंक *mn.*

Aegis, *n.* रक्षणं, त्राणं; फलकं; छत्रं.

Aeon, *n.* युग *mn.*

Aerate, *vt.* वायुना संमिश्र् 10 U.

Aerial, *a.* वायव; वायुरूप; अंतरिक्षवासिन्, नभोगत; अप्रकृत; उच्च; भावित.

Aeriform, *a.* वायुरूप.

Aerolite, *n.* खोपल.

Aerometer, *n.* वायुघनत्वमापकयंत्रं.

Aerometry, *n.* वायुमापनविद्या.

Aeronaut, *n.* वैमानिक; व्योमचर। -ics, *n.* खसंचारविद्या.

Aeroplane, *n.* विमान *mn.*

Aesthetics, *n.* सौंदर्यमीमांसा, सौंदर्यविज्ञानशास्त्रं; रसज्ञानं.

Afar, *adv.* दूरं, दूरात् (*both ind.*).

Affable, *a.* दक्षिण, प्रियवादिन्, सुशील.

Affability, *n.* सौजन्यं, मधुरालापता.

Affair, *n.* कार्यं; व्यवहार; विषय.

Affect, *vt.* द्रु *c*; अभिभू 1 P; आकुलीकृ 8 U; बाध् 1 A; आचर् 1 P.

Affectation, *n.* कुक्कुटि-टी *f.*, दंभ, मिथ्याचर्या, हाव.

Affected, *a.* कृत्रिम; विकृत: क्लिष्ट.
Affecting, *a.* करुण, भेदक, मर्मस्पृश्.
Affection, *n.* अनुरति *f*, अनुराग, प्रेमन् *mn*, ममता, वात्सल्यं, सौहार्द, सौहृदं, स्नेह.
Affectionate, *a.* अनुरागिन्, प्रेमिन्, वत्सल, स्निग्ध.
Affiance, *n.* विश्रंभ, विश्वास; वाग्दानं, वाङ्निश्चय । -ed, *a.*, वाग्दत्त.
Affidavit, *n.* प्रतिज्ञालेख, शपथपत्रं.
Affiliate, *vt.* परिग्रह् 9 P, संयुज् *c.*
Affiliation, *n.* अंगीकार, परिग्रह, सख्यसंबंध.
Affinity, *n.* संबंध; संपर्क; साम्यं.
Affirm, *vt.* प्रतिज्ञा 9 A; दृढीकृ 8 U, प्रमाणीकृ 8 U.
Affirmative, *a.* अस्त्यर्थक, भावबोधक; निश्चायक; स्वीकारसूचक.
Affix, *vt.* अनुबंध् 9 P, संयुज् 7 U; स्था *c* । *n.* अनुबंध, आगम, प्रत्यय.
Afflatus, *n.* स्फूर्ति *f.*
Afflict, *vt.* क्लिश् 9 P, पीड् 10 U, संतप्, *c* । -ed, *a.* आर्त, दुःखग्रस्त, पीडित.
Affliction, *n.* आर्ति *f.* कृच्छ्रं, क्लेश, दुःखं, पीडा, संताप.
Affluence, *n.* वैपुल्यं, श्री *f.*, समृद्धि *f.*
Affluent, *a.* धनाढ्य, श्रीमत्, समृद्ध । *n.* उपनदी.
Afflux, *n.* स्राव; जनसमुदाय, समूह.
Afford, *vt.* दा 3 U; शक् 5 P.
Afforest, *vt.* अरण्यसात् कृ 8 U.
Affranchise, *vt.* मुच् 6 U.
Affray, *n.* कलह, डिंब, तुमुल, द्वंद्वं.
Affright, *vt* भी *c*, संत्रस् *c.*
Affront, *n.* अधिक्षेप, अवज्ञा, अवहेलना.
Afloat, *adv* प्रसृत, प्लवमान.
Afoot, *adv.* पद्भ्यां ; *a.* प्रचलित.
Afore, *adv.* अग्रे, पूर्वं.
Aforesaid, *a.* पूर्वोक्त.
A fortiori, *adv.* सुतराम्.
Afraid, *a.* दरित, भयार्त, भीत, शंकित.
Afresh, *adv.* पुनरपि *ind.*
After, *prep.* पश्चात्; अनंतरं; उत्तरत्र, ऊर्ध्वं (*all ind.*) । A. all, अंते.
After-birth, *n.* गर्भवेष्टनं.
After-clap, *n.* अकांडपात.
After-crop, *n.* उत्तरसस्यं.
After-glow, *n.* अन्वस्तप्रकाश.
Afternoon, अपराह्ण, विकाल.
After-part, *n.* उत्तरांश.
After-thought, *n.* अनुचिंता
Afterwards, *adv.* अनंतरं, पश्चात् (*both ind.*).
Again, *adv.* अपरं च, पुनः, पुनश्च, प्रत्युत, भूयः (*all ind.*).
Against, *prep.* प्रति; अभि; अभिमुखं; प्रातिकूलं.
Agamic, *a.* मैथुनहीन.
Agape, *a.* जृंभमाण । *n.* प्रीतिमेला.
Age *n.* आयुस् *neu.*, वयस् *neu.*, वयःक्रम ; वार्धक्यं; युग *mn.*

कालगति *f.*: अवस्था, दशा। Come of a., प्राप्तवयस्क, प्रौढ। Of a. (अमुक) वर्षात्मक-वर्षीय। A. of majority, यौवनदशा। Golden a., सत्ययुगं। Iron a, कलियुगं।

Aged, *a.* जरत्, जीर्ण, वयस्क, वृद्ध, स्थविर.

Agency, *n.* कर्तृत्वं, कारणत्वं, नियोज्यत्वं.

Agenda, *n.* कार्यक्रम.

Agent, *n.* कर्तृ; कारक *mn.*; कारणं; प्रतिनिधि *m.*; शक्ति *f.*

Agglomerate, *vt.* संचि 5 U; राशीकृ 8 U। *vi.* एकीभू 1 P.

Agglomeration, *n.* पिंड, पुंज, राशि, संचय.

Agglutinate, *vt.* संयुज् 10 U, संश्लिष् *c.*

Agglutination, *n.* संयोग, संश्लेषणं.

Aggrandize, *vt.* आप्यै *c*; बहुलीकृ 8 U।–ment, *n.* वर्धनं; अभ्युदय, समुन्नति *f.*; आटोप.

Aggravate, *vt.* उद्दीप् *c*, प्रकुप् *c*, संक्षुभ् *c*, वृध् *c.*

Aggregate, *vt.* संचि 5 U; राशीकृ 8 U। *vi.* एकीभू 1 P। *n.* समष्टि *f.*; राशि *m.*

Aggression, *n.* अतिक्रम; अत्याचार.

Aggresive, *a.* अग्रधर्षक; धृष्ट; प्रथमापकारिन्.

Aggressor, *n.* आक्रामक, धर्षक.

Aggrieved, *a.* दुःखित.

Aghast, *a.* भयाभिभूत, विस्मयापन्न,ससाध्वस.

Agile, *a.* आशु, क्षिप्र, चपल, द्रुत, शीघ्र.

Agility, *n.* चापल्यं, द्रुतता.

Agiotage, *n.* नाणकविनिमय.

Agitate, *vt.* क्षुभ् *c*; चल् *c*; धू 5-9 U; विलुड् *c.*

Agitation, *n.* संक्षोभ; उद्वेग; उपप्लव; आंदोलनं.

Agitator, *n.* उद्वेजक, क्षोभक.

Agnate, *a.* गोत्रज, सगोत्र; पित्र्यसंबंधिन्.

Agnomen, *n.* उपनामन्, *neu.*

Agnostic, *n.* अज्ञेयवादिन्।–ism, *n.* अज्ञेयवाद.

Ago, *adv.* पूर्वं, प्राक् (*both ind.*).

Agog, *adv.* सोत्साहं; सोत्कंठं (*both ind.*).

Agonize, *vi.* व्यथ् 1 A; संतप् *Pass.*

Agony, *n.* अतिव्यथा, यातना, वेदना, संताप.

Agora, *n.* चतुरस्र (यवननगरे).

Agrarian, *a.* जानपदीय, क्षेत्रविषयक.

Agree, *vi.* एकचित्त-भू 1 P; अभिमतं मन् 4 A; अनुज्ञा 9 U, उररीकृ 8 U, संमन् 4 A, स्वीकृ 8 U; हिताय भू 1 P.

Agreeable. *a.* अभिमत, प्रिय, मनोज्ञ, रुचिर; तुल्य, सदृश; अनुरूप।–To be a., (अमुकाय) रुच् 1 A.

Agreeableness, *n.* रुचिरत्वं, सौरस्यं, अनुरूपता.
Agreeably, *adv.* यथासुखं *ind.*
Agreement, *n.* संमति *f.*; संवाद; अन्वय; समय; तुल्यत्वं, सादृश्यं.
Agrestic, *a.* ग्रामीण, ग्राम्य.
Agricultural, *a.* कृषिविषयक.
Agriculture, *n.* कृषि *f.*, कृषिकर्मन् *neu.*, हलभृति *f.*
Agriculturist, *n.* कर्षक, कृषीवल, क्षेत्रजीविन्, क्षेत्रिन्, हलभृत्.
Aground, *adv.* उत्तीरं *ind.*
Ague, कंपज्वर, शीतज्वर.
Ah, *int.* अहह, आः, हंत (*all ind.*).
Ahead, *adv.* अग्रे, पुरतः (*both ind.*).
Aid, *vt.* उपकृ 8 U, साहाय्यं कृ 8 U, । *n.* साहाय्यं; उपकार.
Aide-de-camp, *n.* परिधिस्थ.
Ail, *vt.* पीड् 10 U, व्यथ् 1 A; दु 5 P. । *vi.* त्रस् *Pass.*, पीड् *Pass.* । -ing, *a.* पीडित, रोगिन्.
Ailment, *n.* आतंक, पीडा, रोग.
Aim, *vt.* अभिसंधा 3 U, उद्दिश् 6 P, लक्षीकृ 8 U; आकांक्ष् 1 P.
Aim, *n.* अभिसंधानं, आसिकं, लक्षं, लक्ष्यं, वेध्यं, शरव्यं, संधानं; आशय, वांछा.
Air, *n.* वायु; आकाश; ताल; गीति *f*; रूपं; आटोप, आडंबर। *vt.* वातेन धाव् 1 U; प्रकटयति *Den.*, प्रकाश् *c.* Build castles in the a. गगनकुसुमानि चि 5 U. To give oneself airs, अहंमतिं प्रदर्श् *c*। Take the a., वातमासेव् 1 A.
Air-bath, *n.* वायुस्नानं.
Air-bladder, *n.* वायुकोश.
Air-hole, *n.* गवाक्ष, वातायनं.
Air-pump, *n.* वायुनिष्कासनयंत्रं.
Air-ship, *n.* विमान *mn.*
Airy, *a.* वायवीय; सुवात; उच्च; असार; लीलावत्.
Ajar, *a.* अर्धविवृत.
Akin, *a.* सगोत्र, सजातीय.
Alack, *int.* अहह, कष्टं, हंत (*all ind.*).
Alacrity, *n.* उत्साह, क्षिप्रता, त्वरा, लाघवं.
Alarm, *vt.* भी *c*; त्रस् *c* । *n.* त्रास, दर, भयं, भीति *f.*, साध्वसं; सान्नहनिकं; भयध्वनि । *-ing. a.* भयप्रद, भयावह.
Alarm-bell, *n.* प्रबोधनघंटा.
Alarmist, *n.* भीताचारिन्.
Alas, *int.* अहह, आः, कष्टं, हंत (*all ind.*).
Albeit, *adv.* यद्यपि.
Album, *n.* संग्रहपुस्तकं.
Albumen, *n.* श्वेतकल्क; बीजजीवनं.
Alburnum, *n.* मध्यत्वच्(वृक्षस्य) *f.*
Alchemist, *n.* रसज्ञ, रससिद्ध.
Alchemy, *n.* रसविद्या, रसशास्त्रं, रससिद्धि *f.*, रसायनं
Alcohol, *n.* मद्यसार.
Alcove, *n.* कुंज *mn.*

Alderman, *n.* पुराध्यक्ष, गुरुजन.
Ale, *n.* यवसुरा.
Ale-house, *n.* मदस्थानं, शुंडा, शुंडापानं। A.–keeper, *n.* शौंडिक.
Alembic, *n.* सारयंत्रं.
Alert, *a.* अतंद्र, जागरूक, सावधान; क्षिप्र, दक्ष.
Alertness, *n.* अवधानं, क्षिप्रता, जागरूकता; कार्यदक्षता.
Algebra, *n.* बीजगणितं.
Alias *adv.* अन्यथा *ind.* । *n.* नामांतरं.
Alien, *a.* परकीय; विदेशीय; विपरीत.
Alienable, *a.* विभेय.
Alienate, *vt.* विच्छिद् 7 P, विभिद् 7 P.
Alienation, *n.* विघटनं; वितोष; सत्तानिवृत्ति *f.*; चित्तभ्रंश.
Alight, *vi.* अवतॄ 1 P, उपविश् 6P.
Alike, *a.* तुल्य, सम, समान, सदृक्ष, सदृश, संनिभ, सवर्ण, सविध.
Aliment, *n.* अन्नं, आहार, भक्ष्यं, भोजनं; आधार.
Alimentary, *a.* पोषक; अन्नवाहक। A. canal, *n.* महास्रोतस् *neu.*
Alimony, *n.* त्यक्तदारोपजीवनं (धनं).
Aliquot, *a.* निःशेषभाजक.
Alive, *a.* जीवत्, सजीव; सावधान; सोत्साह.
Alkali, *n.* क्षार, सर्जिका.
All, *a.* अखिल, कृत्स्न, निखिल, निःशेष, विश्व, सकल, समग्र, समस्त, सर्व। In a., साकल्येन। Not at a. न कथंचन। At a. times सर्वदा। A. of a sudden अकस्मात्, अकांडे । A. the same तथापि.
Allay, *vt.* उपशम् *c*, सांत्व् 10 U.। –ment, *n.* प्रशमनं, सांत्वनं.
Allege, *vt.* प्रतिपद् *c*; प्रवच् 2 P.
Allegation, *n.* प्रतिज्ञा; अभियोग; व्यपदेश.
Allegiance, *n.* निष्ठा; भक्ति *f.*
Allegorical, *a.* रूपकात्मक, लाक्षणिक। –ly, *adv.* दृष्टांततः.
Allegory, *n.* दृष्टांत, रूपकं.
Alleviate, *vt.* लघयति *Den.*, शम् *c*, सांत्व् *c*.
Alleviation, *n.* प्रशमनं, सांत्वनं; तन्वीकरणं.
Alley, *n.* क्षुद्रपथ; उद्यानपथ.
Alliance, *n.* ऐक्यं, संधि, संयोग; संबंध। Defensive and offensive a., परस्परोपकार। Double a., द्विकूटं। Triple a. त्रिकूटं.
Allied, *a.* संबद्ध.
Alligation, *n.* संयोजनं; विमिश्रप्रक्रिया.
Alligator, *n.* कुंभिन्, कुंभीर, गोमुख, ग्राह, तालुजिह्व, नक्र, मकर, महामुख, शंखमुख.
Alliteration, *n.* अनुप्रास.
Allocate, *vt.* स्था *c*.
Allopathy, *n.* विषमचिकित्सा; असाम्योपचार.
Allot, *vt.* विभज् 1 U; व्यंस् 10 U; क्लृप् *c*; विन्यस् 4 P; प्रदा 3 P.

Allotment, *n.* अंश, विभाग; विभजनं; भोक्तृत्वं, भोग.

Allow, *vt.* अनुज्ञा 9 U, अनुमन् 4 A, उररीकृ 8 U; क्षम् 1 A, सह् 1 P; ग्रह् 9 P; अनुदा 3 P.

Allowable, *a.* अनुज्ञेय; ग्राह्य, स्वीकरणीय; क्षम्य; दातव्य; धर्म्य.

Allowance, *n.* अनुज्ञा, अनुमति *f.*; वृत्ति *f.*, वेतनं.

Alloy, *n.* कुप्यं; अपद्रव्यं; दोष; न्यूनता.

Allude, *vi.* लक्षीकृ 8 U, समुद्दिश् 6 P, सूच् 10 U, स्मृ *c.*

Allure, *vt.* आकृष् 1 P, वि-प्र-लुभ् *c.*

Allurement, *n.* विमोहनं; प्रलोभनं, आमिषं, मोहनं; वंचनं.

Allusion, *n.* इंगितं; उद्देश; संकेत.

Alluvial, *a.* पुलिनमय.

Alluvium, *n.* पुलिनं; नदीमृत्तिका.

Ally, *n.* मित्रं, पक्ष्य, सहाय । *vt.* संधा 3 U, संयुज् 10 U, संश्लिष् *c.*

Almanac, *n.* पंचांगं, पंजिका.

Almighty, *a.* सर्वशक्तिमत् । *n.* परमेश्वर.

Almost, *adv.* प्रायः, प्रायशः, भूयिष्ठं (*all ind.*).

Alms, *n.* दानं, भिक्षा, भैक्ष्यं.

Aloft, *adv.* उच्चं, उपरि, ऊर्ध्वं (*all ind.*)

Alone, *a.* एकल, एकाकिन्, एकांत; अद्वितीय; केवल.

Along, *adv.* अनु (*with acc.*) । A. with, सह, साकं (*with instr.*) (*all ind.*).

Aloof, *adv.* अंतरे, दूरे, पृथक् (*all ind.*).

Alopecia, *n.* खालत्यं.

Aloud, *adv.* उच्चैः, तारस्वरेण, प्रकाशं (*all ind.*).

Alphabet, *n.* वर्णमाला । -ical, *a.* वर्णक्रमानुसारिन्.

Already, *adv.* प्रागेव *ind.*

Also, *adv.*, *conj.* च; अपरं च; अपि च; तद्वत्.

Altar, *n.* वेदि-दी *f.*

Alter, *vt.* अन्यथाकृ 8 U, विकृ 8 U; परिवृत् *c* । -ative, *a.* परिवर्तक.

Alteration, *n.* विकृति *f.*; विपर्यास; परिवर्तनं; भेद.

Altercate, *vi.* विवद् 1 A, व्यवक्रुश् 1 P.

Altercation, *n.* वादानुवाद, विवाद, वाग्युद्धं; विप्रलाप.

Alternate, *vi.* अन्योन्यमनुवृत् 1 A. । *a.* अन्योन्यानुवर्तिन् । -ly, पर्यायेण, पृष्ठानुपृष्ठं.

Alternation, *n.* परस्परानुगमनं; परिवर्तनं.

Alternative, *n.* विकल्प; पक्ष.

Although, *adv.* यद्यपि *ind.*

Altitude, *n.* उच्चत्वं, उच्छ्रिति *f.*, उत्तुंगता; उन्नतांश.

Altogether, *adv.* नितरां; सर्वथा; साकल्येन, एकीकृत्य.

Altruism, *n* परहितनिष्ठा.

Alum, *n.* तुवरी, फाटकी, स्फटिकी.

Alumnus, *n.* अंतेवासिन्, छात्र, शिष्य.
Always, *adv.* अनिशं, नित्यं, निरंतरं, सततं, सदा, संततं, सर्वदा (*all ind*).
Amain, *adv.* अतिरभसेन, अतिवेगेन, प्रसभं.
Amalgam, *n.* मिश्रधातु *m.*
Amalgamate, *vt.* संमिश्र् 10 U.,
Amalgamation, *n.* मिश्रणं; योग.
Amanuensis, *n.* लेखक; लिपिकार.
Amass, *vt.* राशीकृ 8 U, संचि 5 U.
Amassment, *n.* पुंज, संचय, समुच्चय.
Amateur, *n.* कलाप्रिय.
Amative, *a.* रतिशील.
Amatory, *a.* मान्मथ.
Amaze, *vt.* विस्मि *c*; आकुलीकृ 8 U.
Amazement, *n.* आश्चर्य, विस्मय; हतबुद्धित्वं; व्याकुलता.
Amazing, *a.* अद्भुत; विस्मयकारक.
Amazon, *n.* योध्द्री; पोटा.
Ambages, *n.* वक्रोक्ति *f.*
Ambassador, *n.* राजदूत; प्रतिनिधि.
Amber, *n.* तृणमणि ; अंबरं.
Ambidexter, *a.* सव्यसाचिन् ; उभयसाचिन्.
Ambient, *a.* व्यापक; विश्वतोव्यापक.
Ambiguity, *n.* द्व्यर्थता; अस्पष्टार्थ; संदिग्धता; वक्रोक्ति *f.*
Ambiguous, *a.* अस्पष्ट; संदिग्ध; वक्र.
Ambit, *n.* मर्यादा; परिधि *m.*
Ambition, *n.* महत्त्वाकांक्षा; महापदलालसा; यशस्तृष्णा.
Ambitious, *a.* महत्त्वाकांक्षिन्, यशस्काम; ऊर्ध्वदृष्टि.
Amble, *vi* सुखं चर् 1 P.
Ambrosia, *n.* सुरभक्ष्यं; अमृतं, पीयूषं, सुधा.
Ambrosial, *a.* अमृततुल्य; अमृतमय.
Ambulance, *n.* चलद्रुग्णागारं.
Ambulate, *vi.* विचर् , 1 P, परिक्रम् 4 P.
Ambuscade, *n.* प्रच्छन्नधर्षिगण.
Ambush, *n.* धर्षकगोपनं, (पराक्रमणार्थं) निभृतस्थानं.
Ameliorate, *vt.* साधीयसं कृ 8 U; वृध् *c*; समुन्नतिं नी 1 P.
Amen, *adv.* एवमस्तु; भवतु.
Amenable, *a.* वश्य, विनेय; प्रवण.
Amend, *vt.* संशुध् 4 P; समाधा *Pass.*
Amendment, *n.* विशुद्धि *f.*, संशोधनं.
Amends, *n. pl.* क्षतिपूरणं, निस्तार.
Amenity, *n.* रंजकत्वं, रम्यता। *pl.* चारुवृत्ति *f.*; मनोहारिणो गुणाः *pl.*
Amerce, *vt.* दंड् 10 U। –ment, *n.* धनदंड.
Amiable, *a.* स्नेहार्ह; सुमत; सुप्रिय.
Amiableness, *n.* सौजन्यं; मनोहरत्वं.

Amicable, *a.* मैत्र, स्नेहशील.
Amicably, *adv.* मित्रवत्; प्रीतिपूर्वकं *ind.*
Amid,–st, *prep.* अंतरे; मध्ये.
Amiss, *a.* अनुचित; न्यून; दोषिन्। *adv.* अपलक्ष्यं *ind.*। Take a. अन्यथा ग्रह् 9 P.
Amity, *n.* ऐक्यं, मैत्री, मैत्र्यं, सख्यं, साप्तपदीनं, सौहार्दं, सौहृदं, स्नेह.
Ammunition, *n.* युद्धोपकरणं युद्धसज्जा, युद्धसामग्री.
Amnesty, *n.* दोषक्षमा, दोषविमोचनं.
Among, *prep.* मध्ये; अभ्यंतरे.
Amorous, *a.* कामुक, रसिक, लोलुप, विलासिन्.
Amorphism, *n.* अनाकारता, आनियताकारता.
Amount, *vi.* संख्या *pass.*। *n.* परिमाणं, संख्या.
Amphibious, *a.* उभचर; जलभूचर.
Amphibology, *n.* द्व्यर्थवाक्यं.
Amphitheatre, *n* रंगभूमि *f.*, रंगांगणं.
Amphora, *n.* द्विकर्णघट.
Ample, *a.* विपुल; प्रचुर, बहुल; प्रशस्त; यथेष्ट.
Amplification, *n.* विस्तार; वर्धनं.
Amplitude, *n.* प्राचुर्यं, बाहुल्यं, वैपुल्यं.
Amputate, *vt*, छिद् 7 P, निकृत् 6 P, लू 9 U.
Amuck, *adv.* उन्मत्तवत् *ind.*
Amulet, *n.* कवच, यंत्रं, क्षार.
Amuse, *vt.* नंद् *c*, रंज् *c*, विनुद् *c*.
Amusement, *n.* रंजनं, विनोद, विलास; क्रीडा; कौतुकं.
Anabasis, *n.* आक्रम.
Anachronism, *n.* कालविसंवाद; कालव्यतिक्रम.
Anæmia, *n.* रुधिरन्यूनता; रुधिरक्षय.
Anagram, *n.* नामाक्षरविपर्याससिद्धनामन् *neu.*; वर्णविपर्यय.
Analects, *n. pl.* सुभाषितानि *pl.*
Analogical, analogous, *a.* सदृश; तुल्यरूप; आनुषंगिक.
Analogy, *n.* सादृश्यं, उपामिति *f.*
Analyse, *vt.* पृथक्कृ, 8 U; व्यवच्छिद् 3 P; व्याकृ 8 U.
Analysis, *n.* पृथक्करणं, व्यवच्छेद, व्याकृति *f.*
Analytical, *a.* तात्त्विक; आतत्त्वगत.
Analyst, Analyser, *n.* विश्लेषक.
Anarchy, *n.* अनीश्वरता, अराजकता, राजविप्लव.
Anathema, *n.* अभिशाप, अवक्रोश; बहिष्क्रिया.
Anatomy, *n.* शरीरव्यवच्छेदविद्या; शारीरस्थानं; विशसनं.
Ancestor, *n.* पितृ, पूर्व, पूर्वज (*all usually pl.*), वंशकर, वंश्य.
Ancestral, *a.* पितृक, पित्र्य, पैतृक; पितृयात.
Ancestry, *n.* कुलपरंपरा, वंश, संतान *mn.*
Anchor, n. कूपक, लांगलं। *vt.* (नावं) स्थिरीकृ 8 U.

Anchorage, *n.* नौकाबंधनस्थान; नौकाबंधनशुल्कं.

Anchorite, *n.* यति, वनवासिन्, संन्यासिन्.

Ancient, *a.* चिरंतन, पुराण, पुरातन, पूर्व, प्रत्न, प्राक्तन, प्राचीन.

Ancillary, *a.* सहायक; उपकारक.

And, *conj.* च; अपरं च, अपि च। **A.** then, अथ, ततः। A. yet, तथापि.

Androgyne, *n.* स्त्रीलक्षण (नरः); उभयलिंगिन्.

Androphagus, *a.* नरभक्षक; मनुजादन.

Anecdote, *n.* उपकथा, उपाख्यानं.

Anent, *prep.* अधिकृत्य, उद्दिश्य.

Aneurism, *n.* धमनीशोथ.

Anew, *adv.* पुनः, अभिनवं (*both ind.*)

Angel, *n.* देवदूत; प्रेष्य। *-ic, a.* दिव्य, स्वर्गीय.

Anger, *n.* अमर्ष, कोप, क्रुध् *f.*, क्रोध, मन्यु, रोष। *vt.* क्रुध् *c*, प्रकुप् *c*.

Angle, *n.* कोण; अस्त्र। Acute a. लघुकोण। Oblique a. विषमकोण। Obtuse a. विशालकोण। Right a. समकोण। Visual a. दृष्टिकोण.

Angle, *vi.* (मत्स्यं) बडिशयति *Den.*, ग्रह् 9 P.

Angler, *n.* मत्स्यवेधक.

Angrily, *adv.* सकोपं, सक्रोधं.

Angry, *a.* कुपित, क्रुद्ध, रुष्ट.

Anguish, *n.* आधि, परिताप, परिवेदना, मनस्ताप, यातना, संताप.

Angular, *a.* कोणवत्; अस्रवत्.

Anhelation, *n.* उच्छ्वसनं.

Animadvert, *vi.* उपालभ् 1 A; परीक्ष् 1 A.

Animadversion, *n.* उपालंभ, दोषारोपणं, निंदा; गर्हणं, घृणा; परीक्षणं; छिद्रप्रकटनं.।

Animal, *n.* जंतु, जन्यु, जीव, प्राणिन्, भूतं; कप, चरि, पशु, मलुक, मोक। A. food मांसाहार। A. function प्राणिक्रिया। A. kingdom प्राणिकोटि। A. passions षड्रिपवः *pl.* A. magnetism प्राणाकर्षणं। A. pleasures विषयाः.

Animalcule, *n.* क्षुद्रजंतु.

Animate, *vt.* चेतनीकृ 8U, जीव् *c*; उत्तिज् *c*। *a* चेतन; प्रफुल्ल, उल्लसित.

Animation, *n.* चैतन्यं; उत्तेजनं आश्वासनं; उल्लास.

Animosity, *n.* द्वेष, विद्वेष, वैरं.

Animus, *n.* विरोधवृत्ति, वैरभाव.

Anise, *n.* मिशि (षि-सि) *f.*

Ankle, *n.* खुडक, गुल्फ, घुटिकै, घुटी, घुंट.

Anklet, *n.* तुलाकोटि, *f.*, नूपुर *mn.*, मंजीर *mn.*, शिंजिनी.

Annalist, *n.* इतिहासलेखक, ऐतिहासिक, चरित्रलेखक.

Annals. *n. pl.* पुरावृत्तं; वार्षिकवृत्तांत.
Anneal, *vt.* कठिणीकृ 8 U. (तपनशमनक्रियया).
Annex, *vt.* अनुबंध् 9P, संयुज् *c.*
Annihilate, *vt.* उच्छिद् *c*, विनश् *c*, विलुप् *c*.
Annihilation, *n.* उच्छेद, विनाश; प्रलय.
Anniversary, *n.* सांवत्सरी; सांवत्सरिकोत्सव । *a.* सांवत्सरिक; प्रतिवार्षिक.
Anno Domini (A. D.), *phr.* ख्रिस्तीये शके; वार्धक्यं.
Annotate, *vt.* व्याख्या 2 P; भाष्यं लिख् 6 P.
Annotation, *n.* टिप्पणी, टीका; भाष्यं, व्याख्यानं.
Announce, *vt.* आख्या 2P, निविद् *c*, विज्ञा *c*.
Announcement, *n.* ख्यापनं, विघोषणं, विज्ञापनं.
Annoy, *vt.* तप् *c*, क्लिश् 9 P, पीड् 10 U, बाध् 1 A.
Annoyance, *n.* उपद्रव, क्लेश, पीडा, बाधा.
Annual, *a.* आब्दिक, वार्षिक, सांवत्सरिक । -ly, *adv.* प्रतिवर्षं *ind.*
Annuity, *n.* वार्षिकी वृत्ति *f.*, वार्षिकं वेतनं.
Annul, *vt.* विलुप् *c*; निरर्थीकृ 8 U । -ment, *n.* लोप; नाश.
Annular, *a.* मंडलाकार, वलयाकृति;
Annunciation, *n.* विज्ञापनं. आगमनज्ञापनं; वार्तानयनं.
Anodyne, *a.* शूलहर । *n.* आर्तिघ्नं.
Anoint, *vi.* अंज् 7 P, म्रक्ष् 1 P, लिप् 6 U; अभिषिच् 6 P । -ing, *n.* अभ्यंजनं, विलेप; अभिषेक.
Anomalous, *a.* अविधि, विधिविरुद्ध.
Anomaly, *n.* अनियम, अविधि, विधिविरोध.
Anon, *adv.* झटिति, शीघ्रं, सपदि. (*all ind.*) Ever and a., मुहुर्मुहुः ।
Anonymous, *a.* अनामक, नामहीन.
Anosmia, *n.* घ्राणाभाव.
Another, *a, pron.* अन्य, अपर, इतर । One after a., अनुपूर्वशः *ind.* । One a., परस्परं *ind.*
Anserine, *a.* हंसीय.
Answer, *n.* उत्तरं, प्रतिवचनं, प्रतिवाक्यं, प्रत्युत्तरं; समाधानं (पूर्वपक्षस्य) । -*vi.* प्रतिभाष् 1 A, प्रतिवच् 2 P, व्याहृ 1 P; समाधा 3 U । A. one's purpose, प्रयोजनानुरूपं भू 1 P.
Answerable, *a.* प्रतिवाच्य ; अभियोक्तव्य ; अनुरूप, योग्य.
Ant, *n.* पिपीलिका, लूतात, वम्र, वम्री । Big black a., उलंकल । Small black a., मर्कोटपिपीलिका Big tawny a., ब्राह्मणी । Brown a. गृहेडिका । White a. उपदीका, उपदेहिका । -hill, *n.* कूलक, खोलक, वल्मीक *mn.*, वामलूर, स्यमीक.

Antagonist, *n.* विपक्ष, विरोधिन्, शत्रु; अभियोक्तृ.

Antagonism, *n.* विरोध, वैरं.

Antarctic, *a.* दक्षिणकेंद्रीय । *n.* कुमेरु.

Antecedent, *a.* पूर्वगामिन् ; अग्रभूत । *n.* पूर्वचरितं ; पूर्वगामी शब्दः—शब्दसमूह.

Antediluvian, *a.* प्रागाप्लाविक ; अतिपुराण.

Antelope, *n.* (General) प्लाविन्, मरुक, मृग, लिशु, वनन । *Many of the following words are also used for 'antelope' in general:*—(Black-spotted)–एण, कृष्णसार, निरंजन, यज्ञांग । (Red) तृणसंवर, रोहित हरिण *m.*। (Red, with a pale streak on the back) राजीव । (Red, with a white breast) चीनक । (Red, small) शंबर । (Red, spotted) पृषत । (Black-spotted, big) रुरु । (Red, big) कुरंग । (Mouse-deer) कदली.

Antemeridian, *a.* पौर्वाह्णिक, प्रातःकालीन.

Antenatal, *a.* जन्मपूर्वक.

Antenna, *n.* स्पर्शक (कीटकादीनां).

Anterior, *a.* अग्रग, अग्रवर्तिन्, पूर्व; प्राक्तन.

Anthem, *n.* स्तोत्रं ; ईश्वरस्तुति *f.*

Anther, *n.* केसराग्रं, परागकोश.

Anthology, *n.* (काव्यादेः) संग्रह ; पुष्पसंचय.

Anthropoid, *a.* नराकृति; मानवसम.

Anthropology, *n.* मानवशास्त्रं.

Anthropomorphism, *n.* मनुष्यत्वारोप.

Anthropomorphous, *a.* मनुष्यरूप.

Antic, *n.* *usually pl.* हास्यलीला; मुग्धचेष्टा.

Anticipate, *vt.* प्रागेव *or* पूर्वमेव ग्रह् 9 P–ज्ञा 9 U–निरूप् 10 U–अनुभू 1 P.

Anticipation, *n.* प्राग्भाविज्ञानं–दृष्टि *f.*–भोग, प्रवेक्षणं.

Antidote, *n.* विषघ्नं (औषधं).

Antimony, *n.* कपोतांजनं, यामुनं, सौवीरं, स्रोतोंजनं.

Antinomy, *n.* विधिविरोध.

Antipathy, *n.* (स्वाभाविको) विरोध, (स्वा.) वैरं; द्वंद्वभाव, विद्वेष.

Antiphlogistic, *a. n.* पाकहर.

Antiphrasis, *n* विपरीतलक्षणा.

Antipodes, *n. pl.* प्रतितलाः *pl.*

Antipyretic, *a. n.* ज्वरनाशक.

Antiquarian, Antiquary, *n.* पुराणवस्तुकोविद.

Antiquated, *a.* पुराण; जीर्ण; अप्रचालित.

Antique, *a.* सुप्रत्न.

Antiquity, *n.* प्राचीनकाल.

Antiseptic, *a. n.* पूतिनाशक; कोथघ्न.

Antithesis, *n.* अर्थवैपरीत्यं; प्रतिपक्षता; विरोध; व्यवच्छेद.

Antitype, *n.* मूलमूर्ति *f.*; प्रतिबिंबमूलं; आदर्श.

Antler, *n.* मृगशृंगं-°शाखा.
Anus, *n.* अपान *mn.*, गुदं, च्युति *f.*, त्रिवलीकं, पायु, भुलि *f.*
Anvil, *n.* शूर्मि-र्मी *f.* स्थूणा.
Anxiety, *n.* चिंता; औत्सुक्यं; उद्वेग; व्यग्रता.
Anxious, *a.* चिंतापर-मग्न; उत्सुक; उद्विग्न; व्यग्र.
Any, a. किं *with* अपि, चन, चित्.
Any how, *adv.* कथंचित् , येन केन प्रकारेण.
Anywhere, *adv.* कुत्रापि, क्वापि.
Aorist, *n.* (साधारणो) अतीतकाल.
Aorta, *n.* मुख्यधमनी.
Apace, *adv.* क्षिप्रं,, द्रुतं, सत्वरं (*all ind.*).
Apart, *adv.* पृथक्; एकांते; दूरे (*all ind.*)
Apartment, *n.* आवास, कक्षा, कोष्ट, शाला। Inner a. अंतःपुरं, अवरोध, पराविद्ध, शुद्धांत.
Apathetic, *a.* उदासीन; वीतराग; निरुत्साह.
Apathy, *n.* औदासीन्यं; वैराग्यं.
Ape, *n.* कपि, वानर (*see 'monkey', no distinction in Skt.*); विडंबक; अनुकारिन्। *vt.* अनुकृ 8 U, विडंब् 10 U.
Apepsy, *n.* अजीर्णं.
Aperient, *a. n.* रेचक.
Aperture, *n.* कुहरं, गर्तं, छिद्रं, पतेरं, बिलं, रंध्रं, रोकं, श्वभ्रं, सुषिरं; (लघु) द्वारं.
Apetalous, *a.* निर्दल.
Apex, *n.* अग्रं, चूडा, शिखा, कोटि-टी *f.*
Aphonia, *n.* वाङ्नाश.
Aphorism, *n.* सूत्रं; कारिका; वचनं.
Aphrodisiac, *a. n.* कामोद्दीपक.
Apiary, *n.* मधुमक्षिकागारं.
Apiculture, *n.* मधुमाक्षिकापालनं.
Apiece, *a.* एकैकशः, पृथक्पृथक्, प्रत्येकं, विभागशः (*all ind.*)
Apish, *a.* कापेय, विडंबनशील.
Apnœa, *n.* श्वसनविराम.
Apocope, *n.* अंत्याक्षरलोप.
Apocryphal, *a.* संदिग्धप्रमाण; अयथाभूत.
Apodictic, *a.* सुसमर्थक; अबाध-सिद्ध.
Apologetic, *a.* क्षमायाचक.
Apologize, *vi.* क्षमां प्रार्थ् 10 A. *or* याच् 1 A; व्यपदिश् 6 P.
Apologue, *n.* नीतिकथा; उपकथा.
Apology, *n.* क्षमायाचना; स्वदोष-स्वीकार; व्यपदेश.
Apophthegm, *n.* सूत्रं; वचनं.
Apoplexy, *n.* अंगविकृति *f.*
Apostasy, *n.* स्वधर्मत्याग.
Apostil, *n.* टिप्पणी.
Apostle, *n.* ईशदूत; प्रेषित; क्रांति-प्रेरक.
Apostrophe, *n.* संबोधनं.
Apothecary, *n.* औषधकार-विक्रेतृ.
Apotheosis, *n.* देवत्वापादानं.
Apozem, *n.* कषाय, क्वाथ, निर्यूह, फांट.

Appal, *vt.* भी *c.* संत्रस् *c*; व्याकुलीकृ 8 U ।-ling, *a.* अतिभयावह.

Apparatus, *n.* उपकरणं, सामग्री.

Apparel, *n.* आकल्प, परिधानं, वस्त्र, वेश-ष । *vt.* वस् *c*, सज्जीकृ 8 U.

Apparent, *a.* अभिव्यक्त, स्पष्ट, स्फुट ; दृश्य, दृष्टिगोचर । -ly, *adv.* व्यक्तं *ind.*

Apparition, *n.* आभास, छाया; पिशाच, रात्रिंचर.

Appeal, *vi.* परावर्त-पुनर्विचारं प्रार्थ् 10 U; प्रमाणीकृ 8 U । *n.* परावर्तव्यवहार, पुनर्विचारप्रार्थना.

Appear, *vi.* आविर्भू 1 P, प्रादुर्भू 1 P; दृश् *Pass*, लक्ष् *Pass*; उद्गम् 1 P, प्रकाश् 1 A.

Appearance, *n.* आविर्भाव, प्रादुर्भाव; दर्शनं; रूपं; आकार; उपस्थिति *f.*

Appease, *vt.* उपशम् *c*, तुष् *c*, प्रशम् *c*, सांत्व् 10 U; अनुनी 1 P; प्रसद् *c.*

Appeasement, *n.* प्रशमनं, प्रसादनं, सांत्वनं.

Appellation, *n.* अभिधा, अभिधानं, आख्या, आह्वय, आह्वा, नामन् *neut.*, नामधेयं, संज्ञा.

Append, *vt.* अनुबंध् 9 P, अवलंब् *c*, उपाधा 3 U.

Appendage, *n.* अनुबंध; उपाहितांश; उपकरणं, उपांगं.

Appendix, *n.* परिशिष्टं; शेषग्रंथ.

Apperception, *n.* स्वचित्तवृत्त्युपलब्धि *f.*; स्वोपलब्धि *f.*

Appertain, *vi.* संबंध् *Pass.*; अधीन-अस् 2 P.

Appetence, *n.* स्वाभाविकेहा; मनोधर्म.

Appetite, *n.* अभिलाष, इच्छा, वाञ्छा; क्षुधा, बुभुक्षा; रुचि *f.* । Sensual a. विषयरुचि *f.*

Applaud, *vt.* अभिनंद् 1 P, प्रतिनंद् 1 P; श्लाघ् 1 A; स्तु 2 U.

Applause, *n.* प्रणाद; प्रशंसा; धन्यवाद.

Apple, *n.* सीताफलं । A. of the eye,कनीनिका, तारा; महाप्रेमास्पदं.

Appliance, *n.* उपकरणं; उपाय; योग; संयोजनं.

Applicable, *a.* प्रयोज्य, योग्य.

Applicant, *n.* प्रार्थिन् ; आवेदनकारिन् .

Application, *n.* योग; उपयोग; आसक्ति *f.*, चित्तासक्ति *f.*; निवेदनपत्रं; याञ्चा.

Apply, *vt.* संयुज् 10 U; प्रयाच् 1 A; अभ्यस् 4 P; प्रयत् 1 A । *vi.* आश्रि 1 U.

Appoint, *vt.* नियुज् 10 U. 7 P, स्था *c*; निर्दिश् 6 P; निधा 3 U; अधिकृ 8 U.

Appointment, *n.* नियोग; अधिकार; पदं; संकेत; प्रस्थापनं.

Apportion, *vt.* अंश् 10 U, परिक्लृप् 10 U, विभज् 1 U.

Apportionment, *n.* अंशनं, परिकल्पनं, विभाग.

Apposite, *a.* उचित, औपयिक, प्राप्त, यथार्थ, युक्त, संगत । -ly, *adv.* यथार्थं, स्थाने.

Apposition, *n.* समानाधिकरणं; अभेदान्वय, एकान्वय.

Appraise, *vt.* मूल्यं निरूप् 10 U ।--r, *n* मूल्यनिर्धारिक.

Appreciate, *vt.* गुणागुणं विज्ञा 9 U *or* विविच् 7 P; मह् 10 U.

Appreciation, *n.* गुणागुणविवेचनं; गुणग्रहणं; मूल्यवृद्धि *f.*

Appreciative, *a.* गुणज्ञ, मर्मज्ञ, रसज्ञ.

Apprehend, *vt.* ग्रह् 9 U, धृ 1 P, परामृश् 6 P; अधिगम् 1 P, अवबुध् 1 P, उपलभ् 1 A; ऊह् 1 U, तर्क् 10 U, मन् 4 A; आशंक् 1 A, भी 3 P, शंक् 1 A.

Apprehension, *n.* ग्रहणं, धारणं; अवबोध, उपलब्धि *f.*; शंका.

Apprentice, *n.* शिष्यकारु । -ship, *n.* छात्रस्थिति *f.*

Apprise, *vt.* ज्ञा *c*, बुध् *c*, विद् *c.*

Apprize, *vt.* मूल्यं निरूप् 10 U.

Approach, *vt.* आगम् 1 P, उपे 2 P, उपगम् 1 P, उपसृ 1 P, समाया 2 P, समीपं गम् 1 P । *vi.* प्रत्यासद् 1 P; उपस्था 1 P । *n.* आगमनं; संनिकर्ष ; प्रवेश, उपसर्पणमार्ग.

Approbation, *n.* अनुमोदनं; प्रशंसा.

Appropriate, *vt.* आत्मसात् कृ 8 U । *a.* उचित, युक्त, संगत । -ly, *adv.* यथायोग्यं, यथोचितं, स्थाने (*all ind.*).

Appropriation, *n.* आत्मसात्करणं; विनियोग; उपकल्पनं.

Approval, *n.* अनुमति *f.* अनुमोदनं; प्रशंसा.

Approve, *vt.* अनुमन् 4 A, अनुमुद् 1 A; प्रशंस् 1 P; रुच् 1 A (*with dat.*); अभिनंद् 1 P.

Approximate, *vt.* उपनी 1 P । *vi.* उपस्था 1 P । *a* आसन्न, संनिकृष्ट, समीप.

Approximation, *n.* उपगम, उपस्थिति *f.*, संनिकर्ष, सामीप्यं.

Appurtenance, *n.* उपांगं.

Appurtenant, *a.* अंगभूत; आनुषंगिक.

Apron, *n.* कटिप्रच्छद, मलवस्त्रं.

Apropos, *adv.* अधिकृत्य *ind.*; तथा हि

Apsis, *n.* उच्चनीचबिंदु.

Apt, *a.* उचित, योग्य ; कुशल, पटु; °शील.

Aptitude, *n.* औचित्यं, योग्यता; कौशलं; °शीलता, स्वभाव.

Aquarium, *n.* जलचरपात्रं-शाला.

Aquarius, *n.* कुंभराशि *m.*

Aquatic, *a.* जलचर, जलज.

Aqueduct, *n.* जलप्रणाली, जलमार्ग.

Aqueous, *a.* जलमय; अनूप.

Aquiline, *a.* गरुडचंचुतुल्य.

Arable, *a.* कर्षणीय, कृषियोग्य, हल्य.

Arbiter, *n.* निर्णेतृ, प्रमाणपुरुष, मध्यस्थ ; अबाधशक्ति, प्रभु.

Arbitrary, *a.* ऐच्छिक, कामचारिन्, स्वच्छंद.

Arbitrate, *vt.* निर्णी 1 P, निश्चि 5 U.

Arbitration, *n.* निर्णय ; माध्यस्थ्यं.

Arbour, *n.* कुंज *mn.*, कुडंग, झांट, निकुंज *mn.*, लतागृहं-मंडप.

Arc, *n.* वर्तुलांश, वृत्तांश ; धनुस् *neut.*

Arcade, *n.* छन्नमार्ग.

Arcadian, *a.* ग्रामीण (मुग्धसुखित्व-दर्शक).

Arcanum, *n.* रहस्यं ; रसायनं.

Arch, *a.* धूर्त ; कुशल ; क्रीडाशील ; मुख्य। *n.* तोरणं; वृत्तखंडं; ०अग्रणी *m.* । Triumphal a., जयतोरणं.

Archæology, *n.* पुराणवस्तुशास्त्रं.

Archaic, *a.* आर्ष, प्राचीन.

Archaism, *n.* आर्षप्रयोग.

Archer, *n.* इष्वास, धनुर्धर, धनुष्मत्, धन्विन्, धानुष्क, निषंगिन्, शरमल्ल.

Archery, *n.* धनुर्विद्या, धनुर्वेद ; इषुक्षिप्ति *f.*

Archetype, *n.* प्रतिबिंबमूलं ; मूलरूपं ; प्रतिमितं.

Archipelago, *n.* द्वीपसमूह ; द्वीपखचितः समुद्र.

Architect, *n.* शिल्पिन्, स्थपति । -ure, *n.* वास्तुविद्या, शिल्पं; स्थापत्यं; (विशिष्टा) वास्तुनिर्माणरीति *f.*

Architectonics, *n.* स्थापत्यं ; विज्ञानव्यवस्थापनं.

Archives, *n. pl.* ऐतिहासिकलेखरक्षागारं; (अत्र रक्षिताः) ऐतिहासिकलेखाः *pl.*

Archology, *n.* उत्पत्तिशास्त्रं.

Arctic, *a.* उत्तरकेंद्रीय । A. circle, उत्तरध्रुववृत्तं, उदीच्यवृत्तं.

Ardency, *n.* उत्ताप ; तीव्रता औत्सुक्यं.

Ardent, *a.* उत्तप्त ; उत्कट ; प्रखर ; प्रचंड; उत्साहिन् ; उत्सुक ; कुतूहलिन् ; प्रसित ; व्यग्र । -ly, *adv.* उल्बणं; सतृष्णं, सानुरागं (*all ind.*)

Ardour, *n.* उत्ताप ; निरतिशय ; उत्कटता; औत्सुक्यं; कौतूहलं.

Arduous, *a.* प्रांशु; दुरारोह ; दुष्कर, श्रमसाध्य.

Area, *n.* फलं; क्षेत्रफलं; अंगणं-नं; अवकाश.

Areca, *n.* (tree) खपूर, झोंड, तांबूली, नागलता-वल्ली, पुन्नागवल्ली, पूग-गी । (Nut) तांबूलं, पूगफलं.

Arefaction, *n.* शोषणं.

Arena, *n.* मल्लभूमि *f.*; रंगभूमि *f.*; अक्षवाट; युद्धस्थानं.

Argent, *a.* राजत, रौप्य; रजतश्वेत.

Argosy, *n.* तरांधु, तराल्ल.

Argot, *n.* (चौराणां) उपभाषा.

Argue, *vi.* तर्क् 10 U, विचर् *c*, विवद् 1 A; ऊहापोहं कृ 8 U । *vt.* प्रमाणेन साध् *c.*, प्रमाणयति *Den.*

Argument, *n.* उपपत्ति *f.*, युक्ति *f.*; पक्ष; हेतु; विवाद; ऊहापोह; प्रमाणं; (ग्रंथस्य) भावार्थ, विषयक्रम.

Argumentation, *n.* ऊहापोह, तर्क, वितर्कणं.

Argumentative, *a.* तार्किक; वादशील, विवादप्रिय.

Aria, *n.* गीतकं, गीति *f.*

Arid, *a.* शुष्क; रूक्ष। A. soil, धन्वन् *mn.*, मरु, मरुस्थलं-ली.

Aries, *n.* मेषराशि *m.*

Aright, *adv.* यथातथं, यथार्हं, युक्तं, सम्यक् (*all ind.*)

Arise, *vi.* उत्था 1 P, उत्पद् 4 A, उद्गम् 1 P; उदि 2 P.

Aristocracy, *n.* कुलीनजनाः *pl.*; अभिजातिमंतः *pl.*; अभिजनवतः *pl.*; शिष्टजनसत्ताकं राज्यं.

Aristocrat, *n.* कुलीन, अभिजात, शिष्टजन.

Arithmancy, *n.* अंकादेश (कथनं).

Arithmetic, *n.* अंकविद्या, गणितं। –ian, *n.* गणितिन्; गणक.

Ark, *n.* पिटक, मंजूषा, समुद्गक; नौ *f.*, तरणी, तरांधु, पोत; आधार, आश्रय, शरणं.

Arm, *n.* दोस् *mn.*, बाहु, भुज, भुजा; शाखा; नदीवंक; (*usually pl.*), अस्त्रं, आयुधं, हेति *f.* । *vt.* सज्जीकृ 8 U, सन्नह् *c.*

Armada, *n.* नौसेना; नौसाधनं.

Armament, *n.* सज्जीकरणं; सज्जितं-ता बलं-सेना; युद्धसामग्री.

Arm-hole-pit, *n.* कक्षा, खंडिक, दोर्मूलं, बाहुकोटर.

Armistice, *n.* (नियतकालिका) युद्धविरति *f.*

Armlet, *n.* अंगदं, केयूरं, वलय.

Armour, *n.* कंकट, कवच *mn.*, तनुत्राणं, दंशनं, वर्मन् *neut.*, सज्जा, सन्नाह.

Armoury, *n.* अस्त्रागारं, शस्त्रशाला.

Army, *n.* अनीकं, अनीकिनी, चक्रं, चमू *f.*, ध्वजिनी, पताकिनी, पृतना, बलं, वरूथिनी, वाहिनी, सेना, सैन्यं । Full a., अक्षौहिणी, चतुरंगं.

Aroma, *n.* आमोद, गंध, परिमल, सुगंध, सुरभि, सुवास.

Aromatic, *a.* सुगंधि, सुरभि.

Around, *prep.* अभितः, परितः (*with acc.*) । *adv.* समंतात्, सर्वतः (*both ind*).

Arouse, *vt.* उत्था *c*; उत्सह् *c*: जागृ *c*, प्रबुध् *c.*

Arpeggio, *n.* द्रुतमूर्च्छना.

Arrack, *n.* नारिकेली.

Arraign, *vt.* अभियुज् 7 A; अधिक्षिप् 6 P; दुष् *c.*

Arrange, *vt.* रच् 10 U, विन्यस् 4 P, व्यवस्था *c*, व्यूह् 1 U । *vi.* निर्णी 1 P.

Arrangement, *n.* रचना, विन्यास, व्यवस्थापनं, व्यूहनं; क्रम, परिपाटि-टी *f.*; निर्णय.

Arrant, *a.* अत्यंत; अतिदुष्ट; अतिनिंद्य.

Array, *n.* व्यूह; रचना; आभरणं, वेश-ष । *vt.* व्यूह् 1 U; रच् 10 U.

Arrear, *n.* *usually pl.* ऋणशेषं; देयशेषं; अशोधितो भाग.

Arrest, *vt.* ग्रह् 9 P, धृ 1 P, निरुध् 7 U, बंध् 9 P; स्तंभ् 9 P; । *n.* आसेध, ग्रहणं, धरणं, बंधनं.

Arrival, *n.* आगमनं, उपस्थिति *f.*

Arrive, *vi.* आगम् 1 P, आसद् 1 P, प्रपद् 4 A, प्राप् 5 P, समासद् 1 P, संप्राप् 5 P.

Arrogance, *n.* अभिमान, अवलेप, अहंकार, आटोप, आडंबर, उत्सेक, औद्धत्यं, गर्व, दर्प, धर्ष, मद.

Arrogant, *a.* अभिमानिन्, अवलिप्त, उद्धत, गर्वित, समद.

Arrogate, *vt.* समदं ग्रह् 9 P; अन्यायेनात्मसात्कृ 8 U.

Arrogation, *n.*अन्यायग्रहणं;उपधा.

Arrow, *n.* इषु, कलंब, कांड, खग, चित्रपुंख, चिपाट, पत्रिन्, पृषत्क, बाण, भल्ल, मार्गण, रोपण, विशिख, शर, शल्य *mn.*, सायक। *Some of the following words are also used for "Arrow" in general* :—Iron a. एषण, नाराच, प्रक्ष्वेलन। Half-iron a. अर्धनाराच, अर्धशल्य, कंकपत्र, शिलीमुख। One-third iron a., दंडासन, दांडिक। A. with a head like the half-moon, अर्धचन्द्र, क्षुरप्र। Barbed a., कर्णिकारल, विकर्णि.

Arsenal, *n.* आयुधागारं, शस्त्रशाला.

Arsenic, *n* (Red) करवीरा,कुनटी, नागजिह्विका-मातृ *f.*, फेनाश्मन् *m.*, मनःशिला, महासना, रसनेत्री, रोचनी.

Arson, *n.* गृहदाह (कामतः कृतो दंड्यश्च).

Art, *n.* कला, शिल्पं, शिल्पविद्या; कौशलं, निपुणता; कपटं, माया। Fine a. ललितकला। -ful, *a.* चतुर, छलान्वित, मायाविन्। -fulness, *n.* चातुर्य, शठता.

Artery, *n.* धमनी, नाडी, रक्तवाहिनी.

Arthritis, *n.* ग्रंथिरोग.

Article, *n.* वस्तु *neut.*; विषय; पदं; भाग: समय, समयपत्रं; उपपदं; वृत्तपत्रलेख.

Articulate, *a.* ग्रंथिल, संधिमत्; व्यक्त, स्पष्ट, स्फुट; सूच्चारित। *vt.* (संधिना) ग्रंथ् 9 P; यथायथं संयुज् 10 U; स्पष्टं उच्चर् *c*–उदीर् 10 U.

Articulation, *n.* संधानं; उच्चारणं; व्यंजनं; ग्रंथि, पर्वन् *neut.* संधि.

Artifice, कूप्ति *f.*; कौशलं; उपाय; कपटं; छद्मन् *neut.*, व्याज। –r, *n.* कर्मकार, कारु, शिल्पकार, शिल्पिन्.

Artificial, *a.* कृत्रिम; शिल्पिक; शिल्पनिर्मित; अनैसर्गिक; कृतक.

Artillery, *n.* युद्धास्त्राणि *pl.*; अग्न्यस्त्राणि *pl.*

Artisan, *n.* कर्मकार, कारु, देवट, शिल्पकार, शिल्पिन्.

Artist, *n.* शिल्पिन्; कलाभृत्, कलावत्; चित्रकार; पंडित; कोविद.

Artiste, *n.* रंगचर (गायकाः शैलूषा इत्यादयः).

Artistic, *a.* कौशलपूर्ण; कलाशिल्पविषयक.

Artless, *a.* अकपट, निर्व्याज, मुग्ध, सरल.

Aryan, *a. n.* आर्य.

As, *adv. conj.* इव, वत् (in *comp.*); यथा; यद्वत्। So–a., यथा-तथा। A. yet अद्य-यावत्। A. long a. यावत्। A. far a., °पर्यंतं। A. if, इव.

Asafœtida, *n.* बाल्हीकं, र(रा) मठं, हिंगु *mn.*

Curd, *n.* दधि *neu.* द्रप्स *mn.*, पयस्यं, मंगल्यं, श्रीघनं । -le, *vt.* घनीकृ 8 U, श्यै *c*, संहन् 2 P; *vi.* घनीभू 1 P, श्यै 1 A । -y, curdled, *a.* दधिमय; घनीभूत, श्यान.

Cure, *vt.* उपशम् *c.* चिकित्सते *Des.*, प्रतिकृ 8 U, प्रशम् *c*; शुध् *c* । *n.* उपशम, चिकित्सा, प्रतिकार, रोगशमनं; अगद, औषधं, भेषजं । C. -all, *n.* सर्वरोगघ्नं । -able, *a.* साध्य । -less, *a.* असाध्य ।.

Curiosity, *n.* कौतुकं, (कु)कौतूहलं, जिज्ञासा; अपूर्ववस्तु *neu.*

Curious, *a.* कौतूहलिन्, जिज्ञासु; विचक्षण, सूक्ष्म; अद्भुत, अपूर्व, दुर्लभ; चित्र । -ly, *adv.* सकौतुकं; अद्भुतं, चित्रं.

Curl, *n.* अलक, कुरल, खंकर, चूर्णकुंतल, झल्लरी; ऊर्मि *f.*, तरंग । *vt.* अरालीकृ, कुटिलीकृ *both* 8 U । *vi.* अरालीभू, कुटिलीभू *both* 1 P; तरंगयति *Den.* । -ed, -y, *a.* अराल, कुंचित, कुटिल; तरंगित.

Curmudgeon, *n.* कदर्य, कृपण, मितंपच.

Currant, *n.* शुष्कद्राक्षं.

Currency, *n.* प्रचलनं, प्रसार; नाणक°, मुद्राप्रचलनं; प्रचलितनाणकपद्धति *f.* । To gain c., प्रवृत् 1 A.

Current, *a.* प्रचलित, संचारिन्; वर्तमान, विद्यमान । *n.* आपात, ओघ, धारा, प्रवाह, मंदाक, स्रोतस् *neut.* । C. report, जनप्रवाद । C. moment, आपात । -ly, *adv.* साधारणतः, सामान्यतः.

Curricle, *n.* द्व्यश्वरथ.

Curriculum, *n.* अध्ययनक्रम, ०पद्धति *f.*

Currier, *n.* चर्मकार, चर्मरंजक.

Curry, *n.* ओदनोपस्कर । *vt.* (अश्वं) मृज् 2 P. 10 U; तड् 10 U; (चर्म)परिष्कृ, संस्कृ *both* 8 U । To c. favour, चाटूक्त्या प्रसद् *c* । C. -comb, अश्वमार्जनी.

Curse, *vt.* अभिशंस् 1 P, (अभि)-शप् 1 U; बहिष्कृ 8 U; बाध् 1 A । *vi.* शापं वद् 1 P । *n.* अभिशाप, शपथ, शाप; दुःखमूलं, पीडाकारणं । I don't care a c., अतितुच्छं मन्ये । -d, Curst, a. अभिशप्त, अभिशस्त, आक्रुष्ट, शप्त; गर्ह्यः पीडावह.

Cursory, *a.* त्वरित, सरभस; अनंतरज्ञ, असूक्ष्म, बाह्यमात्रगत; अदक्ष, अनवहित.

Cursus, *n.* रथ्या; अध्ययनक्रम.

Curt, *a.* संक्षिप्त, ह्रस्व; अल्पभाषिन् । -ly, *adv.* संक्षेपेण । -ness, *n.* संक्षेप; संकोच.

Curtail, *vt.* संक्षिप् 6 P, संहृ 1 P; अवकृत् 7 P, अवच्छिद् 7 P.

Curtain, *n.* अपटी, कांडपट, ज-(य)वनिका, तिरस्करिणी, प्रतिसारा, व्यवधानं । *vt.* तिरस्करिण्या आवृ 5 P । C. lecture, शय्योपदेश । Behind the c., नेपथ्ये.

Curtal, *n.* छिन्नपुच्छाश्व.

Curtsy, *n.* नमनं, प्रणाम.

Curvate, *a.* आभुग्न । -ure, *n.* आभोग, नति *f.*, वक्रता.

Curve, *n.* अंचनं, नति *f.*, वक्रता । *vi.* नम् 1 P; आभुग्न *a.* भू 1 P । *vt.* नम् *c*; वक्रीकृ, आभुग्नं कृ *both* 8 U.

Curvet, *n.* उत्प्लुतं, वल्गनं.

Cushat, *n.* पारावत.

Cushion, *n.* उच्छीर्षं, उपधानं, उपबर्हं, उपबर्हणं । *vt.* उपधानेन आवृ 5 P । -y, *a.* उपबर्हसम.

Cusp, *n.* बिंदु *m.*; शिखर *mn.*, शिखा; अर्धचंद्राग्रं.

Cuspidate, *a.* तीक्ष्णाग्र.

Cuspidor, *n.* निष्ठीवपात्रं.

Cuss, *n.* शपथ, शाप; तुच्छजन, पामर.

Custodian, *n.* रक्षक; निरोधक.

Custody, *n.* रक्षणं, रक्षा; कारा, गुप्ति; *f.* निरोध; बंधनं

Custom, *n.* आचार, रूढि *f.*, व्यवहार; अनुसार, क्रम, रीति *f.*; (*pl.*) कर, शुल्कं । -ary, *a.* आचारिक, रूढ, लोकसिद्ध,

लौकिक; व्यावहारिक । –arily, *adv*. यथाचारं, यथाव्यवहारं ।–er, *n*. क्रेतृ *m*., ग्राहक.

Cut, *vt*. अवच्छिद् 7 P, कृत् 6 P, छिद् 7 P, छो 4 P, दो 4 P, भिद् 7 P, लू 9 U, व्रश्च 6 P; संक्षिप् 6 P; परिचयं निराकृ 8 U । *vi*. छेदनं कृ 8 U; तीक्ष्ण *a*. अस् 2 P । *n*. कर्तनं, छेद, छेदनं, लवनं; आघात, प्रहार; व्रण; परुष-शब्द; कुल्या, खातं; कशाघात; मित्रधिक्कार; रूपं । C. in, *vi*. प्रतिबंध् 9 P । C. and dry, *a*. सिद्धपूर्व; नावीन्यहीन । Short c., सरलः *or* ह्रसिष्टः मार्गः; उत्तमः उपाय । C. a caper, वल्ग् 1 P । C. down, अवच्छिद् 7 P, पत् *c* । C. short, संक्षिप् 6 P । C. –throat, *n*. प्राणघातक । C. off, उच्छिद् 7 P; विलुप् *c* । C. out, उत्कृत् 6 P; परिक्लृप् *c* । –ter, *n*. छेदक; छेदनी; नौका । –ting, *a*. तीक्ष्ण, तीव्र, मर्मस्पृश्; *n*. छेदनं; शकलं.

Cutaneous, *a*. त्वाच; त्वक्संबंधिन्.

Cutcherry, *n*. व्यवहारमंडप.

Cuticle, *n* बाह्यत्वच् *f*.

Cutlass, *n*. असि *m*., खड्ग.

Cutler, *n*. छुरीकार, शस्त्रकार.

Cycle, *n*. चक्रं; आवृत्ति *f*, पर्याय; संतान; द्विचक्री (यानविशेषः).

Cyclone, *n*. चक्रवात, वातावर्त.

Cyclopœdia, *n* (ज्ञान)कोश.

Cyclops, *n*. एकाक्ष.

Cyclosis, *n*. (रुधिरादेः) अभिसरणं.

Cygnet, *n*. हंसपोत.

Cylinder, *n*. गोलनलिका.

Cylindrical, *a*. गोलनलिकाकार.

Cymbal, *n*. झल्लकी, झल्लरी.

Cynic, *n*. जनद्वेषिन् । –al, *a*. परुषवृत्ति, वामशील, सदावक्र.

Cynosure, *n*. ज्योतीरथ, ध्रुव; दृगेकायतनं, जनचित्तकेंद्रं.

Cypher, *n*. शून्यं.

D

Dab, *vt*. मृदुक्लिन्नद्रव्येण लघु तड 10 U *or* आहन् 2 P । *n*. मृदुताडनं; क्षुद्रपिंड.

Dabble, *vi*. जले क्रीड् 1 P; असूक्ष्मतया कलां शास्त्रं वा अधिगम् 1 P । *vt*. प्रोक्ष् 1 P, सिच् 6 P । –r, *n*. कला०, शास्त्रचुंबक.

Dabster, *n*. निपुण, विशारद.

Dacoit, *n*. प्रसह्यचौर, दस्यु *m*. । –y, *n*. प्रसह्यचौर्य.

Dad Daddy, *n*. तात.

Daddle, *vi*. सकंपं चल् 1 P । *n*. हस्त; मुष्टि *f*.

Dædal, *a*. गहन, दुर्ग्राह्य; सुघटित; निष्णात.

Daft, *a*. अचतुर, मुग्ध, मूढ; उन्मत्त, विकलमति.

Dagger, *n*. असिपुत्रिका, कृपाणिका । At d.s drawn, विरोधिन्; द्वंद्वोत्सुक । To look d.s, क्रोधपूर्ण *or* वैरपूर्ण दृश् 1 P.

Daggle, *vt.* पंकेन लिप् 6 P; पंके कृष् 1 P.

Dagoba, *n.* स्तूप.

Daily, *a.* आह्निक, दैनिक । *adv.* अहरहः, प्रतिदिनं । *n.* दैनिकपत्रं.

Dainty, *a.* मिष्ट, रुचिर, सुरस, स्वादु; कोमल, मृदु, ललित; दुष्प्रसाद्य, दुस्तोषणीय । *n.* मिष्टान्नं, सुग्रास । -ness, *n.* स्वादुता; कोमलत्वं, मार्दवं, लालित्यं.

Dairy, *n.* दुग्धशाला, दुग्धागारं । -maid, *n.* आभीरी, गोदोहिनी, गोपी.

Dais, *n.* पीठिका; उच्चासनं.

Dale, *n.* उपत्यका, कंदर, गह्वरं, दरी.

Dalliance, *a.* केलि, *mf.* क्रीडा, नर्मन् *neu.*, लीला, विभ्रम, विलास, विहार.

Dally, *vi.* केलिं *or* विलासं कृ 8 U, क्रीड् 1 P, रम् 1 A, विभ्रम् 1. 4 P, विलस् 1 P; विलंब् 1 A, कालं वृथा क्षै *c.*

Dam, *n.* (1) जननी, प्रसू *f.*, मातृ *f.*, (2) धरण, सेतु *m* । *vt.* (सेतुना) जलं निरुध् 7 U *or* बंध् 9 P; प्रतिरुध् 7 U.

Damage, *n.* अपकार, अपाय, क्षतं, पीडा, बाधा; अपचय, क्षति *f.*, क्षय, ध्वंस, नाश, हानि *f.*; निष्कृति *f.*, प्रतिफलं, हानिपूरणं । *vt.* अपकृ 8 U, क्षि *c*; हिंस् 7 P.

Damask, *n.* चित्रदुकूलं । *a.* अरुण, लोहित.

Dame, *n.* आर्या, भवती (*used in addressing*); गृहिणी.

Damn, *vt.* गर्ह् 1 A, 10 U, धिक्कृ 8 U, निंद् 1 P; दंड् 10 U; शप् 1 U; नरके पत् *c*; अवमन् 4 A, निराकृ 8 U । -able, *a.* निंद्य; दंडनीय; नरकफल; अतिदुष्ट । -ation, *n.* नरकदंड; नरकयातना, ०वास; गर्हणा । -ed, *a.* गर्हित, निंदित; अवकृष्ट, नीच; नारक । -ing, *a.* गर्हणा०, दंडापादक.

Damp, *a.* आर्द्र, उत्त, उन्न, क्लिन्न, तिमित, सद्रव, सिक्त; उदासीन, निरुत्साह, म्लान, विषण्ण । *n.* आर्द्रता, क्लेद, स्तेम, शैत्यं; विषाद । *vt.* आर्द्रीकृ 8 U, उंद् 7 P. *c*, क्लिद् *c*; भग्नोत्साहं कृ 8 U; खंड् 10 U । D. -proof, *a.* अक्लेददूष्य । -en, *vt.* *See* 'Damp' । -ish, *a.* ईषदार्द्र । -ness, *n.* आर्द्रता, सद्रवता.

Damsel, *n.* कन्यका, कुमारी, तरुणी, मुग्धा, युवती । Celestial d., अप्सरस् *f.*

Dance, *vi.* नट् 1 P, नृत् 4 P, लस् 1 P । *vt.* नृत् *c*; नर्तनेन आविर्भू *c* । *n.* तांडव *mn*, नर्तनं, नृत्यं, लास्यं । -r, *n.* नर्तक (०की *f.*) । -ing, *n.* नर्तनं, नृत्यं । D. attendance on, आराध् *c*, उपास् 2 A, बद्धांजलि *a.* समुपस्था 1 P । Lead one a d., विलंबकारणं भू 1 P.

Dander, *n.* क्रोध, रोष.

Dandify, *vt.* प्रसाध् *c*, भूष् 10 U.

Dandle, *vt.* अंके *or* भुजाभ्यां लल् 10 U.

Dandruff, *n.* दारुणं.

Dandy, *n.* सुभगंमन्य, सुवेषप्रिय। –ism, *n.* विलासिता.

Danger, *n.* अनर्थ, अपाय, भयं, भीति *f.*, विघ्न, शंका, संशय, संकटं, संदेह। –ous, *a.* अनर्थहेतुक, भयावह; संकटाक्रांत; विषम.

Dangle, *vi.* लंब् 1 A, लुठ् 6 P, लुल् 1 P। *vt.* *Causals of preceding verbs.*

Dank, *a.* आर्द्र, क्लिन्न, तिमित, सद्रव.

Danseuse, *n.* नर्तकी.

Dapper, *a.* ललितरूप, सुभग, सुवेष; उत्साहिन्, क्षिप्र, दक्ष.

Dapple, *n.* कर्बूरलांछनं; कल्माषचिह्नं। *a.* (*also* Dappled), कर्बुर,-रित, कल्माष, चित्र, शबल। *vt.* कल्माषयति *Den.*, कर्बुरीकृ 8 U, चित्र् 10 U.

Darbies, *n. pl.* हस्तपाश.

Dare, *vi.* धृष् 5 P, साहसं कृ 8 U; शक् 5 P, क्षम *a. or* समर्थ *a.* अस् 2 P *or* भू 1 P। *vt.* साध् *Desider.*; आह्वे 1 P; स्पर्ध् 1 A। D. –devil, निर्भय। –ing, *a.* धृष्ट, निर्भय, शूर, साहसिक; प्रगल्भ। –ing, *n.* धाष्ट्र्यं, धैर्यं, साहसं.

Dark, *a.* निरालोक, निष्प्रभ; तमोमय, तमोवृत, तामस, तिमिर, सांधकार; कृष्ण, नील, मेचक, मलीमस, श्याम; अस्वच्छ, कलुष, प्रकाशाभेद्य; निरानंद, दुर्दर्शन; अज्ञ, अंध, मूढ; अस्पष्ट, गूढ; दुष्ट, पाप। *n.* अंधं, अंधकार, आतति *f.*, तमस् *neu.*, तमस *mn.*, तमिस्रं, तामिस्रं, तिमिरं, ध्वांतं, शार्वरं; रात्रि *f.*, शर्वरी; छाया; अज्ञानं; संदिग्धता। D. -browed, उग्ररूप। -ness, *n.* अंधं *etc.* (*See* 'Dark'); अंधता; अप्रकाशत्वं; अस्पष्टत्वं; अज्ञानं; दुष्टता, दौरात्म्यं। Deep, all pervading, d.ness, अंधं तमस् *neu.*, अंधतमसं, °तामसं, °तामिस्र *mn.*, तमिस्रा, संतमस् *neu.*, संतमसं। Slight d.ness, अवतमसं। –en, *vt.* अंधकारयति *Den.*, कलुषयति *Den.*, दुष् *c*, अंधकारेण आवृ 5 U; परिभ्रम् *c*; *vi.* अंधीभू 1 P। –ish, *n.* ईषत्कृष्ण। –ly, *adv.* अव्यक्तं; सांधकारं। –some, *a.* तमोमय; दुर्दर्शन; निरानंद.

Darkle, *vi.* तिमिरे *or* निभृतं शी 2 A *or* स्था 1 P; अंधीभू 1 P.

Darling, *n.* दयित-ता, प्रिय-या. वल्लभ; प्रीति°, स्नेहपात्रं। *a.* दयित, प्रिय.

Darn, *vt.* (वस्त्रछिद्रं) संधा 3 U *or* सिव् 4 P.

Dart, *n.* अस्त्रं, भल्ल, शंकु *m.*, शलाका, शल्यं; दंश । *vt.* अस् 4 P, क्षिप् 6 P, पत् *c*, मुच् 6 P । *vi.* अभिद्रु 1 P, सत्वरं गम् 1 P, पलाय् 1 A, फर्फरायते *Den*; विलस् 1 P, स्फुर् 6 P.

Dash, *vt.* प्रसभं आहन् 2 P *or* पत् *c or* प्रक्षिप् 6 P, प्रभंज् 7 P; संघट्ट् *c*; प्रसभं सिच् 6 U *or* प्रोक्ष् 1 P; मिश्र् 10 U; सत्वरं लिख् 6 P; निष्फलीकृ 8 U । *vi.* आपत् 1 P; सवेगं धाव् 1 P । *n.* संघट्ट, समाघात; संघट्टनाद; अभिद्रव, धावनं, पलायनं; दक्षता; साहसं; तेजस्विता; रेखा । -ing, *a.* धृष्ट, प्रगल्भ; तेजस्विन्.

Dastard, *n.* कातर, कापुरुष, क्लीब, त्रस्तु, भीरु, भीरु(लु)क, शौर्यहीन । -ly, *a.* भीरु, *etc.*

Data, *n. pl.* उपन्यास; उपादेय-सामग्री, स्वीकृततत्त्वानि *pl.*

Date, *n.* (1) काल, तिथि *mf.*, दिवस; (2) खर्जूर, खर्जूरिका । *vt.* तिथिं लिख् 6 P । *vi.* आरभ् 1 A; आरंभदिनं गण् 10 U । Out of d., जीर्ण; कालातीत । Up to d., नूतन । -less, *a.* अकाल-विशिष्ट.

Dative, *n.* संप्रदानं; चतुर्थी (विभक्ति *f*)

Datum, *n.* उपादेयं; उपन्यास.

Daub, *vt.* अंज् 7 P, दिह् 2 U, लिप् 6 P; अचातुर्येण चित्र् 10 U; कलुषयति, मलिनयति *both Den.* । *n.* कुचित्रं; कलंक, लेप । -ing, *n.* कुचित्रकर्मन् *neu.*; प्रगाढस्तुति *f.*

Daughter, *n.* आत्मजा, कन्या, तनया, दुहितृ *f.*, नंदिनी, पुत्रिका पुत्री, सुता । D.-in-law, *n.* जनी, वधू *f.*, स्नुषा । -hood, *a.* कन्यात्वं.

Daunt, *vt.* त्रस् *c*, भी *c*; निरुत्साहं कृ 8 U; धैर्यं पत् *c* । -less, *a.* निःशंक, निर्भय, निर्भीत.

Daw, *n.* द्रोणकाक.

Dawdle, *vi.* कालं क्षै *c*; विलंब् 1 A., अनवहितं वृत् 1 A.

Dawn, *n.* अरुण, अरुणोदय, अह-र्मुखं, उषस् *f.*, उषा, क(का)ल्यं, गोसर्ग, प्रत्यु(त्यू)ष, प्रत्युषस् *neu.*, प्रत्यूषं, प्रभातं, प्रविसर, प्रातःकाल, विभातं, विहान *mn.*, व्युष्टं, सांयात्रिकं; उदय । *vi.* आविर्भू 1 P; उद्गम् 1 P । -ing, *n.* प्रातःकाल, *etc.*; प्राची; आरंभ, आविष्कृति *f.*, उदय.

Day, *n.* अहन् *neu.*, दिनं, दिवस, वार, वासर । Lunar d., तिथि *mf.* । D. and night, अह-र्निशं, अहोरात्रं, दिवानिशं, दिवा-रात्रं, नक्तंदिवं, रात्रिंदिवं । All d., अहर्निशं, *etc.* । D. by d. अहरहः, दिने दिने, प्रतिदिनं, प्रत्यहं । Every d., प्रतिदिनं । One d, one of these d.s, अचिरेण । Present d., *a.*

नूतन, सांप्रतिक। By d., दिवा। The next d., परेद्युः। The d. before, पूर्वेद्युः। Another d., अन्येद्युः। Yesterd., ह्यः। The d. after to-morrow, परश्वः। During d., दिवा। To gain the d., विजयं प्राप् 5 P; विजयिन् *a.* भू 1 P। -break, अरुणोदय, *etc. See* Dawn,। –light, दिनकाल। D.'s-work, आह्निकं.

Daze, *vt.* परिभ्रम *c,* विमुह् *c.*

Dazzle, *vt.* दृष्टिं प्रतिहन् 2 P; अतितेजसा परिभ्रम् *c*; विमुह् *c*। *n.* परिभ्रामकं तेजस् *neu.*। –ing, *a.* दुर्निरीक्ष्य, दृष्टिबंधक; अत्युज्ज्वल.

Dead, *a.* उपरत, उपसंपन्न, गतप्राण, निर्जीव, परासु, परेत, प्रमीत, प्राणहीन, प्रेत, संस्थित; जड, निश्चल, निश्चेष्ट, विचेतन, स्तब्ध; तामस; उदासीन; जीर्ण, निष्फल; असार; अस्खलत्। *adv.* अतीव, अत्यंतं। D. body, कुणप, शवं। D. alive, *a.* निरुत्साह, भग्नोद्यम। D.-beat, अतीव क्लांत *or* श्रांत। D.-born, मृतजात; (child) मूढगर्भ। D.-broke, *a.* अकिंचन, नष्टसर्वस्व। D.-certainty, अवश्यभाव्यं। D.-drunk, *a.* मादजड। To flog a d. horse, निष्फलं कर्म कृ 8 U। D. language, मृतभाषा, अप्रचलिता भाषा। D. of night, निशीथ, मध्यरात्र। D.lock, अकिंचित्कार्यसमय। D. shot, अमोघवेधिन्। D. stand, स्थिरविरोध.

Deaden, *vt.* दुर्बलीकृ 8 U; शिथिलीकृ 8 U; जडीकृ 8 U; कुंठ् 10 U; तेजो हृ 1 P। *vi.* दुर्बलीभू 1 P, *etc.*

Deadly, *a.* अंतक, प्राणहर, मारक, मारात्मक; अशाम्य; प्रगाढ।–ness, *n.* अंतकत्वं, *etc.*; अतिशय, गरिमन् *m.*, गाढता.

Deaf, *a.* अकर्ण, एड, बधिर। -en, *vt.* बधिरयति *Den.*, बधिरीकृ 8 U; महानादेन परिभ्रम् *c*; नादनाशकं कृ 8 U। –ness, बधिरत्वं.

Deal, *n.* (1) (अल्पं महद्वा) परिमाणं; अंश, भाग; व्यवहार; (2) देवदारु *neu.*, ॰फलकं। *vt.* परिक्लृप् *c,* विभज् 1 U। *vi* व्यवहृ 1 P; क्रयविक्रयं कृ 8 U; प्रवृत् 1 A। A good *or* great d. प्राचुर्यं, बाहुल्यं; *adv.* अत्यंतं, बहु, भृशं। To d. in, व्यवहृ 1 P, विक्री 9 P.। To d. with, आचर् 1 P, वृत् 1 A। –er, *n.* आपणिक, वणिज् *m.*

Deambulation, *n.* बहिश्चलनं, भ्रमणं.

Dear, *a.* अभिमत, अभीष्ट, कांत, दयित, प्रिय, वल्लभ; बहुमूल्य, महार्घ। *n.* दयित-ता, प्रिय-या, वल्लभ। *adv.* (*also* Dearly), बहुमूल्येन, महार्घेण। *interj.* अहो,

हंत । -ness, *n* प्रियता, प्रीति *f*; महार्घता.

Dearth, *n.* अप्राप्ति *f.*, अभाव, दुर्लभता; दुर्भिक्षं, दुष्काल.

Death, *n.* अंत, अंधक, उपरम, कालधर्म, गमि *m.*, दिष्टांत, दीर्घनिद्रा, निधनं, निपात, निमीलनं, पंचत्वं, प्राणनाश, भूमिलाभ, मरणं, मृत्यु *m.*, संस्थिति *f.*; काल, कृतांत, दंडधर, पाशभृत्, यम; घात, वध । D. -blow, अंतकघात; नाश । D. -feud, मरणांतं वैरं । D. -struggle, -throe, मरणयातना, मृत्युवेदना । D. -warrant वधाज्ञा । At the point of d., आसन्नमृत्यु । To put to d., वधं आज्ञा *c or* आदिश् 6 P; हन् 2 P । Violent d., अपघात, अपमृत्यु । D. by fasting, प्रायोपवेशनं । -ful, *a.* प्राणघातक; मर्त्य । -less *a.* अमर, अमर्त्य; अनश्वर, अविनाशिन् । -like, मृत्युकल्प । -sman, *n.* घातक, वधपुरुष.

Debacle, *n.* ध्वंस, पराजय, विद्राव, विध्वंस.

Debar, *vt.* निरुध् 7 U, निषिध् 1 P, प्रतिषिध् 1 P; प्रतिरुध् 7 U; निवार् 10 U; बहिष्कृ 8 U.

Debark, *vi.* नौकायाः अवतॄ 1 P । *vt. Causal of prec. verb.*

Debase, *vt.* अपकृष् 1 P; अशुद्धीकृ, न्यूनीकृ, लघूकृ all 8 U; च्यु *c*, भ्रंश् *c*.

Debate, *vt.* विचर् *c*, वितर्क् 10 U । *vi.* विचारं *or* विवादं कृ 8 U विवद् 1 A । *n.* वाद, विचार, विवाद, कलह; द्वंद्वं । -able, विचारार्ह, विवादार्ह । -er, *n.* वादिन् *m.*, विवादकृत् *m.*

Debauch, *vt.* दुष् *c*, भ्रंश् *c*; कुमार्गं नी 1 P; आधृष् 1 P । *vi.* पापभोगं भज् 1 A । *n.* उपभोग; कामावेश । -ee, *n.* दुराचार, विषयासक्त । -er *n.* दूषक; उपभोगरत; कौमारचोर । -ery, *n.* विषयासक्ति *f.*; दुष्टोपभोग.

Debenture, *n.* नियमपत्रं, ०लेख, प्रतिज्ञालेख.

Debilitate, *vt.* दुर्बलीकृ 8 U; सामर्थ्यं क्षै *c or* नश् *c*.

Debility, *n.* क्षीणता, दौर्बल्यं, शक्तिपात.

Debit, *n.* देयांश; देयधनं । *vt.* देयांशे लिख् 6 P.

Debonair, *a.* दक्षिण, सभ्य, सुजन, सुशील, हृद्यवृत्ति.

Debouch, *vi.* कंदरात् निर्गम् 1 P.

Debris, *n* शकलराशि *m.*

Debt, *n.* ऋणं, पर्युदंचनं; (without interest) उद्धार; कर्तव्यं, बंध । D. of nature, दिष्टांत, मृत्यु । To clear *or* discharge one's d., ऋणं शुध् *c* । Discharge from d., ऋणशोधनं, ०मोचनं । Free from d., अनृण । Incur d., ऋणं कृ 8 U *or* ग्रह् 9 P । -or, *n.* अधमर्ण, ऋणिन्, खातक, धारक.

Debut, *n.* प्रथमदर्शनं; प्रथमारंभ.

Decade, *n.* दशकं; दशवर्ष.

Decadence, -cy, *n.* अवपात, क्षय, भ्रंश, म्लानि *f*; अधोगमनं । -ent, *a.*अवपातिन्; अधोगामिन्.

Decagon, *n.* दशकोण, दशभुज, दशास्त्र.

Decamp, *vi.* कटकं त्यज् 1 P; पलाय् 1 A; अपसृ 1 P । -ment, *n.* कटकत्याग; पलायनं; अपसर्पणं.

Decangular, *a.* दशकोण.

Decant, *vt.* कुशलतया पात्रात्पात्रे निविश् *c* । -er, *n* काचपात्रं.

Decapitate, *vt.* शिरः छिद् 7 P । -ion; *n.* शिरश्छेद

Decapod, *n.* दशपाद.

Decay, *vi.* अवसद् 1 P, क्षि *Pass*, जॄ 4 P, ध्वंस् 1 A, नश् 4 P, शॄ *Pass*, ह्रस् 1 P; न्यूनीभू 1 P; ग्लै 1 P, म्लै 1 P । *vt.* *Causals of prec. verbs.* । *n.* अवसाद, क्षय, नाश, ह्रास; ग्लानि *f*., म्लानि *f*.

Decease, *n.* मरणं, मृत्यु (*See* Death) । *vi.* उपरम् 1 P, पंचत्वं गम् 1 P, मृ 6 A । -d, *a.* उपरत, गतप्राण, मृत.

Deceit, *n.* कपटं, कैतवं, छद्मन् *neu*, छलं, प्रतारणा, वंचना । -ful, *a.* कपटिन्, वंचक । -fulness, *n.* कापट्यं, शाठ्यं.

Deceive, *vt.* अतिसंधा 3 U, प्रतॄ *c*, वंच् *c*, विप्रलभ् 1 A । -r, *n.* प्रतारक, वंचक । -able, *a.* वंचनीय; मुग्ध.

Decency, *n.* उपपत्ति *f*.; औचित्यं; योग्यता; विनय, शालीनता, सभ्यता.

Decennary, *n.* दशवर्ष । *a.* दशवर्षीय, दशवार्षिक.

Decenniad, *n.* दशवर्ष.

Decennial, *a.* दशवर्षस्थायिन्.

Decent, *a.* उचित, उपपन्न, युक्त, योग्य; शिष्टसंमत; विनीत, शिष्ट, सभ्य.

Deception, *n.* कपटं, कैतवं, प्रतारणा, वंचना.

Deceptive, *a.* भ्रांतिकारक, मोहजनक.

Decide, *vt.* अवधृ 10 U, निर्णी 1 P, निश्चि 5 U, निष्पद् *c*, व्यवसो 4 P; व्यवस्था *c* । *vi.* निर्णयं गम् 1 P *or* कृ 8 U । -d, *a.* दृढ, ध्रुव, निश्चित, स्थिर; असंदिग्ध, व्यक्त, स्पष्ट; सिद्ध । -dly, *adv.* असंशयं, निःसंशयं, नूनं, स्पष्टं.

Deciduous, *a.* पातुक, सामयिकपातिन्, वार्षिकपातिन्.

Decimal, *a.* दशक । *n.* दशांश.

Decimate, *vt.* दशमांशं आदा 3 U; दशमांशं नश् *c*; दशमं नरं हन् 2 P.

Decipher, *vt.* गूढलेखं *or* गूढाक्षराणि विशदीकृ 8 U *or* व्याख्या 2 P; प्रकाश् *c*; स्पष्टीकृ 8 U । -ment, *n.* स्पष्टीकरणं; प्रकाशनं, व्याख्यानं.

Decision, *n.* अवधारणं, निर्णय, निश्चय, निष्पत्ति *f*., व्यवस्थिति *f*.

Decisive, *a.* निर्णायक, निश्चायक; साधक । -ness, *n,* निर्णायकत्वं । -ly, *adv.* सनिश्चयं; निर्णयपूर्वकं.

Decivilize, *vt.* शिष्टतां *or* सभ्यतां न्यूनीकृ 8 U *or* नश् *c.*

Deck, *vt.* (1) अलंकृ 8 U, परिष्कृ 8 U: प्रसाध् *c,* भूष् 10 U, मंड् 10 U; (2) आच्छद् 10 U, आवृ 5. 9. 10 U, आस्तृ 5. 9 U, प्रच्छद् 10 U । *n.* नौकातलं, ०पृष्ठं । To clear the d.s, युद्धार्थं *or* अमुककार्यार्थं सज्जीभू 1 P; यथायथं स्था *c* । -ed, *a.* अलंकृत, भूषित.

Declaim, *vt.* साडंबरं *or* सालंकारं वच् 2 P *or* ब्रू 2 U । *vi.* उच्चैः भाषणं कृ 8 U *or* अपभाष् 1 A *or* आक्षिप् 6 P.

Declamation, *n.* वागाडंबर, वाक्तांडवं ; उच्चैर्भाषणं.

Declamatory, *a.* वाक्तांडवपूर्ण, ०मय.

Declare, *vt.* आख्या *c,* ज्ञा *c,* निविद् *c,* प्रकाश् *c,* प्रख्या *c;* उद्घुष् *c;* अभिधा 3 U, उदीर् *c,* प्रतिज्ञा 9 U, प्रतिपद् *c* । *vi.* प्रतिज्ञां कृ 8 U । To d. against, प्रतिपक्षं *or* विरोधं अवलंब् 1 A । To d. for, अनुग्रह् 9 P, सपक्षी भू 1 P । To d. oneself, वांछितं प्रकाश् *c;* स्वरूपं प्रकटयति *Den.* । -ation, *n.* प्रख्यापनं, प्रतिपादनं; प्रतिज्ञा, भाषणं, वचनं; घोषणा । -atory, *a.* प्रख्यापक, निवेदक; अभिधायक, वाचक; सूचक । -ative, *a.* अर्थव्यंजक; वाचक; प्रख्यापक.

Declension, *n.* अधोगमनं, च्युति *f.* भ्रंश; पदसिद्धि *f.*, विभक्तिरूपाणि *pl.*,

Declinate, *a.* प्रह्वीभूत.

Declination, *n.*अधोगमनं, अवनति *f.* ; च्युति *f.*, भ्रंश.

Decline, *vi.* अवनम्, आनम् *both* 1 P, अस्तं गम् 1 P, परिणम् 1 P; च्यु 1 A, पत् 1 P, भ्रंश् 1 A. 4 P; अवसद् 1 P, क्षि *Pass,* ध्वंस् 1 A, ह्रस् 1 P. । *vt.* अवनम् *c;* अपाकृ, निराकृ *both* 8 U, न अंगीकृ 8 U or ग्रह् 9 P. *or* संमन् 4 A, प्रत्याख्या 2 P, प्रत्यादिश् 6 P; शब्दरूपाणि आख्या 2 P *or* साध् *c* । *n.* अधोगति *f.* अपगम *f.*, अपचय, अवनति *f.*, अवसाद, क्षय, ग्लानि *f.*, ध्वंस, पात; परिणति *f.*; अस्त, अस्तमय; देहक्षय.

Declivity, *n.* उत्संग, निम्नं, निम्नभूमि *f.*, प्रवणं, प्रवणभूमि *f.*, प्लव.

Declivitous, Declivous, *a.* अवसर्पिन्, निम्न, प्रवण.

Decoct, *vt.* क्वथ् 1 P, पच् 1 P । -ion, *n.* कषाय, क्वाथ, निर्यास, निर्यूह, फांट.

Decohere, *vt.* पृथक्कृ 8 U.

Decollation, *n.* शिरच्छेद.

Decolour, *vt.* विवर्णीकृ 8 U; धवलीकृ 8 U.

Decompose, *vt.* पृथक्कृ, व्याकृ *both* 8 U; पूतीकृ 8 U, विद्रु *c.* विली *c*। *vi.* पृथग्भू 1 P ; विली *Pass.*, पूतिभू 1 P।–ition, *n.* पृथक्करणं; विद्रावणं, विलय; पूतीभाव.

Deconsecrate, *vt.* पवित्रतां अपहृ 1 P.

Decorate, *vt.* अलंकृ 8 U, परिष्कृ 8 U, प्रसाध् *c*, भूष् 10 U, मंड् 10 U, । –ion, *n.* अलंकार, आभरणं, भूषणं, मंडनं; अलंक्रिया, परिष्कृति *f.*, प्रसाधनं । –ive, *a.* प्रसाधक, विभूषक.

Decorous, *a.* उचित, युक्त, योग्य; विनीत, शिष्ट, सभ्य.

Decorum, *n.* औचित्यं, योग्यता; विनय, शिष्टाचार, सभ्यता.

Decorticate, *vt.* निस्त्वचीकृ 8 U; निर्वल्कयति *Den.*

Decoy, *vt.* प्रलुभ् *c*, विमुह् *c*; पाशे ग्रह् 9 P। *n.* प्रलोभक; आमिषं, प्रलोभनं.

Decrassify, *vt.* स्थूलतां न्यूनीकृ 8 U, *or* अपहृ 1 P.

Decrease, *vi.*अपचि *Pass*, अल्पीभू, न्यूनीभू *both* 1 P, क्षि *Pass*, ह्रस् 1 P। *vt.* अपचि 5 U, अल्पीकृ, न्यूनीकृ *both* 8 U, क्षै *c.* लघयति *Den.* *n.* अपचय, क्षय, ह्रास.

Decree, *n.* आज्ञा, आदेश, निदेश, नियोग, व्यवस्था, शासनं; नियोग०, शासनपत्रं । *vt.* आज्ञा *c*, आदिश् 6 P, नियुज् 7 A, व्यवस्था *c*। *vi.* व्यवस्थां *or* निर्णयं कृ 8 U *or* विधा 3 U.

Decrement, *n.* अपचय, अवसाद, क्षय, ह्रास.

Decrepit, *a.* जीर्ण; जराक्रांत, वार्धक्यग्रस्त । –ude, *n.* जीर्णावस्था; जरा, वार्धक्यं.

Decrescent, *a.* क्षयिन्, क्षयिष्णु.

Decretal, *n.* नियोगसंग्रह.

Decretory, *a.* निर्णायक निश्चायक.

Decrown, *vt.* मुकुटं अपहृ 1 P, राजपदात् पत् *c.*

Decry, *vt.* अवाक्षिप्, आक्षिप् *both* 6 P, निंद् 1 P, परिवद् 1 P । Decrial, *n.* आक्षेप, परिवाद.

Decumbent, *a.* निषण्ण, शयान.

Decuple, *a.* दशगुण.

Decussate, *a.* व्यत्यस्त.

Dedicate, *vt.* उत्सृज् 6 P; विनियुज् 7 A. *c*; प्रतिष्ठा *c*, समृ *c* । –ion, *n.* उत्सर्ग, विनियोग; प्रतिष्ठा; समर्पणं । –ory, *a.* समर्पक.

Deduce, *vt.* अपवह् 1 P, अनुमा 2 P. 3 A, ऊह् 1 A; अवगम् 1 P । –ible, *a.* अनुमेय.

Deduct, *vt.* अवच्छिद् 7 P, उद्धृ 1 P, ऊन् 10 U, व्यवकल् 10 U । –ion, *n.* (1) उद्धार, उद्धृतांश, व्यवकलनं; (1) अनुमानं, अनुमिति *f.*, ऊहनं, निगमनं.

Deed, *n.* कर्मन् *neu.*, कार्यं, कृति *f.* कृत्यं, क्रिया, चेष्टितं, चेष्टा; लेखपत्रं। Title d., आगम.

Deem, *vt.* अवगम् 1 P, गण् 10 U, मन् 4 A, संकल् 10 U, संभू *c.*

Deep, *a* अगाध, अस्थान, ग(गं)-भीर, गहन, गाढ; अगम्य, गूढ, दुर्ज्ञेय, दुर्बोध; अत्यंत, निबिड, परम; (of sounds) मंद्र; (of colours) घन; निम्न, नीच; दूर-दृष्टि, विदग्ध, सूक्ष्मबुद्धि । *n.* समुद्र, सागर; अतलस्पर्श; पातालं; हृदयकुहरं । D.-laid, *a.* सुघटित । D. -mouthed, *a.* मंद्रनाद । D. -read, बहुश्रुत । D. -rooted, *a.* सुरूढ । D. -seated, *a.* गाढ; सुप्रतिष्ठित । D. of night, निशीथ, मध्यरात्र । -ly, *adv.* अतीव, अत्यंतं, गाढं, दीर्घं, नितरां, भृशं । -ness, *n.* गाढता, गांभीर्यं । -en, *vt.* गंभीरीकृ, घनीकृ *both* 8 U; बृंह् *c*, वृध् *c*; *vi.* गंभीरीभू, घनीभू *both* 1 P; एध् 1 A, वृध् 1 A.

Deer, *n.* एण, कुरंग, कृष्णसार, पृषत, प्लाविन् *m.*, मरुक, मृग, रुरु *m.*, रोहित, लिशु *m.*, वनन, हरिण.

Deface, *vt.* दुष् *c*, विकृ 8 U, विरूप् 10 U; अपमृज् 2 P, विलुप् *c* ।

De facto, *adv.* वस्तुतः

Defalcate, *vt* सकपटं अपहृ 1 P *or* आत्मसात्कृ 8 U; न्यूनीकृ 8 U । -ion, *n.* सकपटापहरणं, सकपटात्मसात्करणं, ग्रसनं.

Defame, *vt.* अपभाष् 1 A, अपवद् 1 P, अभिशंस् 1 P, अभ्यसूयति *Den.*, आक्षिप् 6 P, कलंकयति *Den.*, निंद् 1 P, परिवद् 1 P । -ation, *n.* अपभाषणं, अपवाद, आक्षेप, निंदा, परिवाद । -atory, *a.* अपभाषक, अपवादक, परिवादक । -r, *n.* अभ्यसूयक, आक्षेपक, निंदक, परिवादिन् *m.*

Default, *n.* अप्राप्ति *f.*, अभाव, विरह; अतिक्रम, अननुष्ठानं, लोप; ऋणशोधनासामर्थ्यं । *vi.* कर्तव्ये प्रमद् 4 P *or* स्खल् 1 P; ऋणशोधने असमर्थ *a.* भू 1 P । In d. of, (अमुकस्य) अभावे (*with Gen. or in comp.*) । -er, *n.* अपराधिन्, प्रमादिन् *both m.*

Defeasance, *n.* समयलोप, संविद्भंग; नियमातिक्रम.

Defeasible, *a.* लोपनीय.

Defeat, *vt.* अभिभू 1 P, जिं 1 P, दम् *c*, पराजि 1 A, परा(रि)भू 1 P, विजि 1 A; खंड् 10 U, निष्फलीकृ 8 U, भंज् 7 P, मोघीकृ 8 U; व्याहन् 2 P । *n.* अभिभव, अभिभूति *f.*, पराजय, परा(रि)-भव; खंडनं, निष्फलीकरणं, भंग; व्याघात.

Defeature, *vt.* विकृ 8 U, विरूप् 10 U, विरूपीकृ 8 U, व्यंगयति *Den.*

Defecate, *vt.* निर्मलीकृ 8 U, शुध् *c* । *vi.* निर्मलीभू 1 P, शुध् 4 P । -ion, *n.* मलापगम, शोधनं.

Defect, *n* अपचार, दोष, न्यूनता, वैकल्यं; अभाव, विरह। Bodily d., व्यंगत्वं। -ion, *n*. च्युति *f*, पतनं, भ्रंश; (पक्ष)त्याग। -ive, *a*. विकल, सदोष; अपूर्ण, न्यून.

Defence, *n*. त्राणं, पालनं, रक्षणं; उत्तरं; प्रतिवाद; वप्र *mn*. । -less, *a*. अनाश्रय, अरक्षित, अशरण; निरायुध, निःशस्त्र.

Defend, *vt*. अव् 1 P, त्रै 1 A, पा 2 P. *c*, रक्ष् 1 P; प्रमाणीकृ 8 U, समर्थ् 10 U। *vi*. उत्तरं दा 3 U; अभियोगं विवद् 1 A। -ant, *n*. अभियुक्त, प्रतिवादिन्, प्रत्यर्थिन् *all m*. । -er, *n*. गोप्तृ, त्रातृ, पालक, रक्षक, रक्षितृ *all m*.

Defensible, *a*. प्रत्युत्तरार्ह; समर्थनीय.

Defensive, *a*. पालक, रक्षक। *n* रक्षणं, रक्षाविधानं; आत्मसंरक्षणं.

Defer, *vt*. (1) विलंब् 1 A, व्याक्षिप् 6 P; (2) निक्षिप् 6 P, समृ *c*। *vi*. (1) चिरायति-ते *Den*., मंदायते *Den*. विलंबं कृ 8U, कालं क्षै *c*; (2) अनुवृत 1 A, आदृ 6 A, वशीभू 1 P, स्वाग्रहं *or* स्वनिर्बंधं त्यज् 1 P, परमतं स्वीकृ 8 U. । -ence, *n*. अनुवर्तनं, परानुरोध, प्रश्रय, वश्यता। -ent, *a*. सप्रश्रय, सादर; परमतप्रवण, वश्य.

Defervescence, *n*. ज्वरशमनं.

Defiance, *n*. आह्वानं, युद्धाह्वानं; अवज्ञा, अवहेलना, धिक्कार; प्रतियत्न, विरोध.

Defiant, *a*. आह्वानकारक; अवमानिन् अविनेय, उद्धत, सावज्ञ; प्रतीप, विरोधिन्; अननुरोधिन्.

Deficiency, *n*. अपर्याप्तता, अपूर्णता, अल्पता, ऊनता, न्यूनता, वैकल्यं; अभाव, विरह, हीनता; न्यूनतापूरकं (परिमाणं).

Deficient, *a*. अपर्याप्त, अपूर्ण, न्यून, विकल; अल्प०, ०रहित, ०शून्य, ०हीन in comp.

Defile, *n*. दरी; दुर्मार्ग, संबाधमार्ग। *vt*. (1) कलुषयति *Den*., कलुषीकृ 8 U, दुष् *c*,. मलिनयति *Den*., मलिनीकृ 8 U; आधृष् *c*; अपवित्रीकृ 8 U; (2) (सैन्यं) श्रेणीरूपेण संचल् *c*। -ment, *n*. कलुषीकरणं, दूषणं; मालिन्यं; कौमारहरणं.

Define, *vt*. निर्णी 1 P, निश्चि 5 U, परिमा 3 A; उपलक्ष् 10 U, निरूप् 10 U, परिच्छिद् 7 P; लक्षणं व्याख्या 2 P; लक्ष् 10 U। -able, *a*. निर्वचनीय, व्याख्येय.

Definite, *a*. निर्णीत,निश्चित;नियत, परिच्छिन्न, परिमित; सरल, स्पष्ट; सिद्ध। -ly, *adv* नियतं, सनिश्चयं.

Definition, *n*. लक्षणं, व्याख्या; निर्देश, परिच्छेद.

Definitive, *a*. निर्णायक, निश्चायक; असंदिग्ध.

Deflagration, *n*. क्षिप्रज्वलनं, निर्दहनं.

Deflate, *vt*. अंतर्वायुहीनं कृ 8 U। -ion, *n*. (of prices) अवपातनं.

Deflect, *vi.* अपचर् 1 P, च्यु 1 A, भ्रंश् 1 A, विचल् 1 P । *vt.* भ्रंश् *c*, व्यावृत् *c* । -ion, *n.* उत्क्रम, भ्रंश, विचलनं; उन्मार्गगमनं.

Deflorate, *a.* नष्टपुष्प.

Deflower, *vt.* आधृष् *c*, दुष् *c*, कौमारं अपहृ 1 P, । क्षतयोनिं कृ 8 U.

Defluent, *a.* अधःसरत् .

Defluxion, *n.* अधःसरणं.

Defoliation, *n.* पर्णपात.

Deforest, *vt.* (प्रदेशं) अरण्यहीनं कृ 8 U.

Deform, *vt.* विकृ 8 U, विरूप् 10 U, व्यंगयति *Den.* व्यंगीकृ 8 U । -ed, *a.* कुरूप, पोगंड, विकलांग, विकृतांग, विरूप, व्यंग । -ation, *n.* व्यंगीकरणं; विरूपकरणं । -ity, *n.* कुरूपता, विरूपता, वैरूप्यं; विकलांगत्वं, व्यंगत्वं.

Defraud, *vt.* अतिसंधा 3 U, छल् 10 U, प्रतॄ *c*, वंच् *c*.

Defray, *vt.* अपाकृ 8 U, व्ययं शुध् *c or* स्वीकृ 8 U.

Deft, *a.* कुशल, चतुर, निपुण, निष्णात । -ness, *n.* चातुर्यं, नैपुण्यं.

Defunct, *a* उपरत, मृत; विरत-व्यापार.

Defy, *vt.* युद्धार्थं आह्वे 1 P; अनादृ 6 A, अवमन् 4 A, लघयति *Den.*

Degeneracy, *n.* अवनति *f.* गुणन्हास, परिभ्रंश.

Degenerate, *a.* परिभ्रष्ट; नष्टाचार; दुर्गत्यापन्न । *vi.* दुष् 4 P, भ्रंश् 1 A । -ion, *n.* अपकर्ष, अवनति *f.* परिभ्रंश.

Deglutition, *n.* निगरणं.

Degrade, *vt.* (पदात्) अवपत् *c*, *or* च्यु *c or* भ्रंश् *c*; अवनम् *c*, लघूकृ 8 U; अवमन् *c* । -ation, *n.* अधिकारभ्रंश, पदच्युति; अधोगति, अपकर्ष, गुणापगम; अवमानना । -d, *a.* पदभ्रष्ट; अपकृष्टःनीचावस्थ । -ing, *a.* गुणापहरक; पदभ्रंशक.

Degree, *n.* पदं,पदवी,स्थानं;अवस्था, दशा, स्थिति *f.*: उपपदं, उपाधि *m*; कुलं, गण, वंश, वर्ग; काष्ठा, कोटि *f.*, परिमाणं; अंश; क्रम. By d.s, क्रमशः, क्रमेण, शनैः । To a d., अत्यंतं,भृशं । The highest d., परा काष्ठा or कोटि *f.* । In some d., ईषत् .

Degust, *vt.* साभिलाषं आस्वाद् 1 A *c.*

Dehiscence, *n.* विदारणं; उन्मीलनं.

Dehydrate, *vt.* निर्जलीकृ 8 U.

Deictic, *a.* अभिधायक, निदर्शक.

Deify, *vt.* देवत्वं आरुह् *c*; देववत् आराध् 10 U । Deification, *n.* देवत्वारोपणं; देवत्वप्राप्ति *f.*

Deiform, *a.* देवाकार.

Deign, *vi.* आत्मानमवनम्य *or* अनुग्रहरूपेण or प्रसादपूर्वं कृ 8 U, *etc.*; अर्ह् 1 P *with inf*;

Deiseal, *n.* दक्षिणतोगति *f.*

Deism, *n.* अश्रौतास्तिक्यं; तर्कपूर्वकेश्वरत्ववाद.

Deity, *n.* देव, देवता, दैवतं; ईश्वर, *See* 'God'; परमेश्वरत्वं.

Deject, *vt.* उद्विज् *c*, विषद् *c* । -ed, *a.* उद्विग्न, खिन्न, दुर्मनस्क, विमनस्क, विषण्ण । -ion, *n.* उद्वेग, खेद, दौर्मनस्यं, विषाद, वैमनस्यं.

Delation, *n.* अभियोग, आक्षेप, दूषणं.

Delay, *vt.* अतिपत *c*, विलंब् 1 A, व्याक्षिप् 6 P; प्रतिरुध् 7 U । *vi.* चिरायति-ते *Den.*, विलंबं कृ 8 U । *n.* कालक्षेप, दीर्घसूत्रता, विलंब, व्याक्षेप; अंतराय, प्रतिरोध.

Delectable, *a.* आनंदकर, आह्लादक, मनोहर, रम्य, सुखावह । -ility, *n.* आल्हादकत्वं, रम्यत्वं.

Delectation, *n.* आनंद, प्रमोद, हर्ष.

Delectus, *n.* पाठसंग्रह.

Delegate, *n.* नियोगिन्, नियोजित, प्रतिनिधि *all m.* । *vt.* नियुज् 7 A. *c*, संदिश् 6 P । -ion, *n.* नियोजनं; नियोगि०, प्रतिनिधिमंडलं.

Delete, *vt.* अपमृज् 2 P. विलुप् *c* । -ion, *n* अपमार्जनं, विलोप.

Deleterious *a.* अनिष्ट, अपकारिन्, अहित, घातुक, शरारु, हिंस्र.

Deliberate, *a.* विचार°, विमर्शपूर्वक, समीक्ष्यकारिन्, दीर्घदर्शिन्; अवहित, कृतावधान; ऐच्छिक, बुद्धिपूर्वक; असाहसिक, अत्वरित, अशीघ्र, सावकाश । *vi.* चिंत्, ध्यै 1 P, विचर् *c*, विमृश 6 P, संमंत्र् 10 A. । *vt.* मनसि तुल् 10 U । -ly, *adv.* विचारपूर्वकं, *etc.* । -ion, *n.* चिंता, परामर्ष, मंत्रणा, विचार,-णा, विमर्श, समीक्षा; असाहसं; अशीघ्रत्वं, सावकाशत्वं । -ive, *a.* विचार०, विमर्शशील; विमृश्यकारिन्; मंत्रणाविषयक । -ness, *n.* विमर्शपूर्वकत्वं, समीक्ष्यकारित्वं.

Delicacy, *n.* मनोहर (विशेष्यं); मिष्टान्नं, सुग्रास, स्वाद्वन्नं; सुभगत्वं; माधुर्यं, लालित्य, सौरस्यं; शालीनता, सुशीलता, सौजन्यं; मार्दवं, सौकुमार्यं; प्रकृतिकोमलत्वं, ०दुर्बलत्वं.

Delicate, *a.* मधुर, मिष्ट, सुरस, स्वादु; कोमल, पेलव, मृदु, मृदुल, ललित, सुकुमार; सूक्ष्मग्राहिन्; सूक्ष्म; दुर्बल; भिदुर; सभ्य, सुजन, सुशील । -ness, *n.* माधुर्यं, *etc.*

Delicious, *a.* मधुर, मिष्ट, सुरस, स्वादु; आह्लादक, मनोहर । -ness, माधुर्यं, रमणीयता.

Delict, *n.* अपराध. दुष्कृति *f.*

Deligation, *n.* पट्टिकाबंधनं.

Delight, *n.* आनंद. आह्लाद, प्रमोद, संतोष, सुखं, हर्ष: आनंदन, हर्षकारणं । *vi.* आनंद्, मुद्, संतुष् हृष् *all c.*, सुखयति *Den.* । To be *or* feel d.ed, आनंद् 1 P, प्री 4 A, मुद् 1 A, संतुष् 4 P, हृष्

4 P । -ed, *a.* आनंदित, आह्लादित, प्रीत मुदित, संतुष्ट, हृष्ट । -ful, *a.* आनंदक, आह्लादक, मोदजनक, संतोषक, हर्षप्रद; मनोहर, रमणीय, । -fully, *adv.* सहर्ष, सानंदं.

Delimit, *vt.* मर्यादीकृ 8 U.

Delineate, *vt.* रूपरेखां लिख् 6 P; चित्र् 10 U; वर्ण् 10 U । -ion, *n.* रूपरेखालेखनं; आलेखनं, वर्णनं; आलेख्यं, चित्रं.

Delinquency, *n.* अपचार, अपराध दुष्कृति *f.*, दोष । -ent, *n.* अपचारिन्, अपराधिन्, दुष्कृतिन्.

Deliquesce, *vi.* आर्द्रीभू, द्रवीभू *both* 1 P., विली *Pass* । *vt.* आर्द्रीकृ, द्रवीकृ *both* 8 U, विली 9 P.

Deliquium, *n.* सूर्यप्रभापगम; मूर्च्छा, मोह.

Delirious, *a.* भ्रांतचित्त, मतिभ्रष्ट, विकलचेतस्.

Delirium, *n.* चित्तभ्रम, मतिभ्रंश; उत्कटाभिनिवेश.

Deliver, *vt.* अव् 1 P, उद्धृ 1 P, परित्रै 1 A, मुच् 6 P, रक्ष् 1 P; प्रसू 2 A; उद्गॄ 6 P; उच्चर् *c*, उदीर् *c*; कथ् 10 U, निविद् *c*; उत्सृज् 6 P, प्रतिदा 3 U, समृ *c* । D. up, अन्यसात् कृ 8 U । -ance, *n.* उद्धार, परित्राणं; मोक्ष, मोचनं, रक्षणं । -er, *n.* उद्धर्तृ *m*, तारक, त्रातृ *m.*, मोचक । -y, *n.* उद्धार, परित्राणं, मोचनं; अर्पणं, न्यसनं, प्रतिदानं; प्रसव, प्रसूति *f.*; उच्चारणं, व्याहार; संभाषणशैली.

Dell, *n.* कंदर, दरी.

Delta, *n.* नदीमुखपुलिन *mn.*

Delude, *vt.* अतिसंधा 3 U, प्रतॄ *c*, वंच् *c*, विमुह् *c*, संभ्रम् *c*.

Deluge, *n.* आप्लाव, जलप्रलय, विप्लव; अतिवृष्टि *f.*, धारासंपात; महाशब्दौघ; कल्पांत, प्रलय, संवर्त । *vt.* जलेन आच्छद् 10 U, निमस्ज् *c*, संप्लु *c*.

Delusion, *n.* आभास, इंद्रजालं, प्रपंच, भ्रम, भ्रांति *f.*, माया, मिथ्यामति *f.*, मोह, विवर्त; व्यामोह, कपटं, प्रतारणा, वंचनं । -ive, *a.* ऐंद्रजालिक, प्रापंचिक, भ्रांतिमय, मायिक; कपटिन्, प्रतारक.

Delve, *vt.* खन् 1 P । *vi.* (रहस्यं) अधिगम् 1 P । *n.* खातं, विवरं.

Demagogue, *n.* जनाग्रणी *m.*, प्रजानायक; जनप्रक्षोभक.

Demand, *n.* अभियोग, प्रार्थना; अनुयोग, प्रश्न; प्रार्थनाविषय । *vt.* अभियुज् 7 A, प्रार्थ् 10 U; अनुयुज् 7 A, प्रच्छ् 6 P । D. and supply, संपादनविनियोगसंबंध । In d., *pl.* बह्वन्वेषित । -ant, *n.* अभियोक्तृ *m.*, अर्थिन् *m.*

Demarcate, *vt.* मर्यादां *or* सीमां स्था *c* । -ion, *n.* मर्यादास्थापनं.

Dematerialize, *vt.* सूक्ष्मीकृ 8 U.

Demean (oneself), *vt.* (आत्मानं) अवनम् *c*, लघूकृ 8 U; आचर् 1 P, वृत् 1 A । –our, *n.* आचरणं, आचार, चरितं, चेष्टितं, वर्तनं, वृत्ति *f.*, व्यवहार.

Dementate, *vt.* उन्मद् *c*, संमुह् *c*.

Demented, *a.* उन्मत्त, उन्मादिन्, नष्टबुद्धि भ्रांतचित्त, वातुल, हतज्ञान.

Dementia, *n.* उन्माद, चित्तभ्रम, बुद्धिभ्रंश.

Demerit, *n.* अवगुण, दोष.

Demesne, *n.* भूमि, रिक्थं.

Demi-god, *n.* उपदेव, उपदेवता.

Demi-lune, *n.* अर्धचंद्र.

Demi-man, *n.* अर्धनर, किन्नर.

Demi-mondaine, *n.* कनेरा, वारांगना, वेश्या.

Demi-rep, *n.* पुंश्चली, बंधकी.

Demijohn, *n.* महाशराव.

Demise, *n.* मरणं, मृत्यु *m*.

Demission, *n*, (1) अधःपात, अपकर्ष, अवनति *f.*; (2) अधिकार°, राज्याधिकारत्याग.

Demiurge, *n.* विश्वकर्मन् *m.*, वेधस् *m*, हिरण्यगर्भ.

Demobilize, *vt.* (सैन्यं) विकॄ 6 P.

Democracy, *n.* जनतंत्रशासनं, प्रजातंत्रं, प्रजासत्ताकं राज्यं, जनताप्रभुत्वं.

Democrat, *n.* प्रजासत्तावादिन्, जनतातंत्रवादिन् *both m.* ।–ism, *n.* जनतातंत्रवाद । -ic, *a.* प्रजासत्ताक, जनतातंत्रीय.

Demoiselle, *n.* कन्यका, कुमारी.

Demolish, *vt.* निपत् *c*; उत्पट् *c*, उन्मूल् 10 U, ध्वंस् *c*, विनश् *c* । Demolition *n.* निपातनं; उत्पाटनं, उन्मूलनं, विध्वंस.

Demon, *n.* (1) असुर, दनुज, दानव, देवशत्रु, दैतेय, दैत्य, पूर्वदेव, यातुधान, रसातलेह, राक्षस, शुक्रशिष्य, सुरद्विष् *m*; अनृजु *m.*, कापिशेय, दर्व, निशाचर, पिंडक, पिशाच, भूत *mn.*, माय, रक्षस् *neu*, रात्रि-(त्रिं)चर; (2) (*also* 'Dæmon') अध्यक्षदैवतं; (3) अतिनिर्दय,° निष्ठुर । –iac, *a.* आसुर, पैशाच, भौत; *n.* भूतग्रस्त । –olatry, *n.* भूतपूजा । –ology, *n.* भूतविद्या.

Demonstrable, *a.* निदर्शनीय, प्रतिपादनीय; निर्णेय.

Demonstrate, *vt.* निदृश् *c*, प्रमाणयति *Den.*, प्रमाणीकृ 8 U, साध् *c*; निरूप् 10 U. निर्दिश् 6 P, वर्ण् 10 U । *vi.* लौकिकप्रदर्शनं कृ 8 U । –ion, *n.* निदर्शनं, प्रतिपादनं, सिद्धि *f.*; निर्णय, प्रमाणं; आविष्करणं, प्रदर्शनं, प्रादुर्भाव; निरूपणं, निर्देश, वर्णनं । –ive, *a.* निदर्शक, प्रतिपादक, साधक.

Demoralize, *vt.* धर्मभ्रष्टं कृ 8 U, धर्मात् भ्रंश् *c*; भयाकुलं कृ 8 U । –ation, *n.* धर्मभ्रंश; आचारभ्रष्टता; (सैन्यादिकस्य) भयोत्पन्नसंभ्रम.

Demos, *n.* जनता, प्रजा; पृथग्जनाः *pl.*

Demotic; *a.* लौकिक, प्राकृत.

Demulcent, *a.* शांतिद, शामक.

Demur, *vi.* विलंब् 1 A; आंदोलयति *Den.*, दोलायते *Den.* विक्लृप् 1 A, शंक् 1 A, संदिह् 2 U । *vt.* आक्षिप् 6 P; व्याक्षिप् *c* । *n.* विकल्प, शंका; विलंब, व्याक्षेप; आक्षेप । –rage, *n.* भांडव्याक्षेप-मूल्यं । –rant, *n.* आक्षेपक । Without d., निःशंकं: अविलंबं.

Demure, *a.* अनुद्धत, विनीत, शालीन; मृषानम्र, ०विनीत । –ness, *n.* विनय, शालीनता; मृषानम्रता.

Den, *n.* गर्त, गह्वरं, गुहा, बिलं, विवरं.

Denarius, *n.* दीनार.

Denationalize, *vt.* अराष्ट्रीकृ 8 U; राष्ट्रीयत्वं अपहृ 1 P.

Denaturalize, *vt.* स्वभावं विकृ 8 U.

Denature, *vt.* स्वभावं अपहृ 1 P.

Dendriform, *a.* वृक्षाकार; शाखिन्.

Dendrology, *n.* वृक्षशास्त्रं.

Denegation, *n.* निराकरणं.

Dengue, *n.* संधिसंज्वर.

Deniable, *a.* निराकरणीय, प्रत्याख्येय.

Denial, *n.* निरसनं, निराकरणं; खंडनं, निषेध, प्रत्याख्यानं । Self–d., आत्मनिग्रह स्वार्थत्याग.

Denigrate, *vt.* कृष्णीकृ 8 U; कलंकयति *Den*, दुष् *c.*

Denizen, *n.* निवासिन् *m*; नागरिक, पौर; ०गेह, ०वासिन्, *etc.* (*in comp.*)

Denominate, *vt.* अभिधा 3 U, आख्या 2 P, आह्वे 1 P, नामन् *neu.* कृ 8 U *or* दा 3 U, लक्ष् 10 U, व्यपदिश् 6 P । –ion, *n.* अभिधा, अभिधानं, आख्या, नामन् *neu.*, व्यपदेश, संज्ञा; वर्ग; संप्रदाय । –ional, *a.* सांप्रदायिक । –ive, *a.* अभिधायक, अभिधायिन्, आख्यायक; *n.* (Gramm.) नामधातु *m.* । –or, *n.* छेद, हर, हार.

Denote, *vt.* अभिधा 3 U, उपलक्ष् 10 U, निर्दिश् 6 P; लक्ष् 10 U; गम्, द्युत्, बुध् *all c*; अवच्छिद् 7 U, परिच्छिद् 7 U, विशिष् 7 P. *c* । –ation, *n.* अभिधानं, उपलक्षणं, निर्देश; अभिप्राय, अर्थ, भाव, शक्ति *f.* । –ative, *a.* अभिधायक, दर्शक, वाचक.

Dénouement, *n.* कथावसानं, निर्वहणं, निष्ठा, समाप्ति *f.*

Denounce, *vt.* (सर्वसंमुखं) अधिक्षिप् 6 P *or* निंद् 1 P *or* निर्भर्त्स् 10 U; (अपराधपापादिकं) उद्घुष् 10 U *or* प्रकाश् *c or* प्रख्या *c*; अभियुज् 7 U । –ment, *n.* अधिक्षेप निर्भर्त्सना; (गुप्तपापादि) प्रकटनं.

Dense, *a.* गाढ, घन, निबिड, संहत सांद्र; मूढ, मूर्ख । –ity, *n.* घनता, सांद्रता.

Dent, *n.* आघातचिह्नं । *vt.* आघातेन चिह्न् 10 U । –ed, *a-* आघातचिह्नित; दंतुर.

Dental, *a.* दंत्य.

Dentate, *a.* दंतुर.

Dentifrice, *n.* दंतधावनं.

Dentist, *n.* दंतवैद्य.

Dentition, *n.* दंतोद्गम.

Denudate, Denude, *vt.* नग्नीकृ, विवस्त्रीकृ *both* 8 U; अधिकारात् *or* पदात् भ्रंश् *c*; आवरणं अपहृ 1 P; शून्यीकृ 8 U.

Denunciate, *vt.* अधिक्षिप् 6 P *etc.* *See* 'Denounce' । –ion, *n.* गुप्तदोषप्रकटनं; अधिक्षेप, गर्हणं, निर्भर्त्सनं । –ory, *a.* गर्हणापूर्ण, निर्भर्त्सक.

Deny, *vt.* खंड् 10 U, निरस् 4 U, निराकृ 8 U, प्रत्याख्या 2 P; न दा 3 U; अपसंहृ 1 P; न प्रविश् *c* । D. oneself, (अमुककृत्यात्, ०भोगात्) विरम् 1 P.

Deobstruent, *n.* रेचकं.

Deodand, *n.* देवोपहार.

Deodar, *n.* देवदारु *m.*

Deodorize, *vt.* दुर्गंधं अपहृ 1 P.

Depart, *vi.* अपगम् 1 P, अपया 2 P, अपसृ 1 P, अपे 2 P, गम् 1 P, निर्गम् 1 P, प्रया 2 P, प्रस्था 1 A; उपरम् 1 P, मृ 6 A । *vt.* उत्सृज् 6 P, त्यज् 1 P । The d.ed, प्रेताः, मृताः *pl.* । –ure, *n.* अपक्रम, प्रयाणं, प्रस्थानं; मरणं, मृत्यु; अतिक्रम, प्रकृतत्याग । New d.ure, नवविचारसरणि *f.*; पुनःप्रारंभ.

Department, *n.* अंगं, विभाग, शाखा; अधिकार, व्यापार; प्रदेश, मंडलं.

Depauperate, *vt.* दरिद्रीकृ 8 U. वीर्यं *or* फलवत्त्वं अपहृ 1 P.

Depauperize, *vt.* अदरिद्रं *or* सधनं कृ 8 U, समृध् *c.*

Depend, *vi.* अवलंब् , आलंब् *both* 1 A; अपेक्ष् 1 A; विश्वस् 2 P; संबंध् *Pass.* । D. upon it, निःसंशयं, नूनं । That d.s, स्यात् । –able, *a.* अवलंबनीय, विश्वसनीय । –ant *n.* अवलंबिन् ; आश्रित, उपजीविन् , दास, भृत्य । –ence, *n.* अवलंबनं, अपेक्षा, आश्रय, निबंधनं; परवशता, पराधीनता, पारतंत्र्यं; समन्वय, संबंध; विश्रंभ, विश्वास, श्रद्धा । –ency, *n.* परतंत्रः *or* परसत्ताकः देश । –ent, *a.* अवलंबिन्; अधीन, आयत्त; परवश, पराधीन.

Depict, *vt.* आलिख् 6 P, चित्र् 10 U, वर्ण् 10 U.

Depilatory, *a.* लोमनाशक.

Deplenish, *vt.* रिच् *c*, शून्यीकृ 8 U.

Deplete, *vt.* रिक्तीकृ 8 U, रिच् *c*; क्षै *c*, विलुप् *c* । –ion, *n.* रिक्तता, शून्यत्वं.

Deplore, *vt.* अनुशुच् 1 P, परिदेव् 1 P, परिशुच् 1 P, विलप् 1 P । –able, *a.* शोचनीय.

Deploy, *vt.* (सेनाव्यूहं) विस्तॄ 9 U. *c* । *vi.* (विस्तृतव्यूहं) रच् 10 U.

Deplume, *vt.* निष्पक्षीकृ 8 U.

Depone, *vt.* शपथपूर्वकं कथ् 10 U *or* वद् 1 P; प्रमाणयति *Den.*, साक्ष्यं दा 3 U.

Depopulate, *vt.* निर्जनीकृ, विजनीकृ *both* 8 U.

Deport, *vt.* निर्वस्, निष्कष् *both c*; आचर् 1 P, वृत् 1 A । -ment, *n.* आचरणं, आचार, चर्या, चेष्टितं, वर्तनं, वृत्ति *f.*

Depose, *vt.* (1) राज्यपदात् *or* अधिकारात् पत् *c or* भ्रंश् *c*; (2) साक्ष्यं दा 3 U, शपथपूर्वं कथ् 10 U *or* वद् 1 P । - ition, *n.* (1) अधिकार°, राज्यभ्रंश; (2) साक्ष्यं, साक्ष्यकथनं; साक्ष्यपत्रं.

Deposit, *n.* उपनिधि *m.*, निक्षेप, न्यास; किट्टं, शेष । *vt.* निक्षिप् 6 P, न्यस् 4 P । -ary, *n.* निक्षेपग्राहक । -ory, *n* निक्षेपस्थानं; निधिगृहं.

Depot, *n.* आगारं; शाला; स्थानं.

Deprave, *vt.* दुष् *c*, भ्रंश् *c*; कलुषीकृ 8 U । -ity, *n.* अवनति *f.*, दुराचारता, भ्रष्टता । -d, a. दुराचार, दुर्वृत्त, भ्रष्ट.

Deprecate, *ut.* प्रार्थनया निवार् 10 U; विपरीतं प्रार्थ् 10 U *or* याच् 1 A; अनुशुच् 1 P; निर्भर्त्स् 10 U.

Depreciate, *vt.* लघयति *Den.*, लघूकृ 8 U; अर्घं अवनम् *c or* पत् *c*; अवमन् 4 A । -ion, मूल्यापकर्ष; लघूकरणं.

Depredation, *n.* अपहरणं, मोषणं, लुंठनं.

Depress, *vt.* अवपीड् 10 U; अवनम् *c*, निम्नीकृ 8 U, पत् *c*, भ्रंश् *c*; उद्विज् *c*, विषद् *c*, विषण्णं *or* खिन्नं कृ 8 U । -ion, *n.* अवपीडनं; अवनमनं, पातनं; पात, भ्रंश; उद्वेग, खिन्नता; खेद, विषाद; ग्लानि *f.*, सत्त्वभ्रंश, स्वास्थ्यापगम; विक्रयविरलत्वं; निम्नभाग; वातपरिवर्तनं; मंद्रीकरणं.

Deprive, *vt.* अपहृ 1 P; विनाकृ 8 U, वियुज् 7 A. *c*, हृ 1 P । -able *a.* अपहार्य । -al, -ation, *n.* अपहरणं, विनाकरणं; वियोग, विरह, नाश, हानि *f.*

Depth, *n.* अगाधता, गांभीर्यं, निम्नता; अतलस्पर्शं, उदरं, पराकाष्ठा; गर्भ, मध्यं; घनता; वैदग्ध्यं, सूक्ष्मबुद्धित्वं । Out of one's d., कुंठितमति.

Depurate, *vt.* निर्मलीकृ 8 U, शुध् *c* । *vi.* निर्मलीभू 1 P, शुध् 4 P.

Depute, *vt.* नियुज् 7 A.*c*, समादिश् 6 P, संप्रेष् *c*; निक्षिप् 6 P, न्यस् 4 P । -ation, *n.* नियोजनं, संप्रेषणं; नियोगिन् *m.*, नियोगिमंडलं; नियुक्तजनाः (*used also in sing.*) । -ize, *vi.* नियोगिन् *a.* भू 1 P; अनुनियोजनं प्रवृत् 1 A.

Deputy, *n.* नियोगिन् *m*, प्रतिनिधि *m.*, प्रतिपुरुष.

Derange, *vt.* विक्षिप् 6 P, विपर्यस् 4 U. *c*; विभ्रम् *c*; क्रमभंगं कृ 8 U; विक्षुभ् *c.* । -d, *a.* मतिभ्रष्ट; ईषदुन्मत्त;

अव्यवस्थित, विपर्यस्त । –ment, अव्यवस्था,क्रमभंग,विक्षेप, व्युत्क्रम.

Derelict, *a.* परित्यक्त । *n.* परित्यक्तनौका । –ion, *n.* परित्याग; परित्यक्तता; (कर्तव्य०) उपेक्षा, पराङ्मुखता.

Deride, *vt.* उपहस् 1 P; अवक्षिप् 6 P। –ingly, *adv.* उपहासपूर्वं, सावक्षेपं.

Derision, *n.* अवहास, उपहास; अवक्षेप, अवहेलना

Derisive, *a.* उपहासक,परिहासात्मक, सोपहास.

Derive, *vt.* प्राप् 5 P, लभ् 1 A, साध् *c*; अनुमा 3 A. 2 P; निष्कृष् 1 P; निर्वच् 2 P, *c*, व्युत्पद् *c* । *vi.* उद्गम्, उद्भू *both* 1 P, जन् 4 A. । –ation, *n.* निरुक्ति *f.*, व्युत्पत्ति *f.*; निर्वचनं । –ative, *a.* यौगिक, व्युत्पन्न, साधित.

Derm, *n.* त्वच् *f.*; त्वचा.

Dermatitis, *n.* त्वक्पाक.

Dermatologist, *n.* त्वक्चिकित्सक.

Derogate, *vt.* न्यूनीकृ, लघूकृ *both* 8 U; उपेक्ष् 1 A, लघयति *Den.* । *vi.* न्यूनीभू 1 P; पत् 1 P, भ्रंश् 1 A । –ion, *n.* न्यूनीकरणं; अवज्ञा, उपेक्षा, निंदा; लाघवं । –ory, *a.* अवज्ञा०, लाघवकारक, ०कारिन्, निंदासूचक.

Descant, *n.* गीतं; प्रवचनं । *vi.* प्रवच् 2 P, विवृ 5 U, व्याख्या 2 P; गै 1 P.

Descend, *vi.* अवतॄ 1 P, अवरुह् 1 P; पत् 1 P, भ्रंश् 1 A; आक्रम् 1 U. 4 P, धृष् 1 P. 10 U; उद्भू 1 P, जन् 4 A. *Pass.*; निम्नीभू 1 P; प्रह्वीभू 1 P । –ant, *n.* वंशज, वंश्य, संतति *f.*; (*pl.*) अन्वय, वंश । –ed, *a.* उत्पन्न, जात, प्रसूत.

Descent, *n.* अवतरणं, अवरोहणं; उत्संग, निम्नं; अधोगति *f.*, अवनति *f.*, भ्रंश; आक्रम, धर्षणं, अन्वय, कुलं, वंश; संतति *f.*; अन्वयागम । Of noble d., अभिजात, कुलीन.

Describe, *vt.* निरूप् 10 U, वर्ण् 10 U, विवृ 5 U । –able, *a.* वर्णनीय.

Description, *n.* निरूपणं, निर्देश, वर्णनं-ना । –ive, *a.* निरूपक, वर्णनपर.

Descry, *vt.* आलोक् 10 U, दृश् 1 P, समीक्ष् 1 A

Desecrate, *vt.* अपवित्रीकृ 8 U, दुष् *c* । –ion, *n.* अपवित्रीकरणं.

Desert, *a.* अप्रहत, खिल, निर्जन, निर्जल; वन्य । *n.* (1) ऊषर *mn*, खिलं, धन्वन् *m.*, मरु *m.*, मरुस्थली; (2) पात्रत्वं, योग्यता; पुण्यं । *vt.* उत्सृज् 6 P, (परि) त्यज् 1 P; *vi.* सेनात्यागं कृ 8 U.

Deserve, *vt.* अर्ह् 1 P । –dly, *adv.* न्यायतः, योग्यतयैव । –ing, *a.* उचित, योग्य.

Deshabille, *n.* अल्पवेष.

Desiccate, *vt.* शुष् *c.* । *a.* शुष्क । –ion, *n.* शोषणं.

Desiderate, *vt.* अपेक्ष् 1 A, इष् 6 P । –ive, इच्छार्थक, ०दर्शक । –um, *n.* इच्छितवस्तु *neu.*

Design, *vt.* अनुसंधा 3 U, अभिप्रे 2 P, (परि० सं०)क्लृप् *c*, चिंत् 10 U, प्रयुज् 7 A *c*, संप्रधृ 10 U; इष् 6 P; आलिख् 6 P; घट् 10 U; उपयुज् *c* । *n.* उपाय, कल्पना, घटना, प्रयुक्ति *f.*, प्रयोग, युक्ति *f.*; अभिप्राय, अर्थ, आकूतं, आशय, उद्देश, चिकीर्षा, प्रयोजनं, संकल्प, हेतु *m*; रचना; आलिखनं, सूत्रपात । -ed, *a.* इच्छापूर्वक । -edly, *adv.* कामतः, बुद्धिपूर्वं । -er, *n.* परिकल्पक; आलेखक । -ing, *a.* कुशल, धूर्त, प्रतारक.

Designate, *vt.* अभिधा 3 U, उपलक्ष् 10 U, निदृश *c*, निर्दिश् 6 P, व्यपदिश् 6 P; गम्, ज्ञा, बुध् *all c*, वृ 5 U; नियुज् 7 A. *c* । -ion, *n.* उपलक्षणं;नियोजनं;लक्षणं; अभिधानं, आख्या, उपाधि *m.*, नामन् *neu.*, व्यपदेश, संज्ञा.

Desire, *vt.* अभिलष् 1.4 P, अभीष् 6 P, आकांक्ष् 1 U, इष् 6 P, ईह् 1 A, कम् 1. 10 A, वश् 2 P, वांछ् 1 P, समीह् 1 A, स्पृह् 10 U;अभ्यर्थ्, अर्थ्, प्रार्थ् all 10 U, याच् 1 A; आज्ञा *c*,आदिश् 6 P । *n.* अभिलाष, आकांक्षा, इच्छा, ईप्सा, ईहा, कामना, वांछा,समीहा,स्पृहा; काम, मदन, मैथुनेच्छा, रताभिलाष;भोग-लालसा, विषयासक्ति *f.*; इच्छा-विषय,समीहितं । -able,*a.*कमनीय, काम्य, स्पृहणीय; इष्ट । –ous, *a.* अभिलाष(षु)क, आकांक्षिन्, इच्छ(च्छु)क, इच्छु, ईप्सु, कमर, कम्र, कामुक, वांछिन्, स्पृहयालु, स्पृहालु.

Desist, *vi.* निवृत् 1 A, विरम् 1 P, विश्रम् 4 P; त्यज् 1 P, वृज् 10 U (*with Acc.*).

Desk, *n.* लेखनफलक, ०पीठिका.

Desolate, *a.* निर्जन, विजन, वि-विक्त; अवसन्न, उच्छिन्न, उध्वस्त, जर्जर, जीर्ण; निरानंद, निरुत्साह; अनाथ, असहाय । *vt.* उच्छिद् 7 P, निर्जनीकृ, शून्यीकृ, *both* 8 U; क्लिश् *c*, पीड् 10 U, बाध् 1 A । –ion, *n.* उच्छेद, निर्जनीकरणं, विध्वंस; निर्जनता, विविक्तत्वं; जर्जरत्वं, जीर्णत्वं; अतिक्लेश, अति-विषाद.

Despair, *vi.* निराश *a.* *or* भग्नाश *a.* भू 1 P, आशां त्यज् 1 P । *n* निराशता, नैराश्यं; नैराश्यकारणं । –ing, *a.* त्यक्ताश, निराश, भग्नाश.

Desperado, *n.* आततायिन् *m.* क्रूरजाल्म, प्रसह्यचौर.

Desperate, *a.* आशाहीन, त्यक्ताश, निराश, भग्नाश; निरपेक्ष, निर्भय, साहसिन्; आततायिन्; संकटा०, संदेहाकुल; अत्यपकृष्ट । –ion, *n.*

नैराश्यं, भग्नाशत्वं; पीडानिरपेक्षत्वं; आततायित्वं । -ly, *adv.* अतीव, अत्यंतं; जीवितनिरपेक्षं । -ness, *n.* नैराश्यं; संकटाकुलत्वं; निष्प्रतिकारत्वं.

Despicable, *a.* अधम, अवज्ञेय, कुत्सित, तिरस्काराई, तुच्छ, निंद्य, नीच.

Despise, *vt.* अवधीर् 10 U, अवमन् 4 A, तिरस्कृ 8 U, तुच्छीकृ 8 U, लघयति *Den.* । -ingly, *adv.* तिरस्कारपूर्णं, सावमानं.

Despite, *n.* अभ्यसूया, ईर्ष्या, मत्सर, अप्रीति *f.*, जुगुप्सा; अवहेलना; प्रतिरोध । *prep.* (*also* 'In d. of'), अवगणय्य; *also expressed by Gen. abs.* (*cf.* 'In spite of')। -ful, *a.* अभ्यसूयक, मत्सरिन्.

Despoil, *vt.* प्रसह्य अपहृ 1 P; मुष् 9 P, लुंट् 1 P.

Despond, *vi.* विषद् 4 P, विषादं गम् 1 P । -ency, *n.* उद्वेग, खेद, दौर्मनस्यं, विषण्णता, विषाद । -ent, *a.* उद्विग्न, खिन्न, दुर्मनस्क, विषण्ण । -ently, -ingly, *adv.* सखेदं, सविषादं, सोद्वेगं.

Despot, *n.* अनियतशासन, सम्राज् *both m.*; प्रजापीडक । -ic, *a.* अनियत, अप्रतिबद्ध । -ism, *n.* अनियतशासनं, निष्प्रतिबंधसत्ता; प्रजापीडनं.

Desquamate, *vt.* त्वचयति *Den.*, निस्त्वचीकृ 8 U । *vi.* निस्त्वचीभू 1 P.

Dessert, *n.* (भोजनानंतरं) फलाहार.

Destine, *vt.* नियुज् 7 A. *c*, निर्दिश् 6 P, परिक्लृप् *c* । -d, *a.* दैव०, पूर्वनियुक्त । -ation, *n.* निर्दिष्टस्थानं; लक्ष्यं; प्रयोजनं । -y, *n.* अदृष्टं, दिष्टं, दैवं, नियति *f.*, प्राक्तनं, भवितव्यता, भागधेयं, भाग्यं, विधि *m*, विपाक.

Destitute, *a.* अकिंचन, अतिदरिद्र, अनाथ, अशरण, असहाय, दीन, निराश्रय, निर्धन; परित्यक्त; वियुक्त, विरहित, शून्य । -ion, *n.* अकिंचनत्वं, दारिद्र्यं, दैन्यं, निराश्रयत्वं.

Destrier, *n.* युद्धाश्व; वारकीर.

Destroy, *vt.* अवसद् *c*, उच्छिद् 7 U, उत्पट् 10 P, उत्सद् *c*, उन्मूल् 10 P, क्षि 1. 5. 9 P. *c*, क्षै *c*. ग्रस् 1 A, छिद् 7 U, जंभ् *c*, जॄ *c*, दल् *c*, ध्वंस् *c*, नश् *c*, निर्दल् *c*, निर्मूल् 10 U, निर्वा *c*, प्रणश् *c*, प्रतिहन् 2 P, प्रधृष् *c*, प्रध्वंस् *c*, प्रबाध् 1 A, मृद् 9 P. *c*, विनश् *c*, विलुप् *c*, शत् *c*, शॄ 9 P, सद् *c*, हन् 2 P; (kill), मृ *c*, व्यापद् *c*, सूद् 1 A. 10 U, हन् 2 P. *c*. । -er, *n.* अंतक, ०घातक, नाशक, मारक, ०सूदन, शातयितृ *m*. हंतृ *m*.

Destructible, *a.* क्षय्य, नश्वर, भंगुर.

Destruction, *n.* अवसाद, उच्छेद, क्षय, ध्वंस, नाश, निर्मूलनं, विलोप; घात, मारणं, वध । Cosmic d., कल्पांत, जगत्क्षय, प्रतिसंचर, प्रतिसर्ग, प्रलय, प्रत्यवहार, भूतसंप्लव, युगांत, संवर्त, संहार.

Destructive, *a.* उच्छेदक, घातक, ध्वंसक, नाशक, प्रतिघातक; ०अंतक, ०अपह, ०हर *in comp.*

Desuetude, *n.* विच्छेद, विरति *f.*, विलोप.

Desultory, *a.* अनवस्थित, चंचल; अव्यवस्थित.

Detach, *vt.* पृथक्कृ 8 U. वियुज् 7 A. *c*, विश्लिष् *c* । -ed, *a.* विभिन्न, वियुक्त, विश्लिष्ट; अस्वार्थिन्, उदासीन; अपक्षपातिन्, मध्यस्थ । -ment, *n.* विभेद, वियोग, विश्लेष; गुल्म *mn*; औदासीन्यं; अपक्षपात, माध्यस्थं-स्थ्यं.

Detail, *n.* प्रपंच, विस्त(स्ता)र । *vt.* प्रपंचयति *Den.*, सविस्तरं कथ् 10 U *or* वर्ण् 10 U । In d., सविस्तरं । -ed, *a.* सविस्तर; प्रपंचित.

Detain, *vt.* निग्रह् 9 P, निरुध् 7 U, विरम् *c*; निवृ *c*, प्रतिरुध् 7 U, विधृ 10 U; आसिध् 1 P.

Detect, *vt.* दृश्, निविद् *both c*, प्रकटयति *Den.*, प्रकाश् *c*; अधिगम् 1 P, उपलभ् 1 A, विद् 2 P. 6 U । -ion, *n.* उपलब्धि *f.*, परिज्ञानं; (चौर्यादेः) प्रकटनं, प्रकाशनं । -ive, *n.* अपसर्प, चर, चार । -or, *n.* निवेदक, प्रकाशक.

Detention, *n.* निग्रह, निरोध; प्रतिबंध; आसेध, गुप्ति *f.*; विलंब.

Deter, *vt.* तर्ज् 1 P. 10 U, भी *c*; निवृत् *c*, निवृ *c*; निरुध् 7 U; प्रतिबंध् 9 P, विरम् *c* । -ment, -rence, *n.* तर्जनं, निवर्तनं, निरोध, निवारणं, प्रतिबंध । -rent, *a.* निरोधक, निवारक, निवर्तक, विरामक.

Detergent, *a.* परिमार्जक, मलहर, शोधक.

Deteriorate, *vt.* अपकृष् 1 P, दुष् *c* । *vi.* दुष् 4 P, पत् 1 P, भ्रंश् 1 A । -ion, *n.* अपकर्ष, गुणह्रास, दूषणं, भ्रंश, विकृति *f.*

Determine, *vt.* अवसो 4 P, निवृत् *c*, समाप् *c*; निरूप् 10 U, निर्णी 1 P, निश्चि 5 U, परिच्छिद् 7 P, परिमा 3 A, मर्यादीकृ 8 U, संक्लृप् *c*, स्था *c*; क्लृप् *c*, घट् *c*, रच् *c*; साध् *c*, उत्पद्, उन्नी *both c* । -d, *a.* कृतनिश्चय, दृढ, धीर, नियत, निश्चित, स्थिर । -ant, *a.* निर्णायक, निश्चायक । -ate, *a.* परिच्छिन्न, परिमित, मर्यादित; निर्णीत, निश्चित, व्यवस्थित । -ation, *n.* अध्यवसाय, अभिनिवेश, आग्रह, निर्धार-णं, निश्चय, प्रतिनिवेश, संकल्प; निर्णय, परिच्छेद, परिमिति *f.* । -ative, *a.* निर्णायक, निर्धारक, निश्चायक.

Determinism, *n.* संकल्पपारतंत्र्यवाद.

Detersive, *n.* मलापहरकं, शोधकं.

Detest, *vt.* जुगुप्सते, बीभत्सते *both* Desid., विद्विष् 2 U ।-able, *a.* गर्हणीय, बीभत्स, विद्वेष्य ।-ation, *n.* जुगुप्सनं, जुगुप्सा, विद्वेष.

Dethrone, *vt.* राजपदात् अवपत् *c* *or* भ्रंश् *c* ।-ment, *n.* पदच्युति *f.*

Detinue, *n.* अन्याय्यनिरोध.

Detonate, *vi.* महाशब्देन स्फुट् 6 P । *vt. Causal of prec. verb.*

Detour, *n.* असरलमार्ग.

Detract, *vt.* न्यूनयति *Den.*, न्यूनीकृ 8 U; अपवद् 1 A, लघूकृ 8 U । -ion, *n.* न्यूनीकरणं, अपवाद, निंदा, पैशुन्यं । -or, *n.* अपवादक, अभ्यसूयक, निंदक.

Detriment, *n.* अपाय,क्षति *f*,बाधा, हानि *f*; अनिष्टं, अहितं । -al, *a.* अपायकारक, घातुक, बाधक, शरारु; अहितावह.

Detrited, *a.* जीर्ण । Detritus, *n.* जीर्णोपलराशि *m.*

Detruncate, *vt.* उच्छिद् 7 P, विलू 9 U, शत् *c.*

Deuce, *n.* (1) द्विकं;(2) पीडा,बाधा, हानि *f*। Play the d. with, अवसद् *c* । -d, *a.* बृहत् , महत्.

Devastate, *vt.* अवसद् *c*, उद्ध्वंस् *c*, खिलीकृ 8 U, निर्जनीकृ 8 U, विप्लु 1 A । -ion, *n.* अवसादनं, उद्ध्वंस, विप्लव.

Develop, *vt.* अपावृ 5 P; निष्पद् *c*, साध् *c*;आविर्भू *c*,उद्भिद् *c*, परिणम् *c*, प्रपंचयति *Den*, विस्तॄ *c*, व्याकृ 8 U, पुष् 4.9 P,(सं०)वृध् *c*; प्रकटयति *Den.*, प्रकाश् *c* । *vi.* प्रवृध् 1 A, प्रसृ 1 P, विकस् 1 P, स्फुट् 6 P; स्फुर् 6 P, विस्तारं प्राप् 5 P *or* या, प्रवृत् 1 A; परिणम् 1 U, व्याकृ *Pass*, प्रकटयति *Den*, आविर्भू , प्रादुर्भू *both* 1 P. । -ment, *n.* निष्पादनं; आविर्भाव; परिणति *f*, परिणाम, प्रपंच, विकास, विस्तार, व्याकृति *f.*; संवर्धनं; प्रकटनं.

Deviate, *vi.* अतिक्रम् 1 U. 4 P, अतिचर् 1 P, च्यु 1 A, भ्रंश् 4 P. 1 A, व्यती 2 P; उन्मार्गे गम् 1 P; स्खल् 1 P । -ion, *n.* अतिक्रम, अन्यथाचरणं, च्युति *f.*, भ्रंश, विचलनं, व्यभिचार; उन्मार्गगमनं.

Device, *n.* उपाय, प्रयुक्ति *f.*, प्रयोग, युक्ति *f.*; छल, प्रतारणा; इच्छा, संकल्प; लक्षणं; अभिनवकल्पना.

Devil, *n.* पिशाच; मार; खल, दुर्जन; अत्युत्साह । -ish, पैशाच; अति-पिशुन, घोर, दारुण । *adv.* अतीव, अत्यंतं । -ry, *n.* अतिपैशुन्यं; भूतविद्या.

Devious, *a.* उन्मार्गस्थ, उन्मार्गिन्; अनृजु, असरल, कुटिल,जिह्म; प्रमादिन् , व्यभिचारिन्.

Devise, *vt.* (उप०)क्लृप् *c*, घट्ट् *c*, चिंत् 10 U, युज् *c* । *n.* भूमिरिक्थ-दायपत्रं.

Devitalize, *vt.* निर्बलीकृ 8 U.

Devoid, *a.* रहित, वर्जित, विरहित, शून्य, हीन.

Devoir, *n.* कर्तव्यं, कार्यं; *pl.* आदर, प्रश्रयदर्शनं, सत्कार.

Devolute, *vt.* अधिकारं समृ *c*; अधिकारे नियुज् 7 A *c* । -ion, *n.* (अधिकार) संक्रामणं, समर्पणं; अधिकारविलोप.

Devolve, *vt.* न्यस् 4 P, संक्रम् *c*, समृ *c* । *vi.* आगम् 1 P, संक्रम् 1 U. 4 P; अनुवंशं वृत् 1 A.

Dropsy, *n.* जलोदरं; शोथ-फ.

Dross, *n.* धातुमंड *mn.*, मंडूरं.

Drought, *n.* अनावृष्टि *f.*, अवग्राह, अवर्षणं; शुष्कता; तृष्णा.

Drove, *n.* गण, यूथं, समज; (of cows) धैनुकं (*cf.* आजकं, औरभ्रकं, औष्ट्रकं, हास्तिकं): समुदाय । -r, *n* यूथपाल.

Drown, *vt.* (जले) निमस्ज् *or* प्लु *both c* । To be d.ed, निमस्ज् 6 P, निमज्जनेन मृ 6 A.

Drowse, *vi.* निद्रेच्छु *a.* भू 1 P, स्वप् *Desid* । *vt.* विमुह् *c* । -y, *a.* तंद्रिल, निद्रालु । -iness, *n.* तंद्रा, निद्रालुत्वं, स्वप्नशीलता.

Drub, *vt.* लगुडेन तड् 10 U । To d. into, ताडयित्वा शिक्ष् *c*.

Drudge, *vi.* दासकर्मन् *neu.* कृ 8 U, आयस् 4 P । *n.* महायासिन्; क्षुद्रकर्मकारिन् । -ry, *n.* महायास, अविरतश्रम, दास्यवृत्ति *f*.

Drug, *n.* द्रव्यं; अगद, औषधं, भेषजं; दुर्विक्रेयं । *vt.* अगदेन संमिश्र् 10 U; (विषादिकं) पा *c*; (विषादिना) विमुह् *c* । -gist, *n.* औषधविक्रेतृ *m.*, अगदकार.

Drum, *n.* (small) डमरु *m.*, डिंडिम *m.*; आनक, ढक्का, दुंदुभि *m.*, पटह, पणव भेरी, मर्दल, मुरज, मृदंग; (of ear) कर्णोदरं; लोहपिटक *mn.* । *vi.* आनकं तड् 10 U *or* वद् *c* । -mer, *n.* झार्झर, पाणिध, मार्दंग । -stick, *n.* कोण, शारिका.

Dry, *a.* शुष्क; निर्जल, रूक्ष, वान; अनार्द्र; असार, नीरस; तृषित; पर्जन्यहीन; अनलंकृत; अरुंतुद, परुष । *vi.* शुष् 4 P; निर्जलतां प्राप् 5 P । *vt.* उच्छुष् *c*, शुष् *c*; क्षै *c* । D. -nurse, अंकपाली । -ness, *n* शुष्कता, शोष; निर्जलता, नीरसता.

Dryad, *n.* अरण्यानी, वनदेवता.

Dry-as-dust, *a.* नीरस, शुष्क.

Dual, *a.* द्विक, द्वितय, द्विसंख्य; द्विवाचक । -ism, *a.* द्वैतं, द्वैतवाद । -ity, *n.* द्वित्वं, द्वैतं, द्वैधं.

Dub, *vt.* (1) (अमुकपदे) नियुज् 7 A. *c*; (अमुकपदवीं) दा 3 U *or* आरुह् *c*; (2) स्नेहेन अंज् 7 P; (3) तड् 10 U, वद् *c* । -bing, *n.* चर्मांजनं.

Dubiety, *n.* अनिश्चितता, संदिग्धता.

Dubious, *a.* अनिश्चित, विकल्प्य, शंकनीय, संदिग्ध, संशयापन्न; अप्रत्यय, अस्थिर, दोलायमान; अस्पष्ट, संदिग्धार्थ; आशंकनीय, निषेधार्ह, बाध्य.

Dubitation, *n.* संशय, संदेह.

Dubitative, *a.* आशंकनीय, निषेधार्ह, बाध्य; संशयवाचक.

Duck, *n.* कादंब, वरट; वल्लभ-भा; निमज्जनं; मस्तकनमनं । *vi.* (1) निमस्ज् 6 P, अवगाह् 1 A; (2) शिरः नम् *c* । *vt.* अवगाह्, निमस्ज् *both c* । To make d s and drakes of, अपव्यय् 10 U । Lame d., पंगु श्रोण.

Duct, *n.* नाडि-डी *f.*, नालि-ली *f.*, शिरा.

Ductile, *a.* उद्वर्तनीय; वश्य, विनेय.

Dude, *n.* सुभगंमन्य; भूषणोन्मत्त.

Dudgeon, *n.* (1) क्रोध, रोष; (2) असिपुत्रिका, कृपाणिका.

Duds, *n. pl.* वस्त्राणि; जीर्णवासांसि, चीवराणि *all pl.*

Due, *a.* देय, परिशोध्य; उचित, योग्य; भवितव्य, भाव्य । *n.* देयं, परिशोध्यं; ऋणं; कर्तव्यं; ग्राह्यं, प्राप्यं; कर, राजस्वं, शुल्क *mn* । Duly, *adv.* यथोचितं; यथासमयं

Duel, *n.* द्वंद्वं, द्वंद्वयुद्धं.

Duffer, *n.* जड, मूढ, मूर्ख.

Dug, *n.* ऊधस् *neu.*, पयोधर.

Dulcet, *a.* श्रवणसुभग, श्रुतिसुख, सुस्वर; स्वादु; मनोहर.

Dulcify, *vt.* मधुरीकृ, स्वादूकृ *both* 8 U.

Dull, *a.* जड, मंद, मंदबुद्धि, मूढ, मूर्ख; अतीक्ष्ण, कुंठित, मंदधार, मुंड; अचपल, मंथर; निष्प्रभ, मलिन; आश्रित; आयासक, कष्टकर । *vt.* जडयति *Den.*, जडीकृ 8 U, मुह् *c*; कुंठ् 10 U; घनीकृ 8 U; मंदीकृ 8 U; निष्प्रभीकृ 8 U, मलिनयति *Den.*; खिद्, विषद् *both c* । *vi.* जडीभू 1 P, मंदायते *Den* । D. -brained, d. -witted, *a.* मंदबुद्धि, मूढ । -ard, *n.* जड, मूर्ख । -ness, *n.* जाड्यं; अतीक्ष्णता; मांद्यं, *etc.*

Dumb, *a.* अवाच्, मूक, वाणीहीन । To strike d., संभ्रम् *c*, विमुह् *c* । D. -show, मूकाभिनय । -ly, *adv.* तूष्णीम्; मूकवत् । -ness, *n.* मूकता; निःशब्दता.

Dumbfound, *vt.* जडीकृ, विस्मयाकुलं *a.* कृ *both* 8 U, विमुह् *c*, संभ्रम् *c*.

Dummy, *n.* मूक; कृतकप्रतिमा; कूट ० *in comp.*

Dump, *vt.* प्रसभं निक्षिप् 6 P *or* निधा 3 U । *n.* अवस्करराशि *m*; आघात.

Dumps, *n. pl.* उद्वेग, खेद, दौर्मनस्यं.

Dumpy, *a* ह्रस्वपीवर.

Dun, *a.* कृष्णपिंगल, श्याम; निरुल्लास । *vt.* साग्रहं ऋणशोधनं प्रार्थ् 10 U.

Dunce, *n.* अज्ञ, जड, मंदमति, मूढ, मूर्ख.

Dunderhead, *n* मूढमति, मूर्ख.

Dune, *n.* वालुकावप्र *mn.*

Dung, *n.* अवस्कर, उच्चार, गूथं, पुरीषं, विष्टा, शकृत् *neu.*, शमलं । –hill, शकृद्राशि *m.*

Dungeon, *n.* आंतर्भौमं कारागृहं.

Dupe, *n.* सुखवंचनीय । *vt.* प्रतॄ, वंच् *both c.*

Duplex, *a.* द्विध, द्विविध; द्विगुण.

Duplicate, *a.* द्विगुण; द्विविध; प्रतिमित । *n.* अनुलिपि *f.*, प्रतिलिपि *f.*, प्रतिलेख; प्रतिमां, प्रतिरूपं । *vt.* द्विगुणीकृ 8 U; अनुकृ 8 U.

Duplicity, *n.* द्वैधं, कैतवं, प्रतारणा.

Durable, *a.* अविनाशिन्, चिरस्थायिन्, दृढ, स्थिर । –ity, *n.* चिरस्थायिता, स्थैर्यं.

Durance, *n.* आसेध, गुप्ति *f.*, निरोध, बंधनं.

Duration, *n.* अवस्थानं, (अव) स्थिति *f.*: अविच्छेद, अविराम, नैरंतर्यं, प्रसक्ति *f.*, स्थायित्वं.

Durbar, *n* आस्थान, राजसभा.

Duress, *n.* आसेध, गुप्ति *f.*, निरोध, बंधनं.

During, *prep.* मध्ये, यावत्; ०पर्यंतं.

Dusk, *n.* प्रदोष, विकाल, संध्या, साय । –y, *a.* ईषत्कृष्ण; आनील; ईषत्तिमिर । –iness, *n.* ईषदंधकार.

Dust, *n.* क्षोद, धूलि-ली *f.*, पांशु-सु *m.*, रजस् *neut.*, रेणु *mf.*; अवस्कर; पराग; चूर्णं, पिष्टात । *vt.* निर्धूलीकृ 8 U, (अप०, परि०) मृज् 2 P. 10 U; प्रोक्ष् 6 P । To kick up a d., तुमुलं उत्पद् *c*, कलहं कृ 8 U । To throw dust in one's eyes, प्रतॄ, वंच् *both c* । –bin, *n.* अवस्करपिटक *mn* । –y, *a.* धूलिधूसर, पांसुल.

Duty, *n.* कर्तव्यं, अनुष्ठेयं, धर्म, विधेयं; कार्यं कृत्यं, नियम, विधि, व्रतं; अधिकार, नियोग; कर, शुल्क *mn.* । –ful, *a.* कर्तव्यनिष्ट, धर्मनिष्ट; आज्ञापालक.

Dux, *n.* शिष्याग्रणी *m.*

Dwarf, *n.* खट्टन, खट्टेरक, खर्व, न्यंच्, वामन, ह्रस्व । *a.* खर्व, न्यंच्, ह्रस्व । *vt.* खर्वीकृ, वामनीकृ *both* 8 U; वृद्धिं कुंठ् 10 U *or* स्तभ् 9 P. *c* । –ish, *a.* खर्व, ह्रस्वकाय, वामनमूर्ति.

Dwell, *vi.* (अधि०, नि०, प्रति०) वस् 1 P; स्था 1 P; वृत् 1 A; अध्यास् 2 A; विलंब् 1 A । To d. on, *or* upon, *vi.* निमग्न *a.* भू 1 P; प्रपंचयति *Den.* । –er, *n.* निवासिन् *m.* । –ing, *a.* आलय *mn.*, आवसथ निलय, निवास, भवनं, वसतिस्थानं । D. ing-place, d.-house, गृहं, गेहं.

Dwindle, *vi.* अपचि *Pass.*, अल्पीभू, न्यूनीभू *both* 1 P, क्षि *Pass.*, ह्रस् 1 P; भ्रंश् 1 A.

Dyad, *n.* द्वितयं, युग्मं; द्व्यणुकं.

Dye, *vt.* रंज् 10 U, वर्ण् 10 U; वर्णेन लिप् 6 P । *n.* रंग, राग, वर्ण, वर्णक-का, लेप । -r, *n.* रंजक.

Dying, *a.* म्रियमाण, मरणोन्मुख; मर्त्य; क्षयिष्णु; मरणकालकृत, ॰उक्त, ॰दत्त.

Dyke, *n.* खातं, खेयं, परिखा; धरण, पिंडल, सेतु *m.*

Dynast *n.* अधिपति, नृपति, राजन्, शास्तृ *all m.*; वंशस्थापक । -y, *n.* अन्वय, कुलं, वंश.

Dysentery, *n.* अतिसार, संग्रहणी.

Dysorexia, *n.* क्षुधानाश.

Dyspepsia, *n.* अग्निमांद्यं, अजीर्णं, अपचनं, अपाक.

Dyspeptic, *a.* अजीर्णत्रस्त.

Dyspnœa, *n.* श्वासस्तंभ.

Dysuria, *n.* मूत्रस्तंभ.

E.

Each, *a. pr.* प्रत्येक; एकैक.

Eager, *a.* उत्कंठ, उत्सुक, लालस, सोत्साह; उत्कट, उदग्र, गाढ, तीव्र, नितांत, प्रबल । -ly, *adv.* सोत्कंठं; गाढं । -ness, *n.* उत्कंठा, औत्सुक्यं; उत्कटत्वं, गाढता, प्राबल्यं.

Eagle, *n.* उत्क्रोश, उरगाशन, खगेश्वर, गरुड, गरुत्मत् *m*, तार्क्ष्य, वैनतेय । -eyed, *a.* दीर्घ॰, सूक्ष्मदृष्टि.

Ear, *n.* कर्ण, पैंङ्ग(ञ्ज)प *mn.*, शब्दग्रह, श्रव, श्रवण *mn.*, श्रवस् *neu.*, श्रुति *f.*, श्रोत्रं; (of corn) कणिशं, मंजरी । All e., अत्यंतावहित । To be by the e.s, to fall together by the e.s, कलहं कृ 8 U, कलहायते *Den.* । To set by the e.s, कलहाय प्रवृत् *c or* प्रोत्सह् *c* । To give e. to, अवधा 3 U, मनो दा 3 U । E.-ache, कर्णशूल *mn* । E.-drop, E.-ring, कर्णपूर, कर्णभूषणं, कर्णिका, कर्णोत्तंस, कुंडलं । E.-drum, *n.* कर्णदुंदुभि *m.*, कर्णोदरं । E.-lap (lobe), *n.* कर्णपालि-ली *f.* । E. mark, विशेषकचिह्नं । Outer part of e. (Auricle), कर्णशष्कुली । E.-pick, *n.* कर्णकंडूयनी । E.-wax, कर्णकषाय, ॰किट्टं, ॰गूथ *mn.*, ॰मलं, ॰विट्कं, तोक्मं, पिंजूष । E.-piercing, *a.* कर्कश, कर्णकटु.

Early, *a.* अचिर, सद्यस्क; आद्य; अभिनव, प्रत्यग्र; औषस, प्रातःकालीन । *adv* अचिरेण; पूर्वं, प्राक्; आशु, सद्यः; प्रातः, प्रभाते । -ness, *n.* अचिरत्वं; आद्यत्वं; पूर्वत्वं.

Earn, *vt.* अर्ज्, उपार्ज् *both* 10 U. अर्ह् 1 P; अधिगम् 1 P, प्राप् 5 P । -ings, अर्जनं, उपार्जितं, वेतनं.

Earnest, *a.* गंभीर; अपरिहासिन्; उत्सुक, व्यग्र; एकाग्र, तत्पर, साभिनिवेश; उत्कट, गाढ। *n.* उपन्यास, निक्षेप, सत्याकृति । –ly, (*also* 'In e.) *adv.* साभिनिवेशं, आर्जवेन, सोत्सुकं। –ness, *n.* गंभीरता, गांभीर्यं; अभिनिवेश, आग्रह; औत्सुक्यं; उत्कटता.

Earth, *n.* अचला, अनंता, अब्धिवस्त्रा, अवनि-नी *f.*, इला, उर्वरा, उर्वी, काश्यपी, कीलिनी, कु *f.*, कुह्वरी, क्षमा, क्षार *f.*, क्षिति *f.*, क्षोणि-णी *f.*, क्ष्मा, खंडिनी, गिरिकर्णिका, गिरिस्तनी, गोत्रा, ग्मा, घनश्रेणी, जगती, ज्या, दक्षा, धरणी, धरा, धरित्री, धात्री, नगाधारा, पृथिवी, पृथ्वी, पेरा, बीजसू *f.*, भू *f.*, भूतधात्री, भूमि *f.*, मही, मेदिनी, रत्नगर्भा, रत्नसू *f.*, रसा, वसुधा, वसुंधरा, वसुमती, विपुला, विश्वंभरा, विश्वा, सर्वभृता, सर्वंसहा, स्थगणा, स्थिरा, हेमा; मृत्तिका, मृद् *f.* । –work, *n.* वप्र *mn.* । –worm, मृत्किरा । –en, *a.* मार्त्तिक, मृण्मय । –enware, *n.* कौलालकं, मृत्कांस्यं, मृद्भांडं ।–ly, *a.* और्व, और्वर, पार्थिव, भौम; ऐहिक, सांसारिक; मर्त्य; नश्वर; कायिक । E.ly –minded परमार्थविमुख । –y, *a.* मार्त्तिक, मृण्मय; पार्थिव; पृथ्वीतुल्य; अपारमार्थिक; वैषयिक; स्थूल; असूक्ष्म.

Earwing, *n.* कर्णजलूका, तैलपायिका.

Ease, *n.* निर्बाधता, सुखं, सौख्यं, स्वस्थता, स्वास्थ्यं; विश्रांति *f.*, शांति *f.*; अनायास, सुकरत्वं, सुसाध्यता, सौकर्यं। *vt.* दुःखचिंतादिकात् *or* भारात् मुच् 6 P; लघयति *Den.*, लघूकृ 8 U; उपशम् *c*, सांत्व् 10 U। *vi.* श्रमं न्यूनयति *Den.* । At e;, *a.* स्वस्थ; *adv.* यथाकामं, सुखेन । Ill at e., अस्वस्थ । –ful, *a.* स्वास्थ्यकर; सांत्वनपूर्ण । –ment, *n.* उपशमनं, सांत्वनं; अधिकार.

Easel, *n.* चित्रपीठिका, चित्राधार.

East, *n.* ऐंद्री, पूर्वा, प्राची; प्राच्यदेशाः *pl.* । *a* (*also* 'Eastern') पूर्व, पौरस्त्य, पौर्व, प्राच्, प्राच्य । *adv.* (*also* 'Eastward') पूर्वेण, पूर्वस्यां दिशि । -erly, *a.* पूर्वदिक्स्थ, प्राङ्मुख.

Easy, *a.* स्वस्थ; निर्बाध, निश्चित, शांत; अनायास, सुकर, सुसाध्य; सुगम, सुबोध, सुलभ; अनुकूल, सुखवश्य । –ness, *n.* अनायासता, सौकर्यं; सुबोधत्वं । –ly, *adv.* अनायासेन, अश्रमेण, सुखं.

Eat, *vt.* अद् 2 P, अश् 9 P, खाद् 1 P, घस् 1 P. जक्ष् 2 P, भक्ष् 10 U, भुज् 7 A; क्षै, ह्रस both *c*। *vi.* आहारं *or* भक्षणं कृ 8 U। To e. one's words, स्ववचनं निराकृ 8 U। –able, *a.* खाद्यं, भक्ष्यं; (*n. pl.*) भोजनसामग्री । E.ing –house, भोजनगृहं.

Eaves, *n. pl.* नीध्रं, वलभी, वलीक *mn.* । E. dropper, निभृतश्राविन् *m.*

Ebb, *vi.* परावृत् 1 A, प्रतिनिवृत् 1 A; क्षि 1 P, ह्रस् 1 P । *n.* वेलापसरणं; क्षय, ह्रास.

Ebony, *n.* कुद्दाल, कोविदार, चमरिक, युगच्छद, युगपत्रक, रक्तपुष्प । *a.* कोविदारोत्पन्न; कृष्ण.

Ebriety, *n.* क्षीबता, मदोन्माद.

Ebullient, *a.* उत्सिंचत्; उत्साहातिशयपूर्ण.

Ebullition, *n.* उत्सेक, उद्रेक, प्रक्वाथ; आनंदो०, खेदो०, क्रोधोद्रेक.

Ecaudate, *a.* पुच्छहीन.

Eccentric, *a.* केंद्रच्युत, केंद्रापगामिन्; उत्सूत्र, नियमातिरिक्त, रूढिच्युत, लोकविरुद्ध, विलक्षण, व्यभिचारिन् । -ity, *n.* केंद्रच्युति *f.*; उत्सूत्रता, रूढिविरोध, वैलक्षण्यं.

Ecclesia, *n.* धार्मिकसंघ.

Ecclesiastic, *n.* धर्मोपदेशक, पुरोहित.

Echo, *n.* प्रतिध्वनि *m.*, प्रतिध्वान, प्रतिनाद, प्रतिशब्द, प्रतिश्रुत् *f.*, प्रतिश्रुति *f.*; अनुकरणं । *vi* प्रतिध्वन् 1 P, प्रतिनद् 1 P; अनुरस् 1 P । *vt. causals of prec. verbs.*

Éclaircissement, *n.* विवरणं, विशदीकरणं.

Éclat, *n.* कीर्ति *f.*, यशस् *neu.*; आटोप; गौरवं, प्रशंसा.

Eclectic, *a.* उद्धारक, समाहारक.

Eclipse, *n.* उपप्लव, ग्रसनं, ग्रह, ग्रहणं, ग्रास; अपकीर्ति *f.*, अपयशस् *neu.* । *vt.* उपप्लु 1 A, ग्रस् 1 P. ग्रह् 9 P, तिमिरयति *Den.*, तिरोधा 3 U; प्रत्यादिश् 6 P । -d, *a.* उपप्लुत, ग्रस्त; तिरोहित; प्रत्यादिष्ट

Ecliptic, *n.* क्रांतिमंडलं, क्रांतिवृत्तं.

Economic, *a.* अर्थशास्त्रविषयक; (*also* Economical) मितव्यय; मितपरिमाण । E.s, *n.* अर्थशास्त्रं.

Economist, *n.* अर्थशास्त्रज्ञ.

Economize, *vt.* मितं विनियुज् 7 A. c.

Economy, *n.* व्यवहारनीति *f.*; अर्थशास्त्रं; मितव्यय, मितविनियोग; रचना, व्यवस्था । Political *e.*, अर्थविद्या, अर्थशास्त्रं.

Ecstasy, *a.* अत्यानंद, प्रहर्ष, हर्षपारवश्यं; चित्तोत्सेक.

Ecstatic, *a.* अत्यानंदपूर्ण, प्रहृष्ट; उत्सिक्त.

Ecumenical, *a.* सर्वसाधारण, सार्वलौकिक.

Eczema, *n.* कच्छु-च्छू *f.*, पामन् *m.*, पामा, विचर्चिका.

Edacious, *a.* गृध्नु, लोलुप.

Eddy, *n.* आवर्त, चक्रं, जलावर्त, पुटभेद, भ्रमि *f.*

Edema, *n.* शोथ, शोफ.

Edentate, *a.* दंतहीन, नीरद.

Edge, *n.* अश्रि-श्री *f.*, धारा, पालि-ली *f.*; अणि-णी *f.*; उत्संग, उपांत, पर्यंत, प्रांत, समंत, सीमन् *f.*, सीमा; अंचल, दशा; तीक्ष्णता; तेजस् *neu.* । *vt.* क्ष्णु 2 P, तिज् *c*, तीक्ष्णीकृ 8 U, निशो 4 P, शाणयति *Den*; उपांते वृत् 1 A, प्रांतयति *Den.*, सीमां विधा 3 U; प्रोत्सहृ *c*; शनैः चल् *c* । *vi.* शनैः चल् 1 P । To set the teeth on e., दंतहर्षं कृ 8 U । -d, *a.* तीक्ष्ण, सधार.

Edible, *a.* खाद्य, भक्ष्य.

Edict, *n.* उद्घोषणा, राजशासनं.

Edifice, *n.* प्रासाद, मंदिरं, हर्म्यं.

Edify, *vt.* (1) निर्मा 2 P, विरच् 10 U; (2) अधी *c*, उपदिश् 6 P, शिक्ष् *c* । Edification, *n.* उपदेश, देशना, शिक्षणं.

Edit, *vt.* मुद्रणार्थं सज्जीकृ 8 U *or* संपद् *c* *or* शुध् *c* । -ion, *n.* आवृत्ति *f.*, संस्करणं । -or, *n.* प्रकाशक, संपादक.

Educate, *vt.* अधी *c*, अनुशास् *c*, अनुशिक्ष् *c*, उपदिश् 6 P, पठ् *c*, प्रबुध् *c*, विनी 1 P, शास् *c*, शिक्ष् *c* । -ion, *n.* अध्यापनं, अनुशासनं, अनुशिष्टि *f.*, पाठनं, विद्याप्राप्ति *f.*, विनय, शिक्षणं, शिक्षा, संस्कार । -d, *a.* कृताभ्यास, विनीत, व्युत्पन्न, शिक्षित । -or, *n.* अध्यापक, अनुशास्तृ *m.*, उपदेशक, शिक्षक । -able, *a.* विनेय, शिक्षाग्राहक । -ional, *a.* शिक्षणविषयक । -ive, *a.* शिक्षणपूर्ण.

Educe, *vt.* उद्धृ 1 P, निगम् *c*. निष्कृष् 1 P.

Edulcoration, *n.* आम्लहरणं.

Eel, *n.* जलसर्प.

Eerie, *a.* घोर, दारुण, भयानक.

Efface, *vt.* निर्मृज्, प्रमृज् 2 P. *c*; विलुप् *c*; छायया आवृ 5 U । -ment, *n.* अपामार्जनं; विलोप.

Effect, *n.* उदर्क, कार्यं, परिणाम, फलं; निष्पत्ति, सिद्धि *both f.*; *pl.* रिक्थं; अभिप्राय, अर्थ, आशय, प्रयोजनं । *vt.* उत्पद्, जन्, संपद्, साध् *all c* । In e., अर्थतः, वस्तुतः । Of no e., निरर्थक, निष्फल । To give e. to, निर्वह् *c*, साध् *c* । To no e., वृथा, व्यर्थं । To take e., फल् 1 P; प्रवृत् 1 A । -ive, *a.* कार्यकृत्, कार्यसाधक, सफल । -ual, *a.* कार्यसाधक, पर्याप्त, फलग्राहक । -uate, *vt.* संपद् *c*, साध् *c*.

Effeminacy, *n.* स्त्रीस्वभाव, स्त्रैणं; क्लैब्यं, दौर्बल्यं.

Effeminate, *a.* स्त्रीस्वभाव, स्त्रैण; कोमल, क्लीब, दुर्बल, पौरुषहीन.

Efferent, *a.* अपवहत्.

Effervesce, *vi.* उत्सिच् *Pass.*, बुद्बुदायते *Den.*; अत्यंतोत्सुक *a.* भू 1 P । -nce, *n.* उत्सेक, बुद्बुदायितं; संक्षोभ.

Effete, *a.* क्षीण, जीर्ण, नष्टबल, विकल.

Efficacious, *a.* अमोघ, कार्यसाधक, फलग्राहक, सफल । -y, *n.* कार्यसाधकता, सफलत्वं.
Efficiency, *n.* कार्यक्षमत्वं, ०साधकता, निपुणता, नैपुण्यं, फलसाधकत्वं । -t, *a.* कार्यक्षम, निपुण, सिद्धिकर.
Effigy, *n.* प्रतिमा, प्रतिमूर्ति *f.*
Effloresce, *vi.* उत्फुल्ल् 1 P, स्फुट् 6 P । -nce, *n-* उत्फुल्लनं, पुष्पोद्गम, प्रस्फोटनं.
Effluent, *a.* निःस्रवत् । *n.* निर्गम, निःस्राव.
Effluvium, *n.* पूतिगंध, पूत्युद्गार.
Efflux, *n.* उद्गम, निर्गम; अपगम; अवसानं.
Effort, *n,* अध्यवसाय, आयास, उद्यम, (प्र)यत्न.
Effrontery, *n.* अविनय, औद्धत्यं, धाष्ट्र्यं, निर्लज्जता, प्रगल्भता.
Effulgence, *n.* तेजस् *neu.*, प्रभा, शोभा; उज्ज्वलत्वं, भास्वरत्वं । -t, *a.* उज्ज्वल, प्रभावत्, भास्वर.
Effuse, *vt.* निषिच् 6 P, प्रस्रु *c*; उत्सृज् 6 P । -ion, *n* निषेक, प्रस्रवणं, स्राव; उत्सर्ग, उत्सेक; उद्रेक.
Egesta, *n. pl.* उच्चार, गूथं, पुरीषं, विष्ठा, शकृत् *neu.*
Egg, *n.* अंडं, कोश, डिंब, पेशी । *vt.* उत्तिज्, प्रवृत्, प्रेर्, प्रोत्सह् *all c.*
Ego, *n.* आत्मन् *m.* । -ism, *n.* स्वार्थश्रेष्ठतावाद । -tism, *n.* अहंकार, अहंकृति *f.*, अहंपूर्विका, अहंभाव, आत्मस्तुति *f.*, आत्माभिमान । -tist, *n.* अहंकारिन्, अहंमन्य, अहंवादिन्, आत्माभिमानिन् *all m.* । -tistic, -tistical, *a.* अहंकृत, आत्मश्लाघिन्; गर्वित, साभिमान.
Egregious, *a.* असाधारण, असामान्य, लोकोत्तर, विलक्षण, विशिष्ट; प्रसिद्ध, विख्यात । -ness, *n* असामान्यता । -ly, *adv* अतीव.
Egress, *n.* अपक्रम, निर्याणं, निष्क्रमणं.
Eidolon, *n.* प्रतिमा, प्रतिमूर्ति *f.*
Eight, *n.* अष्टन् । *a.* अष्टन् । -fold, अष्टगुण । -h, *a.* अष्टम । In e. ways, अष्टधा.
Eighteen, *n.* अष्टादशन्.
Eighty, *n.* अशीति *f.*
Eirenicon, *n.* सामोपचार, सामोपाय.
Either, *conj.* (or) वा, वा-वा । *a.* अन्यतर, एकतर.
Ejaculate, *vt.* अकस्मात् वद् 1 P *or* उच्चर् *c* । -ion, *n.* आकस्मिकोदीरणं; उच्चार, उद्गार.
Eject, *vt.* उद्गॄ 6 P, उद्वम् 1 P; अपनुद् 6 P, अपाकृ 8 U, अपास् 4 U, निरस् 4 U, निष्कस् *c* । -ion, *n.* अपनोदनं, अपाकरणं, निष्कासनं । -ment, *n.* निष्कासनं.
Eke, *vt.* पूर् 10 U; कथमपि *or* कृच्छ्रेण पा *c or* वृध् *c* । *adv.* अपि च.

Elaborate, *a.* सुघटित; श्रमसिद्ध । *vt.* आयासेन साध् *c*; प्रपंचयति *Den*, विस्तॄ *c* । –ly, *adv.* भूरिश्रमेण, महायासेन । –ion, *n.* सायासघटना; विस्तार.

Élan, *n.* उत्साह; प्रागल्भ्यं.

Elapse, *vi.* अती 2 P, गम् 1 P, व्यतिक्रम् 1 P, व्यती 2 P.

Elastic, *a.* प्रकृतिप्रापक; आकुंचनीय, नम्य । –ity, *n.* प्रकृतिप्रापकत्वं; नम्यत्वं.

Elate, *vt.* उत्सिच् *c*, उल्लस् *c*, प्रमुद् *c* । –ion, *n.* उत्सेक, उल्लास, प्रमोद.

Elbow, *n.* कफणि-णी *f.*, कफोणि *f.*, कूर्पर । *vt.* कूर्परेण संघट्ट् 1 A । At one's e., अतिसमीपे । Out at e.s, *a.* मलिनवेष; दरिद्र, दीन । E. –grease, *n.* महायास.

Elder, *a.* अग्रज, अग्रिम, ज्यायस्, पूर्वज, वरीयस् । *n.* गुरु *m.*, गुरुजन, वृद्ध.

Eldest, *a.* ज्येष्ठ, वरिष्ठ, श्रेष्ठ.

Eldritch, *a* घोर, दारुण, भयानक, भीषण.

Elect, *a.* वृत; नियुक्त; विशिष्ट । *vt.* वृ 5. 10 U, वॄ 9 U; नियुज् 7 A. *c* । –ion, *n.* नियोजनं; निरूपणं; वरणं । –ive, *a.* जननियुक्त । –or, *n.* नियोजक; वरणाधिकृत *m.* । –orate, *n.* नियोजकगण.

Electric, *a.* विद्युन्मय, वैद्युत । E. current, विद्युत्प्रवाह । –ity, *n.* विद्युत्, विद्युच्छक्ति *both f.*

Electrify, *vt.* विद्युता पूर् 10 U *or* संक्षुभ् *c*; हर्षविस्मयादिना संभ्रम् *c* । –cation, *n.* वैद्युतीकरणं.

Electrocution, *n* विद्युद्वध.

Electrum, *n.* मिश्रधातु *m.*

Electuary, *n.* अवलेह, लेह्यं.

Elegance, *n.* चारुता, रामणीयकं, लालित्यं, लावण्यं, सुभगत्वं, सौंदर्यं; पदलालित्यं । –t, *a.* चारु, रमणीय, ललित, सुंदर, सुभग

Elegy, *n.* करुण०, शोकगीतं, ०काव्यं । –iac, *a.* करुणा०, शोकपूर्ण, ०प्रधान.

Element, *n.* तत्त्वं; मूलद्रव्यं; भूतं; वस्तुमात्रं; वसति *f.* । –al, *a.* भौत, भौतिक; तात्त्विक । –ary, *a.* एकद्रव्यक; अव्याकृत; निरवयव; प्राथमिक, मौल.

Elemosynary, *a.* दानार्थत्यक्त; दीनोपकारक; दानोपजीविन्.

Elenchus, *n.* आत्मविप्रतिपत्ति *f.*

Elephant, *n.* अनेकप, इभ, कंबु, करिन्, कुंजर, कुंभिन्, कुषिन्, गज, गर्ज, दंतावल, दंतिन्, द्विप, द्विरद, नाग, मतंगज, मदवृंद, महाकाय महामृग, मातंग, रदनिन्, रदिन्, वारण, शुंडाल, शुंडिन्, शूर्पकर्ण, षष्टिहायन, सामज, सिंधुर, स्तंबेरम, हस्तिन् *all m* । –ine, *a.* गजाकार, गजविषयक ।

A female e., इभ्या, कणे(ने)रा, करिणी, करेणु-णू *f.*, करेणुका, धेनुका, वशा, हस्तिनी । E. 5, 10, 20, 30 years old, बाल, पोत, विक्क, कलभ *resp.* । E. small limbed and without tusks from birth, मक्कण । E. in rut, प्रभिन्न, मत्त, मदकल, लग्न । E. out of rut, उद्वांत, निर्मद । E. driver, आधोरण, इभ्य, गजाजीव, निषादिन्, हस्तिपक, हस्त्यारोह, हास्तिक । Superintendent of e.s, महामात्र । E. herd, गजयूथं, हास्तिकं । E. goad, अंकुश, तोत्रं, वेणुकं, सृणि-णी *f.* । Rut-fluid from e.'s temples, दानं, मद । E.'s trunk, कर, शुंडा, हस्त । E.'s tusk, रद, रदन । E.'s binding-post, आलानं । E.'s caparisons, कल्पना, कुथ-थं-था, परिस्तोम, प्रवेणी, सज्जना । E.'s leather girth, कक्ष्या, चूषा, वरत्रा.

Elephantiasis, *n.* पदवल्मीक, शिलीपदं, श्लीपदं.

Elevate, *vt.* उत्था *c*, उन्नम् *c*, उन्नी 1 P; उन्नतिं नी 1 P; संस्कृ 8 U; उत्सिच् *c* । -ion, *n.* उत्थापनं, उन्नमनं; उत्कर्ष, उन्नति *f.*; औन्नत्यं, उच्छ्र(च्छ्रा)य, उत्सेध तुंगता; अधित्यका.

Eleven, *n*; *a.* एकादशन् । -th, *a.* एकादश । E. th hour, अंतिमक्षण *mn.*

Elf, *n* भूत; अप्देवता.

Elicit, *vt.* उद्धृ 1 P, निर्गम् *c*; निष्कृष् 1 P*c*, अनुमा 2 P. 3 A.

Elide, *vt.* लुप् *c* । -sion, *n.* लोप.

Eligible, *a.* ग्राह्य, वरणार्ह, वरणीय; योग्य । -ity, *n.* ग्राह्यता, वरणीयत्वं.

Eliminate, *vt.* अपाकृ 8 U, अपास् 4 U, निरस् 4 U, निष्कस् *c*; निराकृ 8 U; विलुप् *c* । -ion, *n.* अपाकरणं; विलोप; आहरणं.

Eliquation, *n.* द्रवीकरणं, विलयनं.

Élite, *n.* शिष्टाः *pl.*, शिष्टजनाः *pl.*

Elixir, *n.* रसायनं.

Ellipse, *n.* अंडवृत्तं, उपवृत्तं, वृत्तकल्पं.

Ellipsis, *n.* अध्याहार, समर्थपदलोप.

Elliptic, *a.* (1) अंडाकार, वर्तुलप्राय; (2) अध्याहार्य; न्यूनपद.

Elocution, *n.* वक्तृत्वं, वाग्मिता; भाषणशैली; वाणी । -ary, *a.* वक्तृत्वविषयक.

Eloge, *n.* श्लाघा, स्तुति *f.*

Elongate, *vt.* आयतीकृ 8 U, आयम् *c*, दीर्घीकृ 8 U, वितन् 8 U । -ion, *n.* दीर्घीकरणं, वितति *f.*

Elope, *vi.* निभृतं अपक्रम् 1 P *or* पलाय् 1 A । -ment, *n.* निभृतपलायनं.

Eloquence, *n.* वक्तृत्वं, वाग्मिता; वाग्वैभवं; मनोहारिवचस् *neu.* ।

–t, *a*. वाक्पंडित, वागीश, वाग्मिन्; चारुवचस्.

Else, *adv*. अन्यथा, इतरथा; अपि च। –where, *adv*. अन्यत्र, इतरत्र, परत्र.

Elucidate, *vt*. प्रकाश् *c*; विवृ 5 U, विशदीकृ 8 U, व्याख्या 2 P। –ion, *n*. विवरणं, व्याख्यानं। –ive, –ory, *a*. व्याख्यापक.

Elude, *vt*. कपटेन अन्वेषणां निष्फलीकृ 8 U; निभृतं पलाय् 1 A। –sive, *a*. दुर्ग्राह्य; अपक्रमणशील। –sion, *n*. अपसरणं। –sory, *a*. मायाविन्, मोहकारक.

Elysium, *n* नंदनं, स्वर्ग। –ion, *a*. स्वर्गीय, स्वर्ग्य.

Emaciate, *vt*. कृशं *a*. कृ 8 U, कृशीकृ 8 U, क्षै *c*, तनूकृ 8 U, ह्रस् *c*। *vi*. क्षि 1 P, ह्रस् 1 P। –d, *a*. कृश, क्षीण। –ion, *n*. मांसक्षय, मांसापचय; कार्श्यं, कृशता, क्षीणता, ग्लानि *f*.

Emanate, *vi*. निःसृ, प्रसृ, *both* 1 P; प्रवृत् 1 A; उत्पद् 4 A, उद्गम्, उद्भू, प्रभू, *all* 1 P। –ion, *n* उद्गम, उद्भव, निर्गम; प्रभा; प्रसृति *f*, प्रसरणं.

Emancipate, *vt*. मुच् 6 P. *c*, विनिर्मुच् 6 P; दास्यं नश् *c*; स्वातंत्र्यं प्राप् *c*। –ion, *n*. मुक्ति *f*., मोक्ष, विमोचनं.

Emasculate, *vt*. वृषणौ छिद् 7 P; पुंस्त्वं *or* वीर्यं नश् *c*; स्त्रैणं *a*. कृ 8 U। –d, *a*. छिन्नमुष्क; नष्टवीर्य, क्लीब, हृतपुंस्त्व। –ion, *n*. पुंस्त्वनाश; मुष्कच्छेद.

Embalm, *vt*. द्रव्यैः रक्ष् 1 P *or* अक्षयीकृ 8 U.

Embank, *vt*. वप्रेण परिक्षिप् 6 P *or* बंध् 9 P। –ment, *n*. वप्रबंध.

Embar, *vt*. आसिध् 1 P, निरुध् 7 U, बंध् 9 P; प्रतिबंध् 9 P.

Embargo, *n*. नौकागमननिषेध, पण्यनिषेध.

Embark, *vt*. नौकायां निविश् *c* *or* निक्षिप् 6 P। *vi*. नावं आरुह् 1 P; प्रारभ् 1 A.

Embarrass, *vt*. आकुलयति *Den*., आकुलीकृ 8 U, संभ्रम् *c*; बाध् 1 A; प्रतिबंध् 9 P। –ing, *a*. प्रतिबंधक, भ्रामक। –ed, *a*. आकुल, संभ्रांत। In e.ed circumstances, आपद्ग्रस्त, दुस्थित। –ment, *n*. आकुलता, संभ्रम; कष्ट; व्यामोह.

Embassy, *n* दौत्यं; दूतमंडलं

Embattle, *vt*. (1) युद्धाय व्यूह् 1 U *or* सज्जीकृ 8 U; (2) वप्रैः सनाथीकृ 8 U.

Embedded, *a*. निगूढ, निविष्ट, निहित.

Embellish, *vt*. अलंकृ 8 U, परिष्कृ 8 U, प्रसाध् *c*, भूष् 10 U, मंड् 10 U। –ment, *n*. अलंकार, आभरणं, परिष्कार, प्रसाधनं, भूषणं, मंडनं.

Ember, *n.* अंगार *mn*; *pl.* अंगारशेषं, भसितं.

Embezzle, *vt.* कपटेन आत्मसात्कृ 8 U *or* विनियुज् 7 A. *c* । -ment, *n.* सकपटापहरणं; दुर्विनियोग

Embitter, *vt.* तिक्तीकृ, अमधुरं *a.* कृ *both* 8 U; क्लिश्, प्रकुप्, संरभ् *all c* । -ment, *n.* प्रकोप.

Emblazon, *vt.* भूष् 10 U; लांछनेन मंड् 10 U.

Emblem, *n.* चिह्नं, लांछनं, संज्ञा; केतु *m*, ध्वज । -atic, *a.* द्योतक, लाक्षणिक, व्यंजक, सूचक.

Embody, *vt.* सशरीरं *a.* *or* मूर्तं *a.* कृ 8 U; स्पष्टं व्यंज् 7 P, समाहृ 1 P; अंतर्भू, समाविश् *both c* । -ment, *n.* मूर्तिमत्त्वं; मूर्ति *f.* । Embodied, *a.* मूर्त, मूर्तिमत्, शरीरिन्, सशरीर.

Embolden, *vt.* आश्वस् *c*; धैर्यं प्राप् *c*; प्रोत्सह् *c*.

Embolism, *n.* धमनीस्तंभ.

Embonpoint, *n.* पीनता, पीवरता, मांसलता.

Emborder, *vt.* सीमया *or* दशया सनाथीकृ 8 U.

Embosom, *vt.* हृदीव निधा 3 U; क्रोडीकृ 8 U; परिरभ् 1 A; परिवेष्ट् 1 A.

Emboss, *vt.* (1) गंडाकारेण उत्कृ 6 P *or* अलंकृ 8 U; (2) कवचेन आच्छद् 10 U; कोशे निविश् *c*; (3) गाढं संत्रस् *c*.

Embouchure, *n.* नदीमुखं.

Embowel, *vt.* अंत्राणि उद्धृ 1 P.

Embower, *vt.* कुंजेन परिवेष्ट् 1 A.

Embrace, *vt.* आलिंग् 1 P, आश्लिष् 4 P, उपगुह् 1 U, परिरभ् 1 A, परिवेष्ट् 1 A. *c*, परिष्वंज् 1 A, स्वंज् 1 A; परिक्षिप् 6 P, परिवृ 5 U; अंतर्गण् 10 U, अंतर्भू *c*, समाविश् *c*; व्याप् 5 P; अंगीकृ 8 U, आदा 3 U; ग्रह् 9 P, रम् 1 A । *n.* आलिंगनं, आश्लेष, उपगूहनं, क्रोडीकरणं, परिरंभ, परिष्वंग, संश्लेष; मैथुनं.

Embranchment, *n.* शाखोद्गम; शाखाविस्तार.

Embrasure, *n.* भित्तिरंध्रं, वप्रच्छिद्रं.

Embrocation, *n.* मर्दनं, विलेपनं.

Embroider, *vt.* सूचिकर्मणा चित्र् 10 U *or* भूष् 10 U; कार्मिकवस्त्रं कृ 8 U; चित्रीकृ 8 U । -y, *n.* सूचिशिल्पं, ०कर्मन् *neu.*

Embroil, *vt.* संक्षुभ्, संभ्रम *both c*; विक्षिप् 6 P; परिभ्रम् *c*; संबंध् 9 P; कलहे पत् *c* । -ment, *n.* संक्षोभ; कलहोत्पादनं.

Embrown, *vt.* कपिशीकृ 8 U.

Embryo, *n.* गर्भ, भ्रूण । In e. (*also* Embryonic), गर्भावस्थ; अपरिणत.

Emend, *vt.* शुध् *c*, समाधा 3 U । -ation, *n.* संशोधनं । -ator, *n.* संशोधक, संस्कर्तृ *m*.

Emerald, *n.* अश्मगर्भ, गारुत्मतं, मरकतं, हरिन्मणि *m.* । *a.* मारकत, हरित.

Emerge, *vi.* उत्था 1 P, उन्मस्ज् 6 P; उदि 2 P; आविर्भू, प्रादुर्भू *both* 1 P । -ence, *n.* उत्थानं, उन्मज्जनं; उदय; आविर्भाव.

Emergency, *n.* अकांडपात, आकस्मिकघटना, प्रसंग; आपद् *f.*, संकटं.

Emersion, *n.* उन्मज्जनं; उदय; पुनर्दर्शनं.

Emery, *n.* उत्तमलोहं.

Emetic, *n.* वमनं; वांतिकरं, वामकं.

Emeute, *n.* राजद्रोहिविप्लव.

Emiction, *n.* मूत्रोत्सर्ग.

Emigrate, *vi.* देशांतरं *or* देशाद्बहिः गम् 1 P । -ion, *n.* देशांतरगमनं । -ant *n.* देशांतरगामिन् *m.*

Eminence, *n.* उच्चता, उत्सेध; उत्कर्ष, प्राधान्यं, प्राबल्यं, मौख्यं; उच्चपदं, ०स्थानं.

Eminent, *a.* उच्च, उत्तुंग; अग्र्य, असामान्य, उत्कृष्ट, प्रधान, प्रमुख; वरेण्य, विशिष्ट.

Emissary, *n.* दूत, वार्तिक, संदेशहर; अपसर्प, प्रणिधि *m.*

Emission, *n.* उत्सर्ग, उद्गार, उद्गमनं; रेतःस्खलनं, वीर्यपात.

Emit, *vt.* उत्सृज् 6 P, उद्गॄ 6 P, उद्गम् 1 P; उदीर् *c.*

Emmet, *n.* पिपीलिका, लूतात, वम्री.

Emollient, *n.* अभ्यंजनं, शामकं, स्नेहनं.

Emolument, *n.* आय, प्राप्ति *f.* लाभ.

Emotion, *n.* भाव, विकार; अंतर्वेग, चित्तक्षोभ; रस; संक्षोभ । -al, *a.* भावमय, भावविषयक; सुक्षोभणीय.

Emperor, *n.* अधिराज, अधीश्वर, एकराज् *m.*, एकराज, एकाधिपति *m.*, चक्रवर्तिन् *m.*, मंडलेश्वर, राजाधिराज, सम्राज् *m.*, सार्वभौम.

Emphasis, *n.* अवधारणं; विशिष्टोच्चारणं । -ize, *vt.* द्रढयति *Den.*, सविशेषं उच्चर् *or* उदीर् *both c.*

Emphatic, *a.* दृढ, सनिश्चय; सविशेषोच्चारित; स्वराघातवत्; सावधारण । -ally, *adv.* सनिश्चयं, सावधारणं.

Empicture, *vt.* रूप्, वर्ण् *both* 10 U.

Empire, *n.* आधिपत्यं, आधिराज्यं, साम्राज्यं; राज्यं.

Empiric, *a.* अनुभवमूल; प्रयोगसिद्ध; आयुर्वेदविरुद्ध । *n.* अनुभवैकप्रमाणिन् *m.*; दुश्चिकित्सक, भिषक्पाश । -ism, *n.* अनुभवैकप्रामाण्यवाद.

Employ, *vt.* नियुज्, प्रयुज् *both* 7 A. *c*; अधिकृ 8 U; व्यापृ *c*; गम् *c* । -ee, *n.* अधिकृत, नियुक्त; भृत्य । -er, *n.* अधिकारिन् *m.*, नियोजक, स्वामिन् *m.* । -ment, *n.* नियोग, वृत्ति *f.* व्यवहार, व्यवसाय, व्यापार; उपयोग, प्रयोग.

Emplume, *vt.* पिच्छैः भूष् 10 U.

Empoison, *vt.* विषेण संमिश्र् 10 U; विषं पा *c or* दा 3 U; दुष् *c.*

Emporium, *n.* आपण, निषद्या, पणिक, पण्यवीथी, पण्यशाला, वाणिज्यस्थानं, विपणि णी *f.*

Empower, *vt.* अधिकृ 8 U.

Empress, *n.* महाराज्ञी.

Empressement, *n.* सौजन्यं, सौहार्दं.

Emprise, *n* साहसिकं कर्मन् *neu.*

Emption, *n.* क्रय.

Empty, *a.* रिक्त, शून्य; असार, निरर्थक, फल्गु; मंदबुद्धि; अन्नहीन, क्षुधार्त। *vt.* रिच् 7 U, शून्यीकृ 8 U; निःसृ *c*। *vi.* रिच् *Pass*, शून्यीभू 1 P। -ness, *n.* रिक्तता, शून्यता; असारता। E. -headed, *a.* मंदमति, मूर्ख.

Empyrean, *n.* परमस्वर्ग.

Emulate, *vt.* स्पर्ध् 1 A; विजिगीषते *Desid.* । -ion, *n.* प्रतिस्पर्धा, विजिगीषा.

Emulsion, *n.* पयस्यं, पायसं.

Enable, *vt.* क्षमं *a.* or समर्थं *a.* कृ 8 U.

Enact, *vt.* प्रशास् 2 P, विधा 3 U; आदिश् 6 P, संपद् *c*। -ment, *n.* विधि *m.*, शासनं; व्यवस्था; आदेश.

Enamel, *n.* धातुस्नेह; चित्रकाच; दंतधातु *m.*

Enamour, *vt.* वशीकृ 8 U; प्रीतिं जन् *c*। To be e.ed, अनुरक्त *or* आसक्त *a.* भू 1 P। -ed, *a.* अनुरक्त, आसक्त, जातप्रीति.

Encage, *vt.* पंजरे निरुध् 7 U.

Encamp, *vi.* निविश् 6 P। *vt.* (सैन्यं) निविश् *c*। -ment, *n.* निवेशनं; शिबिरं.

Encase, *vt.* कोशे निविश् *c.*

Enceinte, *a.* अंतर्वत्नी, गर्भवती, गर्भिणी.

Encephalon, *n.* मस्तिष्क, मस्तुलुंगक.

Enchafe, *vt.* उद्दीप्, तप् *both* c; क्लिश् 9 P, पीड् 10 U; क्षुभ् *c.*

Enchain, *vt.* निगडयति *Den*, शृंखलया बंध् 9 P.

Enchant, *vt.* अभिचर् *c*, मुह् *c*, वशीकृ 8 U; विलुभ् *c*, हृ 1 P; अतीव संतुष् *c*। -ing, *a.* मोहक, मोहिन्, विलोभक; चित्ताकर्षक, मनोहर। -ment, *n.* अभिचार, कुहक, माया, वशीकरणं; मोहनं, विलोभनं। -ress, *n.* मोहिनी.

Encharge, *vt.* नियुज् 7 A.*c.*

Enchase, *vt.* अनुव्यध् 4 P, खच् 10 U.

Enchiridion, *n* लघुग्रंथ.

Enchorial, *a.* ग्रामीण, जानपद.

Encincture, *vt.* मेखलया *or* मेखलयेव वेष्ट् 1 A.

Encircle, *vt* परिवृ 5 U, परिवेष्ट् 1 A, मंडलयति *Den.*

Enclasp, *vt.* परिरभ् 1 A, परिष्वंज् 1 A; परिक्षिप् 6 P.

Enclitic, *n.* निघ्नपदं.

Enclose, *vt.* आवृ 5 U, पिधा 3 U, परिवेष्ट् 1 A. *c*; वृत्या अवरुध् 7 U

or परिक्षिप् 6 P; निविश् *c* । –ure, *n.* प्राचीरं, वृति *f*; अंतर्गतपत्रं; वाट-टी.

Encloud, *vi* मेघैः आच्छद् 10.

Encomiast, *n.* प्रशंसक, स्तुतिपाठक.

Encomium, *n* गुणवर्णनं, प्रशंसा, श्लाघा, स्तुति *f*.

Encompass, *vt.* परिवृ 5 U, परिवेष्ट् 1 A; संवलयति *Den*, अंतर्भू 1 P, व्याप् 5, P, समाविश् *c* । –ment, *n.* परिवृति *f*.; परिवेष्टनं; व्यापकता.

Encore, *adv.* पुनरपि, भूयः । *n.* पुनरावृत्तिप्रार्थना.

Encounter, *vt.* संमुखं गम् 1 P, संमुखीभू 1 P; विरोधेन संमिल् 6 P; आक्षिप् 6 P; विग्रह् 9 P; समासद् *c* । *n.* समागम, संमिलनं; आहव, विग्रह, संमर्द; अकांडमिलनं । –er, *n.* प्रत्यनीक, विरोधिन्, वैरिन् *all m.*

Encourage, *vt.* उत्तिज्, प्रोत्सह् *both c*; धैर्यं प्राप् *c*, समाश्वस् *c*; अनुमुद् *c*; चुद् 10 U, प्रेर् *c* । –ment, *n.* प्रोत्साहनं; अनुमोदनं; समाश्वासनं । –ing, *a.* उत्साहवर्धक.

Encroach, *vi.* अनुज्ञां विना अतिक्रम् 1 U. 4 P; कपटेन ग्रह् 9 P । –ment, *n* सकपटग्रहणं; अननुमतं आक्रमणं.

Encrust, *vt.* शल्केन आच्छद् 10 U; बाह्यतः घनीकृ 8 U.

Encumber, *vt.* भारेण पीड् 10 U *or* प्रतिबंध् 9 P; भारं निविश् *c*; ऋणेन अवनम् *c*.

Encumbrance, *n.* (अति)भार; प्रतिबंध; गतिरोध.

Encyclical, *a.* परिवर्तिन्, संचारक, बहुजनप्रेषित.

Encyclopædia, *n.* विश्वकोश । –ic, *a.* सर्वज्ञानसंपन्न.

End, *n.* अंतं, अवसानं, पर्यवसानं, प्रत्यस्तमय, विराम, समाप्ति *f.*; अग्रं, अणि-णी *f.*, कोटि *f.*; अवधि, *m.* पर्यंत, प्रांत, मर्यादा, सीमन् *f.*, सीमा; अर्थ, आशय, प्रयोजनं, हेतु *m.*; कार्यं, परिणाम, फलं; अत्यय, मृत्यु *m.* । *vt.* अंतं गम् *c*, अवसो 4 P, निर्वृत् *c*, समाप् *c* । *vi.* अवसो, समाप् *both Pass*, विरम् 1 P; परिणम् 1 P, फल् 1 P । At one's wit's e., किंकर्तव्यतामूढ, व्यामोहित, संभ्रांत । To put an e. to, समाप् *c* । –ing, *a* अंत्य; *n.* पर्यवसानं; निर्वहण । –most, *a*, अंतिम । –less, *a.* अनंत, अनवरत अविरत, निरंतर, निरवधि । –lessness *n.* आनंत्यं, नैरंतर्यं.

Endanger, *vt.* संकटे पत् *c*.

Endear, *vt.* प्रेमास्पदं *a* कृ 8 U, अनुरागं उत्पद् *c* । –ment, *n.* प्रणय, स्नेह; विलास.

Endeavour, *vi.* उद्यम् 1 A, उद्युज् 7 U, घट् 1 A चेष्ट् 1 A, यत् 1 A, प्रयत् 1 A, व्यवसो 4 P । *n.* आरंभ, उद्यम, प्रयत्न, यत्न, व्यवसाय.

Endeictic, *a.* निदर्शक, व्यंजक.

Endemic, *a.* स्थानिक.

Endogamy, *n.* अंतर्जातिविवाह.

Endorse, *vt.* पृष्ठे लिख् 6 P; प्रमाणीकृ 8 U । -ment, *n.* पृष्ठलेख; प्रमाणीकरणं.

Endow, *vt.* (अमुकेन) सनाथीकृ 8 U; वृत्तिं सम्पृ *c*; यौतकं दा 3 U; युज् 7 A. *c* । -ed, *a.* उपेत, युक्त, संपन्न । -ment *n.* यौतकार्पणं; अग्रहारदानं; वृत्तिदानं; *pl.* चातुर्यादिगुणाः.

Endue, *vt.* परिधा, वस् *both c*; युज् *c*, सनाथीकृ 8 U.

Endure, *vt.* क्षम् 1 A. तितिक्षते *Desid.*, सह् 1 A । *vi.* चिरं अवस्था, स्था *both* 1 P । -ance, *n.* तितिक्षा, सहिष्णुता; सहनं; अविच्छेद, नैरंतर्य, प्रसक्ति *f.* संस्थिति *f*, स्थायित्वं । -ing, *a.* चिरकाल, स्थायिन्; तितिक्षु, सहिष्णु । -able, *a.* चिरस्थायिन्; अनश्वर.

Enema, *n.* रेचकं; रेचनयंत्रं.

Enemy, *n.* अमित्र, अराति, अरि, अहित जिघांसु, द्विषत्, द्वेष्टृ, परिपंथिन्, प्रतिपक्ष, प्रत्यनीक, प्रत्यर्थिन्, रिपु, विपक्ष, वैरिन्, शत्रु, सपत्न *all m*; शत्रुसेना

Energetic, *a* अतंद्रित, अनलस, उत्साहिन्, उद्यमिन्; बलिन्, शक्त, सामर्थ्यमत्.

Energize, *vi.* सबलं प्रवृत् 1 A । *vt.* सामर्थ्यं दा 3 U.

Energumen, *n.* भूतग्रस्त; अत्युत्साहिन् *m.*

Energy, *n* शक्ति *f.*, सामर्थ्यं; प्रभाव, बलं; उत्साह.

Enervate, *vt.* दुर्बलं *a.* *or* निर्वीर्यं *a.* कृ 8 U । *a.* क्षीणबल, दुर्बल, निर्वीर्य, शिथिल । -ation, *n.* बलनाश, शिथिलता.

Enfeeble, *vt.* दुर्बलीकृ, शिथिलीकृ *both* 8 U.

Enfetter, *vt.* निगडयति *Den.*

Enfold, *vt.* (अव) गुंठ् 10 U, आच्छद् 10 U, (परि)वेष्ट् 1. A. *c*; आश्लिष् 4 P, उपगुह् 1 U, परिरभ् 1 A.

Enforce, *vt.* बलात् कृ *c*; प्रसह्य निर्वह् *c or* विधा 3 U; दृढीकृ 8 U; साग्रहं प्रतिपद् *c or* समर्थ् 10 U । -ment *n.* सबलविधानं; दृढीकरणं.

Enfranchise, *vt.* मुच् 6 P *c*, बंधनात् मुच् 6 P, स्वतंत्राधिकारं *or* मताधिकारं दा 3 U । -ment, *n.* मोचनं; पौराधिकारार्पणं.

Engage, *vt.* अधिकृ 8 U, नियुज् 7 A. *c*; व्यापृ *c*; (विनियोगादिकं) आज्ञा *c*, युध् 4 A; प्रतिश्रु 5 U । *vi.* प्रतिज्ञा 9 U; वाङ्निश्चयं कृ 8 U; युद्धं आरभ् 1 A । -d, *a.* मग्न, व्यापृत; ०आसक्त, ०निष्ट, ०परायण *in comp.* । -ing, *a.* आकर्षक, मनोहर । -ment, *n.* समय, संविद् *f.*; प्रतिश्रुति *f.*,

संकेत; वाङ्निश्चय, विवाहप्रतिज्ञा; व्यवसाय, व्यापार; युद्धं, संपराय.

Engender, *vt.* उत्पद् *c*, जन् *c*, प्रसू 2 A; निष्पद्, संपद्, साध् *all c*.

Engine, *n.* यंत्रं; उपकरणं । -er, *n.* यंत्रकार, यंत्राध्यक्ष । स्थपति *m* । -er, *vt.* कौशलेन घट् *c or* साध् *c* । -ering, *n.* वास्तुविद्या, स्थापत्यं; (mechanical) यंत्रनिर्माणविद्या.

Engirdle, *vt.* मेखलया *or* मेखलयेव परिवेष्ट् 1 A. *c*.

English, *a.* आंग्ल.

Engorge, *vt.* (नि)गॄ 6 P, ग्रस् 1 A.

Engraft, *vt.* (वृक्षांतरे) निविश्, रुह् *both c*; समाविश् *c*.

Engrain, *vt.* अतिदृढं रंज् 10 U.

Engrasp, *vt.* दृढं ग्रह् 9 P.

Engrave, *vt.* उत्कॄ 6 P, तक्ष् 5 P । -ing, *n.* तक्षणं; उत्कीर्णालेख्यं.

Engross, *vt.* (1) स्थूलाक्षरैः लिख् 6 P; (2) कृत्स्नशः स्वायत्तीकृ 8 U *or* वशं नी 1 P; (3) साकल्येन क्री 9 P । -ed, *a.* निमग्न, व्यग्र । -ment, *n.* व्यग्रता; सकलहग्रहणं.

Engulf, *vt.* जलावर्ते इव निगॄ 6 P *or* निक्षिप् 6 P.

Enhance, *vt.* आप्यै, एध्, वृध् *all c* । -ment, *n.* वृद्धि *f*.

Enhearten, *vt.* उत्सह् *c*, समाश्वस् *c*.

Enigma, *n.* कूटोक्ति *f*.; गूढप्रश्न; प्रहेलिका । -tic, *a.* कूटार्थ, गूढार्थ; गूढ, दुर्ज्ञेय.

Enjoin, *vt.* आदिश् 6 P, चुद् 10 U, विधा 3 U, शास् 2 P.

Enjoy, *vt.* आस्वद् *c*, (उप०, सं०) भुज् 7 U, सेव् 1 A; नंद् 1 P, मुद् 1 A; रम् 1 A । -able, *a.* उपभोग्य, सुखावह, सेवनीय । -ment, *n.* उपभोग, संभोग, सेवनं; सुखं, हर्ष.

Enkindle, *vt.* समिंध् 7 A; प्रज्वल् *c*; उत्तिज्, उद्दीप् *both c*.

Enlace, *vt.* दृढं परिवेष्ट् 1 A; परिरभ् 1 A; गुंफ् 6 P.

Enlarge, *vt.* आप्यै, एध्, विस्तॄ, वृध् *all c*; प्रपंचयति *Den.*, बंधनात् मुच् 6 P. *c* । *vi.* आप्यै 1 A, एध् 1 A, वृध् 1 A; विस्तॄ *Pass* । -ment, *n.* विस्तार, वर्धनं, वृद्धि *f*.; प्रपंच.

Enlighten, *vt.* उपदिश् 6 P, प्रतिबुध्, प्रबुध्, शिक्ष् *all c*, संस्कृ 8 U; प्रकाश् *c* । -ment, *n.* उपदेश, प्रबोधनं, शिक्षणं, संस्कृति *f*.; ज्ञानप्रतिपत्ति *f*.; प्रकाशनं.

Enlink, *vt.* गाढं संयुज् *c or* संश्लिष् *c*.

Enlist, *vt.* सूच्यां लिख् 6 P; सैन्ये निविश् *c*; स्वपक्षे समाविश् *c*.

Enliven, *vt.* जीव् *c*; चेतनीकृ 8 U; उल्लस्, प्रमुद् *both c* । -ment, *n.* उल्लासवर्धनं, प्रमोदनं.

Enlumine, *vt.* द्युत्, प्रकाश् *both c.*
Enmarble, *vt.* स्फटिकसात् कृ 8 U; कठिनीकृ 8 U.
Enmesh, *vt.* जाले *or* पाशे बंध् 9 P.
Enmity, *n.* अमित्रता, द्वंद्वभाव, द्वेष, विरोध, वैरं, शत्रुत्वं, सापत्न्यं.
Ennead, *n.* (अध्यायादि) नवकं.
Ennoble, *vt.* उच्चपदं *or* उत्कर्ष *or* प्रतिष्ठां नी 1 P *or* प्राप् *c*; भावशुद्धं *a.* कृ 8 U। -ment, n. उत्कर्ष, उन्नति *f.*, प्रतिष्ठाप्राप्ति *f.*; भावशोधनं.
Ennui, *n.* औदासीन्यं, जडता, निरुत्साह, विमनस्कता.
Enormity, *n.* अतिमात्रता, अपरिमितता, बृहत्त्वं; अतिघोरता, पापिष्ठत्वं; अत्याचार, महाप्रमाथ, महापापं.
Enormous, *a.* अतिमर्याद, अतिमहत्, अतिमात्र, अपरिमित, बृहत्, विशाल, सुमहत्; बृहत्काय, महाशरीर, अत्यंत, अत्यर्थ, परम, सातिशय; अतिघोर, अतिदुष्ट, गर्ह्यतम; पापिष्ठ। -ness, *n.* अतिमर्यादता, *etc.*। -ly, *adv.* अतीव, अत्यंतं, सातिशयं.
Enough, *a.* पर्याप्त, प्रभूत; समर्थ; (predicative) अलं *with infinitive or dative*। *adv.* अलं; कृतं। *n.* पर्याप्ति *f*, प्रभूतता.
Enounce, *vt.* उच्चर्, उदीर् *both c*, घुष् 10 U। Enunciation, *n.* उच्चारणं, उदीरणं, घोषणं.
Enow, *adv.* अधुनैव; अचिरेण.
Enquire, *See* Inquire.
Enrage, *vt.* कुप्, क्रुध्, रुष् *all c.*
Enrapture, *vt.* प्रमुद् *c*, अतीव हृष् *c*, अतिहर्षेण स्तंभ् 9 P.
Enravish, *vt.* हर्षपरवशं *a.* कृ 8 U, अतिमात्रं प्रमुद् *c.*
Enrich, *vt.* सधनं *a.* कृ 8 U; सफलीकृ 8 U; आप्यै, एध्, वृध *all c.*
Enrobe, *vt.* परिधा, वस् *both c*, वस्त्रेण आच्छद् 10 U.
Enrol, *vt.* सूच्यां *or* नामावल्यां निविश् *c*। -ment, *n.* नामनिवेश.
Enroot, *vt.* मूलेन स्था *c*; दृढं आरुह् *c.*
Ens, *n.* अस्तित्वं, सत्ता.
Ensanguine, *vt.* रुधिरेण दिह् 2 U *or* लिप् 6 P; अरुणीकृ 8 U.
Ensate, Ensiform, *a.* खड्गाकार.
Ensconce, *vt.* अपह्नु 2 A, गुप् 1 P. 10 U. गुह् 1 U; सुखेन आस् 2 A *or* उपविश् 6 P.
Ensemble, *n.* समष्टि *f.*
Enshield, *vt.* त्रै 1 A, रक्ष् 1 P.
Enshrine, *vt.* देवालये *or* देवालये इव प्रतिष्ठा *c or* निधा 3 U; सप्रेमादरं निध्यै 1 P.
Enshroud, *vt.* पटेन आच्छद् 10 U.
Ensign, *n.* केतनं, केतु *m.*, ध्वज, पताका, वैजयंती; लक्षणं, लांछनं; ध्वजवाहक.

Enslave, *vt.* दासीकृ 8 U; वशीकृ 8 U; मुह् *c*। –ment, *n.* दास्यं; मोहनं.

Ensnare, *vt.* पाशे ग्रह् 9 P *or* बंध् 9 P; विश्वासघातेन अभिभू 1 P.

Ensorcell, *vt.* वशीकृ 8 U, विमुह् *c*.

Ensoul, *vt.* चेतनीकृ 8 U.

Ensue, *vi.* उत्पद् 4 A, जन् 4 A, प्रसंज् *Pass*, फल् 1 P, समापद् 4 A, संभू 1 P; अनुसृ 1 P। –ing, *a.* आगामिन्.

Ensure, *vt.* दृढीकृ 8 U, निश्चितं *a.* कृ 8 U.

Enswathe, *vt.* आवेष्ट् 1 A, वस्त्रेण आच्छद् 10 U.

Entail, *vt.* (रिक्थं) संसृ *c*; उत्पद् *c*, जन् *c*; अवश्यीकृ 8 U, प्रसंज् *c*। *n.* विशिष्टक्रमागतं रिक्थं.

Entangle, *vt.* संग्रंथ् 9 P; आकुलयति *Den.*, संभ्रम् *c*। –ment, *n.* संग्रथनं; जटिलत्वं; आकुलता, संभ्रम.

Enter, *vt.* निविश्, प्रविश् *both* 6 P; विध् 6 P, व्यध् 4 P; लिख् 6 P; निविश्, समारुह्, समाविश् *all c*। *vi.* प्रवेशं कृ 8 U। To e. into, समे 2 P, समुपागम् 1 P। To e. upon, प्रारभ् 1 A, प्रवृत् 1 A। Entrance, *n.* प्रवेश, प्रवेशनं; प्रवेशाधिकार; प्रवेशनमूल्यं; द्वारं। Entry, *n.* प्रवेश; द्वारं; लेखनं; लिखितं। Entrant, *n.* प्रवेशक; प्रतिस्पर्धिन् *m.*, प्राथमकल्पिक.

Enteric, *a.* आंत्र। E. fever, आंत्रज्वर.

Enteritis, *n.* अंत्रपाक.

Enterprise, *n.* आरंभ, व्यवसाय; साहसिकं कर्मन् *neu. or* कार्यं; धाष्ट्यं, साहसिकता। –ing, *a.* आरंभशूर, उत्थानशील, साहसिक.

Entertain, *vt.* अर्च् 1 P, आराध् 5 P. 10 U, पूज् 10 U, सत्कृ *c*, संमन् *c*, सेव् 1 A; आतिथ्यं कृ 8 U; (अनु) रंज्, नंद्, रम्, विनुद् *all c*; धृ 1 P. 10 U, मनसि निधा 3 U; सानुग्रहं विमृश् 6 P। *vi.* अतिथिसेवां कृ 8 U। –ing, *a.* अनुरंजक। –ment, *n.* आतिथ्यं, अतिथिसत्कार; अनुरंजनं, उत्सव, विनोदनं.

Enthral, *vt.* दासीकृ, बंदीकृ वशीकृ *all* 8 U; मुह् *c*, हृ 1 P। –ment, *n.* वशीकरणं; मोहनं.

Enthrone, *vt.* राज्ये *or* सिंहासने उपविश् *c or* स्था *c*.

Enthuse, *vi.* उत्साहं आविष्कृ 8 U.

Enthusiasm, *n.* अत्यनुराग, अभिनिवेश, आस्था, उत्साह, व्यग्रता; धर्मोन्माद; देवताग्रह.

Enthusiast, *n.* अभिनिवेशिन्, उत्साहिन्। –ic, *a.* आस्थापूर्ण, सोत्साह। –ically, *adv.* साभिनिवेशं, सोत्साहं.

Enthymeme, *n.* लुप्तावयवः न्याय.

Entice, *vt.* (प्र०) विलुभ् *c*, दुराचारे प्रवृत् *c*; भ्रंश् *c*। -ing, *a.* विमोहक, विवेकहर। -ment, *n.* (प्र०) विलोभनं; पापप्रवृत्ति *f.*

Entire, *a.* अखिल, अशेष, कृत्स्न, निखिल, निःशेष, विश्व, सकल, समग्र, सर्व; अखंड, अन्यून, संपूर्ण; असंमिश्र, शुद्ध; अकृत्रिम, ऋजु, सरल। -ly, *adv.* अशेषं, साकल्येन, सर्वथा। -ty, *n.* कात्स्न्यं, निःशेषता, समग्रता, साकल्यं; संपूर्णता; भूमन् *m.*

Entitle, *vt.* अभिधा 3 U, उपलक्ष् 10 U, नामन् *neu.* कृ 8 U *or* दा 3 U; पदवीं आरुह् *c*; अधिकारं दा 3 U। To be e.-ed to, अर्ह् 1 P.

Entity, *n.* अस्तित्वं, सत्ता, भाव; वस्तु *neu.*

Entoil, *vt.* पाशे ग्रह् 9 P.

Entomb, *vt.* समाधौ निविश् *c*; निखन् 1 P.

Entourage, *n.* परिवार; परिचारकगण.

Entr'acte, *n.* अंकावधि *m.*

Entrails, *n. pl.* अंत्राणि *pl.* पुरीतत् *neu.*

Entrain, *vt.* पश्चात् आकृष् 1 P; उत्पद् , साध् *both c.*

Entrammel, *vt.* कुंठ् 10 U, प्रतिबंध् 9 P, विघ्नयति *Den.*

Entrance, *vt.* मुह् *c*, मूर्च्छायां *or* समाधौ पत् *c*। -ed, *a.* मूर्च्छापन्न; हर्षस्तब्ध। -ment, *n.* मोहनं; मूर्च्छा; हर्षस्तंभ.

Entrap, *vt.* पाशे ग्रह् 9 P *or* बंध् 9 P.

Entreat *vt.* अभ्यर्थ् 10 U, सोत्सुकं प्रार्थ् 10 U *or* याच् 1 A; विचर् *c*। -ingly, *adv.* सानुनयं। -y, *n.* अनुनय, अभ्यर्थनं, प्रार्थना, याचना.

Entrée, *n.* प्रवेशाधिकार; पक्वान्नविशेष.

Entremets, *n. pl.* मिष्टान्नविशेषाः *pl.*

Entrench, *vt.* परिखाभिः वेष्ट् 1 A. *c*, परिखयेव रक्ष् 1 P; आक्रम् 1 U. 4 P.

Entrepôt, *n.* पण्यरक्षागारं; पण्यधानी.

Entrepreneur, *n.* लोकरंजनविधायक.

Entrust, *vt.* निक्षिप् 6 P, न्यस् 4 U; नियुज् 7 A. *c.*

Entwine, *vt.* गुंफ् 6 P, (सं) ग्रंथ् 9 P; संमिश्र् 10 U; परिष्वंज् 1 A.

Entwist, *vt.* परिवृत् *c.*

Enucleate, *vt.* प्रकाश् *c*; विशदीकृ 8 U.

Enumerate, *vt.* गण् 10 U, संख्या 2 P; यथाक्रमं परिगण् 10 U *or* निर्दिश् 6 P। -ion, *n.* गणना,

संख्यानं ; परिकीर्तनं; क्रमिकनिर्देश.

Enunciate, *vt.* उच्चर् · उदीर् *both c*, घुष् 10 U; सनिश्चयं निरूप् 10 U *or* प्रतिपद् *c or* प्रख्या *c*। –ion, . *n.* उच्चारणं, उदीरणं; प्रख्यापनं, प्रतिपादनं, निश्चितवचनं.

Envelop, *vt.* अवगुंठ् 10 U, (आ०) परिवेष्ट् 1 A. *c*, आच्छद् 10 U, आवृ 5 U; कोशे *or* पुटे पिधा 3 U। –e, *n.* आवरणं, कोश-ष, पुट । –ment, *n.* आच्छादनं, आवरणं, पिधानं.

Envenom, *vt.* विषेण संमिश्र् 10 U *or* दिह् 2 U; परुषं *a. or* सेर्ष्यं *a.* कृ 8 U.

Environ, *vt.* परिवृ 5 U. *c*; परिक्षिप् 6 U, परिवेष्ट् 1 A. *c*, व्याप् 5 P, संवलयति *Den*; अवरुध् 7 U। –s, *n. pl.* उपांत, परिसर। –ment, *n.* परिस्थिति *f.*

Envisage, *vt.* संमुखं अवलोक् 10 U; अभिमुखयति *Den*; निध्यै 1 P.

Envoy, *n* (1) दूत, वार्त्तिक. संदेशहर; (2) अनुलेख, समाप्तिलेख, ०श्लोक.

Envy, *n.* अभ्यसूया, असूया, ईर्ष्या, परोत्कर्षद्वेष, मत्सर, मात्सर्यं; मत्सरकारणं, मत्सरास्पदं । *vt.* अभ्यसूयति, असूयति *both Den.*, ईर्ष्य् 1 P; गृध् 4 P, लुभ् 4 U।

Enviable, *a.* ईर्ष्यणीय; असूयापादक; अतिस्पृहणीय.

Enwind, *vt.* मंडलीभू 1 P.

Enwomb, *vt.* योनौ धा 3 U *or* उपगृह् 1 U; गर्भे ग्रह् *c.*

Enwrap, *vt.* अवगुंठ् 10 U, आच्छद् 10 U, आवृ 5 U.

Enwreathe, *vt.* मालया संवलयति *Den.*

Eoan, *a.* औषस-स्य; पूर्व, पौरस्त्य, प्राच्य.

Epagoge, *n.* निगमनं; पक्ष; हेतु *m.*

Epaulet, *n.* स्कंधभूषणं.

Ephemeral, *a.* ऐकाहिक; क्षणिक; नश्वर.

Ephemeris, *n.* ग्रहगतिपत्रकं.

Epic, *n.* महाकाव्यं, वीरचरितकाव्यं, वीररसपूर्णं काव्यं । *a.* वीरचरितनिरूपक; वीररसमय.

Epicene, *a.* स्त्रीपुल्लिंग, साधारणलिंग; उभयलिंगिन्.

Epicure, *n.* भोगासक्त, विषयासक्त; मिष्टान्नलोलुप, जिह्वालौल्यप्रसक्त, उदरपरायण *all m.*। *a.* (*also* E.-an) भोगासक्त, *etc.*। –ism, *n.* भोगश्रेष्ठत्ववाद.

Epicycle, *n.* परिचक्रं.

Epideictic, *a.* निदर्शक, निरूपक.

Epidemic, *a.* जनतासंचारिन्। *n.* जनमार, महामारी, मार-री, मारिका.

Epidermis, *n.* बाह्यत्वच् *f.*

Epigastrium, *n.* जठरोर्ध्वभाग.

Epiglottis, *n.* उपजिह्वा.

Epigram, *n.* लघुकाव्यं; बह्वर्थाल्पशब्दं वाक्यं.

Epigraph, *n.* शिलालेख; प्रस्ताववाक्यं । -y, *n* शिलालेखविद्या.

Epilepsy, *n.* अपस्मार, भ्रामरं, मृगी.

Epileptic, *a.* अपस्मारिन्, भ्रामरग्रस्त.

Epilogue, *n.* उपसंहार.

Episcopacy, *n.* धर्माध्यक्षसत्ता; धर्माध्यक्षमंडलं.

Episode, *n.* आख्यानं, आख्यायिका उपकथा, उपाख्यानं, कथांगं । -ical, *a.* प्रासंगिक.

Epistemology, *n.* ज्ञानमीमांसा.

Epistle, *n.* पत्रं, लेख । Epistolary, *a.* पत्रात्मक.

Epitaph, *n.* मृत्युलेख; चैत्यलेख.

Epithalamium, *n.* विवाहगीतं, ०काव्यं.

Epithem, *n.* उपलेप, प्रलेप.

Epithet, *n.* उपाधि *m.*, विशेषणं, विशेष्यनिघ्नं.

Epitome, *n.* संक्षेप, संग्रह, सार । -ize, *n.* संहृ 1 P, संक्षिप् 6 P, संग्रहृ 9 P. । -ist, *n.* संग्रहकार, संग्राहक, संक्षेप्तृ *m.*

Epoch, *n.* कालगणनारंभ; विशिष्टकाल; शक, शाक । -al (*also* E. making) *a.* शककारक; नवकालगणनाकारक,

Epopee, Epos, *n.* *See* Epic.

Equable, *a.* सम, समप्रकृति, निर्विकार, अक्षोभनीय.

Equability, *n.* समता, समप्रकृति *f.*, निर्विकारता.

Equal, *a.* तुल्य, सम, समान; निर्विकार; अपक्षपातिन्, समदृष्टि; पर्याप्त, समर्थ । *n.* समान; तुल्यशक्ति; प्रतिद्वंद्विन् *all m.* । *vt.* तुल् 10 U; समीकृ 8 U. । -ity, *n.* तुल्यता, समानता, साम्यं । -ize, *vt.* समीकृ 8 U. । -ly, *adv.* तुल्यं, समं.

Equanimity, *n.* निर्विकारता, शांति *f.*, समवृत्ति *f.*, स्थैर्यं.

Equanimous, *a*, निर्विकार, समचित्त, स्थिरवृत्ति.

Equate, *it.* समीकृ 8 U । -ion, *n.* समीकरणं.

Equator, *n.* निरक्ष, भूकक्षा । -ial, *a.* निरक्षदेशीय.

Equerry, *n.* अश्वपाल, अश्वाध्यक्ष.

Equestrian, *a.* अश्वीय; अश्वविद्याविषयक; अश्वारूढ; अश्वहृदयज्ञ । *n.* अश्वारोह, आश्विक.

Equiangular, *a.* समकोण, समास्त्र.

Equidistant, *a.* समांतर.

Equilateral, *a.* समभुज.

Equilibrate, *vt.* तुल् 10 U; प्रतितुल् 10 U.

Equilibrist, *n.* पूरक, रज्जुनर्तक.

Equilibrium, *n.* समतोलनं, समभारता; अंगसौष्ठवं.

Equine, *a.* अश्वीय.

Equinox, *n.* विषुवं, विषुवत् *neu.* । Vernal *e.*, महाविषुवं, हरिपदं । Autumnal *e.*, जलविषुवं । Equinoctial, *a.* विषुवीय । E.-al point, अयनं । E.-al line, विषुवरेखा, ०वृत्तं । Sun's e.al passage, विषुवसंक्रांति *f.*

Equip, *vt.* सज्जीकृ 8 U, सनाथीकृ 8 U; (with arms) संनह् *c*; प्रसाध् *c* । -age, *n.* उपकरणसामग्री, साधनानि *pl.*, सामग्री; सज्जा, संनाह; परिवार । -ment, *n.* सज्जीकरणं; सज्जा, सामग्री.

Equipoise, *n.* समतोलनं । *vt.* प्रतितुल् 10 U.

Equipollent, *a.* तुल्यबल, समशक्ति.

Equiponderate, *vt.* प्रतितुल् 10 U.

Equitable, *a.* धर्म्य, न्याय्य, यथार्थ; न्यायवर्तिन् । -y, *adv.* न्यायेन.

Equitant, *a.* अश्वारूढ.

Equitation, *n.* अश्वारोहणं; अश्वहृदयं.

Equity, *n.* धर्म, न्याय, न्याय्यनिर्णय; न्याय्यता; अपक्षपात.

Equivalent, *a.* तुल्य, सम; समानार्थ; तुल्यबल; समफल । *n.* प्रतिफलं; पर्याय.

Equivocal, *a.* द्व्यर्थ; संदिग्धार्थ; अस्पष्टलक्षण; संदिग्ध.

Equivocate, *vi.* संदिग्धं *or* अस्पष्टं वद् 1 P; व्यपदिश् 6 P । -ion, *n.* वक्रोक्ति *f.*, संदिग्धवचनं; व्यपदेश.

Equivoque, *n.* वक्रोक्ति *f.*; श्लेषः कूटोक्ति *f.*

Era, *n.* काल, कालगणना, शाक.

Eradiate, *vi.* प्रसृ 1 P, स्फुर् 6 P । *vt.* उत्सृज् 6 P.

Eradicate, *vt.* उन्मूल्, निर्मूल् *both 10* U; उच्छिद् 7 P; उत्पट् 10 U; विनश् *c.*

Erase, *vi.* अपमृज्, परिमृज् *both* 2 P. 10 U; विलुप् *c* । -r, *n.* अपमार्जक । -ure, *n.* अपमार्जनं; विलोप.

Ere, *prep.* पूर्वं, प्राक् । *conj.* पूर्वं । E. long, अचिरेण.

Erect, *a.* उच्छ्रित, उत्तान; अनत, उन्नत । *vt.* उच्छ्रि *c*, उत्था *c*, उन्नम् *c*; विरच् 10 U, स्था *c* । -ile, *a.* उन्नतिशील । -ion, *n.* उच्छ्रय, उत्थापनं; निर्माणं विरचना, स्थापनं; प्रासाद; (गात्र)दार्ढ्यं; (of hair) पुलक, रोमांच.

Eremite, *n.* यति, वनवासिन्, संन्यासिन् *all m.*

Ergo, *adv.* अतः, अस्माद्धेतोः । -tism, *n.* वाक्कलह, वाग्युद्धं.

Eristic, *a* वादग्रस्त, ०पूर्वक । *n.* वादिन्, तर्किन् *both m.*

Erne, *n.* उत्क्रोश, गरुड.

Erode, *vt.* शनैः विनश् or विली *both c* । Erosion, *n.* विनाश, विलयनं.

Erotic, *a* मान्मथ; कामोत्पन्न; अभिलाषुक, कामपर, कामयमान, कामिन् , कामुक.

Erotomania, *n.* कामोन्माद.

Err, *vi.* प्रमद् 4 P, स्खल् 1 P; व्यभिचर् 1 P; सत्यात् *etc.* च्यु 1 A *or* भ्रंश् 1 A., 4 P; अपराध् 4.5 P. पापं आचर् 1 P। -atic, *a.* अनियतगति, उत्सूत्र; चंचल, भ्रमत्। -atum, *n.* अशुद्धं, (लेखन०, मुद्रण०) दोष, स्खलनं; (-a, *pl.* अशुद्धपत्रकं)। -oneous, *a.* अयथार्थ, अशुद्ध, असत्य, प्रमत्त, प्रामादिक, भ्रांत, सदोष, सप्रमाद, मिथ्या॰ (*in comp.*); मार्गभ्रष्ट। -or, *n.* दोष, प्रमाद, स्खलनं; भ्रम, भ्रांति *f.*, मतिभ्रंश; अपराध, उन्मार्ग, पापं; व्यभिचार.

Errant, *a.* परिभ्रमत्, पर्यटत्, भ्रमणकारिन्.

Erst, *adv.* अतीते काले, पुरा, पूर्वकाले.

Eructation, *a.* उत्क्षेप, उद्गार, उद्वमनं.

Erudite, *a.* पंडित, बहुश्रुत, विद्यासंपन्न, विद्वस्, व्युत्पन्न। -ion, *n.* ज्ञानं, पांडित्यं, विद्या, विद्वत्ता, विद्वत्त्वं, व्युत्पत्ति *f.*

Erupt, *vi.* उद्गॄ 6 P। -ion, *n.* उत्क्षेप, उद्गार, स्फोट; विस्फोट.

Erysipelas, *n.* उदर्द.

Escalade, *n.* वप्रावस्कंदनं, दुर्गलंघनं.

Escapade, *n.* उच्छृंखलचरितं; अश्वप्लुति *f.*

Escape, *vt.* परिहृ 1 P, लंघ् 10 U, वृज् 10 U; क्षेमेण दूरीकृ 8 U.। *vi.* अपसृ 1 P, अपसृप् 1 P. पलाय् 1 A। *n.* अपसरणं, पलायनं; निस्तार, परिहार, मुक्ति *f.*, विमोचनं.

Escarpment, *n.* उत्संग, कटक *mn.*

Eschatology, *n.* अंतिमभावविद्या.

Escheat, *vt.* राजसात् कृ 8 U.

Eschew, *v..* अपसृ 1 P; उज्झ् 6 P. त्यज् 1 P, हा 3 P; निवृत् 1 A, विरम् 1 P.

Escort, *n.* रक्षकवर्ग, रक्षकाः *pl.*; परिवार; परिचर; रक्षणं। *vt.* (रक्षणार्थं) अनुसृ 1 P *or* सह गम् 1 P.

Escritoire, *n.* लेखनपीठिका.

Esculent, *a.* खाद्य, भक्षणीय, भक्ष्य.

Escutcheon, *n.* कुललांछनफलकं.

Esophagus, *n.* गलस्रोतस् *neu.*, निगरण.

Esoteric,-al, *a.* अलौकिक, औपनिषद, गूढ.

Especial, *a.* विशिष्ट, सविशेष; प्रधान, प्रमुख, मुख्य.

Espial, *n.* निरीक्षणं.

Espionage, *n* अपसर्पणं, गूढावेक्षणं, चारप्रयोग.

Esplanade, *n.* नगरपरिसर, समीकृता क्रीडाभूमि *f.*

Espouse, *vt.* उद्वह् 1 P, उपयम् 1 A, परिग्रह् 9 P, परिणी 1 P, प्रतिग्रह् 9 P, विवह् 1 P, वृ 5.10 U; वाचा वृ c; अंगीकृ 8 U;

अनुपा *c*, स्वीकृ 8 U । -al, *n*. उद्वाह, परिग्रहणं, परिणय, विवाह; वाग्दानं, वाग्निश्चय ; अंगीकार, अनुपालनं, स्वीकार.

Esprit, *n*. चातुर्यं, प्रतिभा । E. de corps, संघभक्ति *f*.

Espy, *vt*. आलोक् 1 A. 10 U, ईक्ष् 1 A, दृश् 1 P; निभृतं अवेक्ष् 1 A.

Esquire, *n*. कंचुकवाह; श्री० श्रीमत्० *in comp*.

Essay, *n*. आरंभ, प्रयत्न, यत्न; निबंध, प्रबंध । *vt*. आरभ् 1 A, उद्युज् 7 U, प्रारभ् 1 A । -ist, *n*. निबंधकार, ०लेखक.

Essence, *n*. स्वालक्षण्यं; तत्त्वं, सार; निष्कर्ष, भाव; गंधद्रव्यं.

Essential, *a*. सारभूत, सारविषयक; आवश्यक; शुद्ध । *n*. तत्त्वं, मूलं; परमार्थ । -ly, *adv*. तत्त्वतः, सारतः

Establish, *vt*. (व्यव०, सं०) स्था *c*; दृढीकृ 8 U, निर्णी 1 P, प्रमाणयति *Den*., समर्थ् 10 U. साध् *c* । -ment, *n*. संस्थापनं; व्यवस्था, संस्था; भृत्यवर्ग.

Estate, *n*. भूमि *f*., रिक्थं ; दाय, वित्तं; अवस्था, दशा, भाव; पदं; संस्था.

Esteem, *vt*. आदृ 6 A, पूज् 10 U, बहु मन् 4 A. *c*, मह् 10 U; अवधृ 10 U, गण् 10 U, चिंत् 10 U, मन् 4 A । *n*. आदर, पूजा, पूज्यभाव, बहुमान.

Estimable, *a*. आदरणीय, पूजार्ह, पूज्य, मान्य.

Estimate, *vt*. (मूल्यं) निर्णी 1 P. निरूप् 10 U, संकल् 10 U । *n*; मूल्यनिरूपणं; गणना, संकलनं, संख्यानं; मतं । -ion, *n*. अर्घकल्पना, गणनं; मतं; आदर, संमान.

Estival, *a*. वार्षिक, सांवत्सरिक.

Estop, *vt*. निरुध्, प्रतिरुध् *both* 7 U.

Estrade, *n*. पीठिका.

Estrange, *vt*. विरंज् *c*, अप्रीतिं जन् *c*; दूरीकृ 8 U, विघट् 10 U । -ment, *n*. अपराग, अप्रीति *f*.; मित्रभेद, स्नेहक्षय.

Estuary, *n*. नदीमुखं, पुटभेद.

Estuation, *n*. फेनोद्गम, संक्षोभ.

Esurient, *a*. क्षुधार्त, बुभुक्षित; दीन, दुर्गत.

Et cetera, *phrase*, ०आदि, ०प्रभृति *in comp*.

Etch, *vt*. चित्र् 10 U, लिख् 6 P; उत्कॄ 6 P.

Eternal, *a*. अक्षय, अनंत, अनादि, अमर, अमृत, अविनाशिन्, नित्य, निरंतर, शाश्वत, सतत, सदातन, सनातन, संतत, सार्वकालिक । -ly, *adv*. नित्यं, निरंतरं, शश्वत्, सदा.

Eternity, *n*. आनंत्यं, नित्यत्वं, नैरंतर्यं, सातत्यं.

Eternize, *vt*. अक्षयीकृ, अमरीकृ *both* 8 U.

Etesian, *a.* वार्षिक, सांवत्सरिक.
Ether, *n.* आकाश *mn.* । -eal, *a.* आकाशीय, नाभस; तैजस, दिव्य; सूक्ष्म.
Ethic, -al, *a.* नीतिविषयक, नैतिक। Ethics, *n.* नीति *f.* नीतिशास्त्रं; आचार.
Ethmoid, *a.* चालन्याकार.
Ethnic, *a.* मानवजातिविषयक.
Ethnography, *a.* मानववंशशास्त्रं.
Etiolate, *vt.* धवलीकृ 8 U । *vi.* धवलीभू 1 P.
Etiology, *n.* निदानशास्त्रं.
Etiquette, *n.* समयाचार, शिष्टाचार, ०रीति *f.*
Etymological, *a.* व्युत्पत्तिविषयक, यौगिक.
Etymologist, *n.* नैरुक्त, नैरुक्तिक, व्युत्पत्तिकोविद.
Etymology, *n.* व्युत्पत्तिशास्त्रं; निरुक्ति *f.*, व्युत्पत्ति *f.*, व्युत्पादनं, शब्दसाधनं.
Etymon, *n.* प्रकृति *f.*, मूलं.
Eugenics, *n.* नृवंशशुद्धिशास्त्रं.
Eulogistic, *a* प्रशंसापूर्ण, स्तुतिपर.
Eulogize, *vt.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U.
Eulogy, *n.* प्रशंसा, श्लाघा, स्तुति *f.*
Eunuch, *n.* क्लीब, छिन्नमुष्क, तृतीयप्रकृति *mf.*, पंड, षंड, हतपुंस्त्व; कंचुकिन् *m.*, वर्षवर, सौविद, सौविदल्ल, स्थापत्यक.
Eupeptic, *a.* सुखपाक.
Euphemism, *n.* मंगलभाषितं. मृदूक्ति *f.*
Euphemize, *vt.* मृदु वद् 1 P.
Euphonic,-ious, *a.* श्रुतिसुख, सुस्वर.
Euphony, *n.* मधुरस्वन, सुस्वर; स्वरसौष्ठवं; संधि, संयोग, संहिता.
Euphorbia, *n.* असिपत्रिका, त्रिकंटक, वज्रा, समंतदुग्धा, सिहुंड, सीहुड, स्नुह् *f.*, स्नुही.
Euphrasy, *n.* आह्लादकं, मनोरंजकं.
Eureka, *n.* प्रकाशनं; आत्मधन्यवाद.
Eurhythmics, *n.* नृत्यविद्या, ०कला.
Euthanasia, *n.* अनायासमृत्यु *m.*
Evacuate, *vt.* रिच् 7 U, शून्यीकृ 8 U; उच्चर् *c*, उद्धृ 6 P; शुध् *c*; उत्सृज् 6 P, परित्यज् 1 P । -ion, *n.* उच्चार, मलोत्सर्ग; परित्याग, विसर्जनं । Evacuant, *n.* रेचकं.
Evade, *vt.* नैपुण्येन परिहृ 1 P; अकृतिं साध् *c*; निष्फलीकृ 8 U । *vi.* पलाय् 1 A; वाक्छलं कृ 8 U.
Evaluate, *vt.* मूल्यं निश्चि 5 U । -ion, *n.* अर्घनिर्णय.
Evanesce, *vi.* अदर्शनं गम् 1 P, लुप् *Pass.* । -nce, *n.* अदर्शनं, अंतर्धानं; क्षय, लोप । -nt, *a.* क्षणिक, क्षयिष्णु, गत्वर, नश्वर; अदृश्यमान, परोक्ष.
Evangel, *n.* दिव्योपदेश.
Evaporate, *vt.* बाष्पीकृ 8 U; उच्छुष् *c* । *vi.* बाष्पीभू 1 P; बाष्परूपेण निर्गम् 1 P; शुष् 4 P;

नश् 4 P। –ion, *n.* वाष्पीकरणं, ०भवनं.

Evasion, *n.* व्यपदेश, सकपटवर्जनं *or* ०परिहार; वाक्छलं, छद्मोक्ति *f.*

Evasive, *a.* वंचनशील, शाठ्ययुक्त, छलगर्भ, कुटिल.

Eve, *n.* पूर्वप्रदोष; अग्रकाल; संध्या.

Even, *n.* संध्या.

Even, *adv.* अपि *ind.* । E. so एवमेव, एवमपि । E. if, यद्यपि.

Even, *a,* सम; समप्रदेश, समदर्शिन्, *etc.*; युग्म; अविकारिन् । *vt.* समीकृ [To be e. with, अपकारं निर्यत् 10 U *or* निस्तॄ 1 P *or* प्रत्यपकृ 8 U । E.–handed, अपक्षपातिन् । E.–minded, समाचित्त, समवृत्ति । –ly, *adv.* अक्षोभं; समगत्या.

Evening, *n.* दिनांत, प्रदोष, मैथिल, संध्या, सायंकाल, सायाह्न । *a.* सायंतन । E. star, शुक्र । In the e., सायं.

Event, *n.* घटना, वृत्तं, व्यतिकर, संभव; उदर्क, परिणाम, फलं । At all e.s, सर्वथा । –ful, *a* बहुघटनापूर्ण । –ual, *a.* आनुषंगिक, कार्यरुप; अंतिम, अंत्य । --ually, *adv.* अंते । –uate, *vi.* घट् 1 A, भू 1 P, समापद् 4 A.

Ever, *adv.* नित्यं, सदा, सर्वदा; कदाचन, कदापि । E. and anon, मुहुः, वारंवारं । For e., निरंतरं, शश्वत् । E. so little, मनागपि । —more, *adv.* सदा, निरंतरं.

Everlasting, *a.* अक्षय, अमर, चिरस्थायिन्, निरंतर.

Evert, *vt.* विपर्यस् 4 U; उत्सद् *c.*

Every, *a.* सकल, सर्व; एकैक, प्रत्येक. E. now and then, मुहुर्मुहुः । E. day, अनुदिनं, प्रतिदिनं । –body, *n.* सर्वजन । In e. way, सर्वथा । –thing, *n.* सर्वं । –where, सर्वत्र.

Evict, *vt.* निःसृ *or* निष्कस् *both c.*

Evidence, *n.* निदर्शनं, प्रमाणं, प्रामाण्यं, साक्ष्यं । *vt.* प्रमाणीकृ 8 U, समर्थ् 10 U । Ocular e., प्रत्यक्षप्रमाणं । Written e., लेखप्रमाणं.

Evident, *a.* प्रत्यक्ष, प्रकट, व्यक्त, स्पष्ट, स्फुट । –ial, *a,* प्रमाणरूप । –ly, *adv.* स्पष्टं, स्फुटं । To be e., स्फुटीभू 1 P.

Evil *a.* अधम, असत्, कुत्सित, खल, दुराचार, दुष्ट, निंद्य, पाप, पापात्मक, कष्टकर, घोर, पीडावह । *n.* अनिष्टं, अहितं, अशुभं; अनर्थ, कष्टं; दुरितं, दुष्कृतं, पातकं, पापं । King's e., गंडमाला । E.-disposed, E–minded, कुमति, दुर्बुद्धि । E.–eye, पापदृष्टि *f.* । E.–doer, *n,* दुर्वृत्त, पातकिन्, पापकर्मन्, *all m.* । E.-speaking *n.* अभ्यसूया, निंदा, परिवाद, मिथ्याक्षेप.

Evince, *vt.* दृश् *c*, प्रकटयति *Den*, प्रकाश् *c*, स्पष्टीकृ 8 U.

Evirate, *ot.* पुंस्त्वं अपहृ 1 P, निर्वीर्य *a*. कृ 8 U.

Eviscerate *vt.* निरंत्रीकृ 8 U.

Evoke, *vt.* आह्वे 1 P. आकृ *c*; प्रबुध् *c* । Evocation, *n.* आकारणं. आह्वानं.

Evolution, *n.* उद्भेद, परिणाम, विवर्त, विस्तार; परंपरा, श्रेणी; (सैन्यादिकस्य) चलनं । -ism, *n.* परिणामवाद, अभिव्यक्तिवाद.

Evolve, *vt.* उद्भिद्, विकस्, विस्तॄ *all c*; परिणम् *c*; प्रपंचयति *Den* । *vi.* उद्भिद् *Pass.*, विकस् 1 P; परिणम् 1 P.

Evulsion, *n.* अवलुंचनं, उत्पाटनं.

Ewe, *n.* अवि *f*, अविला, उरणी, उरा, एडका, कुररी, जालकिनी, मेषी, रुजा । E.s milk, अविदूसं, अविमरीसं, अविसोढं.

Ewer, *n.* कलश, कुंभ, घट.

Exacerbate, *vt.* क्रुध्, प्रकुप्, संक्षुभ् *all c*; उद्दीप्, वृध् *both c*.

Exact, *a.* यथार्थ, सत्य; निर्दोष; अप्रमत्त; सूक्ष्मनियमानिष्ट । *vt.* बलात् ग्रह् 9 P *or* आहृ 1 P; साग्रहं अपेक्ष् 1 A । -ing, *a.* अप्रमादापेक्ष, सूक्ष्मतापेक्ष, ग्रहिल । -ion, *n.* बलाद्ग्रहणं; अन्याय्यहरणं । -itude, -ness, *n.* याथार्थ्य; सूक्ष्मता; अप्रमाद । -ly, *adv.* यथार्थतः, यथावत्.

Exaggerate, *vt.* अत्युक्त्या कथ् 10 U *or* वर्ण् 10 U *or* प्रतिपद् *c*; वृध् *c* । *vi.* अत्युक्तिं विधा 3 U । -ion, *n.* अतिवाद, अतिशयोक्ति *f*, अत्युक्ति *f*.

Exalt, *vt.* उत्कृष् 1 P, उन्नम् *c*, उन्नी 1 P, उच्चपदवीं नी 1 P *or* प्राप् *c*; प्रशंस् 1 P; संकृत् 10 U; उद्दीप् *c* । -ation, *n.* उत्कर्ष, उन्नति *f.*, उच्चपदारोप(ह)णं; (Astr.) उच्च *m*.

Examine, *vt.* परीक्ष् 1 A, पर्यालोच् 10 U, विचर् *c*, विमृश् 6 P, समीक्ष् 1 A; अनुयुज् 7 A, प्रच्छ् 6 P । -r, *n.* परीक्षक; प्राश्निक । -ation, *n.* परीक्षा, विचारणा; अनुयोग, प्रश्न.

Example, *n.* उदाहरणं, दृष्टांत, निदर्शनं; आदर्श, प्रमाणं । For e., यथा.

Exanimate, *a.* निर्जीव, निश्चेतन.

Exasperate, *vt.* क्रुध्, प्रकुप्, संक्षुभ् *all c* । -ion *n.* कोप, मन्यु, रोष.

Excavate, *vt.* उत्खन् 1 P; खननेन अपहृ 1 P । -ion, *n.* उत्खननं.

Exceed, *vt.* अतिक्रम् 1 U, अती 2 P; अतिरिच् *Pass.* अतिशी 2 A, विशिष् *Pass* । *vi* मर्यादां उल्लंघ् 1 A. 10 U; प्रत्यादेशः भू 1 P । -ing, *a.* अतिरेकिन्, अत्यंत, परम; *adv.* (*also* -ly) अतीव, अत्यंतं, नितांतं, प्रकामं, सुतरां.

Excel, *vt.* अतिरिच् *Pass*, अतिशी 2 A, विशिष् *Pass* । *vi.* प्रत्यादेशः भू 1 P । -lence, *n.* गुणातिशय, गुणोत्कर्ष ; वैशिष्ट्यं, श्रेष्ठता ; गुण, सद्गुण । -lency, *n.* गुणोत्कर्ष ; (Address) देव, महाराज । -lent, *a.* उत्कृष्ट, उत्तम, गुणान्वित, वरेण्य, श्रेष्ट ; ०वर, ०विशेष, ०सिंह, *etc. in comp.* (*cf.* स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ Amara III. 1·59: *also* उपमितं व्याघ्रादिभिः सामान्याप्रयोगे–Pan. II. 1·56) । -lently, *adv.* उत्तमं, साधु, सुष्ठु । -sior, *adv.* उच्चैस्तरां.

Except, *vt.* अपास् 4 U, त्यज् 1 P, परिहृज्, वृज् *both* 10 U, लुप् *c*, व्यावृत् *c* । *-prep.* (*also* -ing) अंतरा, अंतरेण, ऋते, विना ; वर्जयित्वा । *conj.* यदि...न ।-er, *n.* अपवादक, आक्षेपक । -ion, *n.* त्याग, परिवर्जनं ; अपवाद, व्यभिचार ; आक्षेप, दोष, बाधा, विप्रतिषेध । Take e-ion, आक्षिप् 6 P, असंमतिं प्रकाश् *c* । -ionable, *a.* आक्षेपार्ह, बाध्य ; असामान्य । -ional, *a.* अपवादात्मक, अपवादभूत ; अलौकिक, असाधारण, असामान्य ; अपूर्व.

Excerpt, *vt.* संकल् 10 U; अवतॄ *c*, उद्धृ 1 P, उपन्यस् 4 P । *n.* अवतरणं, उदाहरणं, उद्धार, चूर्णि *f.*, संकलनं.

Excess *n.* अतिरेक, आतिशय, आधिक्यं ; अतिक्रम, अत्याचार, मर्यादोल्लंघनं ; अनिग्रह, अनियताचार । -ive, *a.* अतिमात्र, अत्यंत, अत्यर्थ, अपरिमित, परम, प्रकाम, सातिशय । -ively, *adv.* अतीव, अत्यंतं.

Exchange, *vt.* परिवृत् *c*, प्रतिदा 1 P. 3 U, विनिमे 1 A । *n.* परिवर्त, परिवृत्ति *f.*, प्रतिदानं, विनिमय ; द्रव्य०, पण्यविनिमय ; पणितृचत्वरं । -able, *a.* विनिमेय.

Exchequer, *n.* राजकोष । Chancellor of E., राजकोषाध्यक्ष.

Excise, *n.* कर, राजदेयं, राजस्वं, शुल्कं । *vt.* (1) विच्छिद् 7 U ; (2) राजदेयं स्था *c* । -ion, *n.* कर्तनं, विच्छेदनं.

Excite, *vt.* उत्तिज्, उत्था, उद्दीप्, प्रचुद्, प्रबुध्, प्रोत्सह् *all c*; प्रकुप्, संक्षुभ् *both c*; उत्पद्, जन् *both c* । -able, *a.* उत्तेजनीय, शीघ्रक्षोभ । -ant, *n.* उत्तेजकं, उद्दीपकं । -ation, -ment, *n.* उत्ताप, संरंभ, संक्षोभ ; उत्तेजनं, उद्दीपनं, प्रचोदनं । -d, *a.* उद्दीप्त, प्रबुद्ध, संक्षुब्ध.

Exclaim, *vt.* उच्चैः वद् 1 P, उत्क्रुश् 1 P । *vi.* उच्चैः वचः कृ 8 U । Exclamation, *n.* उत्क्रोश, उच्चैः उद्गार । Exclamatory, *a.* उत्क्रोशवाचक.

Exclude, *vt.* बहिष्कृ 8 U, व्यतिरिच् *c*, व्यावृत *c*; अपास् 4 U, त्यज् 1 P, वृज् 10 U.

Exclusion, *n.* बहिष्कार, व्यतिरेक, व्यावर्तनं, व्यावृत्ति *f.*; वर्जनं.

Exclusive, *a.* बाधक, व्यावर्तक; ऐकांतिक; केवल; अनन्यसाधारण। -ly, *adv.* एकांततः, अनन्यसाधारण.

Excogitate, *vt.* परिचिंत् 10 U, अनुसंधा 3 U । -ion, *n.* परिचिंतनं.

Excommunicate, *vt.* अपांक्तीकृ, बहिष्कृ *both* 8 U; निष्कस् *c*। -ion, *n.* अपांक्तेयत्वं, बहिष्कार, समाजच्युति *f.*

Excoriate, *vt.* निस्त्वचीकृ 8 U.। -ion, *n.* त्वग्भेद.

Excrement, *n.* उच्चार, गूथ *mn.*, पुरीषं, मल *mn*, विष् *f.*, विष्ठा, शकृत् *neu.*, शमलं.

Excrescence, *n.* गंड, शोफ.

Excrete, *vt.* उच्चर् *c*, उत्सृज् 6 P। -ion, *n.* उच्चार, उत्सर्ग.

Excruciate, *vt.* अतीव पीड् 10 U *or* यत् *c*, प्रमंथ् 9 P। -ing, *a.* अरुंतुद, अतिपीडाकर, प्रमाथिन्, मर्मभेदक.

Exculpate, *vt*, निर्दोषीकृ 8 U, दोषात् मुच् *c or* शुध् *c*। -ion *n.* दोषमुक्ति *f.*, ०शुद्धि *f.*। -ory, *a.* दोषक्षालक, ०शोधक, ०हर.

Excurrent, *a.* निःसरत्.

Excursion, *n.* क्रमणं, पर्यटनं, विहार; मार्गत्याग, अप्रस्तुतानुसरणं; आक्रम, आस्कंद.

Excursive, *a.* भ्रमणशील.

Excursus, *n.* आनुषंगिकप्रकरणं.

Excuse, *vt.* क्षम् 1 A, मृष् 1 P. 10 U; दोषात् *or* नियमादिकात् मुच् 6 P. *c*; विसृज् 6 P। *n.* व्यपदेश; क्षमायाचना; हेतुवाद; कृतकहेतुः व्याज; दोषमोचनं। -able, *n.* क्षमार्ह.

Exeat, *n.* प्रयाणानुज्ञा.

Execrate, *vt.* अभिशंस् 1 P, (अभि०) शप् 1 U; जुगुप्सते *Den.* विद्विष् 2 U । Execrable, *a.* गर्हणीय, नीच, बीभत्स, विद्वेष्य। -ion, *n.* अभिशंसनं, शाप; विद्वेष.

Execute, *vt.* (1) अनुष्ठा 1 P, कृ 8 U, विधा 3 U, संपद् *c*, साध् *c*; निर्वर्त् *c*, निर्वह् *c*; (2) हन् 2 P, देहांतदंडं कृ 8 U । -ant, *n.* अनुष्ठातृ *m.*; वादक। -ion, *n.* अनुष्ठानं, निर्वहणं, विधानं; वादनशैली; घात, वध, हत्या । -ioner, *n.* घातक; वध्यापुरुष । -ive, *a.* विधायक, संपादक, *n.* विधायकमंडलं। -or, *n.* मृत्युपत्राधिकृत *m.*

Exegesis, *n.* प्रवचन, भाष्यं, विवरणं, व्याख्यानं.

Exegetical, *a.* व्याख्यानविषयक; प्रकाशक.

Exegetist *n.* भाष्यकार, व्याख्यातृ *m.*

Exemplar *n.* आदर्श, प्रमाणं; प्रमुखोदाहरणं । -y, *a.* अनुकरणीय,

प्रमाणभूत ; उदाहरणात्मक, दार्ष्टांतिक.

Exemplify, *vt.* उदाहृ 1 P, दृष्टांतेन प्रकाश् *c*; दृष्टांतीभू 1 P.

Exempt, *a.* (अमुकादिना) अनिबद्ध, वर्जित ; (अमुकादेः) मुक्त । *vt.* मुच् 6 P. *c*, वृज् 1 P. 10 U । -ion *n.* मोचनं, वर्जनं ; अनुष्ठानाभाव ; नियमशैथिल्यं.

Exequatur, *n.* प्रतिनिधिसमर्थन-लेख.

Exequies, *n. pl.* अंत्यविधि *m.* अंत्येष्टि *f.*, और्ध्वदेहिकं, प्रेतसंस्कार.

Exercise, *n.* उपयोग, प्रयोग, व्यापार; अभ्यास, आवृत्ति *f.*, चर्या, व्यवसाय; व्यायाम । *vt.* उपयुज्, प्रयुज् *both* 7 A. 10 U, व्यापृ *c*; अभ्यस् 4 U, नित्यं आचर् 1 P; व्यायम् *c*, व्यायामं कृ 8 U.

Exercitation, *n.* अभ्यास, व्यव-साय ; प्रबंध.

Exert *vt.* उपयुज् 7 A. 10 U, व्यापृ *c* । E. oneself, आयस् 4 P, (प्र०)यत् 1 A, श्रम् 4 P । -ion, *n.* आयास, क्लेश, श्रम ; उद्यम, उद्योग, यत्न.

Exeunt omnes, *phrase.* निष्क्रांताः सर्वे.

Exfoliation, *n.* त्वग्विगलनं.

Exhale *vt.* उच्छ्वस् 2 P; उद्गॄ 6 P, उद्वम् 1 P ; उत्सृज् 6 P ; बाष्पीकृ 8 U; बाष्पमिव उच्छुष् *c* । *vi.* बाष्पीभू 1 P; उद्गॄ *Pass* । -ation, *n.* उच्छ्वास ; उद्गार ; बाष्प, बाष्पो-द्गार; निर्गम.

Exhaust, *vt.* परिहृ 1 P ; रिच् 7 U, शून्यीकृ 8 U. निःशेषं क्षै *c or* नश् *c or* निर्भुज् 7 A *or* उपयुज् 7 A. 10 U; आयास्, खिद्, श्रम् *all c*; साकल्येन ग्रह् 9 P । -ed, *a.* क्षीण, विरिक्त, शून्यीभूत; खिन्न, ग्लान, श्रांत । -ible, *a.* सुक्षय । -ion, *n.* क्षय, नाश, व्यय; खेद, ग्लानि *f.* श्रम । -ive, *a.* सकलग्राहक, सर्वांगपूर्ण । -less, *a.* अक्षय.

Exhibit, *vt.* प्रदृश् *c*; प्रकटयति *Den*, प्रकटीकृ 8 U, प्रकाश् *c*, व्यंज् 7 P. *c.* । *n.* प्रदर्शितं वस्तु *neu.* साक्ष्यलेख । -ion, *n.* प्रदर्शनं; प्रकटनं; वृत्ति *f.*, वृत्तिसमर्पणं । To make an e.ion of oneself, गर्हणीयं चेष्ट् 1 A.

Exhilarate, *vt.* नंद्, हृष् *both c.* । -ion, *n.* उल्लास, प्रमोद, हर्ष.

Exhort, *vt.* वचनेन प्रोत्सहृ *c or* प्रवृत् *c*; अनुनी 1 P, अनुशास् 2 P; उपपत्त्या उपदिश् 6 P । -ation, *n.* अनुनय; प्रबोधनं प्रोत्साहनं, उपदेश । -ative, *a.* उपदेशक, प्रबोधक.

Exhume, *vt.* (शवं) उत्खन् 1 P.

Exies, *n.* वातोन्माद.

Exigeant, *a.* बलाद्विधायक, बला-त्साधक.

Exigence, -y, *n.* अपरिहार्य०, अवश्य०, नितांतप्रयोजनं, आवश्यकत्वं, विपत्काल, संकटं.

Exigent, *a.* अपरिहार्य, आवश्यक.

Exiguous, *a.* अल्प, तनु, लघु, स्वल्प। Exiguity, *n.* अल्पत्वं.

Exile, *n.* निर्वासनं, प्रव्रजनं, विवासनं; बहिर्देशवास; बहिर्देशस्थित *m.*। *vt.* निर्वस् *c*, निष्कस् *c*, विवस् *c.*

Exility, *n.* अल्पत्वं, तनुता; सूक्ष्मता.

Eximious, *a.* प्रमुख, वरेण्य.

Exist, *vi.* अवस्था 1 A, अस् 2 P, भू 1 P, वृत् 1 A; जीव् 1 P; आस् 2 A.। -ence, *n.* अवस्थानं, अस्तित्वं, भाव, सत्ता, सत्त्वं; जीवनं, जीवितं; वर्तनं। -ent, *a.* वर्तमान, विद्यमान, सत्.

Exit, *phrase* निष्क्रांत। *n.* निष्क्रमणं; निर्गमनं, प्रयाणं, प्रस्थानं, निधनं, मरणं; निर्गमनमार्ग, द्वारं.

Exodus, *n.* प्रयाणं, प्रस्थानं, बहिर्गमनं.

Ex Officio, *phrase.* स्वाधिकारतः; अधिकारोद्भूत, अन्वाधिकारकृत.

Exogamy, *n.* बहिर्गोत्रविवाह.

Exonerate, *vt.* निर्दोषीकृ 8 U, दोषात् मुच् 6 P. *c*; निर्भारं *a.* कृ 8 U। -ion, *n.* दोषापहरणं, दोषशुद्धि, *f.*

Exorbitant, *a.* अपरिमित, अमर्यादित, अमित। Exorbitance, *n.* अपरिमितत्वं, मर्यादातिक्रम.

Exorcize, *vt.* मंत्रादिकैः अपनुद् 6 P *or* निष्कस् *c*; भूतग्रहात् मुच् 6 P *c*। -r, *n.* मंत्रसाधक। Exorcism, *n.* भूतापसारणं.

Exordium, *n.* उपोद्घात, प्रस्तावना, भूमिका.

Exoteric, -al, *a.* लौकिक, साधारण.

Exotic, *a.* विदेशीय, वैदेशिक.

Expand, *vt.* प्रसृ *c*, वितन् 8 U, विस्तॄ *c*। *vi.* प्रवृध् 1 A, प्रसृ 1 P, वितन् *Pass.*, विस्फुर् 6 P, विकस् 1 P, स्फुट् 6 P.

Expanse, *n.* प्रसार, वितान, विसार, विस्तारः आभोग, आयाम.

Expansion, *n.* प्रसरणं, वितति *f.*, विस्तार; प्रपंच, विस्तर.

Expansive, *a.* विसृत्वर, विस्तारशील, व्यापक.

Ex-parte, *phrase.* एकपक्षीय.

Expatiate, *vi.* प्रपंचयति *Den.*, विस्तरेण निरूप् 10 U; पर्यट् 1 P.

Expatriate, *vt.* निर्वस् *c*, निष्कस् *c*, विवस् *c.*

Expect *vt.* अपेक्ष् 1 A, उदीक्ष् 1 A, प्रतीक्ष् 1 A; प्रतिपा *c*; मन् 4 A.। --ance, -ancy *n* अपेक्षित्वं, आकांक्षिता। -ant, *a.* अपेक्षिन्, आकांक्षक, प्रत्याशिन्। -ation, *n.* अपेक्षा, आकांक्षा, प्रतीक्षा, प्रत्याशा; (*pl.*) आयति *f.*। -ingly, *adv.* साकांक्षं.

Expectorate, *vt.* उद्गॄ 6 P, निष्ठिव् 1.4 P। -ion, *n.* उद्गार, निष्ठ्यूति *f.*

Expedience, -y, *n.* औचित्यं, योग्यता; कार्यसाधकता.

Expedient, *a.* कार्यसाधक, उपयुक्त, योग्य, हित । *n.* उपाय, कल्प, साधनं; हितोपाय.

Expedite, *vt.* शीघ्रं प्रवृत् *c. or* साध् *c*; त्वर् *c*; सत्वरं प्रेष् 10 U । *a.* क्षिप्र, लघु, शीघ्र, । -ion, *n.* त्वरा, रभस, वेग, शीघ्रता; अभियानं, प्रयाणं, प्रस्थानं, यात्रा; प्रास्थानिकसेना । -ious, *a.* क्षिप्र, चपल, शीघ्र.

Expel, *vt.* अपनुद् 6 P, अपास् 4 U, निरस् 4 U, निष्कस् *c*; बहिष्कृ 8 U; अपपात्रयति *Den.*

Expend, *vt.* व्यय् 10 U; विनियुज् 7 A. 10 U; क्षै *c*, निर्भुज् 7 A । -iture, *n.* व्यय; विनियोग, विसर्जनं; क्षय, ह्रास.

Expense, *n.* व्यय, विनियोग, विसर्जनं । -ive, *a.* बहुव्यय, महार्घ.

Experience, *n.* अनुभव, उपलब्धि *f.*, प्रतीति *f.*, प्रत्यय, भोग, वेदनं; व्यवहारज्ञानं । *vt.* अनुभू 1 P, उपलभ् 1 A, भुज् 7 U, विद् 2 P; उपगम् 1 P, प्राप् 5 P । -d *a.* अनुभविन्, सानुभव; चतुर, निष्णात; अनुभवज्ञात.

Experiential, *a.* आनुभविक; अनुभवजन्य.

Experiment, *n.* प्रयोग; परीक्षा । *vi.* प्रयोगं कृ 8 U; प्रयोगेन अन्विष् 6 P । -al, *a* अनुभवप्राप्त, प्रयोगदर्शित.

Expert, *a.* अनुभविन्, तज्ज्ञ, निष्णात, प्रवीण । *n.* तज्ज्ञ, *etc. all m.* । -ly, *adv.* कौशलेन । -ness, *n.* नैपुण्यं, प्रावीण्यं.

Expiate, *vt.* निष्कृ 8 U, शम् *c*, प्रायश्चित्तेन शुध् *c* । -ion, *n.* निष्कृति *f.*, पापक्षालनं; शोधनं; प्रायश्चित्तं । -ory, *a.* अघमर्षण, प्रायश्चित्तरूप.

Expire *vt.* उच्छ्वस् 2 P; उद्गॄ 6 P; उत्सृज् 6 P । *vi.* उच्छ्वासं कृ 8 U; पंचत्वं गम् 1 P, मृ 6 A; अंतं गम् 1 P, क्षि *Pass*, समाप् *Pass* । --ation, *n.* उच्छ्वसनं, उच्छ्वास; अंत, अवसानं, समाप्ति *f.* । -atory, *a.* उच्छ्वासकारक । -y, *n.* अंत, विराम, *etc.*

Explain, *vt.* विशदयति *Den*, विशदीकृ, स्पष्टीकृ *both* 8 U; प्रवच् 2 P, विवृ 5 U; व्याख्या 2 P, व्याचक्ष् 2 A.

Explanation, *n.* विशदीकरणं; स्पष्टीकरणं; प्रवचनं; विवरणं, विवृति *f.*, व्याख्यानं.

Explanatory, *a*, अर्थप्रकाशक, व्याख्यात्मक.

Expletive, *n.* पादपूरणं.

Explicate, *vt.* व्याख्या 2 P; विशदीकृ, स्पष्टीकृ, *both* 8 U; प्रपंचयति *Den.* । -ion, *n.* विशदीकरणं । -ory, *a*, अर्थप्रकाशक.

Explicit, *a*, व्यक्त, स्पष्ट, स्फुट; निश्चित, निर्णित.

Explode, *vt.* सशब्दं स्फुट् *c*; खंड् 10 U, निराकृ 8 U। *vi.* सशब्दं स्फुट् 6 P *or* भिद् *Pass*। Explosion, *n*, सशब्दस्फोटनं। Explosive, *a*. स्फोटनशील.

Exploit, *n*. अवदानं, पराक्रम, विक्रम। *vt.* उपयुज् 7 A. 10 U। -ation, *n*. उपयोग; सारोद्धार.

Explore, *vi.* अन्विष् 4 P; निरीक्ष्, परीक्ष् *both* 1 A; अटनेन लोकज्ञानं प्राप् *c* । -ation, *n* अन्वेषणं, प्रदेशख्यापनं। -r, *n*. प्रदेशख्यापक.

Exponent, *a*. आवेदक, दर्शक; द्योतक, प्रकाशक । *n*. घातचिह्नं.

Export, *vt.* बहिर्देशं प्रेष् 10 U । *n*. बहिर्देशगतं भांडं *or* पण्यं.

Expose, *vt.* अपावृ 5 U; प्रकाश् *c*, व्यक्तीकृ 8 U; सत्यस्वभावं प्रकटयति *Den*; अरक्षितं *a*. त्यज् 1 P; पदं कृ 8 U। -ition, *n*. प्रकाशनं, विवरणं । -ure, *n*. स्पष्टीकरणं, स्वरूपप्रकाशनं; उद्घाटनं.

Expostulate, *vi*. साग्रहं प्रत्यादिश् 6 P *or* विचर् *c* । -ion, *n*. प्रत्यादेश; निवारणं.

Expound, *vt.* प्रवच् 2 P, विवृ 5 U, व्याख्या 2 P। -er, *n*. व्याख्यातृ *m*.

Express, *vt.* (1) निष्पीड् 10 U, सु 5 U; निस्यंद् 1 A, प्रस्नु 2 P; (2) अभिधा 3 U, उदीर् *c*, कथ् 10 U, वच् 2 P, व्याहृ 1 P; आविष्कृ 8 U, प्रकटयति *Den*, प्रदृश् *c*, व्यंज् 7 P. *c*, सूच् 10 U । *a*. व्यक्त, स्पष्ट, स्फुट; विशिष्ट । *n* जांघिक; अतिवेगाग्निरथ । To e. oneself, मनोगतं कथ् 10 U । -ion, *n* (1) निष्पीडनं; (2) उदीरणं, ख्यापनं, व्याहृति *f*.; निरूपणं; शब्दरचना; वाक्यं; (3) आकृति *f*., आस्यं, वदनं । - ive, *a*. गमक, व्यंजक, सूचक; साकूत; अर्थपूर्ण.

Exprobation, *n*. गर्हणा, निर्भर्त्सना.

Expropriate, *vt.* अधिकारात् *or* स्वत्वात् दूरीकृ 8 U.

Expulsion, *n*. अपनोदनं, अपसारणं, निष्कासनं, विवासनं.

Expunge, *vt.* अपमृज् 2 P; विलुप् *c*.

Expurgate, *vt.* शुध् *c* । -ion, *n*. शोधनं । -ory, *a*. शोधक.

Exquisite, *a*. कोमल, पेलव, मृदु, ललित; उत्कृष्ट; तीक्ष्ण; सूक्ष्म.

Exsiccate, *vt.* उच्छुष्, शुष् *both c*.

Extant, *a*. वर्तमान, विद्यमान.

Extempore, *a*. अचिंतितपूर्व, तत्कालविहित । *adv*. पूर्वयत्नरहितं.

Extend, *vt.* (प्र०, वि०) तन् 8 U; दीर्घीकृ 8 U, प्रपंचयति *Den*. विस्तृ 5. 8 U. *c*; ऋ *c* । *vi*. (वि)-तन् *Pass*; व्याप् 5 P.

Extension, *n* आयाम, वितति *f*., विस्तार; व्याप्ति *f*.; प्रपंच.

Extensive, *a*. आयत, वितत, विस्तीर्ण; व्यापक । -ly, *adv*. अतीव, बहुशः.

Extent, *n.* आयाम, परिणाह, विस्तार; परिमाणं। To some e., मनाक्, स्तोकं.

Extenuate, *vt.* अल्पीकृ, कृशीकृ *both* 8 U, लघयति *Den.*; क्षल् 10 U। -ion, *n.* क्षालनं; लघूकरणं.

Exterior, *a.* बाह्य; बहिर्दृश्य। *n.* बाह्यरूपं.

Exterminate, *vt.* उच्छिद् 7 P, उत्पट् 10 U, उन्मूल् 10 U, विनश् *c*। -ion, *n.* उत्पाटनं, उन्मूलनं, विनाश.

External, *a.* बहिःस्थ, बाह्य। -ly, *adv.* बहिः, बाह्यतः.

Extinct, *a.* निर्वाण, निर्वापित; अवसन्न, क्षीण, जीर्ण, नष्ट; गतव्यवहार, लुप्त। -ion, *n.* निर्वाणं; अंत, अवसानं, विनाश; लोप.

Extinguish, *vt.* निर्वा *c*; उपशम् *c*; तिरयति *Den*, अंतरयति *Den*; नश्, लुप् *both c.*; (ऋणं) शुध् *c.*

Extirpate, *vt* उत्पट् 10 U, उन्मूल् 10 U, विध्वंस् *c.*

Extol, *vt.* अतीव प्रशंस् 1 P *or* श्लाघ् 1 A *or* स्तु 2 U.

Extort, *vt.* बलात्कारेण ग्रह् 9 P; निष्कृष् 1 P; उपपीड् 10 U। -ion, *n.* अन्याय्यादानं, बलाद्ग्रहणं, विप्लव.

Extra, *a.* अतिरिक्त, अधिक.

Extract, *vt.* उद्धृ 1 P, निष्कृष् 1 P; निष्पीड् 10 U, सु 5 U; उत्पट् *c*। *n* कषाय, निर्यूह, रस; संक्षेप, संग्रह, सार। -ion, *n.* निष्कर्षणं, अन्वय, कुलं, वंश.

Extradition *n.* विदेशीयापराधिप्रत्यर्पणं.

Extramundane, *a.* अतिसंसार, विश्वबाह्य.

Extraneous, *a.* बाह्य; व्यतिरिक्त; अव्याप्त.

Extraordinary, *a.* अद्भुत, अपूर्व, अलौकिक, असाधारण, असामान्य, विलक्षण; अधिक, अपर। -ly, *adv.* अपूर्वं, सातिशयं.

Extravagance, *n.* अमर्यादितत्वं, अमितत्वं, मर्यादोल्लंघनं; महाधनोत्सर्ग, अमितव्यय.

Extravagant, *a* अतिक्रांतमर्याद, अपरिमित, अमर्यादित, अमित; अतिव्ययिन्, अपरिमितव्यय; असंभवकल्पक, काल्पनिक; (मूल्यं) सुमहत्.

Extravaganza, *n.* विचित्रचेष्टितं, ०प्रबंध *etc*; उत्कटभाव.

Extravasation, *n.* रुधिरनिःस्रावणं.

Extreme, *a.* दविष्ट, दूरतम, बाह्य; अंतिम, अंत्य; उत्कट, गाढ, परम; अपरिमित; अतितीव्र। *n.*, अग्र, अंत, अवधि *m.*, पार, सीमा; परा काष्ठा *or* कोटि *f*;। In the e., अतीव, अत्यंतं.

Extremity, *n.* अंत, परमावधि *m.* परा काष्ठा *or* कोटि *f*; अतिकष्टं; दुर्दशा, महासंकटं; (*pl.*) अंगानि, गात्राणि.

Extricate, *vt.* उद्ग्रंथ् 9 P; संदेहात् *or* संकटात् उद्धृ 1 P *or* विमुच् 6 P. *c.*
Extrinsic, *a.* अतात्त्विक, आगंतुक, बाह्य.
Extrude, *vt.* उत्सृ *c*; निष्कस् *c.*
Exuberance, *n.* बहुफलत्वं; प्राचुर्यं, वैपुल्यं, समृद्धि *f*; अतिशय.
Exuberant, *a.* अतिफलवत् बहुफल; प्रचुर, प्रभूत, भूयिष्ट, विपुल, समृद्ध.
Exuberate, *vi.* उत्सिच् *Pass,* विपुलीभू 1 P.
Exude, *vt* उद्गॄ 6 P, प्रस्नु 2 P। *vi.* उद्गॄ, प्रस्नु *both Pass,* निस्यंद् 1 A। -ation, *n.* उद्गारं, निर्यास, प्रस्नव, स्राव
Exulceration, *n* व्रणोत्पादनं.
Exult, *vi.* अतीव मुद् 1 A *or* हृष् 4 P, प्रमुद् 1 A; विजयोत्सवं कृ 8 U। -ant, *a.* अतिहृष्ट, उत्सिक्त, प्रमुदित। -ation, *n.* अत्यानंद, उत्सेक. उल्लास, प्रमोद. हर्षोद्रेक। -ingly, *adv.* सोत्सेकं, सप्रमोदं.
Exuviæ, *n. pl.* कंचुक, निर्मोक, निल्वयनी; त्यक्तवस्तुजातं.
Ex-voto, *phrase.* संकल्पकृते.
Eyas, *n.* अजातपक्षः श्येन.
Eye, *n.* आक्षि *neu.* अंबकं, ईक्षणं-णा, चक्षुस् *neu.* दृश् *f.* -शा, नयनं, नेत्रं, लोचनं; छिद्रं, रंध्र; दर्शनं, दृष्टि *f*; मतं। *vt.* निरीक्ष् 1 A, *etc.* । In the e.s of, मते, दृष्ट्या। Mind your e. सावधानो भव। Before one's e.s, प्रत्यक्षं, समक्षं। To make e.s at, साभिलाषं दृश् 1 P.। To see e. to e. अतिसंमत *a.* अस् 2 P। -ball, *n.* कनीनिका, तारका, तारा। -brightening, *a.* दृष्टिशोधक। -brow, *n.* भ्रू *f.*। -drop, *n.* अश्रु *neu.*, बाष्प। -glass, *n.* उपनेत्रं। -hole,-let, *n.* छिद्रं, रंध्रं। -lash, *n.* पक्ष्मन्, वल्गु *both neu.*। -lid, दृक्छद, वर्त्मन् *neu.*। -opener प्रबोधन। -salve, *n.* नेत्रांजनं। -sore, *n.* अक्षिशूलं, नेत्रपीडा। -wink, *n.* नेत्रसंकेत। -witness, *n.* प्रत्यक्ष-साक्षिन् *m.*

F

Fable, *n.* आख्यायिका, कथा; कल्पितकथा; कल्पित° *or* असत्य-वृत्तांत। -d, *a.* कथात्मक; कथाश्रुत.
Fabric. *n.* घटना, रचना; गृहं, प्रासाद, मंदिरं, हर्म्यं; ऊति *f.* तांतवं, पट; निर्मिति *f.*। -ant, *n.* शिल्पकार, शिल्पिक। -ate, *vt.* निर्मा 2 P. 3 A, रच् 10 U; मिथ्या क्लृप् *c* *or* कृ *c*। -ation, *n.* कपटानुसंधानं, मिथ्यारचना; मनःकल्पना; मिथ्यानुलिपि *f.*
Fabulist, *n,* कथाकार; ऐतिहासिक.
Fabulous, *a.* कल्पित, काल्पनिक, कृत्रिम; ऐतिहासिक, कथाश्रुत; मिथ्याभूत, मृषार्थ; अत्यधिक.
Façade, *n.* गृहपुरोभाग, प्रासादमुखं.

Face, *n.* आननं, आस्यं, तुंडं, तेरं, मुखं, वक्त्रं, वदनं; वदनच्छाया; अवस्था, दशा; धाष्ट्र्यं, प्रगल्भता। *vt.* अभिमुखयति *Den*, संमुखीभू 1 P। F. to f., मुखामुखि, संमुखं। In the f. of, अनादृत्य; *also expressed by Gen. abs. or Loc. abs.*। On the f. of it, आपाततः। To f. the music, निर्भयं संकटे प्रतिष्ठा 1 P। To have the f., धाष्ट्र्यं कृ 8 U। To set the f. against, प्रत्यवस्था 1 A। -ing, *a* अभिमुख संमुख; *n.* आवरणं; अंचलभूषणं; संमिश्रणं.

Facet, *n.* कण, मुखं.

Facetiæ, *n pl.* नर्मोक्तयः *pl.*

Facetious, *a.* नर्मगर्भ, ०प्राय, परिहासशील, विनोदिन्। -ly, *adv.* नर्मपूर्ण, परिहासपूर्व.

Facia, *n.* नामफलकं

Facial, *a.* मुखविषयक.

Facile, *a.* अनायास, सुकर; अदृढ, सुनम्य; निपुण, निष्णात; मृदु, सौम्य। -itate, *vt.* सुकरं *a.* कृ 8 U; प्रवृत्, प्रवृध् *both c*। -ity, *n.* सुसाध्यता, सौकर्यं; निर्विघ्नता; अवसर, प्रसंग, समय; कौशलं, नैपुण्यं, लाघवं, क्षिप्रता; सुनम्यत्वं.

Facsimile, *n.* प्रतिलिपि *f*, प्रतिकृति *f.*

Fact, *n.* अर्थ, वस्तु *neu*, वृत्तं; तत्त्वं, तथ्यं, सत्यं। In f., वस्तुतः, परमार्थतः। -ual, *a.* वास्तविक; तात्त्विक.

Faction, *n.* पक्ष, प्रतिपक्ष; कलह, पक्षभेद, विसंवाद। Factious, *a.* कलहशील, भेदप्रिय, भेदिन्.

Factitious, *a.* कृतक, कृत्रिम, शिल्पिक; शिल्पनिर्मित; अनैसर्गिक, असहज.

Factitive, *a.* कारक, साधक.

Factor, *n.* नियोगिन् *m.* प्रतिनिधि *m*; प्रतिपुरुष; गुण्यपदं; गुणक; घटकावयव। -y, *n.* कर्मशाला, प्रावेशनं, शिल्पगृहं.

Factotum, *n.* सर्वकर्मकर.

Facula, *n.* सूर्यांक.

Faculty, *n.* कार्यशक्ति *f*, सामर्थ्यं; मनःशक्ति *f*, अधिकार; आचार्यगण.

Fad, *n.* छंद। -dist, *n.* छंदिन् *m.*

Fade, *vi.* ग्लै 1 P, म्लै 1 P, विशॄ *Pass*; अवसद् 1 P, क्षि *Pass*, परिगल् 1 P, ह्रस् 1 P; विवर्णीभू 1 P; अंतर्धा *Pass*। *a.* म्लानिहीन; अक्षय्य.

Fæces, *n.* उच्चार, गूथ *mn.* पुरीषं, मल, वर्चस्क, विष् *f*, विष्ठा, शकृत् *neu*, शमलं

Faery, *a.* ऐंद्रजालिक, काल्पनिक.

Fag, *vi.* आयस् 4 P, यत् 1 A, श्रम् 4 P। *vt.* आयस्, श्रम् *both c*। *n.* आयास, श्रम; क्लांति *f*, खेद। -end, *n.* अंत; समाप्ति *f.*

Faggot, *n.* काष्ठभार; अतिवृद्धा.

Fail, *vi.* अवसद् 1 P, न्यूनतां प्राप् 5 P, भ्रंश् *Pass.* विफलीभू 1 P, विसंवद् 1 P, व्याहन् *Pass*; क्षि,

विशृ *both Pass*। *vt.* त्यज् 1 P; न्यूनीभू 1 P; अपेक्ष् 1 A । Without f. अवश्यं, निःशंकं, सुनिश्चितं । -ing, *n.* न्यूनता; अपराध, दोष, व्यसनं; *prep.* ०अभावे । -ure, *n.* अवसाद, भंग, लोप; न्यूनता; अकरणं, अननुष्ठानं, अनिष्पत्ति *f.*, अप्राप्ति *f.*, असिद्धि *f.*; उपेक्षा; निःस्वत्वप्राप्ति *f.*, असिद्धिमत्, दुरवस्थित (जनः).

Fain, *a.* प्रसन्न, प्रीत। *adv.* कामतः, प्रीत्या, सहर्षं, सानंदं.

Faineant, *a*, अलस, तंद्रिल, निरुद्योग.

Faint, *a.* क्षीणशक्ति, दुर्बल, निर्बल; म्लान, लुलित; श्रमिन्, विश्रांत; कातर, भीरु; अव्यक्त, अस्पष्ट, अस्फुट। *n.* मूर्च्छा, मोह, संज्ञालोप। *vi.* मुह् 4 P, मूर्च्छ् 1 P। -hearted, *n.* कातर, भीरु। -ly, *adv.* ईषत् मंदं । -ness, *n.* ग्लानि *f.*, दौर्बल्यं, मांद्यं; क्षीणता; स्वल्पता.

Fair, *n.* मेला, यात्रा, समाज.

Fair, *a.* कांत, चारु, चौक्ष, मनोज्ञ, मनोहर, रम्य, शोभन, सुंदर, सुभग, हृद्य; साधु; अपक्षपातिन्, धर्म्य, न्याय्य, सम; निरभ्र, प्रसन्न, विमल, शुचि; मध्यम । The f. sex, स्त्रीजन; नार्यः *pl.* । By f. means, सरलोपायेन। F.-minded, अपक्षपातिन्, समचित्त । F. play, सरलाचरणं ! F. -seeming, *a.* आपातरमणीय, बहिःशोभन । F.-spoken; *a.* प्रियंवद, श्लक्ष्ण, सौम्य । -ly, *adv.* धर्मेण, निष्कपटं, यथान्यायं । -ness, *n.* कांति *f.*, लावण्यं, शोभा; समता; सरलता; प्रसाद.

Fairy, *n.* यक्षिणी, योगिनी, विद्याधरी। *a.* ऐंद्रजालिक, काल्पनिक.

Faith, *n.* प्रत्यय, मति *f.*, विश्रंभ, विश्वास; आस्तिक्यं, निष्ठा, भक्ति *f.*, श्रद्धा; धर्म; समय । -ful, *a.* प्रतिज्ञापालक, सत्यप्रतिज्ञ, सत्यसंध; कर्तव्यपर, ०परायण, कार्यनिष्ठ; प्रत्ययार्ह, विश्वसनीय, विश्वास्य; दृढनिष्ठ, ०भक्ति; श्रद्धालु। -fully, *adv.* निष्टया, भक्त्या। -fulness; *n.* विश्वास्यत्वं; भक्ति *f*; सत्यप्रतिज्ञा। -less, *a.* अश्रद्धधान; अविश्वासिन्; विश्वासघातक; असत्यप्रतिज्ञ; भक्तिहीन.

Fake, *vt.* मिथ्यारूपं आविष्कृ 8 U; कुद्रव्येभ्यः उत्पद् *c*; वंच् *c*। *n.* प्रतारणा, वंचना; मिथ्याकृति *f.*

Falcate, *a.* अंकुशाकार.

Falchion, *n* चंद्रहास, वक्रखड्ग.

Falcon, *n.* शशादन, श्येन। -ry, *n.* श्येनशास्त्रं; श्यैनंपाता.

Falderal, *n.* क्रीडनकं, क्षुद्रमंडनं.

Fall, *vi.* अवपत् 1 P, च्यु 1 A, पत् 1 P, भ्रंश् 4 P, स्रंस् 1 P; अवसद् 1 P, नश् 4 P, मृ 6 A; अपचि *1 cis*, ह्रस् 1 P; घट् 1 A,

समापद् 4 A । *n.* च्युति *f.*, पतनं, पात, भ्रंश, स्रंसनं; उत्स, निर्झर, प्रपात; प्रवणभूमि *f.*; घनात्यय, फलागम, मेघांत, शरद् *f.*; तुषारस्रुति *f.*, वर्षपात; अपकीर्ति *f.* ऐश्वर्यभंग, भाग्यक्षय; स्वरावरोह । To f. among, अकांडे मिल् 6 P । To f. away, त्यज् 1 P । To f. back, परावृत् 1 A । To f. back upon, समालंब् 1 A । To f. by the ears, कलहं कृ 8 U, कलहायते *Den* । To f. down, प्रणिपत् 1 P । To f. in with, संमन् 4 A । To f. off, परावृत् 1 A; भ्रंश् 1 A. 4 P; अपचि *Pass* । To f. on, अवस्कंद् 1 P, आक्रम् 1 U. 4 P । To f. out, घट् 1 A, संपद् 4 A, संवृत् 1 A; कलहं कृ 8 U । To f. short, न्यूनीभू 1 P । To f. through, निष्फलीभू, विफलीभू *both* 1 P । To f. to, सत्वरं *or* सावेशं उपक्रम् 1 A *or* प्रारभ् 1 A । To f. under, अंतर्गण् *Pass*; वशं गम् 1 P । To f. upon, अवस्कंद् 1 P, आक्रम् 1 U. 4 P । To f. within, अंतर्गण्, समाविश् *both Pass.*

Fallacious, *a.* भ्रांतिमत् ; असत्य; कुतर्कपूर्ण.

Fallacy, *n.* अपसिद्धांत, पक्षाभास, मिथ्याहेतु *m.*, हेत्वाभास; भ्रम, भ्रांति *f.*, मिथ्यामति *f.*, मोह.

Fal-lal, *n.* क्षुद्रमंडनं.

Fallible, *a.* प्रमाद०, भ्रमशील.

Fallow, *a* (1) कडार, कद्रु, कपिलश, पिंगल, पिशंग, रक्तपीत; (2) कृष्टानुप्त; अकृष्ट, खिल; निष्फल.

False, *a.* अनृत, असत्य, कापटिक; कपट०, कृतक० मिथ्या०, मृषा० in *comp*; भ्रांतिकारक, मोहजनक; प्रमादात्मक, वितथ, सदोष; असत्यसंध, विश्वासघातक; विस्वर । To sail under f. colours, कपटेन रूपांतरं धृ 10 U । -hood, *n.* अनृतं, असत्यं; अनृतभाषणं, मृषावाद; प्रतारणा, वंचना । -ify, *vt.* मृषा कृ 8 U; मिथ्यारूपं आविष्कृ *c*; मिथ्या ख्या *c or* वर्ण् 10 U; (आशां) विफलीकृ 8 U; खंड् 10 U, निरस् 4 U । -ification, *n.* कूटरचना । -ly, *adv.* असत्यं, मिथ्या, मृषा । -ity,-ness *n.* असत्यता; मिथ्यात्वं, कापट्यं, कैतवं.

Falter, *vi.* (प्र०) स्खल् 1 P; दोलायते *Den.*, द्वैधीभू 1 P; कंपस्वरेण *or* स्खलत्स्वरेण वद् 1 P; कंप् 1 A, वेप् 1 A, वेल्ल् 1 P.

Fame, *n.* कीर्ति *f.*, ख्याति *f.* प्रसिद्धि *f.*, यशस् *neu.*, विश्राव, विश्रुति *f.*, श्लोक । *vt.* (प्र० वि०)-ख्या *c.* । Ill f., अपकीर्ति *f.*, अपयशस् *neu.* । House of ill f., वेशवास । To long for f., यशस्काम्यति, यशस्यति *both Den.* ।

–d (*also* Famous) *a.* कीर्तित, कीर्तिमत्, (प्र०, वि०) ख्यात, पुण्यश्लोक, प्रथित, प्रसिद्ध, यशस्विन्, यशोधर, लब्धकीर्ति, लोकविश्रुत, सुशंस.

Familiar, *a.* परिचित; सुज्ञात, सुविदित; गाढसौहृद, प्राकृतं, साधारण, सामान्य; सुगम, सुबोध। *n* परिचारकपिशाच। –ity, *n.* परिचय; अत्यासंग, गाढसौहृदं; अनादर; अनिर्बंध। –ize, *vt.* परिचितं *a. or* परिचयं कृ 8 U; अभ्यस् 4 U, परिचि *c*। –ly. *adv.* सपरिचयं, अनादरेण.

Family, *n.* कुटुंबं, कुलं; अन्वय, अन्ववाय, कुलं, गोत्रं, जननं, जाति *f.*, वंश, संतान; वर्ग। In the f. way, अंतर्वत्नी, गर्भवती, गर्भिणी। Head of a f., कुटुंबिन्, कुलपति *both m.* । Of a good f., अभिजात, कुलीन। Of royal f., राजबीजिन् *m.*, राजवंश्य.

Famine, *n.* अनशनं, दुर्भिक्षं, दुष्काल, प्रयाम.

Famish, *vt.* अतिक्षुधया पीड् 10 U। *vi. Pass. of prec. verb.*। –ing, *a.* अतिक्षुधार्त। –ed, *a.* क्षुधार्त, बुभुक्षित.

Famulus, *n.* कुहकसहाय.

Fan, *n.* तालवृंतं, वीजनं, व्यजनं; (of leather) धवित्रं; (of cloth) आलावर्त; (chowrie) चामर *mn.*, प्रकीर्णकं। *vt.* वीज् 10 U; उद्दीप् *c.*

Fanatic, *a* धर्मांध, धर्मोन्मत्त, स्वपक्षांध, स्वमतांध, स्वमतासक्त। *n. m. of prec.* । –ism, *n.* धर्मांधत्वं, धर्मोन्माद, भक्त्युद्रेक, स्वपक्षदुराग्रह.

Fancy, *n.* कल्पना, भावना, वासना; प्रत्यय, मति *f.*, संकल्प; मनोरथमात्रं; कामचार; भ्रम, मोह; छंद, अभिरुचि *f.* । *vt.* मनसा क्लृप् *c.* (सं) भू *c*; चिंत् 10 U, मन् 4 A; रुच् 1 A। *a.* मनोग्राहिन्, भूषात्मक । F. work, सूचिशिल्पं, ० कर्मन् *neu.*। Fanciful, *a.* काल्पनिक, भावित मनःकल्पित, संकल्पात्मक; अलीक, मायामय; कामचारिन्, स्वैरवृत्त। Fancifully, *adv.* कामचारेण, स्वैरं.

Fandangle, *n.* क्रीडनकं, क्षुद्रमंडनं; विचित्रचर्या.

Fane, *n.* देवमंदिरं, देवालय, पुण्यस्थानं.

Fanfare, *n.* तूर्यघोष.

Fanfaronade, *n.* विकत्थनं; दर्प; आडंबर.

Fang, *n.* दंष्ट्रा, रद। –ed, *a.* दंष्ट्राल, दंष्ट्रिक.

Fantasm, *n.* आभास.

Fantastic, *a.* कामचारिन्, स्वच्छंद, स्वैरवृत्त; अपरूप, विचित्र, विलक्षण; अस्थिर, चपल, लोल; अद्भुत.

Fantasy, *n.* अपूर्व०, विचित्रकल्पना, भावनाशक्ति *f.*,

Fantoccini, *n. pl.* तंतुपुत्तलिकाः *pl.*

Far, *a.* दूर, दूरवर्तिन, दूरस्थ, विप्रकृष्ट । *adv.* आरात; दूरं, दूरे; अतीव, अत्यंतं । As f. as, आ *with abl. or in comp.* । By f., अतीव, भूयसा । F.-fetched, *a.* क्लिष्ट; असहज; अयथार्थ । F. -seeing *a.* दूरदृष्टि, पारदृश्वन्.

Farce, *a.* प्रहसनं । -ical, *a* उपहास्य; विरूप.

Fard, *n.* मुखराग.

Fardel, *n.* पोटलिका, भार.

Fare, *vi.* पर्यट् 1 P, विचर् 1 P; अस् 2 P, वृत् 1 A; भुज् 7 U । *n.* (1) आतर, वहनमूल्यं; प्रयाणं; (2) अन्नं, आहार, खाद्यं । -well, *interj.* स्वस्ति, भद्रं भूयात्, शिवास्ते पंथानः संतु । *n.* आमंत्रणं-णा.

Farina, *n.* खंडिका, पिष्टं ।-ceous, *a.* पिष्टमय

Farm, *n.* क्षेत्रं, ०भूमि *f.* । *vt.* कृष् 1 P । -er *n.* कृषीवल, क्षेत्रपाल, क्षेत्रिक । -ing, *n.* कृषिकर्मन् *neu* । -yard, *n.* क्षेत्रवाटिका, क्षेत्रांगणं.

Farrago, *n.* द्रव्यसंकुलं, प्रकीर्णकं, संकर.

Farrier, *n.* अश्वचिकित्सक, ०वैद्य.

Fart, *n.* पर्द, पर्दनं.

Farther, *a.* दवीयस्, दूरतर । *adv.* दूरतरं.

Farthing, *n.* कपर्दक.

Fascia, *n.* बंधनं, वेष्टनं.

Fascicule, *n.* लघुपुंज; पुस्तकभाग.

Fascinate, *vt.* मुह् *c*, वशीकृ 8 U; अभिचर् 1 P; आकृष् 1 P रम् *c*, हृ 1 P । -ing, *a.* चित्तापकर्षक, चेतोहर, मनोहर, मोहक । -ion, *n.* मोहनं, वशीकरणं; अभिचार, इंद्रजालं; चित्ताकर्षणं.

Fash, *vt.* त्रस् *c*, पीड् 10 U.

Fashion, *n.* प्रकार रीति *f.*, शैली; रूपं; लोकाचार; शिष्टवर्ग । *vt.* क्लृप्, घट् *both c*, रूप् 10 U; निर्मा 2 P. 3 A, तक्ष् 1.5 P, रच् 10 U; युज् 7.10 U. । -able. *a.* लोकप्रिय, शिष्टानुमत । Out of f. अप्रचलित, नष्टप्रचार.

Fast, *a.* (1) दृढ, निश्चल, स्थिर; दृढबद्ध, सुस्थापित; गाढ, दृढभक्ति; अनश्वर, स्थायिन्; (2) क्षिप्र, चपल, जवन, त्वरित, द्रुत, वेगवत् शीघ्र; (3) दुराचार, दुर्वृत्त, भोगासक्त, लंपट । -*adv.* द्रुतं, सत्वरं, *etc.* । F asleep, गाढनिद्र । To make f., दृढं बंध् 9 P । -en, *vt.* दृढं स्था *c*; ग्रंथ् 9 P, बंध् 9 P, संयुज् 7.10 U; पिधा 3 U, पिनह् 4 U । -ener, -ening, *n.* अर्गला, कुडुप; ग्रंथि *m.*

Fast, *vi.* उपवस् 1 P, उपोषणं कृ 8 U, क्षप् 1 U, लंघ् 1 A । *n.* (*also* -ing) अनशनं, अनाशकं, अनाहार, आक्षपणं, उपवस्तं-स्तु *m.*

उपवास, उपोषणं, औपवास्यं, लंघनं। F. day, उपवसथ। F. unto death, प्रायोपगमनं, प्रायोपवेशनं-निका.

Fastidious, *a.* दुराराध्य; जुगुप्साशील; उपेक्षक.

Fastness, *n.* (1) दृढता, स्थैर्यं; (2) कोट, दुर्ग.

Fat, *a.* पीन, पीवन्, पीवर, पुष्ट, मांसल, मिन्न, मेदस्विन्, मेदुर, स्थूल; चिक्कण, सस्नेह; श्रीमत्, समृद्ध; उर्वर, सुफल। *n.* पलतेजस् *neu.*, मेदस् *neu*, वपा, वसा; उत्तमांश। *vt.* (*also* -ten) पीवरीकृ 8 U; परिपुष्, स्फाय् *both c*; *vi.* आप्यै 1 A, पीनीभू 1 P। The f.'s in the fire, अनर्थोऽवश्यं संप्राप्तः। F. -brained, -headed, -witted, *a.* जडमति, मंद, मूढ, मूर्ख। -ness, *n.* पीवरता, मेदस्विता। -ty, *a.* मेदोमय; चिक्कण, वपाक्त.

Fatal, *a.* दैवघटित; अहार्य, आवश्यक, नियत, दैवनियुक्त; आयतिनिर्णायक, ०निश्चायक; अनर्थसूचक; अंतकर, प्राणहर, मर्मभेदक; दुर्दैव, दुर्दैवोपहत, मंदभाग्य। -ism, *n.* दैववाद, दैवायत्तत्ववाद; दैवाधीनता। -ist, *n.* दैववादिन्। -ity, *n.* नियति *f.*, भवितव्यता; दैवप्रभाव; अनर्थ, उपप्लव, विप्लव; अपघात, अपमृत्यु *m.*

Fate, *n.* अदृष्टं, दिष्टं, दैवं, नियति *f.*, प्राक्तनं, भवितव्यता, भागधेयं, भाग्यं, विधि *m.*, विपाक; अंत, नाश, मृत्यु *m.* । *vt.* दैवगत्या आदिश् 6 P. *or* नियुज् 7 A. 10 U; नाशाय नियुज् 7 A. 10 U। -d, *a.* (दैव०) नियुक्त, °निर्दिष्ट। -ful, *n.* आयतिनिर्णायक, ०निश्चायक; दैवनियुक्त; प्राणहर.

Father, *n.* जनक, जनितृ *m.*, जन्मद, तात, पितृ *m*, बीजिन् *m.*, वप्तृ *m*; । (*pl.*) पितृ, पूर्वज *both pl.*। F. and mother, पितरौ मातरपितरौ, मातापितरौ *all dual*। F. -in-law, श्वशुर। *vt.* उत्पद्, जन् *both c*; पितृवत् आचर् 1 P; कर्तृत्वं *or* जनकत्वं आरुह् *c*। -hood, *n.* पितृत्वं; जनकाधिकार। -land, जन्मभूमि *f.*। -ly, *a.* पितृसम; वत्सल, स्निग्ध.

Fathom, *vt.* तलं परीक्ष् 1 A *or* मा 3 A.*c*; अवगम् 1 P, ग्रह् 9 P। *n.* व्याम। -less, *a.* अगाध, अतलस्पर्श.

Fatigue *n* क्लांति *f.*, खेद, ग्लानि *f.*, आयास, श्रम। *vt* आयस्, खिद्, ग्लै, श्रम् *all c.*; पीड् 10 U, व्यथ् *c*। -d, *a.* क्लांत, ग्लान, खिन्न, जातखेद, श्रांत। -less, *a.* अश्रांत.

Fatuitous, Fatuous, *a.* जडधी, मंद, मूढ, मूर्ख.

Fatuity, *n.* जाड्यं, मूढता, मूर्खता.

Faugh, *int.* धिक्.

Fault, *n.* अपचार, छिद्रं, दूषणं, दोष; अपराध, प्रमाद, मंतु *m.* स्खलनं । At a f., आकुल, संभ्रांत । To find f. with, अधिक्षिप्, अवक्षिप् *both* 6 P, उपालभ् 1 A, दुष् *c* । -finder, *n.* दोषान्वेषिन्, दोषैकदृश् । -less, *a.* निर्दोष; निरपराध, शुद्ध । -y, *a.* सदोष; विकल; सापराध.

Fauna, *n.* (विशिष्टप्रदेशस्य) प्राणिजातं.

Favour *n.* अनुकूलता, अनुग्रह, उपकार, प्रसाद, मृडनं, संश्रय; प्रीतिचिह्नं । *vt.* अनुग्रह् 9 P, उपकृ 8 U, मित्रीयति *Den*; अनुमन् 4 A, सदृश् *a.* भू 1 P । In f. of, पक्षे । -able, *a.* अनुकूल, हित; प्रसन्न; अनुमत.

Favourite, *n. a.* इष्ट, दयित, प्रिय, वल्लभ । -ism, *n.* पक्षपातित्वं.

Fawn, *n.* (1) मृगपोत, ०शावक; *vt* प्रसू. 2 A । (2) *vi.* (श्ववृत्त्या) उपच्छंद् 10 U *or* आराध् *c.* । -ing, *a.* आराधनपर, चाटुपर.

Fealty, *n.* निष्ठा, भक्ति *f.*

Fear, *n.* भयं, भीति *f.*, दर, संत्रास, साध्वसं; चिंता, शंका । *vt.* त्रस् 4 P, भी 3 P, शंक् 1 A । *vi.* भयत्रस्त *a.* भू 1 P । -ful, *a.* भयार्त, भीत, साशंक; घोर, दारुण, भयंकर, भयानक, भीषण । -less, *a.* अभय, निर्भय; धृष्ट, प्रगल्भ, साहसिक । -some घोर, भीषण.

Feasible, *a.* करणीय, शक्य, साध्य, संभवनीय । Feasibility, *n.* शक्यता; संभवनीयता.

Feast, *n.* मिष्टान्नभोजनं; भोजनोत्सव; उत्सव । *vt.* मिष्टान्नभोजनेन संतुष् *c.*

Feat, *n.* (अद्भुतं) कर्मन् *neu. or* चरितं; सुकृति *f.*

Feather, *n.* पक्ष, पिच्छं । F. of a peacock, बर्ह *mn.* । *vt.* पिच्छेन सनाथीकृ 8 U । A f. in one's cap, गौरवचिह्नं । To f. one's nest, धनसंचयं कृ 8 U । Birds of a f. समप्रकृतिकाः जनाः । To show the white f., क्लैब्यं गम् 1 P. भयं आविष्कृ 8 U । F.-brained, मंदमति ।--ed, *a.* पक्षिन्, पतत्रिन् । -less, *a.* अपक्ष, पिच्छहीन । -y, *a.* पिच्छावृत; पिच्छसम.

Feature, *n.* आकार, रूपं; लक्षणं । *vt.* रूप् 10 U, वर्ण् 10 U.

Febrifacient, *n.* ज्वरजनकं.

Febrifuge, *n.* ज्वरघ्नं.

Febrile, *a.* ज्वरज; ज्वरदर्शक.

Feculent, *a.* कल्कपूर्ण; कलुष.

Fecund, *a.* बहुप्रज, बहुप्रसव; बहुफल; उर्वर ।--ate, *vt.* बहुफलं *a.* कृ, सफलीकृ *both* 8 U; गर्भं ग्रह् *c* ।--ity, *n.* बहुप्रसवत्वं, सफलता.

Federacy, *n.* राष्ट्रसंघ.

Federal, *a.* समयबद्ध, सामयिक; संहत, संयुक्त, सांघातिक.

Federate, *a.* संयुक्त, संहत । -ion, *n.* (राष्ट्र) संघ, (राष्ट्र) संस्था.

Fee, *n.* वेतनं, शुल्क *mn.*; दक्षिणा.

Feeble, *a.* अशक्त, क्षीण, दुर्बल, निर्वीर्य, निःसत्त्व; मंद, शिथिल, निष्प्रभ ; निरर्थक, रसहीन । F.-minded, *a.* न्यूनबुद्धि, विकलमति.

Feed, *vt.* अश् *c.* भुज् *c*; (परि०) पुष् 1. 4. 9 P *c*, संवृध् *c* । *vi.* अद् 2 P, अश् 9 P, भुज् 7 A । *n.* अन्नं, आहार; घास, यवसं । -er *n.* परिपोषक, भोजनदातृ *m.*; भक्षक, भोक्तृ *m.*; नदीशाखा; प्रणाली.

Feel, *vt.* अनुभू 1 P, अभिगम् 1 P, उपलभ् 1 A, विद् 2 P; गण् 10 U, मन् 4 A; स्पृश् 6 P; स्पर्शेण परामृश् 6 P । *vt.* अनुकंप् 1 A; मन् 4 A; अनुभू *Pass.* । *n.*, स्पर्शनं । -er, *n* स्पर्शक, स्पर्शशृंगं (कीटकादीनाम्); परेंगितज्ञानयुक्ति *f.* । -ing *n.* अनुभव, उपलब्धि *f*, उपलंभ, बोध; परामर्श, स्पर्श; भाव, रस; मनोधर्म; वृत्ति *f.*; अनुकंपा, अनुक्रोश, करुणा, कृपा, घृणा, दया, सहानुभूति *f.* । -ingly, *adv.* सानुकंपं; सक्षोभं.

Feign, *vt* (1) अपदिश्, व्यपदिश् *both* 6 P; विडंब् 10 U; (2) मनसा कॢप् *c* । -ed, *a.* कृतक०. मिथ्या०, व्याज० *in comp.* छाद्मिक.

Feint, *n.* कृतकावस्कंद; छद्मन् *neu.*, व्याज.

Felicific, *a.* सुखकर.

Felicitate, *vt.* अभिनंद् 1 P. *c* । -ion, *n.* अभिनंदनं.

Felicitous, *n* धन्य, समृद्ध, सुखिन्; आह्लादक मनोहर; ललित, सुभाषित, सूक्त.

Felicity, *n.* आनंदातिशय, धन्यता, निर्वृति *f.*, परमसुखं, सौख्यं; औचित्यं; सुभाषितं, सूक्ति *f.*

Feline, *a.* बैडाल, मार्जारीय; कापटिक, धूर्त; गुप्त, निभृत.

Fell, *n.* (1) अजिनं, चर्मन् *neu*; लोमावरणं; (2) अश्मरगिरि *m*; अनुर्वराधित्यका । *a.* (3) उग्र, क्रूर, निर्घृण, परुष; घोर, दारुण, रौद्र.

Fell, *vt.* (अव०)निपत् *c*; अवच्छिद् 7 P.

Felloe, Felly *n.* (चक्रस्य) धारा.

Fellow, *n.* सहचर, सहवासिन् *m*; मित्रं, वयस्य; समपदस्थ, समान; यमक; पारिषद्य, सदस्य; जन, नर, पुरुष । F.-feeling, भूतदया, समदुःखत्वं, सहानुभूति *f.* । -ship, *n.* सख्यं, साहचर्यं; मंडलं, परिषद् *f.*, संघ; सदस्यता.

Felo-de-se, *n.* आत्महत्या, प्राणत्याग; आत्मघातिन् *m.*

Felon, *n.* महापराधिन् , महापातकिन् *both m*; अधम, जाल्म । *a.* क्रूर, निर्घृण; खल, दुष्ट ।-ious, *a.* अतिपाप; पापार्थकृत; दुष्ट । -y, *n.* महापराध, महापातकं.

Felt, *n.* और्णकं, नमतं.

Female, *a.* स्त्रीलिंगिन् । *n.* नारी, स्त्री.

Feme covert, *n.* ऊढा *or* कृतविवाहा (स्त्री).

Feme sole, *n.* अनूढा (स्त्री).

Feminine, *a.* स्त्रीजातीय, स्त्रीलक्षण; स्त्रैण; कोमल, मृदु, ललित; स्त्रीलिंगिन् । -ity, *n.* स्त्रीगुणाः, स्त्रैणं । -ism, *n.* स्त्रीस्वातंत्र्यवाद.

Femur, *n.* ऊर्वस्थि *neu.*

Fen, *n.* अनूप, पंकिलभूमि *f.*

Fence, *n.* (1) आवरणं, प्राचीरं, मोघोलि *m.*; वरण, वृति *f.*; (2) लोप्त्रग्राहक । *vt.* त्रै 1 A, रक्ष् 1 P; निवृ *c*; आवृ 5 U; परिवेष्ट् 1 A. *c*; वृत्या अवरुध् 7 U *or* परिक्षिप् 6 P; प्रतिहन् 2 P । *vi.* कृपाणखुरलीं अभ्यस् 4 U; खड्गेन युध् 4 A; लोप्त्रक्रयविक्रयं कृ 8 U । To sit on the f., उदासीन *a.* *or* बहिःपक्षं आस् 2 A *or* वृत् 1 A । -ing, *n.* (1) खड्गविद्या; खड्गखुरली; (2) वृतिसामग्री.

Fend, *vt.* प्रतिहन् 2 P, (नि) वृ *c.*

Fender, *n.* चुल्लिगुप्ति *f.*; नौकावरूथं.

Feoff, *vt.* स्वत्वं ऋ *c* *or* अंगीकृ 8 U.

Feracious, *a.* उर्वर, बहुफल.

Ferine *a.* क्रूर, वन्य.

Ferment, *n.* अभिषव, आसव, कारोत(त्त)म-र, किण्व *mn.*, जगल, नग्नहू *m.*, मंड *mn.* मद्यबीजं, मर्कस, मासर, मेदक; उत्सेक, प्रकोप, विप्लव, संक्षोभः अंतःक्षोभ । *vt.* अंतःक्षोभं जन् *c*; आकुलीकृ 8 U, क्षुभ् *c* । *vi.* उत्सिच् *Pass.*, क्षुभ् 4 P । -ation, *n.* अभिषव; अंतःक्षोभ; उत्सेक.

Ferocity, *n.* क्रौर्यं, घोरता, रौद्रता.

Ferocious, *a.* उग्र, कठोर, क्रूर, निर्दय, भीम, रौद्र.

Ferrate, Ferric, *a.* आयस, लोहमय, लौह.

Ferret, *n.* घरीक, बभ्रु *m.* । *vt.* दीर्घोद्योगेन अन्विष् 6 P.

Ferriage, *n.* आतर, तरपण्यं, तारिकं, तार्यं.

Ferrule, *n.* अग्ररक्षणी.

Ferry, *vt.* नौकया तॄ 1 P *or* पारं गम् *c* । *n.* घट्ट, तर; (*also* F.-boat) तरणि-णी *f*, तरि । F., -man, तारक-ण.

Fertile, *a.* उर्वर, बहुफल, बहुसस्य, सुफल; कुशल, पटु । -ity, *n.* बहुफलत्वं, सफलता । -ize, *vt.* फलदं *a.* *or* बहुफलं *a.* कृ 8 U.

Ferule, *n.* यष्टि *f.*, वेत्रं.

Fervency, *n.* चंडता, प्रखरता; उत्कटता.

Fervent, *a.* उल्बण, चंड, तिग्म, प्रखर, प्रचंड, प्रोष्ण; उत्कट, उत्सुक, उदग्र, सोत्साह.

Fervid, *a.* उल्बण *etc.*; उत्कट *etc.* *See* ' Fervent'.

Fervour, *n.* प्रखरता, प्रचंडता; उत्कटता *etc.* *See* ' Fervency '.

Festal, *a.* औत्सविक; प्रसन्न, प्रोत्फुल्ल.

Fester, *vi.* पूतीभू 1 P, पूय् 1 A। *n.* ईर्म *mn.* व्रण *mn.*

Festination, *n.* त्वरा, रभस *mn.*

Festival, *a.* औत्सविक। *n* उत्सव, उद्धर्ष, उद्धव, क्षण, पर्वन् *neu.*, मह, यात्रा, हर्षवेणुक.

Festive, *a.* औत्सविक; प्रफुल्ल, प्रमुदित, प्रसन्न, सहर्ष। -ity, *n.* उत्सव, *etc. See* 'Festival'; आह्लाद, प्रमोद.

Festoon, *n.* माला, हार.

Fetch, *vt.* आनी, आवह्, आहृ *all* 1 P; आकृ *c*; निष्कृष् 1 P; (मूल्यं) आपद् *c*; आसद्, साध् *both* *c*; आनंद् *c*। -ing, *a.* मनोरम, मनोहर, रम्य.

Fête, *n.* उत्सव, पर्वन् *neu.*, मह। *vt.* तृप् *c.*

Fetid, *a.* दुर्गंध, पूति, पूतिगंध.

Fetish, *n.* पूज्यभूतवस्तु *neu.*

Fetor, *n.* दुर्गंध, पूति *f.*

Fetter, *n.* निगड *mn.*, पाश, बंध, बंधनं, शृंखला। *vt.* निगडयति *Den.* पाशेन बंध् 9 P; नियंत्र् 10 U, निरुध् 7 U। -ed, *a.* निगडित; नियंत्रित.

Fettle, *n.* अवस्था, दशा। In good f., सुस्थ, सुस्थित.

Feud, *n.* द्वंद्वभाव, विद्वेष, विरोध, वैरं.

Feudatory, *n.* सामंत.

Fever, *n.* ज्वर, ताप, दाह। *vt.* ज्वरं आपद् *c*, ज्वर् *c*। -ish, *a.* ज्वरार्त, ज्वरित, सज्वर.

Few, *a.* अल्प, स्तोक; कतिपय। *n.* कतिचित्, कतिपयाः *pl.*। A good f, बहवः *pl.*। In f., संक्षेपतः, समासेन। -ness. *n.* अल्पता, स्तोकत्वं.

Fiancé, -cée, *n.* निश्चितविवाह-हा.

Fiasco, *n.* असिद्धि *f.*, फलभंग.

Fiat, *n.* आज्ञा, आदेश, नियोग, शासनं.

Fib, *n.* तुच्छानृतं, मिथ्याभाषणं। *vi.* तुच्छानृतं वद् 1 P.

Fibre *n.* गुण, तंतु *m.*, सूत्रं; सार; घटना। -ous, *a.* तंतुमय; शिराल.

Fibril, *n.* क्षुद्रतंतु *m.*

Fickle, *a.* अस्थिर, चंचल, चपल, तरल, लोल, चंचलमति *f.*। -ness, *n.* चांचल्यं, चपलता, लौल्यं.

Fictile, *a.* घटनायोग्य, शिल्पनिर्मित; मार्त्तिक, मृण्मय.

Fiction, *n.* कल्पना, निर्मिति *f*, कथा; कल्पितवृत्तांत; मिथ्याकथा; कथात्मकं वाङ्मयं.

Fictitious, *a.* कल्पनात्मक, कल्पित, कृतक, कृत्रिम; मिथ्याभूत.

Fictive, *a.* कल्पक, भावनापर; कल्पनात्मक, कल्पित; कृतक, कृत्रिम.

Fiddle, *n.* सारंगी। *vi.* सारंगीं वद् *c*; कालं वृथा क्षि *c*। -r, *n.* सारंगीवादक। To play first

or second f.; प्रामुख्येन *or* अप्रामुख्येन वृत् 1 A। F. -stick; कोठा, शारिका। -ing *a.* तुच्छ.

Fidelity, *n.* निष्ठा, भक्ति *f.*; सत्यसंधत्वं, समयप्रतिपालनं, सत्यवादित्वं; यथार्थत्वं.

Fidget; *vi* अशांतं वृत् 1 P *or* अंगचालनं कृ 8 U। -y, *a.* अशांत, अस्वस्थ, लोल.

Fiducial, *a.* ध्रुव, स्थिर; विश्वस्त; सामयिक.

Fiduciary, *a.* सामयिक; निक्षिप्त; प्रत्ययित, प्रत्ययिन्; अविचल। *n.* निक्षेपधारिन् *m.*

Fie, *int.* धिक्.

Field, *n.* केदा(द)र, क्षेत्रं, क्षेत्रभूमि *f*; विषयः स्थानं। F. of battle, रणक्षेत्रं, समरभूमि *f.*। Aggregate of fields, कैदारकं, क्षैत्रं। To take the f., युद्धचर्यां उपक्रम् 1 A; विग्रहे प्रविश् 6 P। F. -marshal, सेनानी, सेनापति *both m.*

Fiend, *n.* पिशाच, भूतं, राक्षसः; महाखल। -ish, *a.* आसुर, पैशाच; अतिक्रूर, अतिदुष्ट.

Fierce, *a.* उग्र, क्रूर, दारुण, भीम, भीषण; इद्धकोप, क्रोधाविष्ट; प्रखर, प्रचंड, प्रबल, संरब्ध; तीव्र, सरभस। -ly, *adv.* तीक्ष्णं; संरंभेण; सकोपं.

Fiery, *a.* अग्निमय; उष्ण, तप्त; तेजस्विन्, देदीप्यमान; कोपन, क्रोधन, शीघ्रकोपः प्रबल, सरभस; ज्वलनशील, दाह्य; कलहप्रिय.

Fife, *n.* मुरली, वेणु *m.*

Fifteen, *an.* पंचदशन्। -th, *a.* पंचदश।. Consisting of f., पंचदशिन्.

Fifth, *a.* पंचम। *n.* पंचमं.

Fifty, *a.* पंचाशत्। *n* पंचाशति *f.*। Collection of f. पंचाशिका। Fiftieth, *a.* पंचाश, पंचाशत्तम.

Fig, *n.* (1) अंजीर, (glomerous) उदुंबर, न्यग्रोध, प्लक्ष; (fruit) अंजीरं, उदुंबरफलं, *etc.*; तुच्छं। (2) आभरणं, परिवेष.

Fight, *vi.* युध् 4 A, विग्रह् 9 P। *vt.* विरुध् 7 U; *also prec.*। *n.* अभिमर्द, अभिसंपात, आजि *mf.*, आयोधनं, आस्कंदनं, आहव, कलि *m.*, मृधं; युद्धं, युध् *f.*, संख्यं, संगर, संग्राम, समर, समित् *f.*, संयत् *f.*, सांपरायिकं। To f. off, अपास् 4 U, परावृत् *c*। To f. out, युद्धेन निर्णी 1 P। To f. shy of, त्यज् 1 P, दूरीकृ 8 U। -er, F.ing-man, भट, योद्धृ, योध, वीर.

Figment, *n.* कल्पना, मिथ्यावृत्तांत.

Figuline, *a.* कुलालोचित; कुलालघटित; शिल्पनिर्मित.

Figure, *n.* आकार, आकृति *f.*, रूपं; काय, देह, शरीरं; प्रतिमा, मूर्ति *f*; रेखाचित्रं; (of

speech) अलंकार; अंक । *vi.* परिक्लृप् *c*, रच् 10 U; चित्र् 10 U, रूप् 10 U; विभू *c*; गण् 10 U, संकल् 10 U. संख्या 2 P; दृश् *Pass*, प्रादुर्भू 1 P। To f. up, परिसंख्या 2 P। F.-head, मिथ्याग्रणी *m.*। -ant, *n.* नर्तक। -ate *a.* मूर्त, मूर्तिमत्, साकार। -ation *n.* आकारापादनं; रूपसाधनं; आकार, रूपं। -ative, *a.* औपचारिक, लाक्षणिक; सालंकार। -ed *a.* अलंकृत; चित्रित; (अमुकाकारेण) घटित.

Filament, *n.* केसर; तंतु *m.*, सूत्रं.

Filch, *vt.* चुर् 10 U, मुष् 9 P, स्तेन् 10 U.

File, *n.* (1) (लेख) पंजिका; पंक्ति *f.*, श्रेणि-णी *f.*; (2) व्रश्चन, लोहमार्जनी। *vt.* पंजिकायां विन्यस् 4 U; । *vi.* श्रेणीभिः प्रचल् *c*; घृष् 1 P, मृज् 2 P.

Filial. *a.* पुत्रीय, पुत्र्य; कन्योचित, पुत्रोचित.

Filiation, *n.* अपत्यत्वं; संतति *f.*; अन्वयागम.

Filiform, *a.* सूत्राकार.

Filigree, *n.* सुवर्ण°, रूप्यतंतुशिल्पं.

Filings, *n. pl.* व्रश्चनकृतं चूर्णं.

Fill, *vt.* पूर् 10 U, पृ-पॄ 3 U, भृ 3 U, व्याप् 5 P, संपूर् 10 U। *vi.* पूर् *Pass*; श्वि 1 P. *Pass*, स्फाय् 1 A। -ing, *a.* व्यापक; तृप्तिकर; *n.* पूरणद्रव्यं.

Fillet, *n.* पट्ट, बंधनं, वेष्टनं.

Fillip, *vt.* अंगुल्या तड् 10 U। प्रवृत्, प्रोत्सह् *both* **c**। *n.* अंगुलिताडनं, छोटिका; उत्तेजनं, प्रोत्साहनं.

Filly, *n.* अश्वकिशोरी; कन्यका, बालिका.

Film, *n.* पटलं; सूक्ष्मत्वच् *f.*। *vi.* पटलेन आच्छद् *Pass.*

Filter, *n.* जलशोधनयंत्रं। *vt.* निस्यंदनेन शुध् *c.*

Filth, *n.* अवस्कर, कर्दम, कल्क *mn.*, किट्टं, मल *mn*; आविलत्वं, कालुष्यं, पंकिलत्वं, मालिन्यं; अश्लीलता। -y. *a.* आविल, कलुष, पंकिल, मलिन, मलीमस; अमेध्य, अशुध्द, कश्मल, कुत्सित, पांसुल.

Fin, *n.* (मत्स्य) पक्ष। -ny, *a.* सपक्ष.

Final, *a.* अंतिम, अंत्य, चरम; निर्णायक, निश्चायक; परिच्छिन्न, सुनिश्चित। -ity, *n* अंतिमत्वं; निर्णीतत्वं। -ly, *adv.* अंते.

Finale. *n.* अवसान°, समाप्तिप्रयोग; उपसंहार, निष्ठा, पर्यवसानं.

Finance, *n.* राष्ट्रधनविनियोग; आय, धनागम, राजस्वं। *vt.* धनसामग्रीं उपपद् *c.*। -ier, *n.* धनाधिकारिन्, *m.*

Find, *vt.* अधिगम् 1 P, आप् 5 P, प्रतिपद् 4 A, प्राप् 5 P, लभ् 1 A, विद् 6 U, समासद् 10 U; उपलभ् 1 A, बुध् 1 P; उपपद् *c*, संभृ 3 U। To f. fault with,

दुष् *c*, निंद् 1 P । -ing, *n.* प्रकाशनं; लब्धि *f.*; निर्णय.

Fine, *n.* (धन) दंड । *vt.* दंड् 10 U.

Fine, *a.* उत्कृष्ट, उत्तम, गुणोपेत; परिष्कृत, शुद्ध; तनु, सूक्ष्म; कोमल, सुकुमार; अन्यून, निर्दोष; चारु, रम्य, शोभन; निरभ्र; प्रसन्न; स्तुतिपर । In f., अंते ; संक्षेपेण । F. arts, ललितकलाः *pl.* । -ry, *n.* सुपरिवेष; भूषणाडंबर । -ing, *n.* धातुशोधनं.

Finesse, *n.* कपटं, छद्मन् *neu.*, माया, वंचना, व्याज; कौशलं, नैपुण्यं.

Finger, *n.* अंगुलि *f.*, करशाखा । *vt.* अंगुलिभिः स्पृश् 6 P । Fore or index f., तर्जनी, प्रदेशिनी । Middle f., ज्येष्ठा, मध्यमा । Third f., अनामिका, सावित्री । Little f., कनिष्ठा, कनिष्ठिका, कनीनिका । F.-post, मार्गदर्शकस्थूणा.

Finical, *a.* दुराराध्य; विचित्ररुचि.

Finis, *n.* अंत, समाप्ति *f.*

Finish, *vt.* अंतं गम् *c*, अवसो 4 P, निर्वृत् *c*, समाप् *c*; संपद् *c*, संपूर् 10 U; व्यापद् *c* । *vi.* अवसो, समाप् *both c* । *n.* अंत, अवसानं, समाप्ति *f.*; अंतिमः परिष्कार.

Finite, *a.* नियत, परिच्छिन्न, परिमित, समर्याद.

Fir, *n.* देवदारु, द्रुकिलिमं, पारिभद्रं, पीतदारु, पूतिकाष्ठं, भद्रदारु, सुराह्वयं *all neu.*

Fire, *n.* अग्नि, अंचाति, अनल, अर्चिष्मत्, आश्रयाश, इषिर, उदर्चिस्, उषर्बुध, कृपीटयोनि, कृशानु, कृष्णवर्त्मन्, क्रव्याद, घासि, चित्रभानु, चिरि, जागृवि, जातवेदस्, जुहुराण, ज्वलन, तनूनपात्, त्रिधामन्, दमुनस्, दहन, दुरासद, धूमकेतु, पचि, पावक, पीथ, बृहद्भानु, भरथ, भुजि, मंत्रजिह्व, रोहिताश्व, वमि, वसुरेतस्, वह्नि, वातसख, वातसारथि, वीतिहोत्र, वैश्वानर, शुष्मन्, शोचिष्केश, सधि, सप्तजिह्व, सप्तार्चिस्, समंतभुज्, सहुरि, साचि, सृग्जिह्व, सृदाकु, हवन, हव्यवाहन, हिरण्यरेतस्, हुताशन, *all m.*; ताप, दाह; तेजस् *neu.*; उत्साह । To catch f. ज्वल् 1 P, दह् 1 P । F.-arm, अग्न्यस्त्रं । F.-brand, अलातं, उल्का, उल्मुकं, क्रमुक; जनचित्तसंक्षोभक । F.-eater, कलहप्रिय । F.-fly, खद्योत, ज्योतिरिंगण, निशामणि *m*, प्रभाकीट । F.-place, अधिश्रयणी, अंतिका, अश्मंतं, उद्धानं, चुल्लि *f.* । F.-proof, *a.* अदाह्य । F.-wood, इध्मं, इंधनं । F.-work, अग्निद्रव्यं.

Fire, *vt.* ज्वल् *c*, दह् 1 P; (अग्न्यस्त्रं) उत्सृज् 6 P; उद्दीप् *c*, संक्षुभ् *c* । *vi.* ज्वल् 1 P, दह् *Pass.*

Firm, *n.* (1) वणिक्संघ । (2) *a.* अचल, दृढ, निश्चल, स्थिर; धीर;

गाढ, घन, सांद्र; सुस्थित । -ness, *n*, अचलत्वं, दृढता, स्थैर्य.

Firmament, *n*. अंतरिक्षं, अंबरं, आकाश *mn*, खं, गगनं, तारावर्त्मन्, दिव्यं, नभस् *neu*, वियत् *f*., व्योमन् । -al, *a*. वैहायस; दिव्य.

First, *a*. अग्रिम, आदिम, आद्य, प्रथम; पूर्व, प्राक्तन; अग्र्य. मुख्य, मूर्धन्य । *adv*. (*also* -ly) अग्रे, आदौ, प्रथमं । -born, *a*. अग्रज, ज्येष्ठ । -rate, *a*. उत्तम, श्रेष्ठ.

Firth, *n*. पुटभेद, समुद्रवंक.

Fisc, *n*. राज्यकोश । -al, *a*. राज्यकोशविषयक.

Fish, *n*. अंडज, आत्माशिन् *m*., जलपिप्पक, झष. तिमि *m*. पृथुरोमन् *m*, मत्स्य, मीन, विसार, वैसारिण, शकुलिन् *m*, शंबर, संघचारिन् *m*. स्थिरजिह्व, स्वकुलक्षय । *vi*. मत्स्यान् ग्रह् 9 P *or* धृ 1 P; अन्विष् 6 P । F.-basket, कुवेणी , मत्स्याधानी । F.-hook, बडि(लि) शं, मत्स्यवेधनं । -monger, *n*. मत्स्यविक्रयिन् *m* । --er, er--man, *n*. कैवर्त, जालिक, जालिन् *m*., पाश, धीवर, नौजीविन् *m*., मत्स्याजीव, मात्स्यिक, मैनाल । F.ing--net, आनाय, कुपिनी, जालं; (wicker basket for catching f.) उद्दाल । -ery, *n* मत्स्यग्रहणं । -y, *a*. मत्स्यविषयक; मत्स्यसम; संदिग्ध.

Fissile, *a*. छिदुर, भिदुर.

Fission, *n*. छेद, भंग.

Fissure, *n*. भंग, स्फोट; रंध्रं, विवरं.

Fist, *n*. मुचुटि-- टी, मुष्टि-ष्टी, मुस्तु *all f*., संग्राह; (half-clenched f.) अर्धमुष्टिक, खेटक । --icuffs, *n*. *pl*. मुष्टियुद्धं, मौष्टा.

Fistula, *n*. नाली, नाडीव्रणं.

Fit, *n*. आक्रम, आवेश, घूर्णि *f*., भ्रमि *f*, मूर्च्छा ; कामचार, आकस्मिकः वृत्तिविकार । By fits and starts, सविच्छेदं. सविरामं । -ful, *a*. अस्थिर, चंचलवृत्ति; सविच्छेद; सोद्वेष्टन.

Fit, *a*. अनुरूप, उचित, युक्त, योग्य, संगत, समीचीन; सज्ज, सिद्ध । *vt*. युज् 7 A. 10 U, संधा 3 U; उपक्लृप् , संयुज् *both c*; प्रसाध *c*, सज्जीकृ 8 U; उपपद् , युज् *both Pass*.; अनुरूप *a*. भू 1 P । *n*. आनुरूप्यं । -ly, *adv*. उचितं, युक्तं, सम्यक् । -ness, *n*. औचित्यं, योग्यता; पात्रता.

Fitch, *n*. लोममार्जनी.

Five, *a*. *n*. पंचन् । Fifth, *a*. पंचम । By fives, पंचशः । F. years old, पंचामिन् । In f. parts *or* ways, पंचधा । F. -fold, पंचतय । Pentad *or* Aggregate of f., पंचकं, पंचत *f*..

Fix, *vt*. स्था *c*; निधा 3 U; दृढीकृ, स्थिरीकृ *both* 8 U; विधा 3 U, व्यवस्था *c*; निर्णी 1 P, निश्चि 5 U । *n*. संदेह०, संभ्रमपदं । To f.

upon, दृ 5 U, दृ 9 U । –ation, *n.* स्थापनं ; घनीकरणं । –ed, *a.* दृढ, निरूढ, स्थिर; प्रतिष्ठित; स्थापित । F.–ed property, स्थावररिक्थं । –edly, *adv.* स्थिरं, निश्चलदृष्ट्या । –edness, -ity, *n.* दृढता, स्थैर्यं । –ture, *n.* दृढस्थितं वस्तु *neu.*

Fizgig, *n.* स्वैरतरुणी.

Hauberk, *n.* कवच *mn.*, तनुत्राणं.

Haughty, *a.* अवलिप्त, उद्धत, गर्वित, मत्त, साटोप; उदार । -ly, *adv.* साटोपं, सावलेपं । -ness, *n.* अवलेप, आटोप, औद्धत्यं, गर्व, मद.

Haul, *vt.* बलात् कृष् 1 P *or* हृ 1 P । To h. over the coals, गर्ह् 1. 10 A, दुष् *c*.

Haulm, *n.* कांड *mn.*, पलाल *mn.*, वृंतं.

Haunch, *n.* कटि-टी *f.*, नितंब, श्रोणि-णी *f.*

Haunt, *vt.* नित्यं आश्रि 1 U *or* सेव् 1 A; सदा अनुचर् 1 P; नित्यं स्मृ *Pass*; (पिशाचादिकस्य) उपसृज् 6 P । *n.* आश्रय, नित्यस्थानं । H.-ed by ghosts, भूतोपसृष्ट.

Hauteur, *n.* आटोप, औद्धत्यं; उदारचर्या.

Have, *vt.* *Expressed by* अस् 2 P, भू 1 P, विद् 4 A, वृत् 1 A. *with Gen. of possessor*; अनुभू 1 P; धृ 10 U, भृ 3 U; *Expressed by Pot. Pass. Part. e. g.* मया

वक्तव्यं; *Expressed by causals* । H. done, विरम *Impera. 2 Sing.* । To be had, प्रवृ *c. Pass.* । To h. a care, अवधा 3 U । –ing, *a.* ०मत, ०वत्, *etc. or* ०उपेत, ०युक्त, *etc. in comp.*

Haven, *n.* नौकाशय; आश्रय, शरणं, संश्रय.

Haver, *n.* वृथाजल्पनं.

Havoc, *n* अवसादनं, उद्ध्वंस, निर्दलनं, प्रमाथ, विप्लव, संहार.

Haw, *vi.* साशंकं वद् 1 P.

Hawk, (1) *n.* कपोतारि *m.*, शशादन, श्येन; धूर्त, शठ । *vi.* श्येनैः मृगयां कृ 8 U । –eyed, *a.* तीक्ष्णदृष्टि । –er, *n.* श्येनचित्, श्येनजीविन् *both m.*

Hawk, (2) *vt.* विक्रयार्थं घुष् 1 P. 10 U. *or* क्रय्यजातं नी 1 P; प्रथ् *c* । –er, *n.* भांडवाह, वैवधिक.

Hawk, (3) *vi.* उत्कास् 1 A । *vt.* (श्लेष्माणं) उत्क्षिप् 6 P.

Hawked, *a.* कर्बुर, शबल; चित्रित.

Hawser, *n.* नौकारज्जु *f.*

Hay, *n.* शुष्कतृणं । To make h. of, संक्षुभ्, संभ्रम् *both c* । To make h. while the sun shines, अनुकूलसमयस्य फलं आदा 3 U, अनुकूलावसरे स्वार्थं साध् *c* । –loft, तृणकोष्ठ । –rick, –stack, *n.* शुष्कतृणराशि *m.*

Hazard, *n.* अपायभयं, संशय; दैवं, दैवयोग, समापत्ति *f*; ग्लह, पण । –*vt* संशये पत *c*; साहसं कृ 8 U । –ous, *a.* सांशयिक; संकटाक्रांत; संदिग्ध.

Haze, (1) *n.* धूमिका; अल्पकुहेली; दुर्दिनत्वं; अस्पष्टता । –y, *a.* धूमिकाच्छन्न; अभ्रित; अस्पष्ट.

Haze, (2) आयासैः पीड् 10 U, *or* व्यथ् *c.*

Hazel, *a.* आकपिश.

He, *pron.* अयं, असौ, एषः, सः

Head, *n.* अक्षत्रं, उत्तमांगं, मस्तं, मस्तक *mn*, मास्तिकं, मुंडं, मूर्धन् *m.*, मौलि *m.*, वरांगं, शिरस् *neu*, शीर्षं, शीर्षकं; अग्रं, शिखरं; अग्रणी *m.*, अधिपति *m.*, अध्यक्ष, नायक, प्रधानपुरुष; अधिकरणं, विषय; वर्ग; पाठशालाध्यक्ष; बुद्धि, मति *both f.*; प्रभव, मूलं । *vt.* अधिष्ठा 1 P, नी 1 P; अग्रे गम् 1 P; प्रतिरुध् 7 U । From h. to foot, आपादमस्तकं । H. and, ears, संपूर्णं । To h. back, रुध् 7 U, निवृत् *c* । Off one's h., उन्मत्त, नष्टबुद्धि, भ्रांतचित्त; अतिसंक्षुब्ध । Out of one's own h., स्वमतिकल्पित । To come to a h., सपूय *a.* भू 1 P; पच् *Pass*; परां काष्ठां *or* निर्णयावसरं प्राप् 5 P । To give one his h., अनुज्ञां *or* स्वातंत्र्यं दा 3 U । To keep one's h., स्थितप्रज्ञ *a.* अस् 2 P; न संक्षुभ् 4 P. । To lose one's h., अतीव संक्षुभ् 4 P. । To make

h., अग्रे गम् 1 P; सफलं प्रत्यवस्था 1 A । -ache *n.* शिरोवेदना । -band, *n.* उष्णीष *mn* । -dress, *n.* शिरोवेष्टनं । -er, *n* अवाङ्-मुखनिमज्जनं । -gear. *n.* शिरोभूषणं; अवक्षेपणी, वल्गा । -ing, *n.* नामन् *neu,* संज्ञा । -land, *n.* अंतरीप *mn.*, भूशिरस् *neu.* । -line, *n.* अग्राक्षरपंक्ति *f.* । -long, -foremost, *a.* अवाङ्मुख; सरभस, साहसिक; अविमृश्यकारिन्; *adv.* अधोमुखं; सरभसं । -less, *a.* शिरोहीन; अनायक, मूर्ख । -man, *n.* अग्रणी *m.*, अध्यक्ष, नायक । -money, *n.* प्रतिशीर्षकर । -most, *a.* अग्र्य, प्रमुख; अग्रस्थित । -piece, *n.* शिरस्त्राणं; बुद्धि, मति *both f.* । -quarters, *n.* मुख्यकार्यालय । -ship, *n.* नायकत्वं । - sman, *n* घातक, वध्यापुरुष, शिरश्छेदक । -spring, *n.* स्रोतोमूलं; उद्भव । -strong, *n.* अदम्य, अवश्य, अविनेय, दुर्निग्रह; आग्रहिन्, दुराग्रह, प्रतिनिविष्ट । -way, *n.* प्रगति *f.* । -wind, *n.* प्रतीपवात । -work, *n.* बुद्धिव्यापार.

Heady, *a.* आग्रहिन्, प्रतिनिविष्ट; सरभस, संरंभिन्, साहसिक; उद्दीपक, मादक । -ness, *n.* संरंभ; मादकत्वं.

Heal, *vt.* नीरोगं *a.* कृ 8 U; उपशम् *c*, चिकित्सते *Des.* प्रतिकृ 8 U, प्रशम् *c*; शुध् *c*; (wound) विरुह् *c*; प्रतिसमाधा 3 U । *vi.* प्रशम् 4 P, रुह् 1 P । -all, *n.* सर्वरोगघ्नं । -er, *n.* रोगहर । -ing, *a.* रोगहर; विरोपण; शांतिकर; *n.* उपशम; रोगहरणं; समुत्थानं.

Health, *n.* अनामय *mn.*, अरोगिता, आरोग्यं, कुशलं, नीरोगता, स्वास्थ्यं; प्रकृति *f.*, देहावस्था । -ful, -y, *a.* अनामय, कुशल, कुशलिन्, निरामय, नीरोग, सुस्थ, स्वस्थ । -ily, *adv.* स्वास्थ्यपूर्ण.

Heap, *n.* उत्कार, ओघ, निकर, पुंज-जि *f.* राशि *m*, संचय; बृहत्संख्या । *vt.* राशीकृ 8 U, संचि 5 U; भारं न्यस् 4 U; समाचि 5 U । Struck all of a h., विस्मयेन जडीकृत.

Hear, *vt.* आकर्ण् 10 U, निशम् 4 P, श्रु 5 P, समाकर्ण् 10 U; (कार्यं) विचर् *c*; अवधा 3 U, मनो दा 3 U । -er, *n.* श्रोतृ *m.* । -ing, *n.* निशमनं, श्रवणं; (of cases) अवेक्षणं, दर्शनं; श्रवणगोचर । -ken, *vi.* अवधा 3 U, मनो दा 3 U, सावधानं श्रु 5 P । -say, *n.* किंवदंती, जनप्रवाद.

Hearse, *n.* शवयानं; कट.

Heart, *n.* अग्रमांसं, हृद् *neu*, हृदयं, (Flesh of h.) बुक्का; अंतःकरणं, चित्तं, मनस् *neu*; वक्षस् *neu*; वीर्यं; सत्त्वं; उत्साह; भाव; प्रणय; गर्भ । After his

own h., यथेच्छं, यथेप्सितं । At h., तत्त्वतः । By heart, कंठस्थ । H. and soul, आस्थापूर्वकं, निष्ठया । Near one's h., अतिप्रिय । H. of oak, वीर्यवत् । Out of h., दुर्मनस्क, विषण्ण । To eat one's h. out, आत्मानं व्यथ् *c* । To get, learn by h., कंठस्थं *a.* कृ 8 U । To have at h., साग्रहं मनसि निधा 3 U *or* भज् 1 U । To have one's h. in one's mouth, अतीव संत्रस् 4 P, अतीव चकित *a.* भू 1 P । To give, lose one's h. to, भावं बंध् 9 P, अनुरक्त *a* भू 1 P । To pluck up h., पुनः धैर्यं अवलंब् 1 A । To set the h. at rest, शम् 4 P; सांत्व् 10 U; समाश्वस् *c* । To set the h. on, अतीव स्पृह् 10 U । To speak to one's h., आश्वस् *c*, समाश्वस् *c* । To take h. of grace, धैर्यं अवलंब् 1 A । To take to h., आत्मनं व्यथ् *c*; भृशं आकुलीभू 1 P । To wear one's h. upon one's sleeve, ऋजुतया इंगितं प्रकाश् *c* । With all one's h. प्रकामं, सर्वात्मना । -ache, *n.* मनोवेदना, हृदयव्यथा । -beat, *n* हृदयस्पंद । -broken, *a.* भग्नहृदय, शोकार्त । -burn, *n.* अम्लपित्तं; अंतर्दाह । -burning, *n.* मनस्तापः; अभ्यसूया, ईर्ष्या । -en, *vt.* अनुमुद्, प्रोत्सह्, समाश्वस् *all c*; *vi.* समाश्वस् 2 P । -felt, *a.* अकृत्रिम, निर्व्याज; दृढ, हृद्गत । -rending, *a.* अरुंतुद, मर्मभेदिन्, हृदयविदारक । -sease, *n* शांति *f.*, स्वास्थ्यं । -sick, *a.* अतिविषण्ण । -sore, *n.* महाशोकमूलं; *a.* उद्विग्नमानस । -stricken, -struck, *a.* भग्नमानस, शोकार्त । -strings, *n.* अनुकंपा; सौहार्दं, स्नेह । -whole, *a.* अननुरक्त, अबद्धस्नेह, अभिन्नहृदय.

Hearth, *n.* अग्निकुंडं, अधिश्रयणी, अंतिका, उद्धानं, चुल्लि-ल्ली *f.*

Heartless, *a.* अदय, कठोर, क्रूर, निर्घृण, निर्दय, पाषाणहृदय; कातर, क्लीब, निःसत्त्व, निर्वीर्य, भीरु । -ly, *adv.* कठोरतया । -ness, *n.* अदयता, क्रौर्यं, नैर्घृण्यं.

Heartsome, *a.* प्रोत्साहक, समाश्वासक; सोल्लास.

Hearty, *a.* अकृत्रिम, निर्व्याज, सरल; दृढ, हृद्गत; दक्षिण, सस्नेह; सुप्रकृति, सुमनस्; बहुभक्षक; विपुल; तृप्तिकर; स्वस्थ । -ly, *adv.* निर्व्याजं; सोल्लासं; सस्नेहं; सम्यक् । -ness, *n.* सरलता; दृढता; स्नेहपूर्णत्वं.

Heat, *n.* उष्ण *mn.*, उ(ऊ)ष्मन् *m.*, घर्म, त(ता)प, दाह; उष्णता; आतप, निदाघ; तप्तता; तीव्रता; क्रोध, संरंभ; चंडता, प्रखरता; मद ।

vt. तप् 1 P. *c*; उद्दीप् *c*; दह् 1 P; उत्तिज्, संधुक्ष् *both c* । -ed, *a.* तप्त, तापित; उद्दीप्त । -edly, *adv.* सक्रोधं, सावेशं । -ing, *n.* तापनं; उद्दीपनं, संधुक्षणं.

Heath, *n.* गुल्मावृतभूमि *f.*, जंगलभूमि *f.*, प्रस्तार; प्रचार.

Heathen, *n.* मूर्तिपूजक, आशिष्ट *m.* । -ism, -ry, *n.* मूर्तिपूजकसंस्था; मूर्तिपूजा; मूर्तिपूजकाचार; असंस्कृति *f.*

Heather, *n.* क्षुपविशेष । To set the h. on fire, संमर्दं उत्पद् *c.*

Heave, *vt.* सायासं उच्छ्रि 1 U *or* उत्था *c or* उद्यम् 1 P *or* उन्नम् *c*; उत्तुल् 10 U; दीर्घं निश्वस् 2 P; उत्क्षिप् 6 P । *vi.* स्पंद् 1 A; तरंगायते *Den.*; उद्भ्रम् 1 P । *n.* स्पंदनं; उन्नमनं; दीर्घनिश्वास । To h. in sight, दृष्टिगोचर *a.* भू 1 P । To h. to, (नौकां) विरम् *c.*

Heaven, *n.* आकाश *mn.*, गगनं, तारावर्त्मन्, वियत् *f.*; अमरलोक, अमर्त्यभवनं, ऊर्ध्वलोक, त्रिदशालय, त्रिदिव, त्रिविष्टपं, दिव् *f.*, द्यो *f.*, नाक, फलोदय, भोगभूमि *f.*, सुरावास, सौरिक, स्वर्ग, स्वर् *ind.*; ईश्वर । H. and earth, द्यावापृथिव्यौ, रोदसी-स्यौ । In the seventh h. परमानंदपूर्ण । -born, -bred, *a.* दिव्य, स्वर्गीय, स्वर्गोत्पन्न । -gifted, *a.* देवदत्त । -kissing, *a.* अभ्रंकष, नभःस्पृश् । -ly, *a.* दिव्य, दैव, स्वर्गीय, स्वर्ग्य; दिविषद्, स्वर्गस्थ; अमानुष; श्रेष्टतम; अत्याह्लादक, अतिमनोहर । H.ly body, नभश्चर । H.ly minded, धर्मात्मन्, पुण्यात्मन् । -wards, *adv.* स्वर्गं प्रति, स्वर्गाभिमुखं.

Heavy, *a.* गुरु, भारवत्, भारिक, भारिन; गाढ, घन; बृहत्, महत्, स्थूल; चंड, तीव्र, प्रखर; व्यापक; दुःसह, दुर्वह; जड, मंद; उद्विग्न, खिन्न । *adv.* (*also* Heavily), गुरुभारेण; भृशं; अचापल्येन । -handed, *a.* अकुशल; तंद्रिल । -headed, *a.* जड, मंदमति । -hearted, *a.* उद्विग्न, खिन्न, विषण्ण । H. laden, *a.* गुरुभारवाहक । -ish, *a.* ईषद्गुरु । -ness, *n.* गुरुत्वं; स्थूलता; जाड्यं.

Hebdomad, *n.* सप्तदिनं, सप्ताह; सप्तकं । -al, *a.* सप्तदैनिक, साप्ताहिक.

Hebetate, *vt.* कुंठीकृ 8 U.

Hebetic, *a.* यौवनविषयक.

Hebetude, *n* जाड्यं, मूढता.

Hecatomb, *n.* शतगोबलि, शतपशुबलि; सुमहाबलि *all m.*

Hectic, *a.* अविरत; ज्वरज; ज्वरसूचक.

Hector, *n.* उद्धत, दीनंदम, पिंडीशूर, शूरंमन्य; विकत्थिन् *m.*; कलहप्रिय । *vt.* तर्ज् 10 U । *vi.* विकत्थ् 1 A.

Hedge, *n.* आवरणं, प्राचीरं, मोघोलि *m.*, वृत्ति *f.* । *vt.* वृत्त्य

अवरुध् 7 U *or* परिक्षिप् 6 P *or* परिवेष्ट् *c*; हानिं प्रतिकृ 8 U । *vi.* अनृजुतया वृत् 1 A; दोलायते *Den.*

Hedgehog, *n.* शल्य; शल्यकंठ.

Hedonic, *a.* सुखविषयक.

Hedonism, *n.* सुखैकपुरुषार्थवाद.

Heed, *vt.* अवधा 3 U, आदृ 6 A, भज् 1 U, विमृश् 6 P, संमन् *c* । *n.* अनुसंधानं, अवधानं, विचार, विमर्श । To give, pay, take h. to, सावधान *a.* भू 1 P, सावधानं विचर् *c* । –ful, *a.* अप्रमत्त, विमृश्य०, समीक्ष्यकारिन् । –less, *a.* अनवधान; असमीक्ष्यकारिन्; उपेक्षक.

Heel, *n.* पादमूलं, पार्ष्णि *mf.* । To be at h., come to h., पदं अनुगम् 1 P; निकटे अनुव्रज् 1 P । H.s over head, head over h.s. अवाङ्मुख, ऊर्ध्वपाद । To be down out at h.s, दैन्यं उपगम् 1 P । To lay by the h.s, ग्रह् 9 P । To show a clean pair of h.s, to take to one's h.s, पलाय् 1 A.

Heel, (2) *vi.* एकपार्श्वे प्रलंब् 1 A *or* प्रवणीभू 1 P.

Heft, *n.* (1) उत्तोलनं; आयास, यत्न; भार, गुरुता; (2) त्सरु *m.*, वारंग । –y, *a.* गुरु, भारवत्; प्रबल, बलिन्.

Hegemony, *n* आधिपत्यं, नायकत्वं, प्राधान्यं, प्राबल्यं, मंडलेश्वरत्वं.

Heifer *n.* वत्सतरी, वत्सा, वत्सिका H. 1 year, 3 years old, एकहायनी, त्रिहायणी, *etc* । H. fit for a bull, *i.e.* for breeding, उपसर्या.

Heigh, *int.* रे रे, हंहो.

Height, *n.* उच्चत्वं, उच्छ्रय, उच्छ्रिति *f.*, उत्तुंगता, तुंगता; उच्चपदं, उत्कर्ष; उत्सेध; शिखरं; पराकाष्ठा *or* कोटि *f.*, । At its h. परां काष्ठां गत । –en, *vt.* उच्छ्रि 1 U, उत्था *c*, उन्नम् *c*; एध्, वृध् *both c*; द्रढयति *Den.*; अत्युक्त्या वर्ण् 10 U । –en, *vi.* उत्था 1 P; वृध् 1 A; उपचि *Pass.*

Heinous, *a.* अतिदुष्ट, अवद्य, गर्ह्यतम, घोर, जघन्य, दारुण, निंद्यतम, पापिष्ट । –ly, *adv.* घोरतया । –ness, *n.* घोरता, निंद्यतमत्वं.

Heir, *n.* अंशक, अंशभाज्, ०हर, ०हारिन्, दायाद, दायिक, रिक्थिन् *all m* । H. apparent, युवराज । –ess, *n.* अंशहारिणी । –less, *a.* अदायाद, अदायिक । –loom, *n.* पैतृकं जंगमरिक्थं । –ship, *n.* दायादत्वं, धनाधिकारित्वं.

Helcosis, *n.* विद्रधिपाक.

Heliacal, *a.* सौर.

Heliocentric, *a.* सूर्यकेंद्रत्ववादिन्.

Heliolatry, *n.* सूर्यपूजा.

Heliotrope, *n.* सूर्यकमलं.

Helix, *n.* आवर्त.

Hell, *n.* दुर्गति *f.*, न(ना)रक, निरय; रसातल; प्रेतलोक; परमपीडास्थानं; कारणा, यातना । -cat, (*also* Hellicat) कुहकिनी, डाकिनी । -ish, *a.* नारकीय; निंद्यतम; अतिघोर.

Hellicat, *a.* अविमृश्यकारिन्; चपलमति.

Helm, *n.* अरित्रं, कर्ण, केनिपात; अधिष्ठातृपदं । -sman, *n.* कर्णग्रह, ०धार, नाविक.

Helmet, *n.* खोलक, शिरस्कं, शिरस्त्राणं, शीर्षण्यं.

Helminth, *n.* कृ(क्रि)मि *m.*

Helot, *n.* दास । -ry, *n.* दासवर्ग.

Help, *vt.* उपकृ 8 U, साहाय्यं कृ 8 U; प्रवृत् *c*; (अन्नं) कृ *c* । *vi.* सहायो भू 1 P, हिताय भू 1 P । *n.* उपकार, उपकृति *f.*, साहाय्यं; शरणं; उद्धार; उपाय, प्रतिकार । It cannot be h.ed, उपायस्तत्र नास्ति । Lady h., परिचारिका । To h. forward, to h. on, प्रवृत् *c* । To h. up, उत्था *c*, संस्तंभ् 9 P । -er, *n.* उपकर्तृ *m.*, सहाय । -ful, *a.* उपकारक, उपयोगिन् । -less, *a.* अशरण, असहाय; अप्रतिकार्य । -mate, -meet, *n.* सहकारिन् *m.*, सहकृत् *m.*, सहाय.

Helter-skelter, *adv.* अतिसंभ्रमेण.

Helve, *n.* त्सरु *m.*, दंड, मुष्टि *f.*, वारंग.

Hem, (1) *n.* अंचल, दशा, चीरि-री *f.*, वस्त्रप्रांत । *vt.* अंचलं सिव् 4 P; परिवेष्ट् 1 A. *c*, निरुध् 7 U.

Hem, (2) *n.* उत्कासनं । *int.* ह, हंहो । *vi.* उत्कास् 1 A.

Hemeralopia, *n.* दिवांधत्वं.

Hemicrania, *n.* अर्धशिरोवेदना, अर्धावभेदक.

Hemicycle, *n.* अर्धचक्रं, चक्रार्धं; गोलार्धं; मंडलार्धं.

Hemiphlegia, *n.* पक्षवायु *m.*, पक्षाघात.

Hemisphere, *n.* गोलार्धं.

Hemistich, *n.* अर्धश्लोक, श्लोकार्धं.

Hemorrhage, *n.* रुधिरस्राव.

Hemorrhoids, *n.* अर्शस् *neu.*

Hemp, *n.* भंगा, शणं । -en, *a.* शाण.

Hen, *n.* कुक्कुटी । -coop, *n.* कुक्कुटपंजर । -hearted, *a.* कातर, क्लीब, त्रस्नु, भीरु । -peck, *vt.* (पत्युः) ईश् 2 A; *n.* पतिंदमा । -pecked, *a.* भार्याटक, स्त्रीवश.

Hence, *adv.* इतः; अतः, अत एव, अस्मात् कारणात् । *int.* अपेहि, अपसर *both Impera.* 2 sing. । -forth, -forward, *adv.* अतःपरं, अद्यप्रभृति, अद्यारभ्य.

Henchman, *n.* अनुचर, परिचर, पारिपार्श्वक.

Hendecagon, *n.* एकादशभुज *m.*

Hepatic, *a.* यकृद्विषयक.

Hepatitis, *n.* यकृत्पाक.

Heptad, *n.* सप्तकं.
Heptagon, *n.* सप्तभुज *m.*
Heptangular, *a.* सप्तकोण.
Herald, *n.* अग्रदूत, आह्वायक, घोषक, राजदूत; दूत, वार्ताहर; अग्रेसर; प्राक्सूचक। *vt.* उद्घुष् 10 U; निविद् *c*; प्रविश् *c*; आगम् *c*। -ry, *n.* सज्जाडंबर; वंशावलीज्ञानं.
Herb, *n.* ओषधि *m.*; शाक *mn.*, शिग्रु *m.* हरितकं। -age, *n.* क्षेत्रियं, घास, यवसं। -al, *a.* ओषधिविषयक; *n.* वृक्षायुर्वेदग्रंथ। -alist, *n.* ओषधिकोविद। -arium, *n.* शुष्कौषधिसंग्रह। -ivorous, *a.* शाकभक्षक। -orize, *vi.* ओषधिसंग्रहं कृ 8 U.
Herculean, *a.* अतिप्रबल; अतिदुष्कर। H. labours, भगीरथप्रयत्नाः *pl.*
Herd, *n.* कदंब, कुलं; गण, यूथ, वृंदं, व्रज, संघ, समज। *vi.* एकीभू 1 P, गणशः संमिल् 6 P, यूथेन चर् 1 P; संगम् 1 P। *vt.* एकीकृ 8 U; यूथे संगम् *c.*। H. of cattle, गोकुलं, गोत्रा। H. of calves (वात्सकं), of camels (औष्ट्रकं), of cows (धैनुकं), of elephants (हास्तिकं), of horses (आश्वं, आश्वीयं), of oxen (औक्षणं)। -sman, *n.* आभीर, गोप, बल्लव; गोपाल, अजपाल, अश्वपाल, *etc.*
Here, *adv.* अत्र, इह; इहलोके। H. and there, इतस्ततः। Neither h. nor there, अप्रासंगिक, असंगत। -abouts, *adv.* अत्र *or* इह समीपे, इतो नातिदूरे *or* निकटे। -after, *adv.* अतःपरं, इतःपरं, अनंतरं; अमुत्र, परत्र; *n.* परलोक। -by, *adv.* अनेन, अस्मात्। -in, *adv.* अत्र, इह। -in after, *adv.* अग्रे, उपरिष्टात्। -tofore, *adv* गतकाले, पुरा। -upon, *adv.* अनंतरं, ततः, पश्चात्.
Hereditable, *a.* परंपराप्राप्य, पितृप्राप्य.
Hereditament, *n.* दाय, पैतृकधनं, रिक्थं.
Hereditary, *a.* पित्र्य, पैतृक; क्रमागत, परंपरागत, पितृप्राप्त.
Heredity, *n.* पैतृकगुणप्रतति *f.*; पितृगुणानुवृत्ति *f.*
Heresiarch, *n.* प्रधानपाषं(खं)ड.
Heresy, *n.* उपधर्म, औपधर्म्यं, नास्तिक्यं, पाषं(खं)डमतं, विधर्म.
Heretic, *n.* नास्तिक, पाषं(खं)ड -डक-डिन् *m.*, विधर्मवादिन् *m.*। -al, *a.* धर्मविरुद्ध। -ally, पाषंडवत्.
Heritable, *a.* औद्धारिक, दाययोग्य, पितृप्राप्य.
Heritage, *n.* दाय, पैतृकधनं, रिक्थं; भागधेयं; पैतृकगुण.
Heritor, *n.* दायाद, दायिक, पैतृकधनाधिकारिन् *m.*
Hermaphrodite, *n.* उभयव्यंजन, स्त्रीपुरुषलक्षण *both m.*

Hermeneutic, *a.* भाष्यात्मक, व्याख्यात्मक; अर्थप्रकाशक.

Hermetic, *a.* (1) रसायनीय; रसायनविषयक; (2) सुगाढ, सुदृढबद्ध.

Hermit, *n.* तापस, मुनि *m*, मौनिन् *m.*, यति *m.*, वैखानस । –age, *n.* आश्रम, उटज *mn.*, कुटीर*m n* , पर्णकुटी.

Hernia, *n.* अंत्रवृद्धि *f.*, ०स्रंस, नाभिवर्धनं.

Hero, *n.* अवदानकर्मन् *m.*, महावीर, शूर, शौटीर, सुविक्रम, सुवीर; (drama) नायक । H.-worship, वीरपूजा । –ic, –ical, *a.* विक्रांत, वीर, शूर, साहसिक । To go into h.ics, शब्दाडंबरं प्रवृश् *c* । A h.ic deed, अवदानं, पराक्रम । –ically, *adv.* सविक्रमं ।–ine, *n.* वीरस्त्री, वीरा; नायिका । –ism, *n.* वीरचरितं, शौर्यं; पराक्रम, विक्रम.

Heron, *n.* कंक, कह्व, क्रौंच, बक, लोहपृष्ठ, सारस.

Herpes, *n.* पामन् *m.*

Herpetology, *n.* सरीसृपशास्त्रं.

Hesitance,–y, *n.* अनिश्चय, संशय; स्खलनं.

Hesitant, *a.* अभिशंकमान, संशयान, सविकल्प, ससंदेह.

Hesitate, *n.* अभिशंक् 1 A, आंदोल् 10 U, चिर(रा)यति *Den*, दोलायते *Den*, विक्लृप् 1 A, विलंब् 1 A, संशी 2 A । -ing, *a.* अभिशंकमान, दोलायमान, संशयान-लु । –ingly, *adv.* स्खलनपूर्वकं; सविकल्पं, साशंकं । –ion, *n.* अनिश्चय, आशंका, विकल्प, संशय, संदेह; स्खलनं, स्वरभंग.

Hesperian, *a.* पाश्चात्य, प्रतीच्य.

Hesternal, *a.* ह्यस्तन, ह्यस्त्य.

Hetæra, *n.* विनीतगणिका.

Heterochromous, *a.* भिन्नवर्ण.

Heteroclite, *a.* निपातित.

Heterodox, *a.* अवैध, अशास्त्र, अश्रौत, विपरीत, वैधर्मिक, शास्त्र-विरुद्ध; धर्मविरुद्ध, पाषंडस्थ । –y, *n.* असच्छास्त्रं, विधर्म.

Heterogeneity, *n.* वैजात्यं, वैधर्म्यं.

Heterogeneous, *a.* पृथग्विध, भिन्नजातीय, विजातीय.

Heterogenesis, *n.* भिन्नगुण-प्रजोत्पत्ति *f.*

Heteronomy, *n.* परसत्ताकराज्यं; पारतंत्र्यं.

Heuristic, *a.* अनुसंधानात्मक.

Hew, *vt.* अवच्छिद् 7 P, कृत् 6 P, छिद् 7 P, छो 4 P, दो 4 P, व्रश्च 6 P; सायासं तक्ष् 1. 5 P *or* रच् 10 U । –er, *n.* छेदक । –*n*, *a.* छिन्न, वृक्ण.

Hexad, *n.* षट्कं.

Hexagon, *n.* षट्कोणं, षड्भुज.

Hexangular, *a* षट्कोण.

Hexapod, *n.* षट्प(पा)द्.

Hey, *int.* हंहो, हाहा.

Hey-day, *n.* प्रौढिकाल; प्रकर्ष०, समृद्धिसमय; परिपाक, पूर्णावस्था.

Hiatus, *n.* खंड, छेद, भंग, विच्छेद.

Hibernaculum, *n.* हैमंतनिलय.

Hibernal, *a.* शैशिर, हैमंत, हैमंतिक.

Hibernate, *vi.* हैमंतनिद्रां कृ 8 U; हेमंतं गम् *c or* नी 1 P.

Hiccup *n.* झिणिका, हि(हे)क्का, हिक्किका, हिध्मा। *vi.* हिक्क् 1 U.

Hide, (1) *vt.* अपवृ 5 U.*c*, अपह्नु 2 P., गुप् 1 P. 10 U, गुह् 1 U, निह्नु 2 A, प्रच्छद् 10 U, स्थग् 1 P. *c* । *vi.* गुप्त *a. or* प्रच्छन्न *a.* भू 1 P *or* शी 2 A, तिरोभू 1 P। Hid, Hidden, *a.* अंतर्हित, गुप्त, गूढ, तिरोहित, निभृत, प्रच्छन्न । H.-and-seek, *n.* व्यपदेश । -ing, *n.* गोपनं, निह्नव, प्रच्छादनं.

Hide, (2) *n.* अजिनं, कृत्ति *f.*, चर्मन् *neu*, त्वच् *f.* । -bound, *a.* संकुचितचर्मन्; कृपण; अनुदारमति । -ing, *n.* कशाताडनं, प्रसह्यताडनं.

Hideous, *a.* कुरूप, घोररूप, विकराल, विरूप; कर्णकटु; बीभत्स, भयानक, भीषण। -ly, *adv.* उग्रं, बीभत्सं । -ness, *n.* विकरालत्वं; भीषणता.

Hidrotic, *a.* स्वेदकर, स्वेदन.

Hie, *vi.* त्वर् 1 A, शीघ्रं गम् 1 P, संत्वर् 1 A.

Hierarch, *n.* प्रधानपुरोहित, प्रधानाचार्य । -y, *n.* (*also* Hierocracy) पुरोहितसंस्था, ०संप्रदाय; धर्मशिष्टि *f.*, धर्मसत्ता; आचार्याधिपत्यं.

Hieratic, *a.* पौरोहित, याजकीय.

Hieroglyphics, *n. pl.* चित्रलिपि *f.*

Hierolatry, *n.* साधु०, सिद्धपूजा.

Hierophant, *n.* आचार्य, गुरु *m.*, मंत्रोपदेष्टृ *m.*

Higgle, *vi.* मूल्यं विवद् 1 A । -r, क्षुद्रवैवधिक.

Higgledy-piggledy, *adv.* सविपर्यासं, ससंभ्रमं । *a.* विपर्यस्त.

High, *a.* उच्च, उच्छ्रित, उत्तुंग, उन्नत, तुंग, प्रांशु; श्रेष्ठ; प्रधान; उदार; उद्धत, साटोप; आभिजात, कुलीन; तीव्र, प्रचंड; परिणत, संपूर्ण; बहुव्यय; उद्दाम, दुर्निग्रह; (music) तार; ईषत्पूति । *adv.* उच्चं, उच्चैः; अतीव, परमं, भृशं । H. and dry, उत्तीरं । H. and mighty, साटोप । To play h., महापणेन दिव् 4 P । With a h. hand, साटोपं । -blown, *a* दर्पाध्मात; वातोच्छून । -born, -bred, *a.* अभिजात, कुलीन; शिष्टाचार । -caste, *a.* उच्चवर्ण । -falutin, *a.* दर्पपूर्ण; बृहच्छब्दस्फीत । -fed, *a.* सुपुष्ट; दुर्ललित । -flown, *a.* बृहच्छब्दपूर्ण ; दर्पाध्मात । -handed, *a.* उद्धत साटोप । -jinks, *n.* महोत्सव ।

–lands, *n.* अधित्यका। –lander, *n.* पर्वतवासिन् *m.*। –ly, *adv.* अतिमात्रं; अत्यंतं, भृशं। –mettled, *a.* उदारसत्त्व, वीर्यवत्। –minded, *a.* उदार, महात्मन्, महाशय। –ness, *n.* उच्चत्वं; उच्छ्राय; (*in addressing*) देव। H. noon, पूर्णमध्याह्न। –pitched, *a.* उद्धत; तार। –priest, पुरोहिताध्यक्ष, प्रधानपुरोहित। –principled, *a.* उदारव्रत, पुण्यशील। –reaching, *a.* यशस्काम; उत्तुंग। H. road,-street, –way, घंटापथ, प्रतोली, रथ्या, राजपथ, ०पद्धति *f.*, ०मार्ग, वाहनी, विशिखा, श्रीपथ, संसरणं। –seasoned, तिग्मरुचि; अश्लील, ग्राम्य। –souled, *a.* उदारधी; महात्मन्। –sounding, *a.* दांभिक, साडंबर; शब्दाडंबरपूर्ण। –spirited, *a.* उदारधी, महानुभाव महासत्त्व। –stomached, *a.* उद्धत, दर्पाध्मात, साटोप। –strung, *a.* मृदुप्रकृति। –toned, *a.* उच्चस्वर, तार। H. treason, राजद्रोह। H. water, प्रवृद्धा वेला। –wayman, *n.* परिपंथिन् *m.*, पाटच्चर, मार्गतस्कर, हठमोषक। –wrought *a.* सुघटित; उद्दीप्त, संतप्त.

Hight, *a.* *Exp. by* नाम *ind*; आख्या, नामन् *neu.*, संज्ञा *in comp.*

Hilarious, *a* प्रोत्फुल्ल, सानंद, हर्षोत्फुल्ल.

Hilarity, *n.* प्रमोद, विनोद, हर्ष.

Hill, *n.* अद्रि, गिरि *both m*। –ock, *n.* लघुगिरि *m*; वल्मीक। –y, *a.* पर्वतावृत, पर्वतीय, सपर्वत.

Hilt, *n* त्सरु *m*, वारंग.

Hind, (1) *n.* एणी, कुरंगी, मृगी, हरिणी। (2) *n.* क्षेत्रिन् *m.*; ग्रामिक.

Hind, Hinder, (3) *a.* पृष्ठस्थ; पश्चिम; पश्चात्० *in comp.*। –most, *a.* अवम, चरम। H. part, पश्चाद्भाग, पृष्ठभाग.

Hinder, *vt.* (उप०, नि०) प्रतिरुध् 7 U, वृ *c*, प्रतिबंध् 9 P, प्रतिषिध् 1 P.

Hindrance, *n.* अंतराय, प्रतिबंध, प्रत्यूह, विघ्न, व्याघात.

Hinge, *n.* द्वारसंधि *m.*; केंद्रं। *vi.* अपेक्ष्, अवलंब् *both* 1 A। To be off the n.s, अतीव संक्षुभ् 4 P.

Hinny, *vi.* हेष्, ह्रेष् *both* 1 A। *n.* अश्वतर-री.

Hint, *n.* आकूतं, इंगितं, उद्देश, उपक्षेप, संकेत; सूचना। *vt.* उद्दिश् 6 P, उपक्षिप् 6 P, सूच् 10 U। –ingly, *adv.* साकूतं.

Hip, *n.* कटि-टी *f.*, नितंब, प्रोथ। To smite hip, and high, संपूर्णतया पराजि 1 A; निर्दयं व्यापद् *c.*

Hipped, Hippish, *a.* उद्विग्न, खिन्न, दुर्मनस्क, विषण्ण.

Hippic, *a.* अश्वीय.

Hippodrome, *n.* अश्वक्रीडांगणं.

Hippology, *n.* अश्वशास्त्रं.

Hippopotamus, *n.* करियादस् *neu.*, नदीघोटक.

Hircine, *a.* अजसम ; दुर्गंध.

Hirdy-girdy, *n.* कोलाहल, तुमुलं, संक्षोभ । *adv.* विपर्यस्तं.

Hire, *n.* कर्मण्या, तुलिका, निर्वेश, निष्क्रय, पण, भरणं, भरण्यं, भर्मन् *neu.*, भाटकं, भृति *f*, भृत्या, मूल्यं, वेतनं, हात्रं; सवेतनग्रहणं, सवेतनोपयोग; पारितोषिकं; उत्कोच । *vt.* वेतनेन उपयुज् 7 A. 10 U *or* व्यापृ *c or* ग्रह् 9 P । –less, *a.* निर्मूल्य, निर्वेतन । –ling, *a.* भृतिभुज् *m.*; पण्यांगना । H.d worker, कर्मकर, भृतक, वैतनिक.

Hirple, *vi.* खंज् 1 P, लंग् 1 P.

Hirsute, *a.* लोमश.

Hiss, *vi.* सीत्कारं *or* फूत्कारं कृ 8 U; सीत्कारेण अवमन् 4 A । *n.* फूत्कार, सीत्कार.

Hist, *int.* तूष्णीं भव 2 *Sing. Impera.*

Histography, *n.* पेशिवर्णनं.

Histology, *n* पेशिशास्त्रं.

Historian, *n.* इतिहासकार, ०लेखक, ऐतिहासिक *m.*

Historic, *a.* इतिहासविख्यात । –al, *a.* इतिहासविषयक, ऐतिहासिक.

Historiographer, *n.* इतिहासलेखक.

History, *n.* इतिहास, पुरावृत्तं; इतिहासग्रंथ; वृत्तांत.

Histrion, *n.* नट, रंगाजीव, शैलूष । –ic, *a.* नाटकीय, रंगोचित; कृत्रिम; अतथ्य । –ics, *n. pl.* अभिनय, नाट्यं; प्रतारणा.

Hit, *vt.* (अभि०) आहन् 2 P, तड् 10 U, प्रहृ 1 P, व्यध् 4 P; अधिगम् 1 P, प्रतिपद् 4 A, प्राप् 5 P, समासद् *c* । *vi.* आघातं कृ 8 U; संघट्ट् 1 A; हिताय भू 1 P; युज् *Pass* । *n.* आघात, ताडनं, प्रहार, हथ; सुदैवयोग; सूक्ति *f.*, सुभाषितं; सफलयत्न । To h. it off with, together, एकचित्त *a.* भू 1 P । To h. on, upon, यदृच्छया विद् 6 P.

Hitch, *vt.* (शिथिलं, *etc.*) बंध् 9 P *or* संयुज् 7. 10 U; सहसा आकृष् 1 P । *vi.* सहसा चल् 1 P; संग्रंथ् *Pass* । *n.* चलनरोधक; अंतराय, प्रत्यूह, विघ्न; ग्रंथि *m.*, बंधनं.

Hither, *adv.* अत्र, इतः, इह । *a.* अत्रत्य, नेदीयस् । H. and thither इतस्ततः । –most, *a.* अत्यंतिक, नेदिष्ठ । –to, *adv.* अद्ययावत्, अद्यावधि.

Hive, *n.* चषाल, मधुकोश ष), मधुक्रम, ०पटलं । *vt.* मधुकोशे निविश् *c.*

Hoar, *a.* धवल, सित: पलित: पुराण, प्रत्न; वृद्ध, स्थविर; जीर्ण । -frost. *n.* तुषार, नीहार । -stone, *a.* सीमाचिह्नं, ०लिंगं । -y, *a.* धवल; पलित; अतिपुराण; पूज्य, संमान्य.

Hoard, *n.* निचय, निधि *m.*, राशि *m.*, संग्रह, संचय । *vt.* संग्रह् 9 P, संचि 5 U.

Hoarse, *a.* कर्कश, परुष: विस्वर: भग्न, सगद्गद । -ly, *adv* सगद्गदं । -ness, *n.* स्वरभंग: कर्कशता.

Hoax, *n.* लीलाकपटं, हास्यकर-वंचना; प्रतारणा । *vt.* लीलया वंच् *c*; प्रतॄ *c.*

Hob, *n.* ग्रामिक. जानपद; अपदेवता.

Hobble. *vi.* खंज् 1 P, लंग् 1 P; विषमं चल् 1 P । *vt.* (अश्वपादान्) निगडयति *Den.* । *n.* लंगगति, विषमगति *both f.* । -y, *a.* विषम, रंध्रपूर्ण.

Hobbledeboy, *n.* (अकुशल:) युवन् *m.*

Hobby, *n.* छंद; अभिरुचिमूलं; प्रियवस्तु *neu,* प्रियव्यापार । -horse. *n.* क्रीडाश्व.

Hobgoblin, *n.* अपदेवता, पिशाच.

Hobnail, *n.* स्थूलशंकु *m.*; भंड; मूढ.

Hob-nob, *vi.* स्नेहेन संपीतिं कृ 8 U, सस्नेहं संगम् 1 A.

Hocus, *vt.* प्रतॄ, वंच् *both c*; (मादकसुरया) विमुह् *c* । H. pocus *n.* ऐंद्रजालिक; मंत्रतंत्रं; इंद्रजालं; प्रतारणा.

Hod, *n.* लेपभाजनं । -man, *n.* लेपवाहक; क्षुद्रकर्मकारिन् *m.*

Hodge-podge, *n.* प्रकीर्णकं, विविधवस्तुमिश्रणं, संकर.

Hodiernal, *a.* अद्यतन, अद्यतनीय.

Hodmandod, *n.* शंबूक.

Hoe, *n* अवदारणं, आखान *mn*, खनित्रं, टंग *mn.* । *vt.* अवदारणेन खन् 1 P.

Hog, *n.* आखनिक, किटि(रि) क्रोड, घृष्टि-ष्वि *m.*, घोणिन् ; पोत्रिन्, वराह, शू(सू)कर, हुड: अधमजन, गृध्नु । To go the whole h., संपूर्णतया निर्वह् *c*; न मिथस्त्यागेन समाधा 3 U । -pen, -sty, *n.* शूकरस्थानं । -gish, *a.* शूकरोपम.

Hogshed, *n.* महासुराभांडं.

Hoist, *vt.* उच्छ्रि *c*, उत्तुल् 10 U, उत्था *c*, उन्नम् *c* । *n.* उत्तोलनयंत्रं । H. with his own petard, स्वकपटेनैव प्रतारित:.

Hoity-toity, *a.* चपल; कोपन । *n.* अविनीतक्रीडा; कोलाहल, तुमुलं.

Hold, (1) *vt.* ग्रह् 9 P, धृ 1 P. 10 U; निरुध् 7 U; (contain) धा 3U; भृ 3 U; अध्यास् 3 A (*see* 'Have'); प्रती 2 P, मन् 4 A; गण् 10 U; निर्दृ *c*; प्रतिज्ञा 9 U; (celebrate) अनुष्ठा 1 P, पा *c* । *vi.* ग्राहं न त्यज् 1 P; स्था 1 P;

स्थिरं वृत् 1 A; अनुबंध् 9P, संज् *Pass.* । *n.* ग्र(ग्रा)ह, ग्रहणं; आकलनं, प्रतिपत्ति *f.*; आधार, आलंब; रक्षा, निरोध, गुप्ति *f.*, कारा; दुर्ग । H. hard, विरम 2 *Sing. Impera.* । To h. a wager, पण् 1 A । To h. by, h. to, अनुबंध् 9 P, संज् *Pass.* । To h. forth, प्रसृ *c*; उपन्यस् 4 U; उपनी 1 P । To h. good, h. true, न व्यभिचर् 1 P; संगत *a.* अस् 2 P । To h. in, आत्मानं नियम् 1 P । To h. in esteem, –contempt, बहु मन् 4 A, आदृ 6 A; तृणाय मन् 4 A, अवमन् 4 A । To h. off, दूरे स्था 1 P; विलंब् 1 A, चिरायति-ते *Den.* । To h. a meeting, सभां समाह्वे 1 P । To h. one's own, वशं न गम् 1 P । To h. one's tongue, तूष्णीं भू 1P । To h. together, ऐकमत्येन वृत् 1 A; संश्लिष् 4 P, संसंज् *Pass* । To h. up, उत्था, उन्नम् *both c*; धृ 10 U. संस्तंभ् 9 P. *c* । To h. up one's head, h. one's head high, सगर्वं वृत् 1 A । To h. water, संभू 1 P; न व्यभिचर् 1 P । To h. with, अनुमन् 4 A; पक्षं अंगीकृ 8 U । –er, *n.* ग्राहक, धारक; अधिवासिन् *m.* । –ing, *n* ग्रहणं, ग्राह; भूमिभोग, भूमिभोगाधिकार.

Hold, (2) *n.* नौकोदरं.

Hole, *n.* कुहरं, छिद्रं, बिलं, रंध्रं, रोकं, विवरं, श्वभ्रं, सुषि *f.*, सुषिरं; गर्त *mn.*, पतेर; अवट; संकटं । *vt.* छिद्रं कृ 8 U । To pick h.s in, दोषं प्रकटयति *Den.* । H.-and-corner, *a.* गुप्त, गूढ, निभृत, प्रच्छन्न.

Holiday, *n.* अनध्याय, ०दिनं, उत्सवदिनं, पर्वन् *neu.*

Hollow, *a.* शून्यगर्भ, शून्योदर; उत्तान, पुटाकार; रिक्त, शून्य; मंद्र; असार, कृतक, कृत्रिम, वितथ । *n.* निम्नभाग; रंध्रं, विवरं; (of tree) कोटर *mn.*, निष्कुट(ह); कंदर *mn*, गह्वरं, दरी; (of hand) पुट । *vt.* उत्खन् 1 P; पुटीकृ 8 U । H. pretensions, निराधारप्रतिज्ञा । –ness, *n.* शून्यगर्भता; मंद्रता; असारता.

Holocaust, *n.* होम; महाप्रमथनं.

Holocryptic, *a.* अतिदुर्बोध, अगम्य.

Holograph, *n.* स्वहस्तलेख, स्वहस्ताक्षरं.

Holt, *n.* (1) काननं, विपिनं; तरुगहनं; वनांत; (2) गर्त *mn*, पतेर, बिलं; गहनं; आश्रयस्थानं.

Holy, *a.* पवित्र, पुण्य, मेध्य; परिपूत, पावन, शुचि, शुद्ध, संस्कृत; धार्मिक, निरागस, निर्मल, पुण्यशील, शुचिव्रत, शुद्धात्मन् । H. place, क्षेत्रं, तीर्थं, पुण्यभूमि *f.* । H. stone, मार्जनपाषाण । H. writ, निगम, वेद, श्रुति *f.*, । –ly

adv. पवित्रतया । -ness, *n.* पावित्र्यं, मेध्यत्वं.

Homage, *n.* अभ्यर्चनं, आराधना, उपासना; अभिवंदनं; प्रणाम; प्रश्रय । To pay h. to, वंद् 1 A.

Home, *n.* निज०, स्वगृहं, ०देश; (रुग्णादि०) गृहं । *a.* गृहजात; स्वदेशीय । *adv.* गृहं प्रति । *vi.* गृहं प्रतिगम् 1 P । To be at h., अभिज्ञ *a.* अस् 2 P; परिचित *a.* अस् 2 P । To come h. to one, हृदयं स्पृश् 6 P । -born, -bred, *a.* गृहजात, गृह्य । -bound *a.* गृहगामिन् । -felt, *a.* हृदयगत । H. rule, स्वराज्यं, स्वायत्तशासनं । -sick, *a.* गृहविरहपीडित । -speaking, *a.* हृदयस्पृग्वचनं । -spun, *a.* गृहोत; अनलंकृत । -stall, -stead, गृहभूमि *f.*, वास्तु *mn.* । -ward, *a.* गृहगामिन् ; *adv.* गृहं प्रति.

Homely, *a.* अनलंकृत; अनतिसुंदर; सरल.

Homicidal, *a.* मनुष्यघातिन्.

Homicide, *n.* मनुष्यवध, ०हत्या; नरघातक.

Homily, *n.* धर्मप्रवचनं, धर्मोपदेश; नीत्युपदेश.

Homocentric, *a.* समकेंद्र.

Homeopathy, *n.* समचिकित्सा.

Homogeneity, *n.* सजातीयत्वं.

Homogeneous, *a.* एक०, सजातीय; सवर्ण.

Homoiousian, *a.* समद्रव्य; समस्वभाव.

Homologous, *a.* समपरिमाण.

Homonym, *n* नानार्थशद्ब.

Homosexual, *a.* समलिंगरत.

Homotonous, *a.* समस्वर.

Homunculus, Homuncle, *n.* सूक्ष्मनर; खर्व, वामन.

Hone, *n.* शाण-न । *vt* तिज् *c.*

Honest, *a.* अकुटिल, ऋजु, निर्व्याज, निष्कपट, सत्यवादिन्, ०व्रत, ०शील, सरल, साधु; धर्मवर्तिन्, धर्म्य, न्याय्य; शुद्धशील; अवितथ, सत्य । -ly, *adv.* निर्व्याजं; सरलं, न्यायेन । -y, *n.* आर्जवं, निष्कापट्यं, सत्यशीलता; सारल्यं.

Honey, *n.* क्षौद्रं, छात्रं, पुष्पसार, पुष्पासवं, भ्रामरं, मकरंद, मधु *neu.*, माक्षिकं, सारघं । -bee, *n.* मधुकर, मधुमक्षिका, सरघा । -comb, *n.* करंड । -mouthed, -tongued, *a.* मधुरभाषिन्, ०वाच् । -sweet, *a.* अतिमधुर; अतिप्रिय । -ed, (*also* Honied) *a.* अतिमधुर, मधुस्फीत.

Honk, *n.* हंसरुतं.

Honorarium, *n.* दक्षिणा.

Honorary, *a.* मानार्थकृत, ०समर्पित, सन्मानार्थक; निर्मूल्य, निर्वेतन.

Honour, *n.* आदर, गौरवं, पूजा, पूज्यभाव, प्रतिष्ठा, बहुमान, संभावना; मानचिह्नं; श्रेष्टपदं;

कीर्ति, ख्याति *both f.*; नीति *f.*; शीलं; (fig.) अलंकार; (your, his h.) अत्रभवान्, तत्रभवान्, *Nom.* । *vt.* आदृ 4 A, पूज् 10 U, मह् 10 U, संमन् *c*; उन्नम् *c*; स्वीकृ 8 U । -able, *a.* आदरणीय, पूज्य, माननीय, मान्य; श्रेष्ठपदस्थ; अभिजात; कीर्तिकर, यशस्कर; शुचिव्रत, सत्यशील, सत्यात्मन्; प्रतिष्ठोचित । -ably, *adv.* सगौरवं; न्यायतः, यथाधर्मं; यशःपूर्वं.

Hood, *n.* शिरोवेष्टनं; कालाप, फट-टा, फण-णा, भोग, स्फट-टा, स्फोटा । *vt.* शिरोवेष्टनेन आवृ 5. 9. 10 U; शिरोवेष्टनं परिधा 3 U । -wink, *vt.* नेत्रे पिधा 3 U; प्रतॄ, वंच् *both c* । -ed, *a.* वेष्टितशिरस्; फणिन्.

Hoof, *n.* क्षुर, खुर, निघृष्व, विंख, शफ, शफ *mn.* । To h. it, चल् 1 P । -ed, *a.* खुरिन्.

Hook, *n.* ग्रहणी, धरणी; (fish h.) बडिशं-शा, मत्स्यवेधनी । *vt.* धरण्या *or* बडिशेन ग्रह् 9 P । By h. or by crook, येनकेन प्रकारेण । To h. it, पलाय् 1 A । -ed, *a.* कुटिल; वक्र; अंकुशाकार.

Hooligan, *n.* मार्गावस्कंदिन् *m.*

Hoop, *n.* चक्रं, वलय *mn.* । *vt.* वलयैः परिवेष्ट् 1 A. *c.*

Hoot, *vi.* (निंदापूर्वं) उच्चैः आक्रुश् 1 P; घूत्कारं कृ 8 U । *n.* घूत्कार; निंदाक्रोश, धिक्कारशब्द; शृंगनाद.

Hop, *vi.* प्लु 1 A, वल्ग् 1 U । *n.* झंप-पा, प्लुतं । To h. the twig, मृ 6 A । To catch on the h., अकस्मात् ग्रह् 9 P । H. -o' -my-thumb, *n.* खर्व, वामन.

Hope, *n.* अपेक्षा, आकांक्षा, आशंसा, आशा, इच्छा, उदीक्षणं, प्रतीक्षा, प्रत्याशा, मनोरथ; आशामूलं, आशास्पदं । *vi.* अपेक्ष् 1 A, आकांक्ष् 1 U, आशंस् 1 A, आशास् 2 A, उदीक्ष् 1 A, प्रतीक्ष् 1 A; विश्वस् 2 P । -ful, *a.* आशायुक्त; आकांक्षिन्; आशाजनक, सिद्धिसूचक । -fully, *adv.* सप्रत्याशं । -less, *a.* निराश, भग्नाश; आशानाशक, नैराश्यकारिन्, वैफल्यसूचक । -lessly, *adv.* नैराश्यात्.

Hopple, *n.* अश्वसंदानं.

Hora, *n.* घटिका, मुहूर्त । -l, -ry, *a.* मौहूर्तिक.

Horde, *n.* महागण, स्तोम.

Horizon, *n.* अंबरांत, आकाशकक्षा, क्षितिजं, दिक्चक्रं, दिक्तटं, दिगंत, दिङ्मंडलं । -tal, *a.* अनुप्रस्थ, अन्वायतन, दिगंतसम, सम, समस्थ । -tally, *adv.* अनुप्रस्थं.

Horn, *n.* कूणिका, विषाणं, शृंगं; चंद्रशिखा; कहाला, काहल-ला; विकल्प । *vt.* शृंगाभ्यां सनाथीकृ 8 U; व्यध् 4 P । To draw, pull in one's h.s, निजोत्साहं

or गर्वं नियंत्र् 10 U । -blower, काहलवादक । -ed, *a.* विषाणयुक्त, शृंगिन्; शृंगाकार । -footed, *a.* खुरिन् । -mad, *a.* अत्युन्मत्त । -maker, *n.* परतल्पग, पारदारिक । -y, *a* शार्ङ्ग; कठिन, कर्कश.

Hornet, *n.* गंडोली, वरटा, विषशूक, ०शृंगिन् *m.*, ०सृक्कन् *m.* । To stir up a h.s' nest, अनेकजनवैरं उत्पद् *c.*

Hologe, *n.* कालमापकयंत्रं, घटी.

Horometry, *n.* कालमापनं.

Horoscope, *n.* जन्मपत्रिका.

Horoscopy, *n.* जातकं.

Horrent, *a.* रोमश.

Horrible, *a.* घोर, दारुण, भयंकर, भयानक, भयावह भीषण, विकराल; अप्रिय कुत्सित, बीभत्स । -y, *adv.* दारुणं.

Horrid, *a.* भयानक, भीषण, विकट; बीभत्स.

Horrific, *a.* भयावह, भीतिप्रद, भैरव । -ation, *n.* संत्रासनं.

Horrify, *vt.* भी, संत्रस् *both c.*

Horripilant, *a.* पुलकित.

Horripilate, *vt.* कंटकयति, पुलकयति, रोमांचयति *all Den.* । -ion, *n.* उद्धर्षणं, उल्बणकं, उल्लसनं, कंटक *mn*, पुलक, रोमविकार, ०विभेद, ०हर्ष, रोमांक(च), रोमोद्गम.

Horrisonant, *a.* भीषणरव.

Horror, *n.* महाभयं, संत्रास, साध्वसं; भयकंप; बीभत्सः साध्वसकारणं.

Hors de combat, *a.* क्षतविकलीकृत; योद्धुमसमर्थ.

Horse, *n* अर्वन्, अश्व, एतश, किण्विन्, कुंडिन्, कुदर, केसरिन्, क्रमण, क्रांत, ग्रहभोजन, घोट(क), चामरिन्, तुर(रं)ग, तुरंगम, प्रकीर्ण(क), प्रोथिन्, माषाशिन्, वाजिन्, वाडव, वाडवेय, वातायन, वाह, वीति, शालिहोत्रिन्, सप्ति, सैंधव, हय *all m.* । A thorough-bred h., आजानेय, कुलीन, सिंधुवार । A young h., किशोर । A chariot h., रथ्य । A pack-h., पृष्ठ्य, स्थौरिन् *m.* । An ill-trained h. (buck-jumper), सूकल । A horse that requires the whip, कश्य । A h. with a curl on the chest or the face, श्रीवृक्षकिन् *m.* । A h. with white spots on the chest, back, face and sides, पंचभद्र । A h. with tail, chest, hooves white, अष्टमंगल । A white h., कर्क, केकाह । A tawny h., खोंगाह । A milk-white h., सेराह । A black h. खुंगाह । A bay h., उकनाह, किहाय । A h. fit for a sacrifice, अश्वमेधिक, अश्वमेधीय, ययु *m*.

श्यामकर्ण। A herd of horses, अश्वीयं, अश्व्यं, आश्वं, आश्वीयं। Five kinds of a h.'s pace (गति *f.*, धारा): (i) trot, धोरणं, धो(धौ)रितं, धौरितकं, धौर्य; (ii) gallop, आस्कंदितं, उत्तेरितं, उपकंठं; (iii) canter, उत्तेजितं, भारवहं, रेचितं; (iv) gambade, वल्गनं, वल्गितं; (v) vaulting, प्लुतं, लंघनं। To flog a dead h., नीरसे कौतूहलं जनयितुं *or* असाध्यं साधयितुं यत् 1 A। To mount, ride the high horse, साटोपं आचर् 1 P। On h. -back, अश्वारूढ। -bean, *n.* माष, शिंबा। -boy, *n.* अश्वनिबंधिक, ०पाल, ०बंध, भोगिक। -breaker, *n.* अश्वविनेतृ *m.*, ०शिक्षक। -chanter, *n.* कदश्वविक्रेतृ *m.*। -coper, -dealer, *n.* अश्वविक्रेतृ *m.*, हेलावुक्क। -doctor, -leech, *n.* अश्वचिकित्सक, ०वैद्य। -hair, *n.* वालधि *m*, वालहस्त। -laugh, *n.* अट्टहास। -man, *n.* अश्वारोह, तुरगिन् *m.*, सादिन् *m*। -manship, *n* अश्वविद्या, अश्वहृदयं। -shoe, *n.* अश्वपादत्रं। -tail, *n.* लांगूलं, लूमं। -whip, *n.* कशा। -y, *a.* अश्वसम; अश्वीय; अश्वप्रिय.

Hortative, Hortatory, *a.* उपदेशक, प्रबोधक; उत्तेजनपर.

Horticulture, *n.* उद्यानपालनं, ०विद्या.

Hortus siccus, *m.* शुष्कवनस्पतिसंग्रह.

Hosanna, *n.* धन्यवाद.

Hose, *n.* और्ण पादत्रं.

Hosier, *n.* क्षुद्रवस्त्रविक्रेतृ *m.*। -y, *n.* क्षुद्रवस्त्रापण; क्षुद्रवस्त्राणि *pl.*

Hospice, *n.* पथिकशाला; दीनाश्रय.

Hospitable, *a.* अतिथिसेवापर, आतिथेय, आतिथ्य, आतिथ्यकारिन्, सत्कारपर। -y, *adv.* आतिथ्यपूर्वं, सादरं, सत्कारेण.

Hospital, *n.* आरोग्यशाला, चिकित्सालय, रुग्णालय.

Hospitality *n.* अतिथिपूजा, ०सत्कार, ०सेवा, आतिथेयं, आतिथ्यं, सत्कार.

Host, (1) *n.* आतिथ्यकारिन् *m.*; गृहिन् *m.*; भोजनदातृ *m*; भोजनगृहपति *m.*। To reckon without one's h., विचारणीयं न गण् 10 U। -ess, *n* आतिथ्यकारिणी; भोजनगृहाधिष्ठात्री.

Host, (2) *n* चमू *f.*, सेना; बृहत्संघ, महागण। The heavenly h., ग्रहतारकामंडलं.

Hostage, *n.* अरिप्रतिभू *m.*, ०बंधक। H.s to fortune, पुत्रदारं.

Hostel, *n.* भोजनगृहं; पांथशाला; छात्रवास.

Hostile, *a.* विपक्ष, वैरिन्, शात्रव; अननुकूल, औपरोधिक, प्रतिकूल, प्रतीप, विपरीत, विरुद्ध, विरोधिन्। –ly, *adv.* सवैरं। –ity, *n.* अमित्रता, द्वंद्वभाव, द्वेष, विरोध, वैरं, शत्रुत्वं, सापत्न्यं; (*pl.*) युद्धं, विग्रह; युद्धचर्या.

Hot, *a.* उष्ण, तप्त, नैदाघ; कटु, तिग्म; प्रखर, प्रचंड; उग्र, तीव्र, संरब्ध; कोपन; (news) अदीर्घकालीन, अभिनव। In h. water, संकटे। To give it one h., भृशं गर्ह् 1 A. 10 U *or* दंड् 10 U। –blooded, –headed, *a.* शीघ्रक्षोभ; कोपन, क्रोधन, शीघ्रकोपिन्। –ly, *adv.* उष्णं; सक्रोधं; सोत्तापं। –ness, *n.* उष्णता; चंडता.

Hotchpotch, *n.* प्रकीर्णकं, विविधवस्तुमिश्रणं, संनिपात.

Hotel, *n.* भोजनगृहं; पथिकगृहं.

Hound, *n.* आखेटिक, विश्वकद्रु *m*; नीचजन। *vt.* (आखेटिकैरिव) मृग् 10 A. 4 P. *or* अनुधाव् 1 P; प्रोत्सह् *c*.

Hour, *n* घटिका। At the eleventh h., अंतिमे क्षणे। At all h.s, सदा। A h. and a half, अर्धयाम। Small h.s, प्रत्यूषकाल। –glass, वालुकायंत्रं। –ly, *adv.* प्रातिघटिकं.

Houri, *n.* दिव्यांगना; सुंदरी.

House, *n.* अ(आ)गारं, अधिवास, आलय *mn*, आवसथ, आवसथ्यं, उद्वसितं, एडूकं, ऐडुकं, ओकस् *neu.*, केतनं, क्षय, गृहं, गेहं, छत्वर, धामन् *neu.*, निकाय्य(य्यं), निकेत *mn.*, निकेतनं, निलय, निवसनं, निवास, निवेश, निवेशनं, निशांतं, पस्त्यं, बुंदिरं, भवनं, मंदिरं, महाकीर्तनं, वसति(ती) *f.*, वस्त्यं(स्तं), वास, वेश्मन् *neu*, शाला, संवास, संस्त्याय सदनं, सदस् *neu*, सद्मन् *neu* सादनं; कुलं, गृहजन; वंश; सभा; श्रोतृवर्ग; (Astrol.) भाव। *vt.* गृहे *or* आगारे स्था *c or* निधा 3 U; वस् *c*, आश्रयं दा 3 U; *vi.* निवस् 1 P।
H. of correction, कारा, ०गृहं। H. of ill fame, गणिकागृहं, वेश, वेश्याश्रय। To keep open h., सदा आतिथ्यं विधा 3 U। –breaker, *n.* गृहभेदक, संधिचौर। –fly, *n.* मक्षिका, मशक, माचिका। –hold, *n.* कुटुंबं, कुटुंबकं, गृहजन; *a.* गृह्य; गृहोचित। H.hold goods, उपस्करजातं h.hold gods, कुलदेवताः; h.hold affairs, गृहकर्माणि, ०कार्याणि। H. hold word; आभाणक; सर्वलोकविश्रुत। –holder, *n.* कुटुंबिक, कुटुंबिन्, गृहमेधिन्, ०याय्य, गृहस्थ, गृहायणिक, गृहिन्, स्नातक *all m.* । –keeper, गृहावेक्षक-क्षिका। –keeping, *n.*

गार्हस्थ्यं, गृहकार्यव्यवस्था, गृहव्यापार। -less, *a.* निराश्रय। -maid, *n.* गृहदासी, परिचारिका। -top, *n.* छदिस् *neu.*। -warming, *n.* गृहप्रवेश। -wife, *n.* कुटुंबिनी, गृहिणी, गेहिनी, पुरंध्री। -wifely, *a* गृहकार्यदक्ष। -wright, *n.* गृहसंवेशक.

Housing, *n.* परिष्टो(स्तो)म, परिस्तरणं, सज्जा

Hovel, *n.* उटज *mn.*, कुटी, कुटीर, गर्गरी, पल्ली.

Hover, *vi.* आकाशे डयमानं *a.* स्था 1 P; परिभ्रम् 1. 4 P, पर्यट् 1 P। -ing, *n.* मंडलप्रडीनं; परिभ्रमणं.

How, *adv.* कथं; केन प्रकारेण, *etc.*; कियत् (H. far, great, much, *etc*)। H. many, कति। H. -do-you-do, कथं वर्तते भवान्। H. long कियत्कालं, कियच्चिरं। H. far, कियद्दूरं। -be it, -ever *adv.* तथापि, पुनः; अपि.

Howl, *vi.* उत्क्रुश् 1 P, रु 2 P, रै 1 P। *n.* दीर्घरुतं, राव; उत्क्रोश.

Howsoever, *adv.* *Exp. by* अपि। H. clever he is, he cannot understand that book, अतीव चतुरोऽप्यसौ तं ग्रंथमवगंतुमसमर्थः.

Hoyden, *n.* अविनीतकुमारी.

Hub, *n.* तुंबा, नाभि *mf.*, नाभिका; महत्त्वस्थानं; लक्ष्यं; त्सरु *m.*, वारंग.

Hubbub, *n.* कोलाहल, तुमुल *mn.*

Huckaback, *n.* स्थूलपट.

Huckle, *n.* कटि-टी *f.*, नितंब.

Huckster, *n.* क्षुद्रापणिक, वैवधिक; शठ.

Huddle, *vt.* संपिंडयति *Den.*, संपीड् 10 U, संबाध् 1 A। *vi.* पिंडीभू 1 P; संमिश्र् *Pass.*

Hue, (1) *n.* छवि *f.* रंग, राग, वर्ण। (2) आक्रोश, कोलाहल (H. and cry).

Huff, *n.* आकस्मिकः क्रोधावेश। -er, *n.* विकत्थन। -y, *a.* क्रुद्ध, रुष्ट.

Hug, *n.* गाढं आलिंग् 1 P *or* आश्लिष् 4 P *or* परिरभ् 1 A; दृढं संपीड् 10 U; निष्टया भज् 1 A। *n.* दृढालिंगनं, परिरंभ.

Huge, *a.* अतिमहत्, अतिमात्र, विशाल, सुमहत्; बृहत्काय, स्थूल; परम। -ly, *adv.* अतिमात्रं, अतीव, अत्यंतं। -ness, *n.* अतिमहत्त्वं, सुमहत्त्वं; विशालता.

Hugger-mugger, *n.* गुप्तता; गुप्तभाव, प्रच्छन्नता; रहोभाव, विविक्तः संभ्रम। *a.* गुप्त, गूढ, प्रच्छन्न; संभ्रांत। *adv.* निभृतं; संभ्रांतं.

Hulk, *n.* जीर्णनौका; स्थूलकाय.

Hull, (1) *n.* तुष, त्वच् *f.*, पुट *mn.* । *vt.* निस्तुषयति *Den.*

Hull, (2) *n.* (नौकायाः) भूयोभाग.

Hullabaloo, *n*, कोलाहल, तुमुल *mn.*

Hum, *vi.* गुंज् 1 P, झंकारं कृ 8 U, प्रक्ष्विड् 1 A; संवृतमुखेन गै 1 P । *n.* (*also* –ming) कलरव, गुंजनं, गुंजितं, झंकार, झंकृतं, प्रक्ष्वेडा । To make things h., कार्यप्रवृत्तिं भृशं त्वर् *c.*

Human, *a.* मानव, मानुष; मनुष्यजातीय; मनुजोचित; पौरुषेय । –kind, *n.* मनुष्यजाति *f.*, मानुष्यं । –ly, *adv.* मनुजवत्; मानवशक्त्यनुरूपं; अनुमानवोपायं । –ness, *n.* मनुष्यता.

Humane, *a.* अनुकंपक-पिन्, करुणार्द्र, कृपालु, घृणालु, दयान्वित, दयालु, सदय, सानुकंपः दीनवत्सल, दीनोपकारक । –ly, *adv.* सदयं, सानुकंपं.

Humanism, *n.* मनुष्यजातिहितप्राधान्यवाद (as opp. to मनुष्यव्यक्तिहित° *or* परमार्थ°); मानुष्यकसेवा; सारस्वतवैदग्ध्यं.

Humanitarian, *a.* अनुकंपिन्, दयालु, *etc.* । *n.* जनहितेच्छु, लोकहितैषिन् *both m.* । –ism, *n.* लोकहितनिष्ठा.

Humanity, *n.* मनुष्यस्वभाव, मानवता, मानुषत्वं; मनुष्यजाति *f.*, मानुष्यकं; अनुकंपा, अनुक्रोश, कृपा, घृणा, दया; परहितेच्छा; दीनवात्सल्यं.

Humanize, *vt.* मानुषत्वयुक्तं *a.* *or* सानुकंपं *a.* कृ 8 U; शिष्टाचारं शिक्ष् *c* । – ation, *n.* शिष्टाचारप्रतिपत्ति *f.*

Humble, *a.* अनुद्धत, नम्र, विनीत, शालीन, सप्रश्रय; अधम, अपकृष्ट, अवर, जघन्य, निकृष्ट, नीच; दरिद्र, दीन, पामर । *vt.* अपकृष् 1 P, अवनम् *c*, नम्रीकृ 8 U, आत्तगंधं *a.* कृ 8 U, लघूकृ 8 U । To eat the h. pie, मानभंगं सह् 1 A, मानं पृष्टे कृ 8 U; प्रह्वीभूय क्षमां याच् 1 A । H. plant, (*Mimosa pudica*) नमस्कारी, लज्जालु *mf.* । –ed, *a.* अवपातित, हृतगर्व । –ing, *n.* गर्वहरणं, मानभंग । –ness, *n.* नम्रता; अवरता; दैन्यं । –y, *adv.* नम्रतया.

Humble–bee, *n.* बृहन्मधुकर.

Humbug, *n.* प्रतारणा, वंचना; धूर्त वंचक, हारक । *vi.* प्रतॄ, वंच् *both c*; कपटेन अनुनी 1 P.

Humdrum, *a.* नीरस, विरस; प्राकृत, सामान्य.

Humectation, *n.* क्लेदनं.

Humerus, *n.* प्रगंडास्थि *neu.*

Humic, *a.* पार्थिव, मार्त्तिक.

Humid, *a.* आर्द्र, उत्त, उन्न, क्लिन्न, सद्रव । –ity, *n.* आर्द्रता, क्लेद, स्तेम, सद्रवता.

Humiliate, *vt.* अभिभू 1 P, अवमन् *c*, आत्तगंधं *a.* कृ 8 U, लघूकृ 8 U । -ing, *a.* अवमानपूर्वक, मानहर । -ion, *n.* अवमान, अवहेलना, गर्वहरणं, मानभंग.

Humility, *n* अगर्व, अनौद्धत्यं, नम्रता, प्रश्रय, विनय, शालीनता.

Hummel, *a.* शृंगहीन

Hummock, *n.* पिंडल; लघुगिरि *m.*

Humoral, *a.* (देह) धातुजात.

Humorist, *n.* विनोदिग्रंथकार; विनोदिन् *m.*, हास्यरसप्रिय; वैहासिक.

Humorous, *a.* नर्मगर्भ, विनोदिन्; हास्यकारक; नर्मवत् , विनोदशील, हास्यप्रिय । -ly, सविनोदं.

Humour, *n.* चित्तप्रकृति *f.*, मनोवृत्ति *f.*, स्वभाव; छंद; प्रवणता; नर्मवत्त्वं, विनोदशीलत्वं; नर्मगर्भत्वं; हास्यकरत्वं; (bodily) धातु *m*, रस । *vt.* मनोवृत्तिं अनुवृत् 1 A; आराध् *c.* उपलल् 10 U. । Good h., प्रसन्नता । Bad h., रोष । Out of h., असंतुष्ट, जातरोष । -some, *a* चंचलवृत्ति, स्वैरचित्त.

Hump, *n.* अंसकूट, ककुद् *f.*, ककुद *mn.*, गडु *m.*, स्थगु *m.*; दौर्मनस्यं । *vi.* (पृष्ठं) ककुद्मत् कृ 8 U *or* वक्रीकृ 8 U; खिद् *c*, पीड् 10 U । -back, *n.* कुब्ज, गडुल, वक्रपृष्ट । -ed *a.* ककुदवत्, ककुद्मत् , ककुद्मिन्, ककुद्वत्.

Humpty-dumpty, *n.* पीनखर्व *m.*

Humus, *n.* मृत्तिका, मृद् *f.*

Hunch, गडु *m.*; पिंड *mn*; गंडका । *vt.* (पृष्ठं) वक्रीकृ 8 U; कूर्परेण संचल् *c or* आहन् 2 P । -back, *n.* कुब्ज, गडुल, वक्रपृष्ट.

Hundred, *n.* शतं, also used adjectivally, *e.g.* शतं नराः । *a.* शतक, शतसंख्याक । Containing, consisting of, relating to a h शतिक, शत्य । In a h. ways, into a h. pieces, शतधा । A h. times, शतकृत्वः । By h.s. शतशः । -fold, *a.* शतगुण. शतिन् । -th, *a.* शततम.

Hunger, अशना, अशनाया, अशिशिषा. क्षुध् *f.*, क्षुधा, जिघत्सा, बुभुक्षा; प्रचलेच्छा, लोलुपा । *vi.* अशनायति *Den.*, क्षुध् 4 P, बुभुक्षति-ते *Desid* ; अतीव, अभिलष् 4 P *or* स्पृह् 10 U । -bitten, *a.* क्षुत्क्षाम, क्षुधापीडित, क्षुधार्त.

Hungry, *a.* अशनायित, अशनायुक्त, क्षुधान्वित, क्षुधार्त, क्षुधालु क्षुधित, जिघत्सु, बुभुक्षित, बुभुक्षु । H. and thirsty, क्षुत्पिपासित । -ly, *adv.* क्षुधापूर्वकं, बुभुक्षया; साभिलाषं.

Hunk, *n.* गंडका, पिंड *mn.*

Hunt, *vt.* अनुधाव् 1 P, अनुसृ 1 P, मृग् 10 A. 4 P । *n.* (*also* Hunting) आखेट, आच्छोदनं, खेटनं, मृगया, मृगव्यं, वराधि *m.* । -er,

मृगयु (*See* Huntsman); मृगयाश्व। –sman, *n.* आखेटक, जीवांतक, मृगयु *m.*, लुब्धक, व्याध; (*esp.* fowler) शाकुनिक; (*esp.* trapper) जालिक, वागुरिक.

Hurdle, *n* द्वारकट.

Hurl, *vt.* प्रसभं अस् 4 P *or* क्षिप् 6 P; प्रसभं उद्ह् 6 P। –ing, *n.* क्षेपणं.

Hurly–burly, *n.* कोलाहल, तुमुल *mn.*, संकुलं.

Hurrah, Hurray, *int.* जितं ! जितं ! ; साधु ! साधु ! । *n.* जयजयकार, जयशब्द.

Hurricane, *n.* झंझावात, महावात, वात्या.

Hurry, *vt.* त्वर् *c*, शीघ्रं कृ 8 U *or* प्रेर् *c or* प्रचल् *c*। *vi.* त्वर् 1 A, शीघ्रं गम् 1 P। *n.* त्वरा; संभ्रम; रभस् *neu*, शीघ्रता । Hurried, *a.* त्वरित, शीघ्र । H.edly, *adv.* शीघ्रं, सत्वरं.

Hurt, *vt.* अभिहन् 2 P, क्षण् 8 P, व्रण् 10 U, हिंस् 7 P; अपकृ 8 U, क्लिश् 9 P, पीड् 10 U, बाध् 1 A, व्यथ् *c* । *n.* अरुस् *neu*, ईर्म, क्षणतु *m*, क्षतं, क्षात *f.*, व्रण *mn.*, हिंसा; अपकार, अपकृति *f.*, अपाय, पीडा, बाधा, हानि *f.* । –ful, *a.* अपकारक, अपायकारक, घातुक, पीडावह, बाधक, शरारु, हिंस्र । –fully, *adv.* सापायं; हानिपूर्वकं । –less, *a.* अक्षत; अनपकारिन् , निरपाय.

Hurtle, *vt.* प्रसभं आहन् 2 P *or* संघट्ट् *c or* प्रक्षिप् 6 P; प्रसभं भ्रम् *c*। *vi.* सरभसं धाव् 1 P *or* पत् 1 P *or* चल् 1 P.

Husband, *n.* इष्ट, उपयंतृ, कांत, क्षेत्रिक-न्, दयित, धव, नाथ, पति, परिग्रहीतृ, परिणायक, परिणेतृ, प्राणनाथ, प्रियतम, भर्तृ, वर, वरयितृ, वल्लभ, विवोढृ, सेक्तृ, स्वामिन् *all m.*। *vi.* मितं विनियुज् 7 U. *c*, *or* व्यय् 10 U; कृष् 1 P. 6 U। H. and wife, जंपती, जायापती, दंपती, मिथुने *all dual* । A widow's second h., दिधिषु *m.* । H. of a second wife, the first superseded, अधिवेत्तृ *m.* । H.'s brother, देवर–ल ; (*esp.* younger) देवन्, देवृ *both m* । H.'s br.'s wife, यातृ *f.* । H.'s sister, ननं(नां)दृ *f.*, नंदिनी । H.'s sister's h. कौतूल । Sister's h. नाशिक ; आवुत्त (in plays; अमर॰ and वैजयंती: श्याल as wife's brother) । –man, *n.* कर्षक, कुटुंबिक, कृष(षि)क, कृषाण, कृषीवल, क्षेत्रपाल, क्षेत्राजीव, क्षेत्रिक, हालिक । –ry *n.* कृषि *f.*, कृषिकर्मन् *neu.*, प्रसृतं, हलभृति *f.*

Hush, *vt.* मूकीकृ 8 U; मुखं बंध् 9 P; प्रशम् *c* । *vi.* तूष्णीं भू, मूकीभू, मौनीभू *all* 1 P ; शम्

4 P । *n.* निःशब्दता, स्तिमितत्वं; प्रशांति *f.* । *int.* शांतं ! तूष्णीं भव । –money, *n.* मौनोत्कोच.

Husk, *n.* तुष-स, त्वच् *f.*, बुषं-सं; कोश, पुट; असार-रं । *vt.* निस्तुषयति, निस्त्वचयाति *both Den.* । –ed, *a.* निस्तुष; हततुष.

Husky, *a.* तुषपूर्ण; कर्कश, कर्णकटु, परुषं । –ly, *adv.* कर्कशस्वरेण । –ness *n.* कर्कशत्वं, पारुष्यं.

Hussy, *n* अविनीतयुवती; पुंश्चली.

Hustle, *vt.* संभ्रमेण संचल् *c*; । *vi.* परस्परं संबाध् 1 A; त्वर् *c*, सत्वरं प्रचल् *c* । *vi* प्रसभं प्रचल् 1 P *or* प्रसृ 1 P; येन केन प्रकारेण स्वार्थं साध् *c.*

Hut, *n.* उटज *mn.*, कुटंगक, कुटी, कुटीर-रं, कुटीरक, गर्गरी, पल्ली.

Hutch, *n.* पंजर; क्षुद्रावरोध; पेटिका, समुद्गक; कुटी.

Huzza, *int.* जितं ! जितं ! । *n.* जयशब्द.

Hyæna, Hyena, *n.* तरक्षु *m.*, तर्क्षु *m*, तिलित्सक, मृगादन । –ish, *a.* तरक्षुसम; कातर; क्रूर.

Hyaline, *a.* काचसम; अच्छ, स्वच्छ.

Hybrid, *a.* मिश्रज, संकरज, सांकरिक.

Hydra, *n.* जलव्याल, ०सर्प ।–headed, *n.* बहुशीर्षक; दुरपास्य; प्रसारिन्.

Hydrant, *n.* जलोद्गमनालिका.

Hydrargyrum, *n.* पारद, रस.

Hydraulic, *a.* चलद्द्रव० चलज्जलविषयक; चलज्जलप्रेरित । –s, *n.* जलशक्तियोगशास्त्रं.

Hydria, *n.* कलश, कुंभ, घट.

Hydrocele, *n.* मुष्कवृद्धि *f.*, ०शोफ.

Hydrocephalus, *n.* मस्तिष्कशोफ.

Hydrodynamics, *n.* जल०, द्रवगतिशास्त्रं.

Hydrogen, *n.* उज्जनकवायु *m.*

Hydrography, *n.* नदीसमुद्रादिवर्णनं.

Hydrology, *n.* जलशास्त्रं; जलधर्मविज्ञानं.

Hydromel, *n.* मधुजलपेयं.

Hydrometer, *n.* द्रवगुरुत्वमापकयंत्रं.

Hydropathy, *n* जलचिकित्सा, जलोपचार.

Hydrophobia, *n.* आलर्क, जलसंत्रास.

Hydrophthalmia, *n.* कनीनिकाशोफ.

Hydroplane, *n.* जलविमान *mn.*

Hydroscope, *n.* घटिका, घटी.

Hydrostatics, *n.* द्रव०, जलस्थितिशास्त्रं

Hydrotherapy, *n.* जलचिकित्सा, जलोपचार.

Hydrous, *a.* जलमय, सजल.

Hyetal, *a.* पर्जन्यविषयक.

Hygiene, *n.* आरोग्यशास्त्रं; स्वास्थ्यरक्षा.
Hygienic,-al, *a.* आरोग्यकारक, ०रक्षक.
Hygrometer. *n.* क्लेदमापकयंत्रं.
Hyleg, *n.* लग्नपति *m.*
Hylic, *a.* प्राकृतिक, भौतिक.
Hymeneal, *a.* उ(औ)द्वाहिक, वैवाहिक। *n.* विवाहगीतं, ०काव्यं.
Hymn. *n.* गाथा, गीतं, सूक्तं, स्तोत्रं। *vt.* स्तोत्रेण अर्च् 1. 10 U *or* प्रशंस् 1 P; गै 1 P। -ist, *n.* स्तोत्रगायक। -ody, *n.* स्तोत्रगायनं.
Hypalgia, *n.* व्यथाशमनं.
Hyperbola. *n.* अतिक्षेपणी, अपरावर्त.
Hyperbole, *n.* अतिशयोक्ति, अत्युक्ति *both f.*। -ical, *a.* अत्युक्तिपूर्वक। -ize, *vt.* अत्युक्त्या वर्ण् 10 U.
Hyperborean. *n.* अत्युदीचीन, अत्युदीच्य.
Hypercritic, *n.* दोषैकदृश् *m.*; छिद्रमात्रान्वेषिन् *m.*
Hypermetrical, *a.* अतिरिक्ताक्षर; वृत्तातिरिक्त.
Hypersensitive, *a.* सूक्ष्मवेदिन्; अतिमृदुप्रकृति.
Hypersthenia, *n* वीर्यप्रकोप.
Hypertrophy, *n.* अतिवृद्धि *f.*, अतिस्थौल्यं.
Hyphen, *n.* संयोग०, समासचिह्नं.

Hypnosis, *n.* मोहननिद्रा, ०सुषुप्ति *f.*; निद्रासंपादनं.
Hypnotic, *a.* निद्राकारक; मोहावस्थाकारक.
Hypnotism, *n.* मोहनं.
Hypochondria, *n.* रोगभ्रम; पित्तोन्माद, पित्तविकार। -c, *a.* रोगभ्रमग्रस्त; पित्तोन्मादिन्.
Hypocrisy, *n.* उपधा, कपटविडंबनं, छद्मन् *neu.*; आर्यवृत्ति *f*, कुकुटि *f.* -टी, छंदना, दंभ, दौंदुभि *m.*, धर्मोपधा, मिथ्याचर्या, रेभटि *f*, लिंगवृत्ति *f.*
Hypocrite. *n.* कापटिक, दंभिन्, दांभिक, धर्मध्वजिन्, बकवृत्ति, लिंगवृत्ति *all m.*
Hypocritical, *a.* कापटिक, छाद्मिक, दांभिक। -ly, *adv.* सदंभं, सव्याजं.
Hypodermic, *a.* त्वगंतर्गत.
Hypogean, -ous,-geal, *a.* आंतर्भौम.
Hypostasis, *n.* द्रव्यं; आधार; तत्त्वं.
Hypotenuse, *n.* कर्ण, श्रुति *f.*
Hypothecation, *n.* आधिप्रतिश्रव.
Hypothesis, *n.* उपन्यास; प्राक्प्रमेयकल्पनं; तर्क; अनुमान०, तर्कमात्रं.
Hypothetical, *a.* कल्पित; उपन्यासात्मक; तर्कित; काल्पनिक.
Hypotyposis, *n.* सुस्पष्टवर्णनं.
Hysteria, Hysterics, *n.* गर्भाशयोन्माद वातोन्माद, हर्षमोह.

Hysteric,-al, *a.* वायुग्रस्त, हर्ष-मूर्च्छाल; अतिसंक्षोभशील.

Hysterectomy, *n.* गर्भाशय-विच्छेदनं.

Hysteritis, *n.* गर्भाशयपाक.

I

I, *pro.* अहम्.

Ibex, *n.* गिरिच्छाग.

Ice, *n* जलघन, घनजलं; तुषारसंघात, हिमं । *vt.* हिमीकृ 8 U; हिमेन शीतलीकृ 8 U. । -berg, *n.* हिमराशि *m.*, हिमोत्सेध । -bound, *a.* हिमबद्ध, हिमाक्रांत । -cold *a.* शिशिर, हिम । -cream, *n.* घनमधुरदुग्धं । -field, *n.* हिमप्रस्तार । -man, *n.* घनजल-विक्रेतृ *m.* । -river, *n.* हिमानी । Icy, *a.* हिममय; हिमशीतल; रूक्ष, स्नेहशून्य.

Ichneumon, *n.* अंगूष, कश, नकुल, पिंगल, बभ्रु *m.*

Ichor, *n.* दानं; व्रणस्राव.

Ichthyoid, *a.* मत्स्यसम.

Ichthyology, *n.* मत्स्यशास्त्रं.

Ichthyophagy, *n.* मत्स्यभक्षणं.

Icicle, *n.* हिमकण.

Icon, *n.* प्रतिमा, मूर्ति *f.* । -ic, *a.* प्रतिमात्मक । -oclasm, *n.* प्रतिमाभंजनं । -oclast, *n.* प्रतिमाभंजक । -ography, *n.* प्रतिमावर्णनं । -olatry, *n.* प्रतिमापूजा.

Ictus, *n.* ताल; नाडीस्पंद.

Idea, *n.* कल्पना, प्रतिभास, प्रत्यय, बोध, भावना, वासना, संकल्प; अभिप्राय, मतं, मति *f.*; आकूतं, उद्देश । -l, *a.* प्रत्ययात्मक, भावनात्मक; कल्पित, काल्पनिक, प्रातिभासिक; मानसिक; ध्येय-मात्रात्मक; उत्कृष्ट । -l, *n.* आदर्श; साध्यं । -lism, *n.* विज्ञानवाद । -list, *a.* विज्ञान-वादिन् *m.* । -lity, *n.* प्रत्यया-त्मकता.

Identical, *a.* अनन्य, अभिन्न; सम । -ly, *adv.* तादात्म्येन, निर्विशेषं.

Identification, *n.* तादात्म्य-निरूपणं; अभिज्ञानं; समीकरणं; सायुज्यं.

Identify, *vt.* तादात्म्येन निरूप् 10 U, अनन्यं *a.* एव मन् 4 A, दृश् *c*, प्रतिपद् *c*, *etc.*; समीकृ 8 U; आत्मानं सपक्षं *a.* कृ 8 U, सपक्षीभू 1 P.

Identity, *n.* ऐक्यं, तादात्म्यं ; अन-न्यता, अभेद ; साम्यं, सायुज्यं, सारूप्यं.

Ideograph, *n.* पदार्थचित्रं.

Ideology, *n.* प्रत्ययशास्त्रं ; मतप्रपंच.

Idiocy, *n.* जाड्यं, मतिवैकल्यं, मांद्यं; मूढता.

Idiom, *n.* वाक्संप्रदाय, वाग्व्यवहार ; भाषास्वालक्षण्यं । -atic, *a.* वाग्व्यवहारानुरूप ; रूढ्यनुगत.

Idiosyncrasy, *n.* व्यक्तिस्वभाव ; देहस्वभाव.

Idiot, *n.* जड, मूढ, मूर्ख, विकलमति *m.* । –ic, –ical, *a* जड, बालिश, मंदबुद्धि, etc.

Move, *vt.* (प्र०, वि०) चल् *c*, नी 1 P, वह् 1 P; प्रचुद् प्रवृत्, प्रेर्, प्रोत्सह् *all c*; उत्पद् *c*, प्रबुध् *c*; दयार्द्रीकृ 8 U, द्रु *c*; उपक्षिप् 6 P, उपन्यस् 4 U । *vi.* चेष्ट् 1 A; इ 2 P, इंग् 1 P, क्रम् 1 U, 4 P, गम् 1 P, चर्(ल्) 1 P, या 2 P; गृहांतरं *or* स्थानांतरं गम् 1 P; (chess) परिणायं कृ 8 U; प्रवृत् 1 A; (bowels) मलोत्सर्गं कृ 8 U: वृत् 1 A । *n.* गति *f*; चलनं; व्यवहार: परि-(री) णाय । On the m., चरिष्णु, चल; पर्यटत् । To m. heaven and earth, सकलबलेन यत् 1 A । Moveable, *a.* संचाल्य; अनियत-कालिक; *n. pl.* उपकरणरिक्थं (as opp. to स्थावररिक्थं) । -less, *a.* अचल, निश्चल; स्तब्ध, स्थिर; अविकार । -ment, *n.* गात्रचालनं, चेष्टा; गति *f*; गमनं, चलनं; प्रवृत्ति *f*., (यंत्र) व्यापार; लय । -r, *n* चालक; उपक्षपक । Moving, *a.* चालक, प्रेरक; चल; प्रवर्तक, प्रोत्साहक; करुण, मर्मस्पृश्, हृदयंगम; -ly, *adv.* हृदयंगमत्वेन.

Mow, *vt.* (दात्रेण) कृत् 6 P *or* छिद् 7 P *or* लू 9 P; निर्दल् *c*, व्यापद् *c* । *n.* धान्य०, तृणराशि *m.* । -er, *n.* लवक, लवितृ *m.* । -ing, *n.* छेदनं, लवनं: लूनतृणा भूमि *f*.

Much, *a.* प्रचुर बहु, बहुल, भूरि, विपुल; चिर, दीर्घ । *adv.* अतीव, अत्यंतं, बहु, भूरि, भृशं । *n.* बहु *neu.* । To make m. of, आदृ 4 A, संमन् *c* । As m. as, यावत् ...तावत् । How m., कियत् । So m., इयत्, एतावत्.

Mucid, Mucedinous, *a.* कल्कावृत.

Mucilage, *n.* औषधिस्नेह । Mucilaginous, *a.* चिक्कण, स्निग्ध.

Muck, *n.* अवस्कर, उच्चार, शमलं; कल्क, किट्टं, मल; बीभत्सं । *vt.* कलुषीकृ, मलिनीकृ *both* 8 U; (कार्यं) प्रमादेन विप्रकृ 8 U । To come a mucker, अवसद् 1 P; कर्दमे निपत् 1 P । To go a mucker, अपव्ययं कृ 8 U । -y *a.* कलुष, मलिन.

Mucus, *n.* श्लेष्मन् *m.*; कफ, खेटक, बलास; शिं(सिं)घाणं, सिंहाणं

(नं) । Mucous, *a.* श्लेष्मल(ण); कफकर, ०वाहिन्; चिक्कण, सांद्र.

Mud, *n.* अवकील, कर्दम, चिकिल, जंबाल, दारिपत् *m*, निषद्वर, पंक, परिपत् *m*, शाद। To throw m., मिथ्यानिंदां कृ 8 U। -dy, *a.* कार्दम, पंकिल; मलिन। -sling er, *n.* अभ्यसूयक, कर्णेजप, पिशुन.

Muddle, *vt.* व्याकुलीकृ 8 U, संभ्रम् c; ईषत्क्षीबं *a.* or मत्तप्रायं *a.* कृ 8 U; संक 6 P; प्रमादेन विप्रकृ 8 U; कलुषीकृ 8 U। *vi.* सप्रमादं व्यवहृ 1 P; मुह् 4 P। To m. along, through, कथमपि कार्य-निर्वाहं कृ 8 U। -headed, *a.* असूक्ष्मबुद्धि.

Muff, *n.* (1) हस्तावरणं; (2) जड-मति *m*, मूर्ख.

Muffle, *vt.* (वस्त्रादिकेन) अवगुंठ् 10 U or आच्छद् 10 U; मंदीकृ 8 U। *n.* हस्तावरणं; नादाव-रोधकं। -r, *n.* कंठावरणं.

Mufti, *n.* (सैनिकादीनां) सामान्य-वेष.

Mug, (1) *n.* कंस, चषक, शराव; मुखं। *vi.* मुखविकृतिं कृ 8 U.

Mug, (2) *n.* जडमति *m*, मूढ, मूर्ख.

Mug, (3) *vi.* बहुश्रमेण अध्ययनं कृ 8 U। *vt.* सायासं अधी 2 A or पठ् 1 P.

Mugger, *n.* कुंभीर, गोमुख, नक्र, मकर.

Muggy, *a.* आर्द्र, क्लिन्न, सद्रव.

Mugwump, *n.* अहंपूर्व, अहंभद्र.

Mulberry *n.* क्रमुक, नूद, ब्रह्म-दारु *m*.

Mulct, . (धन)दंड। *vt.* दंड् 10 U; विनाकृ 8 U, वियुज् 7 A. 10 U.

Mule, *n.* अश्वतर, वेगसर, वेसर; दुराग्रहिन् *m.*, प्रतिनिविष्ट। Off-spring of m. and mare, मूक, रुंड। -teer, *n.* वेसरपाल। Mulish, *a.* दुराग्रह, निर्बंधवत्, प्रतिनिविष्ट.

Muley, *n.* (शृंगहीना) गो *f.*। *a.* शृंगहीन.

Mull, *vt.* (मद्यादिकं) वास् 10 U.

Muller, *n.* पेषणी.

Mulligrubs, *n. pl.* खेद, विमन-स्कता; उदरशूलं, जठरव्यथा.

Multangular, *a.* बहुकोण.

Multeity, *n* बहुविधता.

Multifarious, *a.* अनेकविध, बहुप्रकार, बहुविध। -ly, *adv.* बहुप्रकारैः.

Multiform, *a.* बहुरूप.

Multimillionaire, *n.* अनेकको-टिपति *m.*, अतिधनाढ्य.

Multiparous, *a.* बहुप्रज, ०प्रसव।

Multipara, *n.* प्रसूतपूर्वा.

Multipartite, *a.* बहुभाग.

Multiple (x) *a.* बहुविध, विविध, अनेक, बहु; बह्वंग। *n.*, घात। Multiplicity, *n.* बहुविधता; बाहुल्यं.

Multiply, *vt.* गुण् 10 U, (आ०, नि०) हन् 2 P. *c*; बहुलीकृ 8 U, वृध् *c* । *vi.* उपचि *Pass*, बहुलीभू 1 P, वृध् 1 A, विस्तॄ *Pass.*; बहुप्रसवेन उपचि *Pass.* । Multiplicand, *n.* गुण्य, गुण्यराशि *m*, गुण्यांक । Multiplication, *n.* उपचय, वृद्धि, विस्तार; गुणनं, गुणाकार, पूरणं, हननं । Cross m. *m.* वज्राभ्यास । Multiplier, Multiplicator, *n.* गुणक, गुणकराशि *m*, गुणकांक, पुरक.

Multitude, *n.* बाहुल्यं; बृहत्संख्या; ओघ, निकर, स्तोम; जनता, समुदाय, संमर्द, संकुलं; प्राकृतजनाः *pl* । Multitudinous, *a.* अनेक, बहु, बृहत्संख्य, असंख्य.

Mum, *a.* तूष्णीक, निःशब्द, मूक । *int.* शांतं! तूष्णीं भव । *vi.* मूकाभिनयं कृ 8 U । To keep m., जोषं *or* तूष्णीं आस् 2 A.

Mumble, *vt.* अस्पष्टं वद् 1 P; नीचैः वद् 1 P । *n.* अस्पष्टभाषणं.

Mummer, *n.* मूकाभिनयकारिन् *m*; नट, रंगाजीव । -y, *n.* मूकाभिनय; छंदना, दंभ, मिथ्याचर्या.

Mummy, *n.* द्रव्यरक्षितं शवं । Mummification, *n.* शवरक्षणसंस्कार.

Mump, (1) *vi.* साविलापं याच् 1 A; (2) निरुल्लासं वृत् 1 A । -s, *n.pl.* कर्णमूलपाक.

Munch, *vt.* दीर्घं चर्व् 1 P.

Mundane, *a.* ऐहलौकिक, ऐहिक, प्रापंचिक; लौकिक, सांसारिक । M. existence, लोकयात्रा, संसार.

Mungoose, *n.* अंगूष, कश, नकुल, पिंगल, बभ्रु *m*.

Municipal, *a.* नागरिक; स्थानिकस्वराज्यविषयक । -ity, *n.* नगरकार्यनिर्वाहकमंडलं; स्वकार्याधिकारिनगरं.

Munificent, *a.* उदार, मुक्तहस्त, वदान्य । Munificence, *n.* औदार्यं, वदान्यत्वं.

Muniment, *n.* आगमपत्रं; कोट, दुर्गं; पालनं, रक्षणं, रक्षा.

Munition, *n. pl.* युद्धसामग्री; उपकरणसामग्री.

Mural, *a.* भित्तिविषयक; भित्तिसम.

Murder, *n.* द्वेषमूलक-का मनुष्यवध-हत्या । *vt.* द्वेषात् हन् 2 P *c*; प्रमादेन विप्रकृ 8 U । The m. is out, रहस्यभेदः संवृत्तः । -er, *n.* नरघातक, हंतृ *m*. । -ous, *a.* जिघांसु, वधेच्छु, वधोद्यत; घातक, प्राणहर, मारक, मारात्मक; -ly, *adv.* वधेच्छया.

Mure, *vt.* भित्तिभिः परिवृ 5 U; निरुध् 7 U.

Murky, *a.* तमोमय, तिमिर, निरालोक.

Murmur, *n.* कलकल, कलरव, गुंजितं, मंदशब्द, मर्मर; असंतोषवचनं । *vi.* मर्मरायते *Den.*, गुंज् 1 P.; नीचैः वद् 1 P; असंतोषेण

वद् 1 P। *vt.* नीचैः वद् 1 P। –ingly, *adv.* असंतोषशब्देन। –ous, *a.* कलस्वन, मंदनाद.

Murrey, *a.* घनलोहित.

Muscle, *n.* नखारुस् *neu*, पेशी, वस्नसा, स्नसा, स्नायु *m*, स्नाव, स्नावन् *m*। Muscular, *n.* स्नायुविषयक; प्रबलस्नायुमत्; दृढकाय, मांसल। Musculature, *n.* स्नायुरचना.

Muse, (1) *n.* विद्या°, कलादेवता; प्रतिभा। –um, *n.* उत्कृष्टवस्तुसंग्रहालय.

Muse, (2) *vi.* ध्यै 1 P, विमृश् 6 P; मौनीभूय अधी 2 A; संभू *c*। Musingly, *adv.* ध्यानमग्नतया.

Mush, *n*, चिक्कणामिश्रणं; यवागू *f*, यूष। –y, *a.* चिक्कण.

Mushroom, *n.* छत्रक, शिलींध्रं। *a.* शिलींध्रविषयक, °सम; क्षणिक, नश्वर; अचिरोत्कर्षगर्वित.

Music, *n.* गंधर्वविद्या, °वेद, संगीतशास्त्रं; संगीतं, गीतं; सुस्वर, स्वरमाधुर्यं; (Instrumental) तौर्यं, वादनं। To face the m., निर्भयं संकटे प्रतिष्ठा 1 P। –master, *n.* संगीताचार्य। –al, *a.* संगीतविषयक; संगीतप्रिय, गानप्रिय, संगीतविशारद; मधुर, सुस्वर। –ian, *n.* संगीतज्ञ; गातृ, गाथ(थि)क, गायक, गेष्णु *all m*; वादक.

Musk, *n.* कस्तूरिका, कस्तूरी, गंधकेलिका, गंधधूलि *f*, मृगनाभि *m*, मृगमद। -deer, *n.* गंधमृग। –rat, *n.* गंधाखु *m*, गंधमूषी। –y, *a.* कस्तूरीसम, °वासित, °मय.

Musket, *n.* अग्न्यस्त्रं। –eer, *n.* अग्न्यस्त्रधारिन् *m*.

Muslin, *n.* सूक्ष्मकार्पासवस्त्रं.

Mussel, *n.* शंबु *m*, शंबूक.

Mussitation, *n.* अस्पष्टभाषणं.

Mussulman, *n.* महंमदीय.

Must, (1) *n.* मद्यकल्प: द्राक्षारस; (2) कल्कं, मल। –y, *a.* कल्कदूषित; जीर्ण, नीरस.

Must, (3) *aux. v. exp. by potential forms, with* अवश्यं, *etc.*; *by* अर्ह् 1 P.

Mustard, *n.* (white) कदंबक, शुभक, सर्षप; (black) कृष्णिका, क्षव, राजिका.

Muster, *n.* सैनिकसंमेलनं; गण, समुच्चय, समुदाय। *vt.* (सैनिकान्) एकत्र कृ 8 U, संगम् *c*, संग्रह् 9 P; परिगण् 10 U; समाह्वे 1 P; (courage, *etc.*) आत्मनि उत्पद् *c*। To pass m., परीक्षणं उत्तॄ 1 P; स्वीकृ *pass*। –book, –roll, *n.* (सैनिक°) नामावलि *f*, परिगणना.

Mutable, *a.* विकारशील; अस्थिर, चंचल, चपल। Mutability, *n.* विकारशीलत्वं; अस्थैर्यं, चंचलता। Mutate, *vt.* अन्यथाकृ 8 U, परिवृत् *c*। Mutation, *n.* विकार, परिवर्तनं, स्थित्यंतरं.

Mute, (1) *a.* अवाच्, तूष्णीक, निःशब्द, मूक, वाणीहीन, स्तब्धवाच् *n.* मूक *m* । *vt.* मंदीकृ 8 U । –ly, *adv.* मूकवत्; जोषं, तूष्णीं। –ness, *n.* मूकता.

Mute, (2) *vi.* मलोत्सर्गं कृ 8 U.

Mutilate, *vt.* (अंगं *or* गात्रं) छिद् 7 P; विरूप् 10 U, विरूपीकृ 8 U; विप्रकृ 8 U । –ion, *n.* गात्रकर्तनं, विदारणं; व्यंगीकरणं; विच्छेदनं; वैकल्यं.

Mutineer, *n.* आज्ञोल्लंघिन्, प्रकोपकारिन्, सेनाधिकाररोधिन् *all m* । Mutinous, *a.* आज्ञालंघिन्, अधिकाराभिद्रोहिन्; अवश । Mutiny, *n.* आज्ञोल्लंघनं, अधिकाराभिद्रोह, सेनाधिकाररोधनं; *vi.* अभिद्रुह् 4 P, आज्ञोल्लंघनं *or* अधिकाररोधनं कृ 8 U.

Mutter, *vi.* अस्पष्टभाषणं *or* असंतोषवचनं कृ 8 U; गंभीरनादं कृ 8 U, नीचैः स्तन् 1 P । *vt.* अस्पष्टं *or* उपांशु *or* अप्रकाशं वद् 1 P । *n.* अस्पष्टालाप, उपांशुभाषणं; असंतोषवचनं; मंद्रनाद, ॰स्तनितं.

Mutton, *n.* अविमांसं.

Mutual, *a.* अन्योन्य, परस्पर; मिथस्॰ *in comp* । –ity, *n.* परस्परसंबंध, अन्योन्याश्रय । –ly, *adv.* अन्योन्यं; परस्परं, मिथः.

Muzzle, *n.* घोणा, विघ्राणिका; घोणाबंध, मुखबंधनी । *vt.* मुखं बंध् 9 P; मूकीकृ 8 U.

Muzzy, *a.* क्षीब, मत्त; संभ्रांत.

My, *a.* मदीय, मम, मामक, मामकीन.

Mycetes, *n. pl.* जीवाणवः *pl.*

Myocardium, *n.* हृदयस्नायु *m.*

Myography, *n.* स्नायुवर्णनं.

Myology, *n.* स्नायुशास्त्रं.

Myope, *n.* ह्रस्वदृष्टि *m.* । Myopia, *n.* ह्रस्वदृष्टित्वं । Myopic, *a.* ह्रस्वदृष्टि.

Myriad, *a.* अगण्य, असंख्य । *n.* दशसहस्रं; बृहत्संख्या.

Myrmidon, *n.* अनुचर, परिचर; दुष्टसेवक.

Myrobalan, *n* (Yellow) अभया, अव्यथा, कायस्था, कालकूणिका, चेतकी, धारणी, नंदिनी, पथ्या, पूतना, शुक्रसृष्टा, साधिका, हरीतकी; आमलकी, तिष्या.

Myrrh, *n.* गंधरस, गोल, गोस, पिंड, प्राण, बोल, शश.

Mystagogue, *n.* रहस्यदर्शक.

Mystery, *n.* गुह्यं, गहन॰, गूढतत्त्वं, रहस्यं; गूढता; (*pl.*) गूढदीक्षाः । Mysterious, *a.* औपनिषद, गुप्त, गुह्य, गूढ; गहन, गूढार्थ, दुर्बोध; –ly, *adv.* गूढं, गूढतया.

Mystic, *a.* गुह्य, गूढ; औपनिषद; तर्कातिशायिन् । *n.* गूढतत्त्वद्रष्टृ *m*, गुह्यसंप्रदायविद् *m.* । –ism, *n.* गूढतत्त्वं; गुह्यसंप्रदाय.

Mystify, *vt.* मुह् *c*, संभ्रम् *c*; वंच् *c* । Mystification, *n.* संभ्रांति *f*, संमोह.

Myth, *n.* कल्पितकथा, पुराकथा, पुरावृत्तं ; कल्पनामात्रं । -ic, -ical, *a.* पौराणिक ; कल्पनात्मक, काल्पनिक । -ologist, *n.* पुराविद् *m*, पुराकथाशास्त्रज्ञ । -ology, *n.* पुराकथासंग्रह ; पुराकथाशास्त्रं.

N

Nab, *vt.* ग्रह् 9 P, धृ 10 U; निरुध् 7 U.

Nacre, *n.* शुक्तिकागर्भ.

Nadir, *n.* अधोबिंदु *m*; नीचतमपदं.

Nævus, *n.* तिल(क).

Nag, (1) *n.* अश्वक । (2) *vi.* नित्यं अधिक्षिप् 6 P *or* उपालभ् 1 A *or* दुष् *c* । *vt.* निर्भर्त्सनया पीड् 10 U । -ger, *n.* निर्भर्त्सक । -gish, -gy, *a.* निर्भर्त्सनाप्रिय, ०शील.

Naiad, *n.* अप्सरस् *f*, जलदेवता.

Nail, *n.* करकंटक, करज, कररुह, करशूक, खरूल, नख *mn*, नखर *mn*, पाणिरुह, पुनर्नव, पुनर्भव, स्मरांकुश ; कील(क), शंकु *m* । *vt.* कीलैः बंध् 9 P *or* दृढीकृ 8 P, कील् 10 U ; ग्रह् 9 P; स्था *c* ; चुर् 10 U । On the n., योग्यस्थाने ; सहसा । To hit the n. on the head, सत्यवृत्तांतं विद् 6 P ; उचितकार्यमेव विधा 3 U । To n. to the counter, व्यलीकामिव प्रकाश् *c*

Naive, *a.* अकपट, निर्व्याज, मुग्ध, सरल । -ly, *adv.* निष्कपटं । -te, *n.* आर्जवं, मुग्धता, सारल्यं.

Naked, *a.* नग्न(क); अवस्त्र, दिगंबर, विवस्त्र, विवासस् ; अनाच्छादित, अनावृत ; अशरण ; रहित, शून्य ; अनलंकृत, अभूषित; केवल, शुद्ध ; निर्व्यलीक, स्पष्ट । A n. woman, कोट्टवी, नग्ना । -ly, *adv.* नग्नतया, नग्नवत् ; निर्व्यलीकं ; स्पष्टं । -ness, *n.* नग्नता.

Namby-pamby, *a.* नीरस.

Name, *n.* अभिधा, अभिधानं, अभिधेयं, आख्या, आह्वय, आह्वयनं, आह्वा, उपाधि *m*, नामधेयं, नामन् *neu*, व्यपदेश, संज्ञा; शब्दमात्रं, संज्ञामात्रं ; कीर्ति *f*, ख्याति, प्रतिष्ठा, प्रसिद्धि, विश्रुति *all f*, यशस् *neu* ; अनुग्रह, आश्रय । *vt.* अभिधा 3 U, आख्या 2 P, आचक्ष् 2 A, आह्वे 1 P, उपलक्ष् 10 U, नाम कृ 8 U, व्यपदिश् 6 P; नाम्ना आकृ *c* or निर्दिश् 6 P; नियुज् 7 A. 10 U; उदाहृ 1 P, कथ् 10 U । By n., नाम (*ind.*), नामतः, नामधा ; ०आह्व, ०नामक *in comp* । In the n. of, अधिकारतः, नियोगात्, वचनात् ; (in oaths) साक्षीकृत्य, स्मृत्वा । To call n.s, अपभाष् 1 A, निंद् 1 P । -d, नाम (*ind*); ख्यात, संज्ञित ।

-less *a.* अनामक, नामहीन, अप्रसिद्ध, अविख्यात; विजात; अनिर्वचनीय; अवद्य। -ly, *adv.* यथा, तद्यथा। -sake *n.* समनामक *m.*

Nanism, *n.* खर्वता, वामनाकारता.

Nanny-goat, *n* अजा, गलस्तनी, चुलुंपा, छागी, पर्णादा, पलिकिनी, मंजी, सर्वभक्षा.

Nap, (1) स्वल्पनिद्रा। *vi.* स्वल्पं निद्रा 2 P *or* स्वप् 2 P; अनवधान *a.* भू 1 P। To catch napping, अनवहितं *or* प्रतिकूलावस्थायां विद् 6 P.

Nap, (2) मृदुलोमन् *neu*, तूलं। -py, *a.* मृदुलोमावृत.

Nape, *n.* अवटु *m*, कृकाटिका, घाटा, मन्या, शिरःपीठं.

Napery, *n.* वरकजातं.

Napkin, *n.* नक्तक, वरकं.

Narcosis, *n.* मादकद्रव्यस्तंभ; माद, मोह, स्तंभ। Narcotic, *a.* मादक, स्तंभकारिन्, स्वापकारक; *n* निद्रौषधं, मादकद्रव्यं, स्तंभकौषधं.

Nard, *n.* आमिषी, जटा, जटामांसी, जटिला, तपस्विनी, नर(ल)द्दा, मांसी, मिशी-षी, लोमशी; नरदांजनं.

Narrate, *vt.* आख्या 2 P, आविद् *c*, उपाख्या 2 P, कथ् 10 U, कथापयति *Den.*, निगद् 1 P, निविद् *c*, वद् 1 P, वर्ण् 10 U, श्रु *c*। -ion, *n.* कथनं, कीर्तनं, निरूपणं, निवेदनं। -ive, *n.* कथोपाख्यानं वृत्तांतकथनं; आख्यानं, आख्यानकं, आख्यायिका, उपाख्यानं, कथा, वृत्तांत; (historical) इतिहास, चरितं-त्रं; *a.* कथनात्मक, कथाविषयक। -or, *n.* कथक, कथिक.

Narrow, *v.* अनायत, अपृथु, अविस्तीर्ण, संबाध; संकुचित, संवृत; अल्पविषयक, अव्यापक, (परि०) मित; अनुदारमति, आकुंचितबुद्धि, कृपणचेतस्; स्वपक्षांध, स्वमतांध; सूक्ष्म; निकट। *vt.* अनायतं *a.* कृ 8 U; आकुंच् *c*, संकुच् 6 P, परिच्छिद् 7 P, परिमा 2 P. 3 A। *vi.* अनायत *a.* भू 1 P; *Pass. prec. verbs*। *n.* (*pl.*) सामुद्रधुनी; संबाधमार्ग। N. circumstances, *n.* दारिद्र्यं, दैन्यं। N. escape, कथमपि साधितं विघ्नतारणं। -ly, *adv.* अनायतं; कथमपि, कृच्छ्रेण। -minded, *a.* अनुदारमति, कृपणचेतस्। -ness, *n.* अनायतत्वं, संकोच.

Nasal, *a.* नस्य, नासिक्य; अनुनासिक। *n.* अनुनासिकं.

Nascent, *a.* जायमान, प्रादुर्भवत्; भविष्णु; प्रादुर्भावोन्मुख, वर्धिष्णु; अपरिणत.

Nasty, *a.* आविल, कलुष, मलिन; अमेध्य, अशुद्ध; अशिष्ट, अश्लील, कश्मल, कुत्सित, ग्राम्य, बीभत्स;

वांतिकर; उद्वेगकर, क्लेशावह, पीडाकर; अप्रिय, तुच्छ। Nastily, *adv.* कुत्सितं । Nastiness, *n.* मालिन्यं; अशुद्धता; अप्रियता.

Natal, (1) *a.* जन्मविषयक; (2) *a.* नितंबविषयक.

Nates, *n. pl.* नितंब, श्रोणिं-णी *f*, स्फिच् *f*.

Nation, *n.* जनपद, नीवृत् *m*, राज्यं, राष्ट्रं; देश, विषय; जनाः, प्रजाः, लोक, जनता । -al, *a.* राष्ट्रीयः देशीय, देश्य; सार्वजनिक, सार्वलौकिक ; -ly, *adv.* राष्ट्रीय-प्रकारेण; राष्ट्रीयार्थतः । -alism, *n*, देशभक्ति *f*; राष्ट्रीयतंत्रं । -alist, *n.* स्वदेशभक्त, स्वदेशाभिमानिन् *m* । -ality, *n.* स्वदेशाभिमान; राष्ट्रं । -alize, *vt.* राष्ट्रायत्तीकृ 8 U.

Native, *a.* देशीय, देश्य, स्वदेशोत्पन्न ; जन्मविषयक; अंतर्जात, औत्पत्तिक, नैसर्गिक, सहज, स्वाभाविक ; अकृत्रिम । *n.* देशज, देशीयजन । N. country, जन्मभूमि *f*, स्वदेश । N. place, जन्मस्थानं । Nativity, *n.* जन्मन् *neu* ; जन्मपत्रिका.

Natron, *n.* कापोत, सर्जिका.

Natty, *a.* सुभग, सुवेष.

Natural, *a.* निसर्गज, नैसर्गिक, प्राकृतिक, सांसिद्धिक ; अंतर्जात, अंतर्भव, औत्पत्तिक, सहज, स्वाभाविक ; यथाक्रम ; अकृत्रिम ; अक्लिष्ट, सरल ; यथार्थ, युक्त ; जारज, विजात । *n.* जडमति *m*, मूर्ख । N. history ; प्राणिविद्या, ०शास्त्रं । N. philosophy, पदार्थविज्ञानं । -ism, *n.* नैसर्गिकावस्था ; अनाधिदैविकी निसर्गमीमांसा ; यथानिसर्गनिरूपणं । -ist, *n.* प्राणिशास्त्रज्ञ । -istic, *a.* निसर्गानुसारिन् ; यथार्थ, वास्तविक । -ize, *vt.* देशजाधिकारग्राहिणं कृ 8 U । -ly, *adv.* निसर्गतः, स्वभावतः ; अकृत्रिमतया, सारल्येन ; उपपन्नं, खलु, नूनं.

Nature, *n.* गुण, धर्म, प्रकृति *f*, भाव, वृत्ति *f* , शीलं, लक्षणं' संसिद्धि *f*, स्वभाव, स्वरूपं, स्वालक्षण्यं ; (kind) जाति *f*, प्रकार, वर्ग, विशेषः निसर्ग, सर्ग, सृष्टि *f* ; चराचरं, जगत् *neu*, विश्वं ; प्रकृति *f*, प्रधानं, माया ; निसर्गक्रम, सृष्टिनियम । By n., जन्मतः , प्रकृत्या. स्वभावतः। Naturism, *n.* निसर्गोपासना.

Naught, *n.* खं, बिंदु *m.*, शून्यं ; न किंचिदपि. न किमपि । *adv.* न किंचिदपि । To set at n., अवगण् 10 U, अवधीर् 10 U, तृणाय मन् 4 A.

Naughty, *a.* प्रतीप, वक्रशील , विरुद्धाचार ; कुचेष्टित, दुश्चेष्टित ; अवश्य, अविनेय, आज्ञालंघिन् ; अविनीत, असभ्य ; अरुचिकर । Naughtily, *adv.* प्रतीपं ।

आविनयेन । Naughtiness, *n.* वक्रशीलता; कुचेष्टितं; अविनेयता.

Naumachia, -chy, *n.* (कृत्रिमं) नौकायुद्धं.

Nausea, *n.* वमनेच्छा, छर्दिर्व्याधि *m*; समुद्रघूर्णिपीडा; जुगुप्सा, बीभत्स । -te, *vt.* वमनेच्छुं *a.* or छर्दिःपीडितं *a.* कृ 8 U; जुगुप्सया निरस् 4 U । *vi.* वमनेच्छया *or* छर्दिषा पीड् *Pass*; जुगुप्सया विमुखीभू 1 P । -ting (*also* Nauseous), *a.* वमनकारक; जुगुप्सावह, बीभत्स.

Nautch, *n.* नर्तनं, नृत्यं, लास्यं.

Nautical, *a.* नौकाविषयक; नाविक.

Naval, *a.* नौकाविषयक; नौकात्मक.

Nave, *n.* तुंबा, नाभि *m. f*, नाभिका पिंडि-डी *f*, पिंडिका.

Navel, *n.* तुंदि *f*, तुंदिकरी, तुंदिका, नाभि-भी *f*, नाभिका, प्रतारिका । Cavity of the n., नाभीलं, नाभ्यावर्त । N. string, नाभिनाल । Ruptured n., नाभिकंटक, ०गोलक.

Navicular, *a.* नौकाकृति.

Navigate, *vi* नौकया गम् 1 P *or* चल् 1 P; नौचालनं कृ 8 U । *vt.* चल् *c*, प्रेर् *c* । -ion, *n.* नौकाटनं, नौयात्रा; नौचालनं; नाविकविद्या, नौचालनविद्या । or *n.* नाविक, नौवाह, पोतवाह, मार्गर; समुद्रपथिक । Navigable, *a.* नाव्य, नौतार्य.

Navvy, *n.* खनक, खनितृ *m.*

Navy, *n.* (युद्ध) नौकागण.

Nay, *adv.* न, नहि । *n.* निराकरणं; नकार.

Neap, *a.* नीच, नीचतम.

Near, *Prep, adv.* अंतिकं-कात्-के. आरात्, उपकंठं, निकटे, निकषा, समया, समीपं, समीपतः, समीपे, सविधे; कार्पण्येन । *a.* अदूर, अंतिक, अभ्याश, आसन्न, उपकंठ, उपांत, निकट, निकृष्ट, संनिहित, समीप, समीपवर्तिन्, सविध, दृढसख्य, सुपरिचित; आसन्न। दृढसंबंधिन्, सकुल-ल्य (left) वाम, सव्य; सूक्ष्म; कृपण; *vt.* उपगम् 1 P, उपे 2 P; *vi.* समीपं गम् 1 P । N. at hand, नातिदूरे; उपनत, प्रत्यासन्न । -ly, *adv.* प्रायः, प्रायशः, प्रायेण; सूक्ष्मतया; दृढं । -ness, *n.* नैकट्यं, संनिधि *m*, सामीप्यं.

Neat, (1) *n.* गावः *pl.* । -herd, *n.* गोपाल, गोसंख्य । -house, *n.* गोशाला, गोष्टं, व्रज.

Neat, (2) *a.* सुव्यवस्थ; सुपरिष्कृत; सुभग, सुरेख; ललित, सूक्त; कुशल, निपुण, निष्णात; अमिश्रित, शुद्ध । -handed, *a.* चतुर, निपुण । -ly, *a.* सुव्यवस्थया; कौशलेन । -ness, *n.* सुव्यवस्था, सुभगत्वं.

Neb, *n.* चंचु-चू *f*, सृपाटिका; घोणा; अग्रं.

Nebula, *n.* खधूमिका ; शुक्लं, शुक्लपटलं। Nebulous, *a.* अभ्रित; मेघोपम ; अस्पष्ट, अस्फुट ; संभ्रांत.

Necessary, *a.* अनिवार्य, अपरिहार्य, अवश्य, अ(आ)वश्यक, अहार्य ; अवश्यकार्य ; अवश्यंभाविन्, नियत; निर्णायक । *n.* (*pl.*) उपजीव्य-सामग्री ; अन्नाच्छादनं । Necessarily, *adv.* अवश्यं, अवश्यमेव, नियतं.

Necessity, *n.* अनिवार्यता, अपरिहार्यता, अवश्यता, आवश्यकता ; अवश्यकार्यता ; अवश्यभावित्वं ; नियति *f,* भवितव्यता ; दैन्यं, विपद् *f*; निमित्तं, प्रयोजनं । Necessitarianism, *n.* संकल्प-पारतंत्र्यवाद । Necessitate, *vt.* अवश्यीकृ 8 U ; अवश्यं उत्पद् *c or* प्रसंज् *c* । Necessitous, *a.* दरिद्र, दीन, निराश्रय, निर्धन

Neck, *n.* अवसुषिरा, कंधरा, ग्रीवा, व्यापलंडिका, शिरोधरा, शिरोधि *f*। N. with 3 lines (an auspicious sign), कंबुग्रीवा । Back of the n., अवटु, कृकाटिका, घाटा, शिरःपीठं । A stiff n., दुराग्रह, निर्बंध । -cloth, (*also* Neckerchief), *n.* ग्रैवेयकं । -lace, *n.* कंठमाला, हार.

Necrolatry, *n.* प्रेतपूजा, पूर्वजोपासना.

Necrology, *n.* मृतसूची; मृतजन-वर्णनं.

Necromancy, *n.* प्रेतसिद्धि *f,* भूत-विद्या.

Necropolis, *n.* श्मशानं.

Necrosis, *n.* कोथ, (अस्थि॰) पाक.

Nectar, *n.* सुरपेयं; अमृतं, निर्जरं, पीयूषं, सुधा; मकरंद । -ean, -ed, -ous, *a.* अमृतोपम; अमृतमय.

Ne'e, *phrase* जन्मनाम्ना.

Need, *n.* अपेक्षा; कार्यं, प्रयोजनं; न्यूनता, विरह; दारिद्र्यं, दैन्यं, निर्धनता; आपद् *f,* कष्ट *mn,* वैक्लव्यं; आकांक्ष्यं । *vt.* अपेक्ष् 1 A; आकांक्ष् 1 U, व्यपेक्ष् 1 A । *vi.* *Exp. by* अर्ह् 1 P *with inf., by pot. forms, etc.* । -fire, *n.* इद्धाग्नि *m* । -ful, *a.* अपेक्षित ; आकांक्ष्य ; आवश्यक । -less, *a.* अनावश्यक ; निरर्थक, निष्प्रयोजन । -s, *adv.* अपरिहार्य-तया, अवश्यमेव । -y, *a.* दरिद्र, दीन, निर्धन.

Needle, *n.* सीवनी, सूचक, सूचा, सूचि *f,* सूचिका, सूची ; लोह-चुंबकशलाका । *vt.* सूच्या सिव् 4 P । -woman *n.* सूचिका । -work, *n.* सूचीकर्मन् *neu.*

Ne'er-do-well, *n.* अकिंचित्कर, सर्वकार्यविमुख.

Nefandous, *a.* अवाच्य ; घोर, दारुण, पापिष्ठ.

Nefarious, *a.* अतिदुष्ट, अतिनिंद्य, अवद्य, कुपूय, घोर, पापिष्ठ । -ly, *adv.* अतिदुष्टं । -ness, *n.* अतिनिंद्यता, घोरता.

Negate, *vt.* अभवंतं *a.* कृ 8 U; खंड् 10 U, निराकृ 8 U। Negation, *n.* अपलाप, खंडनं, निरसनं, निराकरणं, निषेध, प्रत्याख्यानं; अभाव, विरह; निषेधार्थकं वाक्यं। Negatory, *a.* निषेधार्थक.

Negative, *a.* अभाववाचक, निषेधात्मक, निषेधार्थक; विपरीत। *n.* निषेधार्थकः—कं शब्द, वाक्यं; निषेध; (photo.) प्रतिमाकाच; (Algebra) क्षयराशि *m.* । *vt.* प्रतिषिध् 4 P, प्रत्यादिश् 6 P; विपर्यस् 4 U। -ly, *adv.* नेति, सनिषेधं । Negativity, *n.* निषेधार्थकता; अभावात्मकता.

Neglect, *vi.* अनवधानेन *or* सप्रमादं कृ 8 U *or* अनुष्ठा 1 P; अवगण् 10 U, अवधीर् 10 U, उपेक्ष् 1 A; न अनुष्ठा 1 P *or* कृ 8 U; सप्रमादं *or* प्रमादात् त्यज् 1 P *or* वृज् 10 U। *n.* अनादर, अवगणना, उपेक्षा; अननुष्ठानं, अविधानं; अनवधानं; प्रमाद। -ful, *a.* अप्रश्रय, सावज्ञ; उपेक्षक; अनवधान, प्रमादिन्; -ly, *adv.* सोपेक्षं; सप्रमादं, अनवधानेन। Neglige′, *n.* अल्पवेष । Negligence, *n.* अनवधानं, उपेक्षा, प्रमाद; अननुष्ठानं, कर्तव्यलोप; उपात्यय । Negligent, *a.* अनवधान, अनवहित, असावधान, प्रमादिन्; -ly, *adv.* अनवधानपूर्वकं, सप्रमादं । Negligible, *a.* अवगणनार्ह; अनादरणीय; अकिंचित्कर, तुच्छ.

Negotiate, *vi.* समयं *or* मूल्यनिर्णयं कृ 8 U; (समयार्थं) व्यवहृ 1 P *or* संमंत्र् 10 U । *vt.* (संमंत्रणेन) रच् 10 U *or* संधा 3 U; साध् *c*: विक्री 9 A । -ion, *n.* व्यवहार, संमंत्रणं; पणनं; सामन् *neu* । Negotiant, Negotiator, *n.* व्यवहर्तृ *m*, संमंत्रक.

Negro, *n.* कृष्णदेह.

Neigh, *vi.* हेष् 1 A, ह्रेष् 1 A । *n.* हे(ह्रे)षा, हेषितं.

Neighbour, *n.* प्रतिवासिन् *m*, प्रतिवेश(श्य), प्रातिवेशिन् *m*, प्रातिवेश्य; समीपवर्तिन् *m* । *vt.* समीपे वृत् 1 A । -hood, *n.* प्रतिवेश, सामंतं; प्रतिवेश्याः, प्रतिवेशिनः *pl*; नैकट्यं, संनिधि *m*, सांनिध्यं, सामीप्यं। -ing, *a.* प्रतिवासिन्, प्रतिवेशिन्, सामंत; निकटवर्तिन्; N.ing king, सामंत *m*। -ly, *a.* प्रतिवेश्योचित; उपकारपर.

Neither, *conj.* न-न, न च—न च। *a.* न *with* अन्यतर.

Nemesis, *n.* (दुष्कृति०) प्रतिफलं.

Nenuphar, *n.* कह्लारं, कैरवं.

Neology, *n.* नूतनशब्दप्रयोग । Neologism, *n.* नूतनशब्द । Neologist, *n.* नूतनशब्दप्रयोजक। Neologize, *vi.* नूतनशब्दप्रयोगं कृ 8 U.

Neophyte, *n.* नूतनदीक्षित; नवच्छात्र, प्राथमकल्पिक, शैक्ष; अनभ्यस्त.

Nepenthe, *n.* दुःखनाशनं (औषधं).

Nephalism, *n.* मद्यनिवृत्ति *f.*

Nepheloid, *n.* अभ्रित; कलुष, अनच्छ। Nephelology, *n.* मेघशास्त्रं.

Nephew, *n.* (Brother's son) भ्रातुष्पुत्र, भ्रातृव्य, भ्रात्रीय, भ्रात्रेय; (Sister's s.) जामेय, भागिनेय, स्वस्रीय.

Nephralgia, Nephritis, *n.* वृक्करोग। Nephritic, *a.* वृक्कविषयक, वृक्करोगघ्न। Nephrocele, *n.* वृक्कस्रंस। Nephrotomy, *n.* वृक्कच्छेद.

Nepotism, *n.* ज्ञातिपक्षपात.

Nereid, *n.* समुद्रदेवता.

Nerve, *n.* ईलिका, ज्ञानतंतु *m*, धमनि-नी, नाडि-डी, नाडिका, नालि-ली, शि(सि)रा *all f*; धैर्यं, सामर्थ्यं, साहसं; (*pl.*) कातर्यं, संक्षोभ, व्याकुलता; धाष्टर्यं प्रगल्भता। *vt.* समर्थ *a.* कृ 8 U। -less, *a.* निर्वीर्य, निःसत्त्व। Nervine, *a.* शिरापुष्टिकर। Nervous, *a.* शिराविषयक; शिरामय; शिराल; ओजस्विन्; अधीर, सुक्षोभ; असाहसिक, कातर; दृढकाय; -ly, *adv.* आकुलतया; कातरतया। Nervy, *a.* दृढकाय, मांसल; आत्मप्रत्ययिन्, निःशंक, प्रगल्भ; अधीर, क्षुब्ध, व्याकुल.

Nescient, *a.* अज्ञ, अनभिज्ञ, अनुपलब्ध। Nescience, *n.* अज्ञानं, अबोध; अविद्या.

Nesh, *a.* कोमल, मृदु.

Ness, *n.* भूशिरस् *neu.*

Nest, *n.* कुलाय *mn*, निलय, नीड *mn*, नीडक; गर्त, बिलं; आवसथ, निवास। *vt.* नीडे निविश् *c*। *vi.* नीडं कृ 8 U। -egg, *n.* कृत्रिमांडं; धनसंग्रह। -ling, *n.* पक्षिशावक; स्तनंधय.

Nestle, *vi.* (नीडादिके) सुखं उपविश् 6 P; अतिनिकटं शी 2 A, उपविश् 6 P, *etc.*

Nestor, *n.* सदुपदेशक, सुमंत्रिन् *m*; विपश्चित् *m.*

Net, (1) *a.* शुद्ध; अशेष, निरवशेष; अन्यून; निरुद्धार। *vt.* समग्रतया अर्ज् 1 P. *c or* साध् *c.*

Net, (2) *n.* जालं, जालकं; पाश, वागुरा। *vt.* जालीकृ 8 U; जाले ग्रह् 9 P *or* बंध् 9 P। -work, (also Netting), *n.* जालकर्मन् *neu*; जालरचना। Netted, *a.* सजाल.

Nether, *a.* अधर, अवर; नारक, नारकीय। N. regions, world, अधोलोक, नागलोक, पातालं, रसा; नरक, निरय। -most, *a.* अधम, अवम.

Nettle, *n.* पीतपर्णी। *vt.* दंश् 1 P; क्लिश् 9 P, तप् *c*, पीड् 10 U, प्रकुप् *c.*

Neural, *a.* शिराविषयक । -gia, *n.* शिरावेदना, वातशूलं । Neurasthenia, *n.* शिरादौर्बल्यं । Neuritis, *n.* शिरापाक । Neurology, *n.* शिराशास्त्रं.

Neurosis, *n.* शिराव्याधि *m* । Neurotic, *a.* शिराव्याधिग्रस्त.

Neuter, *a.* क्लीब, तृतीयप्रकृति, नपुंसक । *n.* नपुंसकं.

Neutral, *a.* उदासीन, तटस्थ, मध्यस्थ ; अपक्षपातिन् , समभाव, समवर्तिन् ; अनियतलक्षण । *n.* उदासितृ, उदासीन, तटस्थ, मध्यस्थ *all m* । -ity, *n.* औदासीन्यं, ताटस्थ्यं, माध्यस्थ्यं; अपक्षपात । -ize, *vt.* प्रतिकृ 8 U; निष्फलीकृ 8 U । -ization, *n.* विशिष्टप्रवृत्तिस्तंभनं; निष्फलीकरणं.

Never, *adv.* न कदाचन, न कदाचित् , न कदापि । -more, *adv.* नातःपरं; न पुनः । -theless, *adv.* तथापि, एवं सत्यपि, किंतु.

New, *a.* अपूर्व, अभूतपूर्व; अभिनव, नव, नवीन, नव्य, नूतन, नूत्न; अर्वाचीन, आधुनिक, इदानींतन, सांप्रतिक; अनभ्यस्त, अपरिचित । N. year's day, वर्षप्रतिपद् *f*, । -blown, *a.* प्रतिनव, प्रत्यग्र, साद्यस्क । -born, *a.* सद्योजात । -come *a.* आधुनिक; प्रत्यावर्तिन् ; अन्यथाभूत । -fangled, *a.* (*also*-fashioned) आधुनिक, नूतन, सांप्रतिक; अपूर्वविध; नावीन्यप्रिय । -ish, *a.* ईषन्नव । -ly, *adv.* नवं, प्रत्यग्रं; सद्यः । -ness, *n.* नवता, नूतनत्वं.

News, *n. pl.* उदंत, वार्ता, वृत्तं, वृत्तांत, समाचार । -agent, *n.* वृत्तपत्रापणिक । -boy, -man, *n.* वृत्तपत्रविक्रेतृ *m.* । -monger, *n.* वार्त्तायन; जल्पाक, वाचाट । -paper, -sheet, *n.* वृत्तपत्रं.

Newt, *n.* जलगोधिका.

Next, *a.* अनंतर, अनंतरित, अव्यवहित, आसन्न, संसक्त ; आगामिन् । *adv.* अनंतरं , ततःपरं, तदनंतरं । *prep.* अनंतरं । N. door to, प्रतिवेशिगृहे ; अभिन्नप्राय । What n., किमतःपरं.

Nexus, *n.* संधि *m*, संबंध, संयोग.

Nib, *n.* (लेखन्यादिकस्य) अग्रं, आणि *f*; चंचु *f*.

Nibble, *vt.* अल्पाल्पशः *or* शनैः दंश् 1 P *or* खाद् 1 P *or* चर्व् 1 P; ग्रह् 9 P । *vi.* अल्पचर्वणं कृ 8 U ; वृथा आक्षिप् 6 P । *n.* अल्पदंशनं.

Nice, *a.* दुराराध्य, दुष्प्रसाद्य ; सूक्ष्म; सूक्ष्मग्राहिन्; अभिमत, प्रिय, मनोज्ञ, रुचिर, ललित ; स्वादु ; मैत्र, स्नेहपूर्ण । -ly, *adv.* सम्यक्, सुष्ठु; सूक्ष्मतया । -ty, *n.* याथार्थ्यं, सूक्ष्मता ; सूक्ष्मविशेष ; युक्ति *f*; to a n , यथार्थतः ; यथावत्.

Niche, *n.* (भित्त्यादिके) अवकाश ; प्रतिमास्थानं ; योग्यपदं.

Nick, *n.* लघ्वाघातचिह्नं, सूक्ष्मावच्छेद ; फलनिर्णायकोऽवसर, उचितकाल । *vt.* सूक्ष्मं अवच्छिद् 7 P ; उचितकाले ग्रह् 9 P.

Nicker, *vi.* हेष् A 1; उच्चैः हस् 1 P.

Nick-name, *n.* उपाधि *m*, विरूपक, संज्ञा । *vt.* विरूपकं दा 3 U; विरूपकेण आह्व *c*.

Nictate, Nictitate, *vi.* निमिष् 6 P, निमील् 1 P, पक्ष्मचालनं कृ 8 U । -ion, *n.* निमि(मे)ष, निमीलनं.

Nidamental, *a.* अंडाशयभूत.

Niddle-noddle, *vi.* शिरः विधू 5.9 U । *a.* अस्थिर, दोलायमान.

Nidificate, Nidify, *vi.* नीडं कृ 8 U । Nidification, *n.* नीडरचना.

Nidor, *n.* शृतमांसगंध.

Nidus, *n.* नीडं; कोथकेंद्रं.

Niece, *n.* भ्रातुष्पुत्री, भ्रात्रीया; जामेयी, भागिनेयी, स्वस्रीया.

Nifty, *a.* सुभग, सुवेष.

Niggard, *n.* कदर्य, किंपचान, कृपण, बद्धमुष्टि *all m* । *a.* (*also* -ly) अनुदार, अवदान्य, कृपण । Niggardliness, *n.* अनुदारता, कृपणता.

Nigger, *n.* कृष्णदेह.

Niggle, *vi.* क्षुद्रविषये व्यग्र *a.* भू 1 P; वृथा कालं गम् *c* । -r, *n.* कालापव्ययकृत् *m*.

Nigh, *adv.* अंतिके, समीपे । *a.* आसन्न, निकटवर्तिन्, संनिहित.

Night, *n.* क्षणदा, क्षणिनी, क्षपा, क्षाणी, घारी, घृताची, घोरा, चक्रभेदिनी, तमस्वती, तमस्विनी, तमा-मि-मी, तुंगी, त्रियामा, दोषा, निशा, निशिता, निशीथिनी, निशीथ्या, निषद्वरी, भौती, यामवती, यामिका, यामिनी, यामीरा, याम्या, रक्षोजननी, रजनिनी, रात्रि-त्री, वासतेयी, वासुरा, विभावरी, शताक्षी, शत्वरी, श(शा)र्वरी *all f*; (very dark) तमिस्रा, तामसी, (moonlit) ज्योतिष्मती, ज्यौत्स्नी ; (full moon n.) दिनंमन्या, राका । N. with the two days enclosing it, पक्षिणी । A period of two nights with the intermediate day, गर्भकं । A n. out, उत्सवरात्रि *f* । At, By n. दोषा, नक्तं, निशि, रात्रौ । A series of n.s, गणरात्रं; चिररात्रं । N. and day, नक्तंदिवं, रात्रिंदिवं । To make a n. of it, विनोदेन रात्रिं गम् *c* । -bird, उलूक, घूक ; बुल्बुल ; रात्रिंचर । -blindness, रात्र्यंधता । -fall, निशामुखं, प्रदोष, संध्या ; रात्रियोग । -mare, *n.* कुस्वप्न, दुःस्वप्न; पिशाच । -shade, *n.* कुली, निदिग्धिका । -shirt, *n.* शय्यावेष । -soil, *n.* नैशं विण्मूत्रं

-stool, विण्मूत्रभांडपीठिका । walker, *n.* निद्राचारिन् *m*; रात्रिंचर । -watch, *n.* याम; रक्षक । Nightly, *a.* दोषातन, नैश, शार्वर; *adv.* निशिनिशि, प्रतिनिशं, प्रतिरात्रं.

Nightingale, *n.* बुल्बुल.

Nigrescent, *a.* श्यामायमान; ईषत्कृष्ण.

Nigrify, *vt.* कृष्णीकृ 8 U.

Nihil, *n.* न किंचित्, अभाव, शून्यं । -ism, *n.* शून्यवाद । -ist, *n.* शून्यवादिन्; सर्वसत्ताद्रोहिन् *both m.* । -ity, *n.* शून्यता.

Nil, *n.* न किंचित्.

Nimble, *a.* आशु, क्षिप्र, चपल, द्रुत, शीघ्र; कुशल, चतुर, पटु । -ness, *n.* क्षिप्रता, चातुर्यं । Nimbly, *adv.* शीघ्रं, त्वरया.

Nimbus, *n.* प्रभामंडलं; वर्षामेघ.

Niminy-piminy, *a.* मिथ्याशालीन.

Nincompoop, *n.* मूढ, मूर्ख.

Nine, *a. n.* नवन् । N. days' wonder, अचिरस्थायी चमत्कार । N. times out of ten, प्रायशः बहुशः । -fold, *a.* नवक, नवगुण । -teen, *a. n.* नवदशन्; ऊनविंशति *f.* -th, *a.* नवदश । -ty, *a. n.* नवति (*f.*); नवतिका । Ninth, *a.* नवम । Ninetieth, *a.* नवतितम.

Ninny, *n.* जडमति *m*, मंद, मूढ, मूर्ख.

Nip, (1) *vt.* (अंगुल्यग्रादिकेन) दृढं निपीड् 10 U; दंश् 1 P; म्लै *c*, विशृ *c*; जडयति *Den* । *vi.* पीडां कृ 8 U; सत्वरं गम् 1 P । *n.* निपीडनं; दंशनं; शैत्यबाधा । -per *n.* (*pl.*) संदंशक; बालक, शिशु *m.* । -pingly, *adv.* तीक्ष्णतया । -py, *a.* अतिशीत; तीक्ष्ण.

Nip, (2) *n.* ईषत्पानं । *vi.* ईषत्पानं कृ 8 U.

Nipple, *n.* चूचुकं, पिप्पलं, मेचकं, वृंतं, स्तनाग्रं.

Nit, *n.* लिक्षा, लिक्षिका, लिख्या.

Nitre, *n.* निपीतिन्, पाक्य, त्रिपाकिन्, यवक्षार *all m.*

Nitrogen, *n.* नत्रवायु *m.*

Nitwit, *n* अल्पमति *m.* मूढ, मूर्ख.

Niveous, *a.* हिमोपम; हैम.

Nix, *n.* न कश्चित्, न किंचित्.

No, *adv.* न, नहि, नो । *n.* नकार; निराकरणं । *a.* *Expressed adverbially*; *also* न कोऽपि, *etc.* । -body, *n.* न कोऽपि, न कश्चित्, *etc*; तुच्छजन, हीनजन । N. more, नाधिकं; नातःपरं; न पुनः; दिवंगत, मृत.

Nob, *n.* शिरस् *neu*; महाशय, सुप्रतिष्ठ । -ly, *a*, सुभग, सुवेष.

Nobble, *vt.* (अश्वादिकं) विकलयति *Den*; प्रतॄ *c*, वंच् *c*; कपटेन अधिगम् 1 P; ग्रह् 9 P.

Nobility, *n.* औदार्यं, महानुभाव, माहात्म्यं, विभूति *f*, वैभवं,

आभिजात्यं, कुलीनता; अभिजनवंत:, आर्यका:, कुलीनजना: *all pl*.

Noble, *a*. अवदात, उदात्त, उदार, महात्मन्, महानुभाव, महाशय; अभिजनवत्, अभिजात, आर्य, कुलीन; प्रशस्त, भव्य, महाप्रभ, श्रीमत्; उत्कृष्ट, उत्तम, वरेण्य, श्रेष्ठ। *n*. (*also* –man) अभिजनवत्, आर्यक, आर्यजन, सुप्रतिष्ठ। –woman, *n*. आर्यका, आर्या, आर्यिका। Nobly, *adv*. औदार्येण; आभिजात्येन; उत्कृष्टं। Noblesse, *n*. अभिजनवंत: *pl*.

Nocent, *a*. अपायकारक, घातुक; अपराधिन्, सदोष.

Nock, *n*. अटनि-नी *f*.

Noctambulant, Noctivagant, *a*. निशाचर, रात्रिंचर.

Noctilucent, *a*. नक्तंभास्वर.

Nocturnal, *a*. दोषातन, नैश, शार्वर; रात्रिकृत। Nocturne, *n*. रात्रिदृश्यालेख्यं; रात्रिगीतं.

Nocuous, *a*. अपायकारक, घातुक; सविष.

Nod, *vi*. शिरश्चालनं कृ 8 U; प्रवणीभू 1 P; अल्पं स्वप् 2 P; प्रमद् 4 P, स्खल् 1 P। *vt*. (शिर:) चल् *c*। *n*. शिरश्चालनं.

Noddle, *n*. शिरस् *neu*। *vi*. शिर: भृशं विधू 5. 9 U.

Noddy, *n*. मूढ, मूर्ख.

Node, *n*. ग्रंथि *m*, ग्रंथिका; आस्थिगुल्म; पात। Nodal, *a*. पातविषयक। Nodose, Nodular, Nodulose, *a*. ग्रंथिल। Nodule, *n*. ग्रंथिका; पिंड। Nodus, *n*. दुर्बोधविषय; ग्रंथि *m*.

Noetic, *a*. चैत्तिक, बुद्धिविषयक.

Nog, *n*. कीलक *mn*.

Noggin, *n*. लघुचषक.

Noise, *n*. कटुस्वन; (उच्चै:) ध्वनि निनाद, शब्द; उत्क्रोश, कलकल, कोलाहल, घोषणं, रव; उद्घोष, जनप्रवाद, निर्वाद। *vt*. प्रकटीकृ 8 U, प्रकाश् *c*। –less, *a*. नि:शब्द, निर्घोष, नीरव। Noisy, *a*. घोषकर, घोषण; उत्क्रोशत्, निनादिन्, निह्रादिन्, महास्वन, मुखर। Noisily, *adv*. महानादेन, सशब्दं; मुखरतया, सोत्क्रोशं.

Noisome, *a*. अपायकारक, घातुक, बाधक; दुर्गंध, पूति; कुत्सित, उग्र। –ness, *n*. घातुकता; (गंधस्य) उग्रता.

Noll, *n* शिरस् *neu*, शीर्षं.

Nomad, *n*. पशव्यव्रजन; सदाव्रजन। –ic, *a*. आस्थिरनिवासिन्, *also prec*.

Nomenclature, *n*. परिभाषा, ०संग्रह.

Nomic, *a*. लौकिक, व्यावहारिक, सामान्य.

Nominal, *a*. नामधारक, नामधारिन्, नाममात्र: वाचनिक, शाब्द, शाब्दिक; अवास्तविक, तुच्छ; नामवाचक, नामविषयक, नामा-

त्मक । -ly, *adv*. नामत एव, नाममात्रेण, नाम्नैव.

Nominate, *vt*. (नाम्ना) उपलक्ष् 10 U, निर्दिश् 6 P ; नियुज् 7 A. 10 U । -ion *n*. नियोजनं । Nominee, *n*. अधिकृत, नियुक्त.

Nominative, *n*. कर्तृ *m* ; प्रथमा (विभक्ति *f*).

Nomistic, *a*. विधिमूलक, वैध । Nomology, *n*. विधिशास्त्रं.

Non, *prefix, exp, by* अ०, अन्० वि० ; *only those words beginning with 'Non' are given, which are not simple negatives, but have a positive meaning.*

Nonage, *n*. अप्रौढवयस्कता, बालावस्था, बाल्यं.

Nonagenarian, *n*. नवतिवर्षवयस्क, नवतिवर्षीय.

Nonagesimal, *a*. नवत्यात्मक, नवतिविषयक.

Nonagon, *n*. नवास्रं, नवकोणाकृति *f*.

Nonce, *n*. प्रस्तुतकाल ; आपात । For the *n*., इदानीं, सांप्रतं.

Nonchalant, *a*. निःशंक, निश्चिंत ; अव्याकुल, असंभ्रांत ; उदासीन । -ly, *adv*. निःशंकं ; असंभ्रमेण । Nonchalance, *n*. अव्याकुलता, निःशंकता ; औदासीन्यं.

Non-committal, *a*. अप्रतिज्ञाकारिन् ; अपक्षपातिन् ; इंगितगूहन.

Non-cooperation, *n*. असहकारिता.

Nondescript, *a*. दुर्वर्णनीय ; विचित्र, विलक्षण.

None, *pro*. न कश्चित्. न कोऽपि, *etc*. । *adv*. न मनागपि.

Nonentity, *n*. अभाव, असत्ता, असत्त्वं, असद्भाव ; अवस्तु *neu*, कल्पनामात्रं ; अकिंचित्कर, तुच्छजन.

Nonesuch, *n*. अद्वितीय, अप्रतिम.

Non-existence, *n*. अभाव, असत्ता, असत्त्वं, असद्भाव । Non-existent, *a*. अभवत्, असत्.

Non-feasance, *n*. कर्तव्याकरणं, कर्तव्यप्रमाद ; अकर्मन् *neu*.

Nonpareil, *a*. अतुल्य, अद्वितीय, अपूर्व, अप्रतिम, असदृश । *n*. आदर्श ; अनुपमं वस्तु *neu*.

Nonplus, *n*. द्वैधीभाव, वैक्लव्यं, व्याकुलता, संदेह, संभ्रम । *vt*. मुह् *c*, व्याकुलीकृ 8 U, संभ्रम् *c* । -sed, *a*. द्वैधीभूत, व्याकुल, संभ्रांत.

Nonsense, *n*. अर्थशून्य-न्यं प्रलाप *or* वचनं, जल्पितं ; अनुपपत्ति *f*. । Nonsensical, *a*. अर्थशून्य, निरर्थक, संदर्भहीन ; -ly, *adv*. असंगतं, निरर्थकं.

Nonsuit, *n*. अभियोगविरति *f*.

Noodle, *n* जडधी *m*, मूर्ख.

Nook, *n*. अस्र, कोण ; सुखस्थानं ; विविक्तं.

Noology, *n*. बुद्धिशास्त्रं.

Noon, *n*. मध्याह्न ; परा काष्ठा *or* कोटि *f* । *a*. माध्यंदिन, माध्याह्निक । -day, -tide, *n*. मध्याह्न.

Noose, *n.* पाश, बंधनं, मृगबंधनी, वागुरा ; कंठपाश । *vt.* पाशे ग्रह् 9 P *or* बंध् 9 P.

Nor, *Conj.* न च, न वा.

Norm, *n.* आदर्श, प्रतिमानं, मानं। -al, *a* नियमबद्ध, वैधिक,यथादर्श; यथाक्रम; (geometry) लंबरूप; *n.* सामान्यक्रम । -ality, *n.* यथाक्रमत्वं । -ally, *adv.* सामान्यतया.

North, *n.* उत्तरा, उदीची, कौबेरी; उत्तरदिशा, *etc.* । *a.* (*also* -erly, -ern) उत्तर, उदंच्, उदीचीन, उदीच्य । *adv.* उत्तरतः, उत्तरं, उत्तरेण, उदक्, उदक्तात् । -east, *n.* उत्तरपूर्वा, ऐशानी, पूर्वोत्तरा, प्रागुत्तरा, प्रागुदीची ;-erly,-ern, *a.* उत्तरपूर्व, पूर्वोत्तर, प्रागुत्तर प्रागुदंच्; *adv.* उत्तरपुरस्तात् । -erner, *n.* उदीच्य । -star, *n,* ध्रुवतारा । -west, *n.* उत्तरपश्चिमा, पश्चिमोत्तरा, वायवी; -erly, -ern, *a.* उत्तरपश्चिम, पश्चिमोत्तर । -ward, -s, *adv.* उत्तरतः उत्तरेण, उदक्, उदक्तात्.

Nose, *n.* गंधस्य, गंधवहा, घोणा, घ्राणं, नकुटं(टकं), नसा, नस्त, नस्या, नासा, नासिका, नासिक्यकं विघूणिका, शिंघाणी; घ्राति *f*; चातुर्यं । *vt.* घ्राणेन अवगम् 1 P; जुध् 1 P; नासिकया स्पृश् 6 P । To lead by the n., निर्विवेकं अनुसरणं कृ *c* । To pay through the n., अतिव्ययं कृ 8 U । To put one's n. out of joint, संकुलीकृ 8 U, संभ्रम् *c* । To thrust, put one's n. into, परकार्ये वृथाव्यापारं कृ 8 U । To turn up the n., अनादरं प्रकटीकृ 8 U । Under one's n. प्रत्यक्षं, प्रत्यक्षे । Flat-nosed अवटीट, अवनाट, अवभ्रट । Bridge of the n, नासावंश । Septum of the n., नासामर्यादा । -gay, n. कुसुमगुच्छ, °स्तबक । -less, *a.* विख-ख्य, विग्र । -ring, *n.* नासालंकार । Nosy, *a.* प्रलंबघोण ; दुर्गंध ; परकार्य-जिज्ञासु.

Nosography, *n.* रोगवर्णनं.

Nosology, *n.* रोगवर्गीकरणं.

Nostalgia, *n.* गृहविरहपीडा.

Nostril, *n.* धमन, नासारंध्रं, नासापुट *mn.*

Nostrum, *n.* गुप्तोपचार, गुप्तौषधं ; कृतकोपाय.

Not, (1) *adv.* न, नहि, नो ; मा । N. once or twice, असकृत्, बहुवारं ; अभीक्ष्णं, मुहुर्मुहुः, वारंवारं.

Not, (2) *a.* लूनकेश ; शृंगहीन.

Notable, *a.* स्मरणार्ह ; प्रख्यात, प्रसिद्धि, विख्यात ; असामान्य, विशिष्ट । *n.* प्रख्यातपुरुष । Notability, *n.* स्मरणार्हता ; प्रसिद्धि *f*; प्रसिद्धपुरुष । Notabilia, Notanda, *n. pl.* स्मरणीय-

विषयाः *pl.* । Notably, *adv.* विशेषतः, विशेषेण.

Notalgia, *n.* पृष्ठवेदना.

Notary, *n.* कायस्थ, लिपिकार, लिबिंकर, लेखनिक.

Notation, *n.* अंकनं ; चिह्नपद्धति *f* ; प्रस्तार.

Notch, *n.* छेद । *vt.* छिद् 7 P ; दंतुरीकृ 8 U । -ed, -y, *a.* अनुक्रकच, दंतुर, दंतुरित.

Note, *n.* अंक, चिह्नं, लक्षणं, लिंगं ; लघुलेख ; ऋणलेख्यं ; टिप्पणी(नी), टीका, वृत्ति *f* ; अवधानं, अवेक्षा ; ख्याति *f*, प्रसिद्धि *f* ; स्वर ; ध्वनि *m*, शब्द । *vt.* अवलोक् 1 A. 10 U, अवेक्ष् 1 A, आलोच् 10 U ; अवधा 3 U, मनः निधा 3 U ; आदृ 6 A ; लिख् 6 P । Of n., प्रख्यात, प्रसिद्ध । Key -n., excluded n. in a râga, वादिन् *m*, विवादिन् *m*. । -d, *a.* कीर्तिमत्, प्रथित, प्रसिद्ध, विख्यात । -worthy, *a.* स्मरणार्ह, स्मरणीय.

Nothing, *n.* न किंचित्, न किमपि ; शून्यं ; अभाव, असत्ता ; अवस्तु *neu* ; तुच्छवस्तु *neu.* । *adv.* न कथंचन, न मनागपि । Next to n., शून्यप्रायं । To come to n., निष्फलीभू 1 P. । To make n. of, न अवगम् 1 P । -arian, *n.* अश्रद्धधान, नष्टश्रद्ध । -ness, *n.* शून्यता ; अभाव.

Notice, *n.* ख्यापना, निवेदनं, विज्ञापना, सूचना ; सूचनापत्रं ; उल्लेख, निर्देश, वृत्तांत ; अनुसंधानं, अवधानं, अवेक्षणं, विमर्श ; आदर । *vt.* अवगम् 1 P, उपलभ् 1 A, आलोक् 1 A. 10 U, ईक्ष् 1 A ; अवधा 3 U, आदृ 6 A, विमृश् 6 P । -able, *a.* स्पष्ट ; विशिष्ट.

Notify, *vt.* आख्या, निविद्, प्रकाश्, प्रख्या, विज्ञा *all c*, सूच् 10 U । Notification, *n.* आख्यापना, निवेदनं, विज्ञापना, सूचना.

Notion, *n.* प्रत्यय, भावना, मति *f* ; तर्क, मतं ; उपाय, युक्ति *f* ; उद्देश, संकल्प, हेतु *m* । -al, *a.* प्रत्ययविषयक ; कल्पनात्मक, काल्पनिक

Notorious, *a.* अपकीर्तिमत्, कुप्रसिद्ध, दुर्लौकिक ; परिस्फुट, प्रकट, व्यक्त, स्पष्ट । -ly, *adv.* अपकीर्तिपूर्वं ; प्रकटं, स्पष्टं । Notoriety, *n.* अपकीर्ति *f*, अपयशस् *neu*, अप्रतिष्ठा, कुप्रसिद्धि *f*, दुष्कीर्ति *f*, वाच्यता.

Notwithstanding, *prep.* अनादृत्य, अवगणय्य ; *also exp. by Gen. abs.* । *adv.* एवमपि, एवं सत्यपि, तथापि.

Noumenon, *n.* प्रतिभासाधार.

Noun, *n.* नामन् *neu* ; विशेष्यं.

Nourish, *vt.* (परि०) पुष् 1. 4. 9. P. *c* ; भुज् *c*, पा *c*, भृ 3 U, संवृध् *c* । -ing, *a.* पुष्टिकर, पोषक, पौष्टिक । -ment, *n.* (परि०),

पोषणं, पुष्टि *f*; अन्नं, आहार; भोज्यं। Nouriture, *n.* पोषणं, संवर्धनं ; आहार.

Nous, *n.* चित्तं, बुद्धि *f.*

Novation, *n.* नवर्णविनिमय (नव + ऋण०).

Novel *a.* नव, नवीन, नव्य, नूतन ; अपूर्व, (वि०)चित्र, विलक्षण । *n.* कथा, कथाप्रबंध । –ist, *n.* कथालेखक । –ty, *n.* नवता ; अपूर्ववस्तु *neu.*, कौतुकं.

Novenary, *n.* नवकं । *a.* नवात्मक ।

Novennial, *a.* नववर्षीय.

Novercal, *a.* वैमात्र ; विमातृयोग्य.

Novice, *n* नवच्छात्र, नवदीक्षित, प्राथमकल्पिक, शैक्ष। Novitiate, *n.* शैक्षता; छात्रस्थिति *f*; विद्यारंभ, दीक्षारंभ.

Now, *adv.* अधुना, इदानीं, संप्रति, सांप्रतं ; तत्कालं, तत्क्षणं-णे, सद्यः, सपदि ; अतः, अथ ; ततः । Just n., अचिरादेव । N. and then, N. and again, काले काले । –a-days, *adv.* संप्रति, सांप्रतं.

Nowhere, *adv.* न कुत्रापि । To be, come in n., सर्वथा पराभू *pass.*

Nowt, *n.* पशु *m* ; जड, मूर्ख.

Noxious, *a.* अपायकारक, घातुक, बाधक; अनर्थावह, अनिष्ट, आहित। –ly, *adv.* सापकारं ; बाधकतया.

Nozzle, *n.* (नालिकादेः) अग्रभाग.

Nuance, *n.* (अर्थवर्णादिके) सूक्ष्मविशेष.

Nubiferous, *a.* मेघकारिन्, ०वाहिन्.

Nubile, *a.* उद्वाह्य, विवाहयोग्य.

Nucleus, *n.* गर्भ०, बीजकेंद्रं.

Nude, *a.* अनावृत, दिगंबर, नग्न, विवस्त्र । –ly, *adv.* नग्नतया । –ness, *n.* नग्नता.

Nudge, *vt.* कूर्परेण ईषत् संचल् *c.*

Nugatory, *a.* आकिंचित्कर, तुच्छ, निरर्थक, निष्फल, व्यर्थ.

Nugget, *n.* (सुवर्ण०, धातु०) पिंड.

Nuisance, *n.* पीडाकारणं, ०मूलं, कंटक.

Null, *n*, अप्रमाण, निरर्थक, निर्बल; शून्यात्मक । –ify, *vt.* निरर्थीकृ 8 U; खंड् 10 U; (वि०)लुप् *c*; प्रमृज् *c* । –ifidarian, *n.* अश्रद्दधान, नष्टश्रद्ध । –ipara, *n.* अप्रसूतपूर्वा । –ity, *n.* अप्रामाण्यं, निरर्थकता, लोप; अभाव, शून्यता; तुच्छजन.

Numb, *a.* जड, नष्टवेदन, स्तब्ध, स्तंभित । *vt.* जडयति *Den*, जडीकृ 8 U, स्तंभ् 5.9 P । –ness, *n.* जडता, जाड्यं, (वेदना)स्तंभ.

Number, *n.* अंक; संख्या ; परिमाणं ; गण, राशि *m*; (*pl.*) छंदस् ; (*pl.*) बाहुल्यं; (Grammar) वचनं । *vt.* गण् 10 U, संख्या 2 P; यथाक्रमं *or* यथांकं परिगण् 10 U; अंकेन निर्दिश् 6 P; अंतर्भू *c*, समाविश् *c* । –less, (*also*

'Without n.'), असंख्य, असंख्येय.

Numeral, *a*. संख्यात्मक, ०वाचक, ०विषयक । *n*. अंक । -ly, *adv*. यथासंख्यं । Numeration, *n*. गणना, संख्यानं । Numerator *n*. अंश, लव, हारक । Numerically, *adv*. यथासंख्यं.

Numerous, *a*. अनेक, बहु, बहुसंख्य, भूरि ; छंदोबद्ध, लयबद्ध । -ly, *adv*. अनेकशः, बहुशः । -ness, *n*. बहुसंख्यत्वं ; बाहुल्यं.

Numismatics, *n*. नाणकशास्त्रं । Numismatist, *n*. नाणकशास्त्रज्ञ.

Nummary *a*. नाणकविषयक । Nummular, *a*. नाणकाकृति.

Numskull, *n*. जड, मंदधी, मूढ, मूर्ख *all m*.

Nun *n*. तपस्विनी, तापसी, मठवासिनी, श्रमणा-णी । -nery, *n*. आश्रम, मठ, विहार.

Nuncupative, *a*. उक्त, वाचिक ; अलिखित.

Nundinal, *a*. मेला०, यात्राविषयक.

Nuptial, *a*. औद्वाहिक, वैवाहिक । *n*. (*pl*.) उद्वाह, परिणय, विवाह.

Nurse, *n*. अंकपाली, उपमातृ *f*, धात्री; रुग्णोपचारिका; परिपालक । *vt*. स्तन्यं धे *c or* पा *c*; अंके लल् 10 U; (परि०) पुष् 4. 9 P, संवृध् *c*; भितं विनियुज् 7 A. 10 U । -ery, *n*. शिशुगृहं, बालशाला ; वृक्षसंवर्धनसंस्थानं; N.maid, बालपरिचारिका ; N.-man, वृक्षसंवर्धक । -ling, *n*. स्तनंधय.

Nurture, *n*. परिपोषणं, संवर्धनं ; आहार ; शिक्षणं । *vt*. (परि०) पुष् 4. 9 P, संवृध् *c*; शिक्ष् *c*.

Nut, *n*. फलं ; बीजं ; कीलकाधार । Off his n., उन्मत्त ; क्षीब । To be nuts, dead nuts on, प्री 4 A, मुद् 1 A ; बद्धानुराग *a*. भू 1 P ; निष्णात *a*. अस् 2 P । -shell, *n*. बीजकवचं । To be in a nutshell, अतीव संक्षिप् *pass* । -ty, *a*. बहुफल ; स्वादु ; सुभग.

Nutate, *vi*. प्रणम् 1 P ; म्लै 1 P । -ion, *n*. अनुसूर्यप्रवृत्ति *f*; शिरःकंप.

Nutmeg, *n*. जातिकोष, ०फलं.

Nutrient, *a*. पुष्टिकर, पोषक । *n*. पुष्टिकरं द्रव्यं । Nutriment, *n*. पोषणं; अन्नं, आहार । Nutrition, *n* पुष्टि *f*; पोषणं ; आहार । Nutritious, Nutritive, *a*. पुष्टिकर, पोषक, पौष्टिक.

Nux Vomica, *n*. वरस्वरा.

Nuzzle, *vt*. घोणया *or* प्रोथेन घृष् 1 P *or* स्पृश् 6 P; (उप०) लल् 10 U । *vi* (मातृदेहादिके) संसक्त० *a* भूत्वा आस् 2 A.

Nyctalopia, *n*. दिवांधत्वं.

Nymph, *n*. अप्सरस् *f*, अप्सरा, दिव्यांगना; जल०, वनदेवता, *etc*.; रमणी, सुंदरी । -olepsy, *n*. देवताग्रह । -omania, *n*. सुरतोन्माद.

O

O, Oh, *int.* अयि, अरे, भोः, हे; अहो, बत, हंत.

Oaf, *n.* विकलांगो बालक; जडधी, मंद, मूढ.

Oak, *n.* सिंदूर.

Oakum, *n* रज्जुखंडाः *pl*, शणखंडाः *pl.*

Oar, *n.* अरित्रं, क्षे(क्षि)पणि-णी *f*, नौदंड। *vt.* क्षेपण्या प्रेर् *c* । To put in one's o., परसंवादे विच्छेदं कृ 8 U; परकार्ये व्यवहृ 1 P । -sman, *n.* क्षेपणीधर.

Oarium, *n.* अंडाशय.

Oasis, *n.* मरुमध्यशाद्वल *mn.*

Oat, *n.* धान्यविशेष । Wild o.s, यौवनकामचार.

Oath, *n.* प्रतिज्ञा, वचनं, वाचा, शपथ, संकल्प, समय; अभिशाप, शाप । To take an o., शप् 1·4 U । -breaking, *n.* प्रतिज्ञाभंग.

Obdurate, *a.* दुराग्रह, प्रतिनिविष्ट; अननुशयिन्, अपश्चात्तापिन्; अविनेय । -ly, *adv.* दुराग्रहेण । Obduracy, *n.* दुराग्रह, निर्बंध; अपश्चात्ताप; अविनेयता.

Obeisance, *n.* नमनं, नमस्कार, प्रणति *f*, प्रणाम, प्रणिपात; अभिवंदनं । To make an o., प्रणम्, प्रणिपत् *both* 1 P । Obeisant, *a.* कृतप्रणाम, प्रणत.

Obelisk, *n.* शूलाकारस्तंभ.

Obelus, *n.* प्रक्षेपचिह्नं.

Obese, *a.* पीन, पीवर, मांसल, मेदुर, स्थूल । -ness, (*also* Obesity) *n.* पीनता, मेदुरता.

Obey, *vt.* (आज्ञां) अनुकृ 8 U, अनुविधा 3 U, अनुष्ठा 1 P, कृ 8 U, पा *c*; अनुवृत् 1 A, अनुसृ 1 P । Obedience, *n.* आज्ञानुष्ठानं, आज्ञानुसरणं; अनुवर्तनं, वश्यता; अधिकार । Obedient, *a.* आज्ञाधीन, आज्ञानुवर्तिन्, आज्ञानुसारिन्, आज्ञापालक; कर्तव्यनिष्ट; शुश्रूषु; वश्य; -ly, *adv.* आज्ञानुसारेण, यथाज्ञं.

Obfuscate, *vt.* अंधकारयति, कलुषयति, अंतरयति *all Den*; मुह् *c*, संभ्रम् *c* । -ion, *n.* कलुषीकरणं; संभ्रम.

Obit, *n.* निधनं, मृत्यु *m* । -uary, *a.* मृत्युविषयक; *n.* मृत्युलेख.

Object, *vt.* प्रतिरुध् 7 U, आक्षिप् 6 P; (विवादे) प्रतिपद् *c* । *vi.* विवद् 1 A; न अनुमुद् 1A; दोषं ग्रह् 9 P; न रुच् 1 A । *n.* अर्थ, विषय; वस्तु *neu*; आस्पदं, पदं, पात्रं, स्थानं; आशय, उद्देश, निमित्तं, प्रयोजनं, हेतु *m*; हास्यास्पदं, करुणास्पदं; (Grammar) कर्मन् *neu*; कर्मपदं । O. lesson, *n.* वस्तुपाठ; निदर्शनं । -ify *vt.* विषयीकृ 8 U प्रत्यक्षीकृ 8 U । -ion, *n.* अपवाद, आक्षेप, उद्ग्राह, कक्षा, दोष, प्रतिक्षेप, बाधा

विप्रतिषेध ; अननुमोदनं, अप्रीति *f*। –ionable, *a.* आक्षेपार्ह, आशंकनीय ; सदोष ; अननुमोदनीय ; वर्ज्य । –ive, *a.* वैषयिक, विषयमूलक, पदार्थनिष्ट ; वास्तविक ; बाह्य ; कर्मवाचक ; *n.* प्रयोजनं, लक्ष्यं, हेतु *m.* । –ivity, *n.* विषयनिष्ठता ; वास्तविकता.

Objuration, *n.* वाचा, शपथ.

Objurgate, *vt.* अधिक्षिप् 6 P, गर्ह् 1.10 A, निर्भर्त्स् 10 U । –ion, *n.* अधिक्षेप, उपालंभ, निर्भर्त्सना.

Oblate, *a.* ध्रुवनिम्न.

Oblation, *n.* आहवनं, आहुति *f*, उपदानं, उपदानकं, उपहार, उपायनं, बलि *m* ; इष्टि *f*, हव, हवनं, हविस् *neu*, हुतं ; (of eatables) नैवेद्यं ; (oblational remnants) प्रसाद.

Obligation, *n.* अवश्यंकर्तव्यता, आवश्यकता, बंधनं ; प्रतिज्ञा, संविद् *f*, समय ; कर्तव्यं, धर्म, विधेयं ; उपकृतत्वं, उपकारभार । Obligatory, *a.* अपरिहार्य, आवश्यक, अवैकल्पिक.

Oblige, *vt.* (समयादिकेन) बंध् 9 P *or causals of verbs* ; अनुग्रह् 9 P, उपकृ 8 U । To be o.d, अनुगृहीत *a. or* उपकृत *a.* अस् 2 P । Obliging, *a.* उपकारपर, °शील ; दक्षिण, सभ्य, सुशील ; –ly, *adv.* अनुग्रहवृत्त्या, सानुग्रहं, सौजन्येन ; –ness, *n.* दाक्षिण्यं, सौजन्यं.

Oblique, *a.* तिरश्चीन, तिर्यच् ; अनृजु, असरल ; कुटिल, छलगर्भ, जिह्म, वक्र ; (angle) असम । –ly, *adv.* तिर्यक् ; असरलतया । Obliquity, *n.* तिर्यक्त्वं ; असारल्यं, कौटिल्यं.

Obliterate, *vt.* अपमृज्, प्रमृज् *both* 2 P. *c* ; (वि०)लुप् *c* ; विनश् *c* । –ion, *n.* अपमार्जनं ; (वि०) लोप ; अवसाद, ह्रास.

Oblivion, *n.* विस्मरणं, विस्मृति *f*, स्मृतिलोप ; अवगणना, उपेक्षा । Oblivious, *a.* विस्मृतिपर ; अनवहित, अनुपलब्ध ; विस्मृतिकर ; ध्यानमग्न ; –ly, *adv.* विस्मृत्या.

Oblong, *a.* दीर्घचतुरस्र । *n.* आयत *m.*

Obloquy, *n.* अपभाषा, अपवाद, कुत्सनं, निंदा, निर्भर्त्सना ; अप्रतिष्ठा, दुष्कीर्ति *f*.

Obmutescence, *n.* वाग्लोप ; तूष्णीकता, मूकभाव, मौनं.

Obnoxious, *a.* अधीन, वश ; अनिष्ट, अप्रिय, कुत्सित, निंदित, विद्वेष्य । –ly, *adv.* कुत्सितं.

Obscene, *a.* कुत्सित, जुगुप्सित, बीभत्स ; अशिष्ट, अश्लील, असभ्य, ग्राम्य, निर्लज्ज, वियात ; अमंगल, अशुभ । –ly, *adv.* बीभत्सं ; अश्लीलतया । Obscenity, *n.* अशिष्टाचार, अश्लीलता, ग्राम्यचेष्टा ; अश्लीलोक्ति *f*.

Obscurant, *n.* प्रगतिविरोधिन् *m* । –ism, *n.* प्रगतिविरोध.

Obscure, *a.* निरालोक, निष्प्रभ; अप्रकाश, अव्यक्त, अस्पष्ट, अस्फुट; गूढ, दुरवगम, दुरूह, दुर्बोध; अप्रसिद्ध, अलब्धकीर्ति, अविख्यात ; *vt.* अंधकारयति, तिमिरयति *both Den*; (अभ्रादिकस्य) आच्छद् 10 U, आवृ 5 U; अस्पष्टं *a. or* दुर्बोधं *a.* कृ 8 U, गहनीकृ *both* 8 U; मलिनयति *Den*; प्रत्यादिश् 6 P; अतिरिच्, विशिष् *both Pass* । –ly *adv.* अव्यक्तं; दुर्बोधं । Obscuration, *n.* ग्रहणं, तेजोहरणं; प्रत्यादेश । Obscurity, *n.* तेजोहानि *f*; अस्पष्टता; दुर्बोधता; अप्रसिद्धि *f*.

Obsecration, *n.* प्रार्थना, याचना.

Obsequies, *n. pl.* अंत्यक्रिया, अंत्यविधि *m*, अंत्येष्टि *f*, उत्तरक्रिया, और्ध्वदैहिकं, प्रेतकृत्यं, ०संस्कार । Obsequial, *a.* और्ध्वदैहिक.

Obsequious, *a.* आज्ञापर, अनुरोधिन् ; अत्यनुवर्तिन् , चाटुपर, श्ववृत्ति । –ly, *adv.* श्ववृत्त्या । –ness, *n.* श्ववृत्ति *f*.

Observe, *vt.* अवधा 3 U, आलोच् 10 U, सावधानं दृश् 1 P, निरीक्ष् 1 A, परीक्ष् 1 A; विमृश् 6 P; अनुष्ठा 1 P, आचर् 1 P, विधा 3 U; (प्रति) पा *c*; अनुविधा 3 U; आलंब् 1 A, सेव् 1 A; वच् 2 P, वद् 1 P । Observable, दृश्य; अनुष्ठेय ; –y, *adv.* स्पष्टं, स्फुटं । –r, *n.* निरीक्षक । Observance, *n.* अनुष्ठानं, आचरणं, संपादनं, (प्रति०) पालनं; आलंबनं ; सेवनं ; नियम, विधि *m*; आचार, व्यवहार । Observant, *a.* अवहित, जागरूक, सावधान ; –ly, *adv.* जागरूकतया, सावधानं । Observation, *n.* अवलोकनं, आलोचनं, निरीक्षणं ; उक्ति *f*, वचनं । Observatory, *n.* मानमंदिरं, वेधशाला.

Obsess, *vt.* (पिशाचादिकस्य) उपसृज् 6 P; आविश् 6 P, ग्रह् 9 P; पीड् 10 U । –ion, *n* आवेश, उपसर्ग ; पीडा, बाधा ; दृढाग्रह.

Obsolescent, *a.* जीर्णप्राय । Obsolete, *a.* अप्रचालित, जीर्ण, लुप्त । –ness, *n.* अप्रचार.

Obstacle, *n.* अंतराय, प्रतिबंध(नं), प्रतिरोध(नं), प्रत्यूह, विघात, विघ्न.

Obstetric, –al, *a.* प्रसूतिविषयक । –s, *n. pl.* प्रसूतिसाधनशास्त्रं । –ian, *n.* प्रसूतिसाधक.

Obstinate, *a.* अवश्य, दुराग्रह, निर्बंधपर, प्रतिनिविष्ट ; दुःसाध्य, दुरुपचार, दुष्प्रतिकार्य । –ly, *adv.* दुराग्रहेण, सनिर्बंधं । –ness, *n.* (*also* Obstinacy), आग्रह, दुराग्रह, निर्बंध, प्रतिनिविष्टवृत्ति *f*.

Obstipation, *n.* मलावष्टंभ, विड्ग्रह.

Obstreporous, *a.* उत्क्रोशत्, तुमुल, बहुघोष, मुखर ; उद्दाम, दुर्निग्रह । -ly, *adv.* बहुघोषेण ; दुर्निग्रहं । -ness, *n.* मुखरता ; उद्दामत्वं.

Obstruct, *vt.* अवरुध्, उपरुध् *both* 7 U, प्रतिबंध् 9 P, प्रतिबाध् 1 A, प्रतिरुध् 7 U, प्रतिहन् 2 P, स्तंभ् 9 P । -ion, *n.* अंतराय, प्रतिबंध(नं), प्रतिरोध(नं), प्रत्यूह, विघ्न, व्याघात । -ionism, *n.* प्रतिरोधकव्यवहार, ॰युक्ति *f* । -ive, *a.* प्रतिबंधक, प्रतिरोधक, विघ्नकर । Obstruent, *n.* स्तंभनौषधं.

Obtain, *vt.* अधिगम् 1 P, आप् 5 P, आसद् *c*, प्राप् 5 P, लभ् 1 A, विद् 6 P ; प्रतिपद् 4 A, समासद् *c* । *vi.* प्रचलित *a. or* प्रचारे अस् 2 P । -able, *a.* प्राप्य, लभ्य । -ment, *n.* अधिगम, प्रतिपत्ति *f*, प्राप्ति *f*, लाभ.

Obtest, *vt.* प्रार्थ् 10 U, याच् 1 A । -ation, *n.* प्रार्थना, याचना.

Obtrude, *vi.* निमंत्रणं विना *or* बलात् प्रविश् 6 P । *vt. Causal of prec.* । Obtrusion, *n.* बलात्प्रवेश ; आगंतुकप्रवेश । Obtrusive, *a.* आगंतुक, बलात्प्रवेशक ; अतिस्पष्ट, सुव्यक्त ; -ly, *adv.* बलात् ; सुव्यक्तं.

Obtund, *vt.* कुंठीकृ 8 U, कुंठ् 10 U.

Obtuse, *a.* अतीक्ष्ण, घनाग्र; (Angle) बहिर्लंब, विषम; जड, मंदमति, मूढ । -ly *adv.* अतीक्ष्णतया; बहिर्लंबकोणवत्.

Obverse, *a.* अभिमुख । *n.* अग्रं, अग्रभाग, मुखं; पृष्ठभाग; प्रतिपक्ष । Obvert, *vt.* अभिमुखीकृ 8 U.

Obviate, *vt.* अपहृ 1 P, निरस् 4 U, परिहृ 1 P; अतिक्रम् 1 U. 4 P, उत्तॄ 1 P; प्रतिकृ 8 U; प्रागेव प्रतियुज् 7 A. 10 U । -ion, *n.* अपहरणं, परिहार.

Obvious, *a.* प्रकट, प्रत्यक्ष, व्यक्त, स्पष्ट, (परि॰)स्फुट । -ly, *adv.* स्पष्टं, स्फुटं । -ness, *n.* व्यक्तता, स्पष्टता.

Occasion, *n.* अवकाश, अवसर, काल, प्रसंग, समय ; कारणं, निमित्तं, प्रयोजनं, हेतु *m*; (*pl.*) व्यवसाय । *vt.* उत्पद्, जन्, संपद्, साध् *all c* । -al *a.* कादाचित्क, नैमित्तिक, प्रासंगिक; अनित्य, अनियत; आगंतुक, आपतिक । -ally, *adv.* कदा कदा, कर्हिचित्, काले काले, क्वचित्.

Occident, *n.* पश्चिमा, प्रतीची; पाश्चात्यदेशाः, ॰संस्कृति *f.* । -al, *a.* प्रतीच्य, पाश्चात्य । -alize, *vt.* पाश्चात्यसंस्कृत्या सनाथीकृ 8 U.

Occiput, *n.* शिरःपृष्ठं.

Occlude, *vt.* पिधा 3 U, संवृ 5 U । Occlusion, *n.* संवरणं.

Occult, *a.* निलीन, प्रच्छन्न ; गहन, दुर्बोध ; गुप्त, गुह्य, गूढ ; औपनिषद, अलौकिक । *vt.* अपह्नु 2 A, तिरोधा 3 U । -ation, *n.* अपह्नुति *f*,

ग्रास । -ism, *n.* गुप्तविद्या, गुह्य-संप्रदाय.

Occupy, *vt.* आक्रम् 1 U. 4 P, आत्मसात्कृ 8 U, आविश् 6 P, स्वायत्तीकृ 8 U; अधिवस् 1 P, अधिष्ठा 1 P, (प्रति॰)वस् 1 P; पूर् 10 U, पॄ-पॄ 3 U, व्याप् 5 P; व्यापृ *c*; (oneself) व्यापृ 6 A, प्रवृत् 1 A । Occupancy, *n.* भोग; अधिवास, अधिष्ठानं । Occupant, *n.* अधिकारिन् *m*, भोगिन् *m*; अधिवासिन् *m* । Occupation, *n.* आवेशनं; अधिष्ठानं; उपजीविका, वृत्ति *f*, व्यवसाय, व्यवहार, व्यापार । Occupied, *a.* आविष्ट; व्याप्त; अध्यासित; व्यापृत; ॰पर, ॰परायण, ॰मग्न, ॰रत *in comp.*

Occur, *vi.* उपनम् 1 P, घट् 1 A, वृत् 1 A, समापद्, संपद् *both* 4 A, संवृत् 1 A; विद् 4 A; मनसि जन् 4 A । -rence, *n.* घटना, प्रसंग, वृत्तं, व्यतिकर, संभव, संवृत्ति *f*; समापत्ति *f.*

Ocean, *n.* महासमुद्र, महासागर; *See also* 'Sea'; महाविस्तार । -ic, *a.* समुद्रीय सामुद्र । -id, *n.* सागरदेवता । -ography, *n.* महासागरवर्णनं.

Ochlocracy, *n.* पामरजनसत्ता.

Ochre, *n.* गैरिकं.

Passenger, *n.* वाहनोपयोजिन् *m*, नौकोपयोजिन् *m*; अध्वग, अध्वन्य, पथिक, सारणिक.

Passible, *a.* वेदनक्षम; विकार्य.

Passing, *a.* अस्थिर, क्षणिक, विनश्वर; आगंतुक, आपतिक। *adv.* अतिमात्रं, अत्यंतं, अत्यर्थं.

Passion, *n.* अंतर्वेग, भाव, विकार, संक्षोभ, संताप; अनुराग, अभिनिवेश, प्रणय, प्रीति *f*, प्रेमन् *mn*, राग; अमर्ष, कोप, क्रोध, मन्यु *m*, रोष; आस्था, उत्कंठा, उत्साह। -al, -ary, *n.* सज्जनक्लेशवर्णनं। -ate, *a.* कोपन, क्रोधन, क्रोधालु, रोषण, शीघ्रकोप; संरंभिन्, सुक्षोभ्य; रागान्वित, भावप्रचुर, संक्षुब्ध। -ly, *adv.* सरोषं; संक्षुब्धं, साभिलाषं। -less, *a.* विरक्त, वीतराग; निर्विकार.

Passive, *a.* विकार°, कर्मविषयीभूत; (Grammar) कर्मवाच्य; निर्व्यापार, निष्क्रिय; निष्प्रतिकार, वशवर्तिन्, वश्य, साहिष्णु, सुवश। P. resistance, अप्रवृत्तिपरो विरोध। P. voice, कर्मणिप्रयोग। -ly, *adv.* निष्प्रतिकारं; साहिष्णुतया। Passivity, *n.* निष्प्रतिकारता; साहिष्णुता.

Passport, *n.* गतागतानुज्ञा, °पत्रं; प्रवेशानुज्ञासाधनं.

Past, *a.* अतीत, गत, भूत; पूर्व। *n.* पूर्व°, भूतकाल। *Prep.* परतः पारे। -master, *n* पारंगत, पारदृश्वन् *both m.*

Paste, *n.* उदपेष, गुंडिक-का, जलपेष, शट्टकं; श्यानमिश्रणं। *vt.* श्यानद्रव्येण संश्लिष् *c*। -board, *n.* संश्लिष्टपत्रकं; *a.* सुविदार्य; असार.

Pastern, *n.* (अश्वस्य) खुडक.

Pastille, *n.* चूष्यगुलिका.

Pastime, *n.* कालक्षेपकं; (अनु) रंजनं, विनोद; केलि *f*, क्रीडा, खेलनं, लीला.

Pastor, *n.* आचार्य, उपाध्याय, धर्मकार्यावेक्षक। -al, *a.* पशुपालनविषयक; ग्रामीण, जानपद; *n.* जानपदकाव्यं.

Pastry, *n.* अपूप.

Pasture, *n.* गोप्रचार, शाद्वल, *mn*; तृणं, यवसं। *vt.* चर् *c*, तृणं खाद् *c*। Pasturage, *n.* गोप्रचार.

Pasty, *a.* उदपेषसम; पांडु, विवर्ण.

Pat, *n.* लघुहस्ताघात; लघुपिंड। *vt.* हस्तेन लघु *or* मृदु तड् 10 U *or* परामृश् 6 P। *a.* उचित, युक्त, सूपपन्न। *adv.* उपपन्नं, योग्यकाले.

Patagium, *n.* जतुकापक्षचर्मन् *neu.*

Patch, *n.* वस्त्रखंड; अंक; लघुक्षेत्रं, लघुस्थली। *vt.* वस्त्रखंडेन सिव् 4 P *or* प्रतिसमाधा 3 U; कथमपि

or असम्यक् रच् 10 U । Not a p. on, सर्वथापि अतुलनार्ह। -work, *n.* कर्पट *mn*, नक्तक; अनिपुणकृति *f* । -y, *a.* कर्पटोपम; असम्यग्रचित.

Pate, *n.* मूर्धन् *m*, मुंडाग्रं.

Patent, *a.* प्रकाश, व्यक्त, स्पष्ट, स्फुट । *n.* नवयुक्तिपूर्णाधिकार; विशिष्टाधिकाररक्षितयुक्ति *f* । *vt.* विशिष्टाधिकारेण रक्ष् 1 P *or* स्वायत्तीकृ 8 U । Letters p., नवयुक्तिपूर्णाधिकार, विशिष्टाधिकारपत्रं । -ee, *n.* नवयुक्तिपूर्णाधिकारिन् *m* । -ly, *adv.* स्पष्टं, स्फुटं.

Pater, *n.* तात, पितृ *m* । -familias, *n.* कुलपति *m* । -nal, *a.* पितृविषयक, पैतृक; पित्र्य; पितृयोग्य, वत्सल, स्निग्ध; p. uncle, पितृव्य; p. aunt पितृव्या, पितृष्वसा । -nity, *n.* पितृत्वं; कुलपरंपरा, वंश; प्रभव, मूलं.

Path, *n.* चरणपथ, पदवी, पद्धति *f*, पथा; अध्वन् *m*, मार्ग, वर्त्मन् *n.* । -finder, *n.* नवप्रदेशान्वेषक; मार्गदर्शक । -less, *a.* निष्पथ; दुर्गम.

Pathetic, *a.* करुण, करुणात्मक, हृदिस्पृश् । *n.* कारुण्यविषय; करुणाविष्कार । Pathos, *n.* करुण (रस), करुणारस.

Pathogenesis, *n.* रोगनिदानं.

Pathognomy, *n.* भावप्रकटनं.

Pathology, *n.* रोगशास्त्रं । Pathological, *a.* रोगशास्त्रविषयक; रोगात्मक । Pathologist, *n.* रोगशास्त्रज्ञ.

Patience, *n.* क्षमा, क्षांति *f*, तितिक्षा, सहनशीलता, सहिष्णुता; धैर्य, स्थैर्य । Out of p. with, असहिष्णु । To have no p. with, न तितिक्षते *Den*, न सह् 1 A.

Patient, *a.* तितिक्षु, सहनशील, सहिष्णु; अनन्यनिग्राहिन्, धीर, क्षमाशील, सौम्य; अभिनिविष्ट, दीर्घोद्योगिन् । *n.* आतुर, आर्त, रुग्ण, रोगातुर, रोगिन् *all m*; उपचारसेविन् *m* । -ly, *adv.* तितिक्षापूर्ण, सहनपूर्व.

Patio, *n.* अंगणं, अजिरं, चत्वर *mn*.

Patois, *n.* प्राकृतभाषा.

Patriarch, *n.* कुलपति *m*; मूलपुरुष । -al, *a.* कुलपतियोग्य । -y, *n.* पितृसत्ताकसंस्था.

Patrician, *a.* अभिजात, कुलीन । *n.* कुलीनजन.

Patrimony, *n.* अंश, औद्धारिकं, दाय, दायाद्यं, पितृदाय, पितृद्रव्यं, रिक्थं । Patrimonial, *a.* पितृप्राप्त, पैतृक.

Patriot, *n.* स्वदेशभक्त, स्वदेशाभिमानिन् *m* । -ic, *a.* स्वदेशभक्त । -ism, *n.* स्वदेशभक्ति *f*.

Patrol, *vi.* रक्षार्थं पर्यट् 1 P । *n.* रक्षाटनं; रक्षकाः, रक्षिणः *both pl.*

Patron, *n.* आश्रयदातृ *m*, उपकारक, पुरस्कर्तृ *m*; प्रतिपालक; क्रेतृ *m*, ग्राहक । -age, *n.* अनुग्रह, आश्रय, पुरस्कार; प्रतिपालनं, संवर्धनं; ग्राहकसाहाय्यं । -ize *vt.* आश्रयं दा 3 U; अनुग्रह् 9 P; प्रतिपा *c*, संवृध् *c*; (ग्राहकस्य) नित्यं आश्रि 1 U *or* सेव् 1 A; आश्रयदातृवत् (साटोपं) आचर् 1 P.

Patronymic, *a.* पितृप्राप्त, पैतृक । *n.* पैतृक०, गोत्रनामन् *neu.*

Patter, *vi.* पटपटायते *Den*; क्षिप्रोच्चारणं कृ 8 U । *vt.* क्षिप्रं जल्प् 1 P । *n.* पटपटाशब्द, जल्पनं.

Pattern, *n.* आदर्श, प्रतिमानं, प्रतिरूपं ; उदाहरणं, निदर्शनं ; चित्राकृति *f*; आकार, रूपं । *vt.* प्रतिरूपं कृ 8 U; चित्राकृतिभिः अलंकृ 8 U.

Patulous, *a.* पृथुरंध्र ; विस्तीर्ण.

Paucity, *n.* अल्पता, विरलता.

Paunch, *n.* उदरं, कुक्षि *m*, तुंदं, पिचिंड, फंड, मलुक । -y, *a.* उदरिल, तुंदिक, तुंदिन्, तुंदिल, पिचंडिल, लंबोदर.

Pauper, *n.* अकिंचन, अनाथ, दरिद्र, दीन, निःस्व, निराश्रय, निर्धन; भिक्षु, मार्गण, याचक *all m* । -dom, -ism, *n.* कार्पण्यं, दारिद्र्यं, दैन्यं, भैक्ष्यं । -ize, *vt.* दरिद्रीकृ 8 U.

Pause, *n.* निवृत्ति, विरति, विश्रांति *all f*, विच्छेद, विराम; विरामचिह्नं । *vi.* विरम् 1 P, निवृत् 1 A; (wait) प्रतीक्ष् 1 A.

Pave, *vt*, प्रस्तरैः खच् 10 U *or* दृढीकृ 8 U; प्रस्तरैरिव आच्छद् 10 U । -ment, (*also* Paving), *n.* कुट्टिम *mn*, शिलास्तर.

Pavilion, *n.* पटमंडप ; चंद्रातप, क्रीडागृहं.

Pavonine, *a.* मयूरोपम, मायूर.

Paw, *n.* (व्याघ्रादीनां) पाद ; कर । *vt.* (भूमिं) पादेन *or* खुरेण आहन् 2 P *or* घृष् 1 P *or* लिख् 6 P; असभ्यक् परामृश् 6 P.

Pawn, (1) *n.* खेलनी, शार, शारि *m.*

Pawn, (2) *n.* आधि *m*, उपनिधि *m*, निक्षेप, बंधक । *vt.* आधीकृ 8 U, निक्षिप् 6 P, न्यस् 4 U; पण् 1 A । At p., in p., आधीकृत, उपनिहित, निक्षिप्त । -broker, *n.* निक्षेपव्यवसायिन् *m* । -er, *n.* निक्षेप्तृ *m.*

Pay, *vt.* उत्सृज् 6 P, दा 3 U ; व्यय् 10 U ; निस्तॄ *c*, शुध् *c*; ऋ *c* । *vi.* निष्क्रयं कृ 8 U ; अर्थकर *a. or* फलसाधक *a.* भू 1 P । *n.* निर्वेश, भृति *f*, वेतनं । To p. off, पूर्णनिस्तारं कृ 8 U । To p. a person in his own coin, शठं प्रति शाठ्यं आचर् 1 P, योग्यं प्रत्यपकारं कृ 8 U । -able देय ; शोधनीय । -bill, -roll, *n.* निर्वेशसूचिका । -day, *n.* भृति-

दानादिनं । -ee, *n.* प्रतिग्रहीतृ । -master, *n.* वेतनाध्यक्ष । -ment, *n.* अर्पणं, दानं, व्यय; निस्तार, शोधनं.

Paynim, *n.* मूर्तिपूजक.

Pea, *n.* कलाय, कालपूरक, खंडिक, चण, रेणुक, वातुल, संवर्त, सतीन-(ल)क, हरेणु *m.*

Peace, *n.* अविप्लव, अविरोध, ऐक्यं, सख्यं; संधानं, संधि *m*; अक्षोभ, प्रसाद, शांति *f*, स्वास्थ्यं । To hold one's p., तूष्णीं आस् 2 A *or* भू 1 P । To make p., संधिं कृ 8 P. *c or* साध्; विरोधात् *or* युद्धात् विरम् 1 P । -able, *a.* अक्षुब्ध, शांत, सौम्य, स्वस्थ; शांतवृत्ति । -ful, *a.* शांत; निरुपप्लव, अव्याकुल, अक्षुब्ध; विरोधहीन, शांतिपर । -maker, *n.* संधातृ *m* । -offering, *n.* शांतिहोम; सामोपायनं.

Peach, *n.* फलविशेष.

Peacock, *n.* कलापिन्, केकालि, केकावल, केकिक, केकिन्, चंद्रकिन्, चित्रपत्रक, ०पिच्छक, ०मेखल, दार्वड, नर्तनप्रिय, नीलकंठ, प्रचलाकिन्, बर्हिण-न्, भुजंगारि, मयूर(क), मरूक, मार्जारकंठ, मेघनादानुलासिन्, मेघानंदिन्, मेनाद, वर्षामद, शापठिक, शिखंडिन्, शिखावल, शुक्लापांग, षहसानु *all m*; वृथागर्वित । P.'s cry, केका । P. tail कलाप, पिच्छं, प्रचलाक, बर्ह, शिखंड । Eye in p.'s tail, चंद्रक, मेचक । -fowl, *n.* विष्किर । Pea-hen, *n.* मयूरी, शिखंडिनी.

Peak, (1) *n.* कूट, शिखर, सानु *all mn*, *also* (पर्वत०)मस्तकं *etc.* । -ed, *a.* शिखरिन्, सानुमत्.

Peak, (2) *vi.* रोगार्त *a or* अस्वस्थ *a.* इव दृश् *Pass.*.

Peal, *n.* ध्वनि *m*, निनाद; गर्जना, स्तनितं । *vi.* नद्, स्वन्, गर्ज्, स्तन् *all* 1 P.

Pear, *n.* फलविशेष.

Pearl, *n.* मौक्तिकं, मुक्ता, मुक्ताफलं, शुक्तिजं, शुक्तिबीजं, शौक्तिकेयं, शौक्तेयं, कटशर्करा, गंगेष्टि *f* । *vi.* मुक्तोपमबिंदुरूपं प्राप् 5 P । -oyster, *n.* मुक्तागार, ०प्रसू *f*, ०मातृ *f*, स्फोट, अब्धिमंडूकी, शुक्ति *f*, शुक्तिका । -y, *a.* मुक्तोपम.

Peasant, *n.* ग्रामिक, जानपद; क्षेत्रिक । *a.* ग्रामीण, ग्राम्य । -ry, *n.* क्षेत्रिकाः *pl.*, ग्रामिकवर्ग.

Pebble, *n.* अश्मगुटिका, उपलखंड, शर्करा । Pebbly, *a.* अश्मर, शर्करिक-ल.

Peccable, *a.* पापप्रवण.

Peccadillo, *n.* क्षुद्रापराध, अल्पस्खलितं.

Peccant, *a.* पातकिन्, पापिन्; अपराधिन्, कृतापराध, सदोष

अन्याय्य, नियमविरुद्ध । Peccancy, *n.* पापित्वं, सदोषता.

Peccavi, *phrase* अपराद्धोऽस्मि । *n* आत्मप्रमादख्यापनं.

Peck, *vt.* चंच्वा तड् 10 U, तुद्, 6 U, विदल् 1 P *or* ग्रह् 9 P । -er *n.* काष्ठकूट, दार्वाघाट ; बुभुक्षा ; धैर्यं । -ish, *a.* क्षुधालु, बुभुक्षु.

Pectoral, *a.* उरस्य । *n.* कासहरं.

Peculate, *vt.* कपटेन स्वायत्तीकृ 8 U । -ion, *n.* परस्वग्रसनं.

Peculiar, *a.* व्यक्तिगत, अव्यापक; असाधारण, असामान्य, विशिष्ट; स्वीय; अपूर्व, विलक्षण । -ity, *n.* असामान्यता; विशेष । -ly, *adv.* असामान्यतः; विशेषतः, विशेषेण.

Pecuniary, *a.* अर्थ०, धनविषयक, अर्थात्मक.

Pedagogue, *n.* (बालानां) अध्यापक, शिक्षक; पंडितंमन्य । Pedagogics, Pedagogy, *n.* शिक्षणशास्त्रं.

Pedal, *n.* पादोत्तोलनी.

Pedant, *n.* पंडितंमन्य, विद्याडंबरिन् *both m* । -ic, *a.* विद्याडंबरस्फीत; पांडित्यदर्शिन् । -ry, *n.* पांडित्यप्रदर्शनं, विद्याडंबर.

Peddle, *vi.* पण्यविक्रयार्थं पर्यट् 1 P । -r, *n. See* 'Pedlar' । Peddling, *a.* क्षुद्र, तुच्छ.

Pederast, *n.* शिशुभोगिन् *m* । -y, *n.* शिशुरमणं.

Pedestal, *n.* (स्तंभादिकस्य) तल *mn*, पाद, मूलं.

Pedestrian, *a.* पादगामिन् ; पादाक्रमणीय; नीरस, सामान्य । *n.* पादग, पादगामिन् *m*, पदिक.

Pedicel, *n.* नाल *mn*, वृंतं.

Pedicular, *a.* यूकाकीर्ण.

Pedicure, *n.* पादप्रसाधनं; पादप्रसाधक.

Pedigree, *n.* कुलं, ०परंपरा, अन्वय, प्रभव, वंश, वंशावलि *f* । *a.* (*also* -d) अभिजात, कुलीन.

Pedlar, Peddler, *n.* भांडवाह, वैवधिक । P.'s pony, pad, दंड, यष्टि *f*.

Pedometer, *n.* चालिताध्वमापकयंत्रं । Pedomotive, *a.* पादगामिन्.

Peduncle, *n* नाल *mn*, वृंतं.

Peel, *n.* चोलकं, छल्ली, त्वच् *f*, वल्क *mn*, वल्कुटं । *vt.* त्वचयति-ते *Den*, निस्त्वचीकृ 8 U । *vi.* निस्त्वचीभू 1 P.

Peep, (1) *vi* किलकिलायति-ते *Den*, कूज् 1 P । *n.* किलकिला, कूजनं.

Peep, (2) *vi.* निभृतं (रंध्रेण) दृश् 1 P *or* आलोक् 1 A. 10 U; ईषत् *or* असंपूर्णं दृश् *Pass or* प्रादुर्भू 1 P; शनैः प्रकटीभू 1 P *or* उदि 2 P । *n*, क्षण०, अपूर्णदर्शनं ; प्रथमदर्शनं.

Peer, (1) *n.* समान, तुल्य; समानपदस्थ, ०वर्गीय; कुलीनजन । -age

n. कुलीनजनवर्ग । -less, *a.* अतुल्य, अद्वितीय, अनुपम, अप्रतिम, असदृश.

Peer, (2) *vi.* निभृतं दृश् 1 P *or* वीक्ष् 1 A; आविर्भू, प्रादुर्भू *both* 1 P.

Peevish, *a.* आत्मतापिन्, कोपन, दोषमात्रदर्शिन्, प्रतीप, वक्रवृत्ति। -ly, *adv.* प्रतीपं, वक्रवृत्त्या। -ness, *n.* कोपनत्वं, वक्रवृत्ति *f.*

Peg, *n.* कीलक, पुष्पल, शंकु *m*; (नाग°) दंतक; (of lute) क(कू)-णिका; निमित्तं। *vt.* कीलकैः बंध् 9 P; (मूल्यादिकं) स्थिरीकृ 8 U। To p. away, दीर्घं परिश्रम् 4 P। To take one down a p., अवमन् *c*, लघूकृ 8 U.

Pejorative, *a.* अवहेलनार्थक.

Pelagian, *a.* समुद्रीय, समुद्र्य, सामुद्र.

Pelf, *n.* वित्तहतकं.

Pelisse, *n.* अवगुंठनं, प्रावार(क).

Pellet, *n.* गुटिका, गुलिका.

Pellicle, *n.* विरलत्वच् *f*, झिल्ली.

Pell-mell, *adv.* अतिसंभ्रमेण। *a.* अव्यवस्थ, संकुल, संभ्रांत.

Pellucid, *a.* अच्छ, निर्मल, विशद, शुद्ध, स्वच्छ; स्पष्टार्थ, सरल। -ity, -ness, *n.* नैर्मल्यं, स्वच्छता; वैशद्यं, सारल्यं.

Pelt, (1) *n.* अजिनं, कृत्ति *f*, दृति *f*, चर्मन् *neu.*

Pelt, (2) *vt.* (अश्मादिकं) प्रक्षिप्य तड् 10 U *or* प्रहृ 1 P। *vi.* (rain) अत्यंतं वृष् 1 P। Full p., अतिवेगेन.

Pelvis, *n.* बस्तिदेश.

Pemmican, *n.* उत्तप्तं, वल्लूरं; संक्षेपात्मकः बोध.

Pen, (1) *n.* अवरोध; गोष्ठ, व्रज। *vt.* अवरुध् 7 U; (जलं सेतुना) निरुध् 7 U। -t, *a.* अवरुद्ध, निरुद्ध, प्रतिरुद्ध। Penthouse, *n.* प्रलंबनीध्रं; उपगृहं; उल्लोच, वितान *mn.*

Pen, (2) *n.* कलम, तूलिका, लेख-(खि)नी, वर्णिका। *vt.* लिख् 6 P। -man, *n.* लिपिकार, लिपिज्ञ, लेखक; -ship, *n.* लिपिन्यास°, लेखनविद्या; लेखनशैली.

Penal, *a.* दंडात्मक, दंडविषयक; दंडनीय, दंडार्ह। -ize, *vt.* दंड-नीयं *a.* कृ 8 U; अनिष्टोपायेन प्रतिबंध् 9 P। -ty, *n.* दंड, शासनं.

Penance, *n.* कृच्छ्रं, तपस् *neu*, तपस्या, व्रत *mn*; प्रायश्चित्तं.

Penchant, *n.* प्रवणता; प्रवृत्ति *f*; अभिरुचि *f.*

Pencil, *n.* तूलिका, लेख(खि)नी, वर्णिका। *vt.* लिख् 6 P.

Pendant, *n.* प्रालंब, लोलक; कुंडलं.

Pendent, *a.* लंबमान, प्रलंब; अनिर्णीत; अपूर्णार्थ, साकांक्ष.

Pending, *a.* अनिर्णीत। *prep.* यावत्.

Pendulous, *a.* लंबमान; दोलायमान, प्रेंखत्। Pendulate, *vi.* दोलायते *Den*; द्वैधीभू 1 P. । Pendulum, *n.* लंबक, लोलक.

Penetralia, *n.* गर्भागारं.

Penetrate, *vt.* निविश्, प्रविश् *both* 6 P; गाह् 1 A; निर्भिद् 7 P, विध् 6 P, व्यध् 4 P; व्यश् 5 A, व्याप् 5 P; अवगम् 1 P । Penetrative, Penetrating, *a.* प्रवेशक; वेधिन्; तीक्ष्ण, सूक्ष्म। Penetration, *n.* प्रवेशनं; वेधनं; व्यापनं; ग्रहणं, बोध; सूक्ष्मदर्शित्वं.

Peninsula, *n.* द्वीपकल्प *mn* । -r, *a.* द्वीपकल्पाकार; द्वीपकल्पस्थ.

Penis, *n.* उपस्थ, *mn*, कामलता, कोश, मेढ्र, मेहनं, लिंगं, शंकु *m*, शिश्नं, शेफस् *neu.*

Penitent, *a.* अनुतापिन्, अनुशयिन्, अनुशोकार्त, पश्चात्तापग्रस्त। -ial, *a.* अनुतापात्मक; अनुतापार्थक । -iary, *a.* अनुतापात्मक; *n.* प्रायश्चित्तगृहं, कारागृहं । Penitence, *n.* अनुताप, अनुशय, अनुशोक, पश्चात्ताप, विप्राति(ती)सार.

Pennant, *n.* केतनं, केतु *m*, ध्वज, पताका, वैजयंत-ती.

Penniform, *a.* पिच्छाकार.

Penon, *n.* केतु *m*, ध्वज, पताका.

Penny, *n.* नाणकविशेष। A pretty p., अनल्पः व्यय। To turn an honest p., सदायासेन धनं अर्ज् *c*।

Penniless, *a.* अकिंचन, दरिद्र.

Penology, *n.* दंडशास्त्रं ।

Penologist, *n.* दंडशास्त्रज्ञ.

Pensile, *a.* लंबमान, लंबित.

Pension, *n.* पूर्वसेवावृत्ति *f.* । -er, पूर्वसेवावृत्तिभोजिन् *m*,

Pensive, *a.* ध्यानपर, ध्यानस्थ, विचारमग्न; उन्मनस्क, चिंतापरमग्न, गंभीर, त्यक्तविनोद.

Pentachord, *n.* पंचतंतुवाद्यं.

Pentad, *n.* पंचकं.

Pentagon, *n.* पंचभुज । -al, *a.* पंचकोण.

Penult, *n.* उपांत्याक्षरं । -imate, *a.* उपांत्य; p. letter, उपधा, उपांत्यं.

Penumbra *n.* उपच्छाया.

Penury, *n.* अकिंचनत्वं, दारिद्र्यं, दैन्यं, निर्धनता। Penurious, *a.* अकिंचन, दरिद्र, दीन, निर्धन; असुक्तहस्त, कदर्य, कृपण, मितंपच.

Peon, *n.* पदातिक, पादिक; अनुचर, परिचर.

People, *n.* जन-नाः, जनता, प्रकृतयः, प्रजा-प्रजाः, लोक-लोकाः; बंधुवर्ग, बांधवाः; सेवकवर्ग, परिवार। *vt.* जनैः अध्याक्रम् 1 U. 4 P *or* वस् *c*; (अधि०, नि०, प्रति०) वस् 1 P, अधिष्ठा 1 P.

Pepper, *n.* उषणं, औषणं, कालकं, धर्मपत्तनं, पलितं, पेलवं, मरि(री)चं, विरावृत्तं, वेणुनं, वेल्लनं, श्यामवल्ली।

vt. मरीचेण अवकृ 6 P *or* उपस्कृ 8 U; भृशं तड् 10 U। -y, *a.* तिक्त, तीक्ष्ण; कोपन, क्रोधन.

Pepsin, *n.* जठररसद्रव्यं.

Per, *prep. Expressed by Instr. or. Abl.* । P. annum, प्रतिवर्षं । P. cent, ॰उत्तरं *in comp.*, नवोत्तरं शतं.

Peradventure, *adv.* कदाचित्, कदापि; दैवात्, यदृच्छया.

Perambulate, *vt.* परितः गम् 1 P, परिभ्रम् 1 P, पर्यट् 1 P। -ion, *n.* परिभ्रमणं, पर्यटनं। -ory, *a.* पर्यटनवृत्ति.

Perceive, *vt.* अधिगम् 1 P, अवबुध् 1 P, उपलभ् 1 A, विद् 2 P; आलोक् 1 A. 10 U, दृश् 1 P, समीक्ष् 1 A। -able, *a.* उपलभ्य, वेद्य। -r, *n.* उपलब्धृ *m*, वेत्तृ *m.*

Percentage, *n.* प्रतिशतदेयं; शुल्क *mn.*

Percept, *n.* उपलब्धिफलं। -ible, *a.* उपलभ्य, वेद्य; व्यक्त, स्पष्ट। -ion, *n.* अवबोध, उपलब्धि *f.* वेदनं; प्रत्यक्षबोध; उपलब्धृशक्ति *f.*। -ive, *a.* उपलब्धृ, ग्रहणक्षम, बोधग्राहिन्.

Perch, *n.* आसनदंड, वासयष्टि *f*। *vi.* आस् 2 A, निषद् 1 P। *vt.* वासदंडे इव स्था *c.*

Perchance, *adv.* कदाचित्, कदापि; दैवात्, यदृच्छया.

Percipient, *a.* उपलब्धृ, विषयग्राहिन्; चेतन। Percipience, *n.* विषयग्राहित्वं; चैतन्यं.

Percoct, *a.* अतिपक्व, नष्टनावीन्य.

Percolate, *vi.* (सूक्ष्मरूपेण) प्रस्नु 2 P, स्यंद् 1 A। *vt.* व्याप् 5 P। -ion, *n.* सूक्ष्मस्यंदनं.

Percuss, *vt.* (अंगुलिभिः) आहन् 2 P; अंगुल्याघातेन परीक्ष् 1 A। -ion, *n.* संघट्ट, समाघात; अंगुल्याघातपरीक्षा.

Perdition, *n.* उच्छेद, विध्वंस, विनाश; अधःपात, अधोगति *f.*

Perdu, *a.* गूढ, निभृत, निलीन, प्रच्छन्न। To lie p.. निभृतं प्रतीक्ष् 1 A *or* शी 2 A; संकटे स्था 1 P.

Perdurable, *a.* अतिचिरस्थायिन्; अक्षय, शाश्वत। Perdurability, *n.* शाश्वतत्वं.

Peregrination, *n.* पर्यटनं; प्रवसनं । Peregrinate, *vi.* पर्यट् 1 P; प्रवस् 1 P.

Peregrine, *a.* विदेशीय; प्रवासिन्। P. falcon, श्येनविशेष.

Peremptory, *a.* अविशंकनीय, अवैकल्पिक, निश्चयपूर्वक, निश्चित; अतिनिर्बंधपर, शीघ्रकर्तव्य। Peremptorily, *adv.* निश्चयपूर्वकं; सानिर्बंधं.

Perennial, *a.* अखिलवर्षस्थायिन्; अनवरत, अविरत, निरंतर, सतत; (plant) वर्षद्वयाधिकस्थायिन् । -ly, *adv.* अनवरतं, सततं, सदा.

Perfect, *a.* संपूर्ण, सिद्ध; अन्यून, निर्दोष; उत्तम, श्रेष्ठ; अतिकुशल, सुनिपुण। *vt.* संपद् *c*, संपूर् 10 U; सुनिपुणं *a.* कृ 8 U । P. tense, लिट् । -ion, *n.* संपूर्णता; निर्दोषता, सुपरिणति *f*, प्रकर्ष, सिद्धि *f*; परा काष्ठा *or* कोटि *f*; सद्गुण; to p., संपूर्णं, समग्रतया । -ly, *adv.* संपूर्णतया, साकल्येन, सर्वथा। -ness, *n.* अन्यूनता, निर्दोषत्वं.

Perfervid, *a.* उल्बण, अत्युत्कट, प्रखर.

Perfidy, *n.* विश्वासघात, समयभंग, संगरभेद, असत्यसंधत्वं । Perfidious, *a.* असत्यसंध, विश्वासघातिन्; कपटिन्, वंचक.

Perforate, *vt.* छिद्रयति *Den.* विध् 6 P, व्यध् 4 P, समुत्कृ 6 P । -ion, *n.* वेधनं; छिद्रं । -or, *n.* वेधनी.

Perforce, *adv.* अवश्यं, अवश्यतया, बलात्.

Perform, *vt.* अनुष्ठा 1 P, आचर् 1 P, कृ 8 U, विधा 3 U; निर्वह्, निर्वृत्, निष्पद्, संपद्, साध् *all c*; अभिनी 1 P, नट् 10 U; वद् *c* । -ance, *n.* अनुष्ठानं, विधानं; निष्पादनं, संपादनं; कर्मन् *neu*, कार्यं, कृति *f*, क्रिया; अद्भुतं *or* लोकोत्तरं कर्मन् *neu or* चेष्टितं; प्रयोग । -er, *n.* अनुष्ठातृ *m*; नट; वादक.

Perfume, *vt.* धूप् 10 U, वास् 10 U, सुरभीकृ 8 U । *n.* गंधद्रव्यं, गांधिकं; गंध, परिमल, सुगंध, सुवास । -atory, *a.* सुवासकारिन् । -r, *n.* गांधिक । -ry, *n.* गांधिकापण.

Perfunctory, *a.* अनादृत्यकृत; अनवहित, अनुत्सुक, निरुत्साह। Perfunctorily, *adv.* अनवधानेन, अनास्थापूर्वकं, निरुत्साहं.

Perfuse, *vt.* उक्ष् 6 P, सिच् 6 P । Perfusion, *n.* प्रोक्षणं.

Perhaps, *adv.* कदाचित्, कदापि, स्यात्.

Peri, *n.* दिव्यांगना; सुंदरी.

Periapt, *n.* कवच *mn*, रक्षाकरंड, रक्षिका.

Pericardium, *n.* हृत्कोश । Pericarditis, *n.* हृत्कोशपाक.

Pericarp, *n.* बीजकोश.

Peril, *n.* अनर्थ, भयं, विघ्न, संकटं; अपायभयं, संशय । -ous, *a.* अनर्थहेतुक, भयावह; संकटाक्रांत, शंकापूर्ण.

Perimeter, *n.* परिणाह.

Period, *n.* काल, समय; कालावधि *m*, ०परिमाणं; अंतरं, अवधि *m*; कालावर्त, युगं, शाक; पूर्णवाक्यं; (पूर्ण)विराम । -ic, -ical *a.* नियतकालिक, सामयिक । -ical, *n.* नियतकालिकं (पुस्तकं) । -ically, *adv.* काले काले । -icity, *n.* नियतकालिकत्वं.

Peripatetic, *a.* पर्यटत्, परिभ्रमणशील.

Periphery, *n.* बाह्यांगं; परिणाह, परिधि *m*, परिवेश, प्रधि *m*.

Periphractic, *a.* परिव्यापक.

Periphrasis, *n.* वक्रोक्ति *f*, असरलोक्ति *f* । Periphrastic, *a.* असरलवचनात्मक; P. future, perfect, लुट्, लिट्.

Perish, *vi.* अवसद् 1 P, उच्छिद् *Pass*, ध्वंस् 1 A, नश् 4 P, विलुप् 4 P; प्रे 2 P, मृ 6 A, व्यापद् 4 A; क्षि *Pass*, शॄ *Pass* । -able, *a*, क्षयिष्णु, नश्वर.

Peristalsis, *n.* अंत्रचलनं.

Peristyle, *n.* स्तंभावालि *f*.

Peritoneum, *n.* अंत्रावरणं । Peritonitis, *n.* अंत्रावरणपाक.

Perjure, *vt.* (oneself) मिथ्याशपथं प्रतिज्ञा 9 P *or* कृ 8 U, मिथ्या शप् 1.4 U । -r, *n.* मिथ्याशपथकारिन् *m*, मिथ्याशतक । Perjury, *m.* मिथ्याशपथ, ०शपनं.

Perk, *vt.* सुभगं *a.* कृ 8 U; अग्रतः प्रसृ *c* । *vi.* धार्ष्ट्येण वृत् 1 A । -y, *a.* अप्रश्रय, धृष्ट, प्रगल्भ.

Perlaceous, *a.* मुक्तोपम.

Perlustration, *n.* सम्यक्परीक्षणं.

Permanent, *a.* अक्षय, चिरस्थायिन्, ध्रुव, नित्य, शाश्वत, स्थिर । -ly, *adv.* ध्रुवं, शाश्वतं । Permanence, -y, *n.* अक्षयत्वं, ध्रुवता, ध्रौव्यं, नैत्यं, स्थिरता, स्थैर्यं.

Permeate, *vt.* व्यश् 5 A, व्याप् 5 P; अत्यंतं पूर् 10 U । -ion *n.* व्यापनं, व्याप्ति *f*; अतिपूरणं.

Permit, *vt.* अनुज्ञा 9 U, अनुमन् 4 A; क्षम् 1 A, सह् 1 A । *n.* अनुज्ञादेश; अनुज्ञापत्रं । Permissible, *a.* अनुज्ञेय; धर्म्य, न्याय्य । Permission, *n.* अनुज्ञा, अनुमति *f* । Permissive, *a.* अनुज्ञात्मक; अप्रतिबंधक.

Permutation, *n.* परिवर्तनं, परिवृत्ति *f*, विपरिणाम, विपर्यय; विनिमय, व्यतिहार । Permute, *vt.* परिवृत् *c*, विपर्यस् *c*; विनिमे 1 A । Permutable, *a.* विनिमेय.

Pernicious, *a.* अंतक, घातुक, मारक; अपकारक, पीडावह, बाधक, शरारु.

Pernickety, *a.* दुराराध्य; संभ्रमशील.

Perorate, *vi.* उच्चैः भाषणं कृ 8 U; साडंबरं वद् 1 P । -ion, *n.* उपसंहार.

Perpend, *vt.* सावधानं विचर् *c*.

Perpendicular, *a.* लंब, लंबरूप; सरल । *n.* लंब, लंबक.

Perpetrate, *vt.* आचर् 1 P, कृ 8 U, विधा 3 U । -ion, *n.* आचरणं, विधानं । -or, *n.* अनुष्ठातृ *m*, कर्तृ *m*.

Perpetual, *a.* अनंत, अनवरत, अविनाशिन्, नित्य, निरंतर, शाश्वत, सतत, सदातन, सनातन, संतत, सार्वकालिक । -ly, *adv.*

अनवरतं, नित्यं, सततं । Perpetuate, *vt.* अनंतं *a. or* नित्यं *a.* कृ 8 U; स्थिरीकृ 8 U । Perpetuity, *n.* आनंत्यं, नित्यत्वं, नैरंतर्यं, सातत्यं; For, In p., निरंतरं, शश्वत् ·

Perplex, *vt.* मुह् *c*, संकुलीकृ 8 U, संभ्रम *c* । -ity, *n.* वैक्लव्यं, संदेह, संभ्रम, संमोह·

Perquisite, *n.* वेतनाधिकलाभ; उपायनं, पारितोषिकं·

Persecute, *vt.* अर्द् 1 P. *c*, उपद्रु 1 P, क्लिश् 9 P, पीड् 10 U, संतप् *c*, संबाध 1 A । -ion, *n.* अर्दनं, उपद्रव, क्लेश, पीडा । -or, *n.* क्लेशदायिन् *m.*

Persevere, *vi.* दीर्घं यत् 1 A; दृढाग्रहेण आस् 2 A । Perseverance, *n.* दृढप्रवृत्ति *f*, दीर्घव्यवसाय; अभिनिवेश, दृढाग्रह । Persevering, *a.* दीर्घोद्यमिन्; अभिनिविष्ट, दृढाग्रहिन् ·

Persian, *a.* पारसीक, पारस्य.

Persiflage, *n.* अन्यथपरिहास, विनोद·

Persist, *vi.* दीर्घं यत् 1 A; दृढाग्रहेण आस् 2 A; अविच्छेदेन वृत् 1 A, पर्यवस्था 1 A । -ence, -ency, *n.* दीर्घप्रवृत्ति *f*; अभिनिवेश, दृढाग्रह, निर्बंध; अविच्छेद, प्रसक्ति *f*; संतानं । -ent, *a.* दीर्घोद्यमिन्, अभिनिविष्ट, दृढाग्रहिन्, निर्बंधपर, चिरस्थायिन्, अविच्छेदस्थायिन्; -ly, *adv.* दृढाग्रहेण, सनिर्बंधं·

Person, *n.* जन, नर, पुरुष; काय, तनु *f*, देह, शरीरं; (Grammar) पुरुष । In p., स्वतः, स्वयमेव । -able, *a.* शोभन, सुदर्शन, सुंदर, सुरूप । -age, *n.* श्रेष्ठजन; पात्रं, भूमिका; आकार, रूपं । -al *a.* स्वकीय, स्वीय; व्यक्तिगत, ०स्थित; निंदात्मक; कायिक, शारीरिक; स्वयंकृत । -ality, *n.* व्यक्तित्वं; व्यक्ति *f*; स्वालक्षण्यं, स्वभाव । -ally, *adv.* स्वतः, स्वयं । -alty, *n.* अस्थावररिक्थं । -ate, *vt.* (अमुकरूपवेषादिकं) ग्रह् 9 P *or* धृ 10 U, विडंब् 10 U । -ation, *n.* विडंबनं, (अन्य) रूपधारणं । -ify, *vt.* मनुष्यत्वं *or* चैतन्यं आरुह् *c*; दृष्टांतीभू 1 P । -ification, *n.* चैतन्यारोपणं, मनुष्यत्वारोप । -nel, *n.* नियोगिवर्ग, कार्यकारिमंडलं·

Perspective, *n.* यथादर्शनचित्रालेखनकला; दृश्यं·

Perspicacious, *a.* तीक्ष्णमति, तीव्रदृष्टि, सूक्ष्मबुद्धि । Perspicacity, *n.* सूक्ष्मदर्शनं, तीक्ष्णबुद्धि *f.*

Perspicuous, *a.* विशद, व्यक्त, स्पष्ट, स्फुट । Perspicuity, *n.* वैशद्यं, स्पष्टत्वं.

Perspire, *vi.* (प्र०) स्विद् 4 P । Perspiration, *n.* घर्म, निदाघ, स्वेद । Perspiratory, *a.* स्वेदस्यंदिन् ·

Perstriction, *n.* दोषनिरूपणं.

Persuade, *vt.* अनुनी 1 P; प्रवृत् *c*; प्रवणीकृ 8 U; प्रती *c*। Persuasion, *n.* अनुनय; प्रवर्तनं; प्ररोचना; प्रत्ययसाधनं; मतं, मार्ग, संप्रदाय। Persuasive, *a.* अनुनयिन्; प्रत्ययकारिन्; प्रवर्तक; प्ररोचक.

Pert, *a.* क्षिप्र, चपल, सोत्साह, सोल्लास; अविनीत, धृष्ट, प्रगल्भ। -ly, *adv.* अविनयेन, प्रगल्भतया। -ness, *n.* चापल्यं; प्रगल्भता.

Pertain, *vi.* अस् 2 P, भू 1 P, विद् 4 P (*All with Gen.*); उपपद् 4 A.

Pertinacious, *a.* अभिनिविष्ट, दृढाग्रहिन्, निर्बंधपर, प्रतिनिविष्ट। Pertinacity, *n.* अभिनिवेश, दृढाग्रह, निर्बंध.

Pertinent, *a.* उचित, उपपन्न, औपयिक, प्राप्त, प्रासंगिक, यथार्थ, संगत। Pertinence, -cy, *n.* औचित्यं, उपपत्ति *f*, याथार्थ्यं, संगति *f*.

Perturb, Perturbate, *vt.* आकुलीकृ 8 U, (सं०)क्षुभ् *c*, संभ्रम् *c*; विपर्यस् 4 U, व्यस् 4 U। -ation, *n.* आकुलता, संक्षोभ, संभ्रम.

Peruke, *n.* कृत्रिमकेशकलाप.

Peruse, *vt.* (सावधानं) वच् *c or* पठ् 1 P *or* परीक्ष् 1 A। Perusal, *n.* सुपठनं.

Pervade, *vt.* व्यश् 5 A, व्याप् 5 P। Pervading, Pervasive, *a.* व्यापक, व्यापिन्। Pervasion, *n.* व्यापनं, व्याप्ति *f*.

Perverse, *a.* दुराग्रहिन्, प्रतिनिविष्ट; अतिप्रतीप; दुर्दम। Perversity, *n.* दुराग्रह, प्रतीपता.

Pervert, *vt.* योग्यव्यवहारादिकात् परावृत् *c*; असम्यक् उपयुज् 7 A. *or* उपन्यस् 4 U; कुपथेन नी 1 P। Perversion, *n.* विपर्यय, विपर्यास; दुरुपयोग; उन्मार्गगमनं, भ्रष्टाचार। Perversive, *a.* विपर्यासकारिन्; उन्मार्गप्रापक.

Pervicacious, *a.* अतिदुराग्रहिन्; अतिप्रतीप.

Pervious, *a.* प्रवेश्य, व्याप्य; ज्ञेय; गम्य.

Pessary, *n.* योनिस्तंभनी.

Pessimism, *n.* निराशावाद; विश्वफल्गुत्ववाद। Pessimist, *n.* निराशावादिन् *m*; विश्वफल्गुत्ववादिन् *m*.

Pest, *n.* उपद्रव०, पीडाकारणं। -iferous, *a.* पीडाप्रद; मारात्मक; घातुक.

Pester, *vt.* पीड् 10 U, बाध् 1 A.

Pestilence, *n.* जनमार, मार-री, मारक, मारिका। Pestilential, *a.* मारात्मक, मारिकावह; घातुक; अतिपीडाप्रद.

Pestle, *n.* मुसल *mn*.

Pet, *n.* (1) क्रीडापशु *m*, ०मयूर, ०मृग, *etc*; प्रेमास्पदं । *a.* इष्ट, प्रिय । *vt.* लल् 10 U.

Pet, (2) रोषावेश, कोपाक्रम.

Petal, *n.* दलं, पत्रं । -ous, *a.* सदल.

Petard, *n.* वप्रभेदनयंत्रं । Hoist with his own p., स्वकपटेनैव वंचित.

Peter, *vi.* अवसो, समाप् *both pass*, विरम् 1 P.

Petition, *n.* अभ्यर्थना, प्रार्थना, याचना, विज्ञप्ति *f*; प्रार्थना०, विज्ञप्तिपत्रं । *vt.* अभ्यर्थ्, प्रार्थ् *both* 10 A, याच् 1 A । -er, *n.* प्रार्थक, याचक.

Petrify, *vt.* पाषाणीकृ 8 U; जडीकृ 8 U, स्तंभ् 9 P; कठिनीकृ 8 U । *vi.* पाषाणीभू 1 P; स्तंभ्, *Pass*; जडीभू 1 P; कठिनीभू 1 P, । Petrifaction, *n.* पाषाणीकरणं.

Petroglyph, *n.* पाषाणशिल्पं.

Petrograph, *n.* शिलालेख.

Petroleum, *n.* पाषाणतैलं.

Petrology, *n.* पाषाणशास्त्रं.

Petrous, *a.* अश्मर.

Petticoat, *n.* शाटक, शाटी; अर्धोरुकं; नारीजन । P.-government, स्त्रीप्राधान्यं.

Pettifog, *vi.* कपटं आचर् 1 P.

Pettish, *a.* आत्मतापिन्, कोपन, वक्रवृत्ति.

Petty, *a.* अल्प, क्षुद्र, तुच्छ, लघु; अप्रधान, लघ्वर्थक; अनुदार, कदर्य, कृपण, नीच.

Petulant, *a.* आत्मतापिन्, कोपन, प्रतीप, वक्रवृत्ति । Petulance, *n.* क्रोधनता, वक्रवृत्ति *f*.

Pewit, *n.* टिट्टिभ.

Pewter, *n.* कांस्यं, पीतलोहं.

Phaeton, *n.* रथ.

Phalanx, *n.* (घन°) व्यूह.

Phallus, *n.* लिंगं । Phallicism, Phallism, *n.* लिंगोपासना.

Phantasm, *n.* आभास; दृष्टिभ्रम; कल्पनामात्रं.

Phantasmagoria, *n.* स्वप्नसृष्टि *f*; मायाडंबर.

Phantom, *n.* पिशाच, प्रेतनर, भूत; आभास । *a.* मायिक । -atic, -ic, *a.* आभासात्मक.

Phare, *n.* समुद्रदीपगृहं.

Pharisee, *n.* नियममात्रपूजक, बाह्योपचारनिष्ठ; दंभिन्, दांभिक, धर्मध्वजिन्, बकवृत्ति, लिंगवृत्ति *all m* । Pharisaic, -al, *a.* दांभिक । Pharisaism, *n.* आर्यवृत्ति, कुक्कटि-टी, छंदना, रेभटि, लिंगवृत्ति *all f*, दंभ, दांभिकता.

Pharmaceutical, *a.* औषधविषयक.

Pharmacography, *n.* औषधवर्णनं । Pharmacology, *n.* औषधशास्त्रं। Pharmacopœia, *n.* औषधोपचारनिघंटु *m*; औषधसंग्रह

Pharmacy, *n.* औषधोपचारक्रिया; °कला; औषधालय.

Pharos, *n.* समुद्रदीपगृहं ; आकाशदीप.

Pharynx, *n.* गलाग्रभाग.

Phase, *n.* दर्शनं ; दृश्यविशेष; (moon's) कला, रे(ले)खा.

Pheasant, *n.* जीवंजीव, वीजन.

Phenomenon, *n.* प्रतिबुद्धवस्तु *neu*, प्रतिबोधविषय, प्रतिभास ; अद्भुतं, आश्चर्यं, उत्पात । -al, *a.* प्रातिभासिक ; प्रतिबोध्य ; अद्भुत, अलौकिक, असामान्य, आश्चर्य ; -ly, *adv.* अपूर्वं, सातिशयं.

Phew, *int.* धिक् *ind.*

Phial, *n.* लघुकूपी.

Philander, *vi.* केलिं *or* विलासं कृ 8 U, विभ्रम् 1.4 P, हिल् 6 P । -er, *n.* विलासिन् *m.*

Philanthropy, *n.* सर्वजनानुराग, विश्ववात्सल्यं, जनप्रीति *f*; लोकहितेच्छा । Philanthropic, *a.* जनानुरक्त ; लोकहितेच्छु । Philanthropist, *n.* जनानुरागिन् *m* ; लोकहितैषिन् *m.*

Philharmonic, *a.* संगीतप्रिय.

Philippic, *n.* निंदापूर्णभाषणं.

Philology, *n.* भाषाशास्त्रं । Philologist, *n.* भाषाशास्त्रज्ञ । Philological, *a.* भाषाशास्त्रविषयक.

Philomath, *n.* विद्याप्रिय, पांडित्यसेविन् *m.*

Philopolemical, *a.* विवादप्रिय.

Philoprogenitive, *a.* अपत्यवत्सल.

Philosopher, *n.* तत्त्वज्ञ, तत्त्वविद्, दार्शनिक ; ज्ञानिन्, प्राज्ञ *all m* । P.'s stone, *n.* स्पर्शमणि *m*, स्पर्शोपल । Philosophe, *n.* दार्शनिकंमन्य । Philosophic, -al, *a.* दर्शनविषयक, दार्शनिक ; तत्त्वज्ञ ; आन्वीक्षिकीप्रिय ; प्राज्ञ, विपश्चित ; स्थिरमति, स्थितप्रज्ञ। Philosophism, *n.* आन्वीक्षिकीविडंबनं ; वाक्छलं । Philosophize, *vi.* दार्शनिक इव आचर् 1 P ; वितर्क् 10 U ; नीत्युपदेशं कृ 8 U । Philosophy, *n.* आन्वीक्षिकी, तत्त्वज्ञानं, तत्त्वविद्या ; (system) दर्शनं ; तत्त्वानि *pl*; प्राज्ञत्वं ; स्थितप्रज्ञता.

Philotechnic, *a.* कलाप्रिय.

Philtre, *n.* वशीकरणपेयं, ०चूर्णं, ०कवच *mn.*

Phiz, *n.* मुखं, वदनं ; रूपं.

Phlebitis, *n.* धमनीपाक । Phlebotomy, *n.* धमनीछेद ; रुधिरस्रावणं.

Phlegm, *n.* कफ, श्लेष्मन् *m* ; खेटक, बलास ; शिं(सिं)घाणं, सिंहाणं(नं) ; जाड्यं, मांद्यं । -agogic, *a.* कफनाशन । -atic, *a.* श्लेष्मल(ण), कफकर ; जड, मंद । -y, *a.* कफपूर्ण, श्लेष्मल.

Phonetic, *a.* वाग्विषयक, स्वरविषयक ; उच्चारदर्शक । *n. pl.* स्वरशास्त्रं.

Phonic, *a.* ध्वनिविषयक.

Phonograph, *n.* ध्वनिलेखनयंत्रं.

Phonology, *n.* स्वरशास्त्रं; (अमुकभाषायाः) स्वरपद्धति *f.*

Phosphoresce, *vi.* तापदाहं विना प्रकाश् 1 A.

Photograph, Photo *n.* प्रकाशचित्रं। -y, *n.* प्रकाशचित्रकला.

Phrase, *n.* वाक्यावयव; संक्षिप्तवचनं; वाक्सरणि *f*, वाक्संप्रदाय। *vt.* वर्ण् 10 U; वद् 1 P. *c*। -ology, *n.* पदरचना; वाग्व्यवहार, वाक्सरणि *f*, वाक्शैली.

Phrenetic, *a.* उन्मत्त, संक्षुब्ध.

Phrenitis, *n.* मस्तिष्कपाक.

Phrenolcgy, *n.* कपाललक्षणशास्त्रं.

Phthisis, *n.* क्षयरोग, यक्ष्म, यक्ष्मन् *m.*

Phylactery, *n.* कवच *mn*, रक्षाकरंड.

Physic, *n.* चिकित्सा, वैद्यकं; औषधं, भेषजं। *vt.* औषधं पा *c*; औषधोपचारं कृ 8 U। -ian, *n.* अगदंकार, आयुर्वेदिन् *m*, चिकित्सक, जीवद, दोषज्ञ, निदानज्ञ, भिषज् *m*, रोगहारिन् *m*, वैद्य.

Physical, *a.* प्राकृतिक, भौतिक; इंद्रियगोचर; मूर्त, घन; कायिक। -ly, *adv.* कायेन, देहबलेन.

Physics, *n. pl.* पदार्थशास्त्रं। Physicist, *n.* पदार्थशास्त्रज्ञ.

Physiognomy *n.* मुखलक्षणशास्त्रं, मुखसामुद्रिकं; मुखलक्षणं, वदनाकृति *f*; मुखं; दर्शनं। Physiognomist, *n.* मुखसामुद्रिक.

Physiography, *n.* पृथ्वीवर्णनं.

Physiolatry, *n.* निसर्गोपासना.

Physiology, *n.* देहव्यापारशास्त्रं.

Physique, *n.* देहरचना, मूर्ति *f.*

Piacular, *a.* अघमर्षण, प्रायश्चित्तात्मक.

Piazza, *n.* अजिरं, चत्वरं; पण्याजिरं.

Picaroon, *n.* धूर्त, शठ; स्तेन, हठमोषक.

Picaninny, *n.* अर्भक.

Pick, *n.* (1) (also Pick-axe) खनित्रं, टंक, विशाखिका.

Pick, (2) उद्ग्रह् 9 P, उद्धृ 1 P; ग्रह् 9 P, चि 5 U, लू 9 U; वृ 5 U, वृ 9 U; (तीक्ष्णाग्रेण) विद्द् 9 P. 10 U *or* व्यध् 4 P; शुध् *c*; अल्पशः खाद् 1 P; मुष् 9 P। *n.* वरणं; वृत०, उत्तमवस्तु *neu.*। To p. to pieces, दोषैकदृष्ट्या परीक्ष् 1 A। -lock, *n.* तालकभेदनी; चोर। -pocket, *n.* ग्रंथिच्छेदक। Picking, *n.* उपलब्ध०, मुषितप्रकीर्णकं.

Picket, *n.* शंकु *m*; रक्षकगुल्मं; बहिष्कारसाधक। *vt.* शंकुभिः आवृ 5. 9 U; (गुल्मं) रक्षणार्थं स्था *c*; बहिष्कारसाधकान् स्था *c*.

Pickle, *n.* तेमनं, निष्ठानं, संधानं; संकटं। *vt.* संधानेन कृ 8 U.

Picnic, *n.* वनभोजनं.

Pictograph, *n.* शब्दचित्रं.

Pictorial, *a.* चित्रविषयक; सचित्र; चित्रित, चित्रदर्शित.

Picture, *n.* चित्रं, आलेख्यं, प्रतिमा; वर्णनं; रमणीयवस्तु *neu.* । *vt.* चित्रेण निरूप् 10 U; सुस्पष्टं वर्ण् 10 U, *or* संभू *c* । -gallery, *n.* चित्रशाला। -sque, *a.* सचित्रोपम; सुचित्रित.

Piebald, *a.* कर्बुर, किर्मीर, चित्र, शबल; पृथग्विध.

Piece, *n.* अंश, भाग; खंड *mn*, लव, शकल *mn*; निदर्शनं; प्रबंध; शारि *m* । *vt.* संधा 3 U, संयुज् 7 A. 10 U, संश्लिष् *c* । Of a p., समप्रकार। To p. out, पूर् 10 U । P. of money, नाणकं, मुद्रा । -less, *a.* अखंड, सकल, समग्र । -meal, *adv.* खंडशः, पृथक् पृथक्.

Pied, *a.* चित्र, किर्मीर, विचित्र, शबल.

Pier, *n.* सेतुबंध; स्तंभ; वप्र *mn*; घट्ट । -glass, *n.* बृहद्दर्पण.

Pierce, *vt.* विध् 6 P, व्यध् 4 P; छिद्रं कृ 8 U; द्रु *c*; प्रवेशं कृ 8 U । -ing, *a.* वेधक; मर्मभिद्; कर्णकटु, कर्कश.

Pietist, *n.* धर्माडंबरप्रिय.

Piety, *n.* धार्मिकता; धर्मनिष्ठा; भक्ति *f*; पितृनिष्ठा, ०भक्ति *f.*

Piffle, *n.* मूर्खजल्पनं.

Pig, *n.* क्रोड, घोणिन् *m*, शू(सू)-कर; गृध्नु; लोहपिंड । -gish, *n.* शूकरोपम; गृध्नु । -headed, *a.* जड, मूढ, मूर्ख । -let, -ling, -gy, *n.* शूकरपोत । -tail, *n.* कबरी.

Pigeon, *n.* कपोत, कलरव, झल्लकंठ, पारावत, बालवत्स; मूर्ख, सुवंचनीय । *vt.* प्रतॄ *c*, वंच् *c* । -hearted, *a.* कातर, भीरु । -hole, *n.* कपोतपाली; संपुट । -ry, *n* विटंक, कपोतपाली.

Pigment, *n.* रंग, वर्णद्रव्यं । -ation *n.* रंजनं.

Pike, *n.* कणप, कुंत, प्रास, शंकु *m*, शूल । -man, *n.* कौंतिक, -staff, *n.* कुंतदंड.

Pilar, *a.* केशविषयक.

Pilaster, *n.* चतुरस्रस्तंभ.

Pile, (1) उत्कर, निकर, पुंज, राशि *m*, संचय; चिता-त्या; अट्टालिका, महाहर्म्यं । *vt.* राशीकृ 8 U, संचि 5 U; भारं निविश् *c or* न्यस् 4 U.

Pile, (2) *n.* शंकु *m*; स्तंभ, स्थूणा.

Pile, (3) *n.* मृदुलोमन् *neu*, ऊर्णा.

Piles, *n. pl.* अर्शस् *neu*, अर्शोरोग, गुदांकुर.

Pilfer, *vt.* अल्पशः चुर् 10 U *or* मुष् 9 P । -age, *n.* स्तैन्यं । -er, *n.* चोर, स्तेन.

Pilgrim, *n.* तीर्थसेविन् *m*, तीर्थिक, यात्रिक । -age, *n.* तीर्थयात्रा, तीर्थाटनं.

Piliferous, *a.* लोमश, लोमावृत.

Pill, *n.* गुलिका, मोटक *mn*, वटिका.

Pillage, *n.* (वि॰)लुंठनं; लुंठितं, लोत्रं-प्त्रं। *vt.* (वि॰)लुंठ् 1 P. 10 U.

Pillar, *n.* मेठि-थि *m*, यूप, स्तंभ, स्थाणु *m*, स्थूणा; मूलाधार। *vt.* स्तंभैः धृ 10 U *or* अलंकृ 8 U.

Pillory, *n.* दंडयंत्रं। *vt.* निंदास्पदं कृ 8 U.

Pillow, *n.* उच्छीर्षं, उपधानं, उपबर्ह, उपबर्हणं, बालिशं, मसूरक। *vt.* उपबर्हे धृ 10 U.

Pilose, Pilous, *a.* लोमश, लोमावृत.

Pilot, *n.* नौकामार्गदर्शक; मार्गदर्शिन् *m*। *vt.* प्रणी 1 P.

Pilule, *n.* लघुगुलिका.

Pimp, *n.* कुंडाशिन् *m*, विट, संचारक.

Pimple, *n.* पिट(टि)का, वरंड(क), स्फोटक.

Pin, *n.* कील(क), कीलिका; शलाका; सूचि-ची *f*। *vt.* कीलकेन *or* सूच्या बंध् 9 P; व्यध् 4 P; दृढं ग्रह् 9 P। Not to care a p., सर्वथापि न गण् 10 U। To p. one's faith on, पूर्णविश्वासास्पदं कृ 8 U। -prick, *vt.* क्षुद्रपीडया बाध् 1 A.

Pincers, *n. pl.* कंकमुखं, संदंश, संदंशिका.

Pinch, *vt.* कूर्चेन संपीड् 10 U; दंश् 1 P; पीड् 10 U, बाध् 1 A; चुर् 10 U। *n.* कूर्चपीडनं; (नस्य॰) कूर्चः; क्लेश, पीडा; संकटं; द्वैधं। At a p., आकस्मिकप्रसंगे। -commons, -fist, -penny, *n.* अमुक्तहस्त, कदर्य, किंपचान, मितंपच। -ingly, *adv.* अमुक्तहस्तेन, कृपणत्वेन.

Pinchbeck, *n.* क्षुद्रकुप्यं। *a.* कृतक, कृत्रिम.

Pine, (1) *n.* देवदारु, द्रुकिलिमं, पारिभद्रं, पीतदारु, पूतिकाष्ठं, भद्रदारु, सुराह्वयं *all neu*, देवदारु, *m*, सरल। -apple, *n.* अननसं (modern).

Pine, (2) *vi.* अवसद् 1 P, क्लम् 1. 4 P, ग्लै 1 P, म्लै 1 P, शिथिलीभू 1 P; अतीव अभिलष् 1. 4. P, उत्कंठ् 1 A, भृशं वांछ् 1 P.

Pinfold, *n.* अवरोध.

Ping, *a.* टं(टां)कार.

Pinguid, *n.* पीन, पीवर, मेदुर; चिक्कण.

Pinion, *n.* पक्ष, पतत्रं, पत्रं। *vt.* बंधं 9 P; निग्रह् 9 P.

Pink, (1) *a.* पाटल, श्वेतरक्त। -y, *a.* ईषत्पाटल.

Pink, (2) *n.* परा काष्ठा *or* कोटि *f*; परमोत्कर्ष.

Pink, (3) *vi.* विध् 6 P, व्यध् 4 P.

Pinnace, *n.* लघुनौका.

Pinnacle, *n.* अग्रं, शिखरं, शृंगं ; परा काष्टा.

Pioneer, *n.* मार्गविधायिन् *m* ; मार्गदर्शक, अग्रगामिन् *m*, अग्रेसर ; नवप्रदेशख्यापक । *vt.* मार्गं विधा 3 U; मार्गं दृश् *c*, प्रणी 1 P.

Pious, *a.* ईश्वरनिष्ठ, भक्त ; धार्मिक, धर्मनिष्ठ ; पितृ०, मातृभक्त ; कर्तव्यनिष्ठ । P. fraud, दंभ, धर्मोपधा । -ly, *adv.* भक्त्या.

Pip, (1) *n.* बीजं ; बिंदु *m*.

Pip, (2) *n.* अस्वास्थ्यं, आमय । To get, have the p., विमनस्क *a.* भू 1 P, खिद्. 4 P ।

Pip, (3) *vi.* किलकिलायति-ते *Den.*

Pipe, *n.* नाडि-डी, नाडिका, नालि-ली *all f* ; नालिका, मुरली, वंश-शी, वेणु *m* । *vt.* वंशीं वद् *c or* ध्मा 1 P; उच्चैः वद् 1 P। To p. one's eye, रुद् 2 P । -r, *n.* वांशिक, वैणविक, वैणुक.

Piquant, *a.* तिग्म, तीक्ष्ण, तीव्र ; रुचिकर, सरस ; चित्ताकर्षक, मनोहर । Piquancy, *n.* तिग्मता, मनोहरत्वं, सरसता.

Pique, *vt.* प्रकुप्, व्यथ्, संतप् *all c*; मत्सरं *or* कौतूहलं उत्था *c*; आत्मानं श्लाघ् 1 A । *n.* अप्रीति *f*, अभ्यसूया, रोष.

Pirate, *n.* समुद्रतस्कर; तस्करनौका; ग्रंथचौर । *vt.* (वि०)लुंठ् 1 P. 10 U; (ग्रंथं) विनाधिकारं प्रकाश् *c* । Piracy, *n.* नौकालुंठनं.

Pirouette, *n.* चक्रनृत्यं.

Piscatory, *n.* मैनालविषयक.

Pisces, *n.* मीनराशि *m*.

Piscine, *a.* मत्स्यविषयक । Piscivorous, *a.* मत्स्यभक्षक.

Pish, *int.* धिक् *ind.*

Pismire, *n.* पिपीलिका, वम्री.

Piss, *vi.* मिह् 1 P, मूत्रयति *Den.*

Pistil *n.* स्त्रीकेसर *mn*.

Pistol, *n.* लघ्वग्न्यस्त्रं.

Pit, *n.* कुहरं, गर्त *mn*, पतेर, बिलं, विवरं; अवट, खातं, खेयं; व्रणच्छिद्रं । *vt.* विवरे निधा 3 U; व्रणच्छिद्रैः अंक् 10 U; स्पर्ध् *c* । -fall, *n.* उन्माथगर्त, अंधकूप.

Pitch, (1) *n.* तिंदु *m*, राल । *vt.* तिंदुना लिप् 6 P । -black, -dark, -y, *a.* अतिकृष्ण; अतितमिस्र.

Pitch, (2) *vt.* निधा 3 U, निविश् *c*, स्था *c*; अस् 4 P, प्राक्षिप् 6 P; (tell) कथ् 10 U । *vi.* अवतॄ 1 P, अवरुह् 1 P; अवपत् 1 P । *n.* स्थापनं ; प्रक्षेपणं ; अवपतनं, (परा) काष्टा, कोटि *f*; उद्रेक ; परिमाणं ; स्वर.

Pitcher, *n.* अलिंजर, करक, कलश-शं-शी, कुट *mn*, कुंभ, घट, निप, मणिक.

Piteous, Pitiable, *a.* घृणार्ह, करुण ; कष्टापन्न, दीन, दुःखार्त । Pitiful, *a.* दयार्द्र, दयालु, सानुकंप ; करुण, घृणार्ह ; क्षुद्र, तुच्छ,

निकृष्ट। Piteously, Pitiably, *adv.* करुणं, दीनं। Pitifully, *adv.* करुणं; (intensive of 'weak', etc.) अत्यंतं, अतीव। Pitiless, *a.* अदय, निर्घृण, निर्दय, निष्करुण, निष्ठुर, कठोर, क्रूर; –ly, *adv.* निर्घृणं, निर्दयं.

Pith, *n.* सार; तत्त्वं, सारांश; वीर्य, सत्त्वं; प्राबल्यं। –less, *a.* असार, निःसार, फल्गु; निर्बल। –y, *a.* अर्थपूर्ण, सारवत्; बलवत्.

Pittance, *n.* अत्यल्पवेतनं.

Pituitary, *a.* श्लेष्मस्राविन्.

Pity, *n.* अनुकंपा, अनुक्रोश, करुणा, कृपा, घृणा, दया; खेदकारणं। *vt.* अनुकंप् 1 A, दय् 1 A। To take p. on, दयां कृ 8 U। –ingly, *adv.* सानुकंपं.

Pityriasis, *n.* दारुणं.

Pivot, *n.* भ्रमणकेंद्रं, ०कीलक। *vi.* अवलंब् 1 A, अपेक्ष् 1 A.

Placable, *a.* प्रशमनीय, सांत्वनीय; क्षमाशील, सुप्रसाद्य; सौम्य.

Placard, *n.* ख्यापकपत्रिका। *vt.* ख्यापकपत्रिकाभिः प्रकाश् *c or* आच्छद् 10 U.

Placate, *vt.* उपशम् *c*, प्रशम् *c*, सांत्व् 10 U; अनुनी 1 P.

Place, *n.* स्थानं, स्थलं; धिष्ण्यं, प्रदेश, भूमि *f*, स्थली; आवसथ, निवास; (room) अवकाश, प्रसर; (rank) अधिकार, नियोगपदं; (lieu) स्थानं। *vt.* निधा 3 U, (वि°) न्यस् 4 U, स्था *c*; निक्षिप् 6 P; नियुज् 7 A. 10 U। In p., उचित, उपपन्न। In p. of, (अमुकस्य) स्थाने। Out of p., अस्थाने; अनुपपन्नं। To give p. to, प्रह्वीभू 1 P; स्थानं त्यज् 1 P; अवकाशं दा 3 U। To take p., समापद् 4 A, संपद् 4 A, संवृत् 1 A। To take the p. of, (अमुकस्य) स्थाने न्यस् *Pass*। In the first p., प्रथमं, प्रथमं तावत्.

Placenta, *n.* गर्भवेष्टनं.

Placet, *n.* अनुज्ञा, अनुमति *f*,

Placid, *a.* शांत, सौम्य; अक्षुब्ध, निराकुल, प्रसन्न। –ity, *n.* शांति *f*, सौम्यता; अक्षोभ.

Plafond, *n.* पटलं, वितानं.

Plagiarist, *n.* शब्दचोर, कुंभिल। Plagiarism, *n.* शब्दचौर्य। Plagiarize, *vi.* शब्दचौर्यं कृ 8 U.

Plagium, *n.* बलादपहरणं, नरापहरणं.

Plague, *n.* अनर्थ, उत्पात, उपप्लव; जनमार, महामारी, मार-री, मारिका; कंटक, पीडाकरणं। *vt.* क्लिश् 9 P, पीड् 10 U, संतप् *c*। –some (*also* Plaguy), *a.* पीडावह, संतापक.

Plaid, *n.* कंबल.

Plain, *a.* विशद, व्यक्त, स्पष्ट, स्फुट; सरल, सुगम, सुबोध; अनलंकृत, निर्भूषण; अनतिसुंदर; स्पष्टभाषिन्;

अकुटिल, ऋजु, निर्व्याज । *n.* समप्रदेश, ०भूमि *f,* ०स्थली । P. sailing, सुकरक्रम । -dealing, *n.* निष्कपटाचरणं। -ly, *adv.* स्पष्टं, स्फुटं; व्यक्तं; विनालंकारं । -spoken, *a.* स्पष्टोक्त; स्पष्टभाषिन्.

Plaint, *n.* अभियोग, भाषा, भाषापाद; परिदेवना, विलाप, शोक । -iff, *n.* अभियोक्तृ, अर्थिन्, वादिन्, शिरोवर्तिन् *all m* । -ive, *a.* खेदसूचक, दुःखवाचक, शोकार्थक; करुण; दीन; -ly, *adv.* करुणं, दीनं.

Plait, *n.* (Hair,) कबरी, कर्परी, धम्मिल्ल, वेणी; ऊर्मिका, पुट, भंगि-गी *f* । *vt.* वेणीकृ 8 U; संग्रंथ् 9 P, संसिव् 4 P; पुटयति *Den,* पुटीकृ 8 U, व्यावृत् *c.*

Plan, *n.* रूपरेखालेख्यं, सूत्रपात; उपाय, कल्पना, उद्देश, प्रयुक्ति *f,* प्रयोग, युक्ति *f* । *vt.* रूपरेखां आलिख् 6 P, सूत्रपातं कृ 8 U; (परि०, सं०)क्लृप् *c,* प्रयुज् 7 A. 10 U, संप्रधृ 10 U.

Plane, *a.* सम । *n.* (1) समक्षेत्रं, ०तलं ; (2) तक्षणी । *vt.* समीकृ, श्लक्ष्णीकृ *both* 8 U. तक्ष् 5 P.

Planet, *n.* खेचर, खेट, ग्रह, ज्योतिस् *neu.*, नभश्चर । Minor P. उपग्रह । P'.s aspect, दशा । P.'s orbit, कक्षा । P.'s motion गति *f,* चार । P.'s passage to another sign, संक्रमणं, संक्रांति *f.* । -arium *n.* ग्रहगतिदर्शकयंत्रं । -ary, *a.* ग्रहविषयक । -stricken, *a.* ग्रहपीडित.

Plangent, *a.* तारस्वर, घोषण । महास्वन, मुखर.

Planish, *vt.* द्रुघणेन समीकृ 8 U.

Plank, *n.* फलक *mn.*; कार्यक्रमभाग । *vt.* फलकैः आच्छद् 10 U. *or* सनाथीकृ 8 U ; निक्षिप् 6 P.

Plant, *n.* उद्भिज्ज, ओषधि *f.*, वृक्ष, शाक, शिग्रु *m.* हरितकं ; वंशज, वंश्य ; शिल्पयंत्रसामग्री ; कपटोपाय, प्रतारणा । *vt.* (आ) रुह् *c,* मूल् 10U ; निविश् *c,* स्था *c.* । -ation, *n.* रोपणं ; क्षेत्रं, वाटिका । -er. *n.* रोपक, रोपयितृ *m.*

Plantain, *n.* अंशुमत्फला, कदली, काष्ठीला, दीर्घपर्णी, रंभा, वारबुसा, तृषा ; कदलीफलं । P. of a dark kind, लंपा । P. with big fruit, माहेंद्री । P. with small fruit, मोचा, साष्टी.

Plantigrade, *a.* पादतलचारिन्.

Plaque, *n.* शिल्पितपट्ट *mn.*

Plash, *n.* कासार, जलाशय । *vt.* (1) (जलं) आस्फल् *c*; जले क्रीड् 1 P; (2) (शाखाः) संग्रंथ् 9 P । -y, *a.* अनूप-प्य, जलाढ्य.

Plasma, *n.* रुधिररस.

Plaster, *n.* चूर्ण *mn*; लेप, सुधा ; उपनाह, प्रलेपपट्टिका । *vt.* सुधया लिप् 6 P ; उपनह् 4 U । -er, *n.* पलगंड.

Plastic, *a.* घटक, मूर्तिसाधक; सुघटनीय; सुनम्य.

Plastron, *n.* उरःपट.

Plate, *n.* (धात्वादिकस्य) पट्ट *mn*, फलक *mn*; चित्रकाच; पात्रं, स्थाली; हेमरूप्यपात्राणि *pl.* । *vt.* धातुपट्टेन *or* धातुपत्रेण आच्छद् 10 U । Plating, *n.* धातुपटलं; धातुपत्रावरणं.

Plateau, *n.* अधित्यका.

Platform, *n.* पीठिका, मंच, वेदि *f*, वेदिका.

Platitude, *n.* नीरसता, सामान्यता; नीरसोक्ति *f* । Platitudinous, *a.* नीरस, सामान्य । Platitudinarian, *n.* नीरसोक्तिप्रिय.

Platoon, *n.* गुल्म *mn*.

Platter, *n.* स्थाली.

Plaudit, *n.* धन्यवाद, प्रशंसा.

Plausible *a.* आपातसत्य, सत्याभास । Plausibility, *n.* आपातसत्यता.

Plaustral, *a.* शाकट.

Play, *n.* केलि *f*, क्रीडा, खेलनं, लीला, विहार; देवनं, द्यूतं, द्यूतक्रीडा; नाटकं, भरतप्रयोग । *vi.* क्रीड् 1 P, खेल् 1 P, रम् 1 A, विहृ 1 P; अक्षैः क्रीड् 1 P, दिव् 4 P; वद् *c*; आचर् 1 P, चेष्ट् 1 A; अभिनयं कृ 8 U । *vt.* प्रवृत् *c*, व्यापृ *c*; कृ 8 U, विधा 3 U; वद् *c*; अभिनी 1 P, नट् 10 U । In p., लीलया । P.ed out, क्षीण, श्रांत । P. on words, श्लेष । To p. false, विश्वासघातं कृ 8 U । To p. fast and loose, अस्थिरं *or* विवेकशून्यं वृत् 1 A । To p. the game, निष्कपटं आचर् 1 P । -day, *n.* अनध्याय०, उत्सवदिनं, पर्वन् *neu* । -er, *n.* क्रीडक; नट, पात्रं । -fellow, *n.* सहक्रीडक, सहविहारिन् *m* । -ful, *a.* क्रीडाप्रिय, लीलापर, विलासिन्; -ly, *adv.* लीलया । -house, *n.* नाटक०, रंगशाला । -wright, *n.* नाटककार.

Plea, *n.* उत्तरं, उत्तरपाद; व्यपदेश; क्षमायाचना । -d, *vi.* उत्तरं दा 3 U; स्वपक्षं समर्थ् 10 U; परपक्षं विरुध् 7 U; (अर्थिनः) पक्षं प्रतिपद् *c*; क्षमां याच् 1 A । *vt.* उपपत्त्या समर्थ् 10 U; व्यपदेशार्थं *or* क्षमार्थं उपन्यस् 4 U *or* उपक्षिप् 6 P. । To p. guilty, not g., दोषारोपं अंगीकृ 8 U, निराकृ 8 U । To p. with, अनुनी 1 P, -der, *n.* अभिभाषक, व्यवहारदर्शक । -ding, *n.* उत्तरवाद; प्रार्थना, याचना.

Pleach, *vt.* गुंफ् 6 P, (सं°)ग्रंथ् 9 P.

Please, *vt.* आनंद् *c*, आह्लाद् *c*, तुष् *c*, तृप् 10 U, प्रसद् *c*, प्री 1.9 U, (प्र०) मुद् *c*, सुखयति *Den*, हृष् *c* । *vi.* इष् *Pass*, रुच् 1 A । If you p., यदि रोचते

भवते । Pleasing, Pleasant, *a.* आनंदक, आह्लादक, चारु, चेतोहर, प्रिय, मनोरम, मोदजनक, रमणीय, रम्य, रुचिर, सुखकर, हर्षप्रद ; -ly, *adv.* सुखं, सुष्ठु । Pleasance, *n.* आराम, केलिवनं, क्रीडोद्यानं, प्रमदवनं । Pleasantry, *n.* क्ष्वेला, नर्मन् *neu*, नर्मालाप, नर्मोक्ति *f*, विनोद.

Pleasure, *n.* आनंद, आह्लाद, तुष्टि *f.* प्रमोद , संतोष, सुखं, हर्ष ; (उप०, सं०)भोग ; अभिलाष, इच्छा, ईहा, कामना, रुचि *f* । -boat, *n.* क्रीडानौका । -ground, *n.* केलिवनं *etc. See* 'Pleasance' Pleasurable, *a.* आनंदक, तुष्टिकर, रुचिर, सुखप्रद ; चारु, रम्य.

Pleat, *n.* पुट, भंग, वलि *f* । *vt.* पुटयति *Den.* पुटीकृ 8 U.

Plebeian, *a.* प्राकृत, साधारण, सामान्य । *n.* प्राकृतजन.

Plebiscite, *n.* जनतामतप्रकाशनं.

Plectrum, *n.* तंत्रिघर्षणी.

Pledge, *n.* आधानं, आधि *m.*, उपनिधि *m*, औपनिधिकं, निक्षेप, न्यास, बंधक ; पण ; समय ; अभिज्ञानं । *vt.* आधीकृ 8 U, निक्षिप् 6 P, न्यस् 4 U ; प्रतिज्ञा 9 U, प्रतिश्रु 5 P । -d, *a.* (word) कृतप्रतिज्ञ, प्रतिज्ञाबद्ध.

Pleiades, *n.pl.* कृत्तिकाः *pl.*

Plenary, *a.* (सं०) पूर्ण, सकल, समग्र, ऐकांतिक.

Plenilune, *n.* चंद्रमातृ *f.*, निरंजना, पित्र्या, पू(पौ)र्णमासी, पूर्णा, पूर्णिमा(का).

Plenipotentiary, *a.* पूर्णसामर्थ्यसंपन्न ; ऐकांतिक । *n.* राजप्रतिनिधि *m.*

Plenitude, *n.* पूर्णता, सामग्र्यं ; बाहुल्यं, वैपुल्यं.

Plenty, *n.* प्राचुर्यं, बाहुल्यं, भूयस्त्वं, विपुलता, वैपुल्यं, समृद्धि *f* Plenteous, Plentiful (*also* Plenty) *a.* अधिक, पुष्कल, प्रचुर, प्रभूत, प्राज्य, बहुल, भूयिष्ठ, भूरि, विपुल ; -ly *adv.* बहुशः, भूरि, भृशं, विपुलं.

Pleonasm, *n.* शब्दाधिक्यं, पौनरुक्तं (क्त्यं)। Pleonastic, *a.* उद्वृत, व्यर्थशब्दबृंहित.

Pleroma *n.* बाहुल्यं, वैपुल्यं; परमात्मन् *m.*

Plethora *n.* अतिरेक, अतिशय, आधिक्यं, उत्सेक, उद्रेक; रुधिरोद्रेक। Plethoric, *a.* अतिमांसल ; रक्तोत्सेकिन्.

Pleura, *n.* पुप्फुसवेष्टनं। Pleurisy *n.* फुप्फुसवेष्टनपाक ; पार्श्वशूलं.

Plexus, *n.* शिराजालं.

Pliable , Pliant, *a.* आयम्य, कुंचनीय, नम्य ; वश्य, विधेय, सुखनम्य । Pliability, Pliancy, *n.* नम्यता ; वश्यता.

Plicate, *a.* पुटीभूत.

Pliers, *n. pl.* कंकमुखं, संदंश, संदंशिका.

Plight, *vt.* (1) प्रतिज्ञा 9 U, प्रतिश्रु 5 P । *n.* प्रतिज्ञा, समय.

Plight (2) *n.* अवस्था, गति, दशा, स्थिति *all f.* । Sorry p. दुर्दशा; कष्टं, कृच्छ्रं.

Plinth, *n.* स्तंभ°, भित्तिमूलं.

Plod, *vi.* सायासं गम् 1 P *or* चल् 1 P; दीर्घं आयस् 4 P *or* श्रम् 4 P; दीर्घश्रमेण अधी 2 A *or* पठ् 1 P । *n.* सायासगमनं; दुष्करकार्यं । -der, *n.* दीर्घोद्योगिन् *m* । -dingly, *adv.* सायासं, दीर्घश्रमेण.

Plop, *n.* मज्जनध्वनि *m* । *adv.* अकस्मात्, सहसा । *vi.* (जले) सहसा पत् 1 P.

Plot, *n.* स्थलं-ली; उपाय, युक्ति *f*; कपटयोजना, कूटोपाय; वस्तु *neu*, संविधानकं । *vt.* कपटेन क्लृप् *c or* घट् *c* । *vi.* उपजप् 1 P, कूटं रच् 10 U; द्रुह् 4 P । -ter, *n.* उपजापक, कूटघटक, संशप्तक.

Plough, *n.* गोदारणं, लांगलं, सीर(क), हलं, हलि *m*, हाल । *vt.* कृष् 1 P. 6 U, हल् 1 P; परीक्षायां प्रत्याचक्ष् 2 A । To p. the sands, वृथायासं कृ 8 U । Shaft of p., ईषा, हलीषा । Furrow of p., फालरेखा, लांगलपद्धति *f*, सीता । -land, *n.* फालकृष्टं, सीत्यं, हल्यं । -man, *n.* कृषाण, कृषिक, लांगलिन् *m*, सैरिक, हालिक । -share, *n.* कृषक, निरीष *mn*, फाल.

Pluck, *vt.* उत्कृष् 1 P, उद्धृ 1 P; सहसा आकृष् 1 P; (पिच्छानि) उत्पट् *c or* लू 9 U; प्रतॄ *c*, वंच् *c*; परीक्षायां प्रत्याचक्ष् 2 A । *n.* आकर्षणं; धैर्यं, प्रगल्भता, साहसं । To have a crow to p., छिद्रं *or* दोषं आन्विष् 4 P । To p. up heart, पुनः धैर्यं अवलंब् 1 A । -less, *a.* कातर, धैर्यहीन, भीरु । -y, *a.* धृष्ट, निर्भय, शूर, साहसिक.

Plug, *n.* रोधनी, स्तंभनी; कीलक *mn* । *vt.* स्तंभ् 9 P.

Plum, *n.* बदरं; (tree) कर्कंधू *f*, बदरिका, बदरी; उत्तमांश । -my, *a.* बदरपूर्ण; मिष्ट, सुरस, स्वादु.

Plumage, *n.* पिच्छानि *pl*, पिच्छकलाप, °भार.

Plumassier, *n.* पिच्छविक्रेतृ *m*.

Plumb, *n.* लंबक । *a.* लंबरूप; ऋजु, सरल । *vt.* लंबकेन *or* सूत्रेण समाधा 3 U *or* समायुज् 7 U; जलवेधं *or* निम्नतां परिमा 2 P. 3 A । -less, *a.* अगाध, अतलस्पर्श । -line, *n.* (लंब) सूत्रं.

Plumbean, Plumbeous, *a.* सीसमय; सीसोपम; जड, मंद.

Plumber, *n.* जलप्रणालीशिल्पिन् *m*.

Plume, *n.* पक्ष, पर्णं, पिच्छं; चूडालंकार । *vt.* आत्मानं *or* निजपिच्छभारं प्रसाध् *c*; आत्मानं श्लाघ् 1 A । Borrowed p.s, अन्याय्यप्रतिष्ठा । Plumose, *a.* पिच्छोपम; सपिच्छ । Plumy, *a.* पिच्छावृत.

Plummet, *n.* लंबक, लंबसीसकं.

Plump, (1) *a.* पीन, पीवर, मांसल, मेदुर, स्थूल। *vt.* पीवरीकृ 8 U, स्फाय् *c*। *vi.* आप्यै 1 A। –ness, *n.* पीवरता, मेदुरता। –y, *a.* ईषत्पीन.

Plump, (2) *vi.* सहसा पत् 1 P; एकांतेनैव अनुग्रह 9 U *or* अनुमन् 4 U। *vt.* सहसा निक्षिप् 6 P। *adv.* सहसैव; स्पष्टं। –er, *n.* एकांतानुमानिन् *m*; अनृतमात्रं.

Plunder, *vt.* (वि०) लुंठ् 1 P. 10 U; बलात् *or* कपटेन अपहृ 1 P। *n.* लुंठनं, लुंठितं, लोप्त्रं। –er, *n.* विलुंठक.

Plunge, *vt.* (जलादिके) अवगाह् *c or* निमस्ज् *c*; व्यध् 4 P, निविश् *c*। *vi.* अवगाह् 1 A, निमस्ज् 6 P; सहसा प्रविश् 6 P *or* प्राप् 5 P। *n.* आप्लव, निमज्जनं; आकस्मिकचलनं; अतिसाहसं.

Pluperfect, *a.* भूतातीत० *or* भूतसमाप्तकाल० *or* ०कर्मवाचक.

Plural, *a.* एकाधिक, अनेक, बहु; बहुवाचक। *n.* अनेक०, बहुवचनं। –ism, *n.* बहुत्वं; परमतत्त्वानेकतावाद। –ity, *n.* अनेकत्वं, बहुत्वं; भूयिष्ठसंख्या.

Plus, *n.* धनं, धनचिह्नं। *a.* अधिक *in comp.*

Plutarchy, Plutocracy, *n.* धनिकप्राधान्यं, ०राज्यं। Plutocrat, *n.* धनसत्ताधिकारिन् *m.*

Plutonian, *a.* नारक; आंतर्भौम.

Pluvial, *a.* प्रावृषिक; वृष्टिपूर्ण; आर्द्र, क्लिन्न.

Ply, (1) *n.* पुट, भंग; ग्रथितसूत्रं.

Ply, (2) *vt.* चिरं व्यापृ *c or* प्रयुज् 7 A. 10 U; दृढं चल् *c*; प्रवृत् *c*, निर्वह् *c*; उपपद् *c*, दा 3 U। *vi.* सततं गतागतं कृ 8 U; व्यापृ 6 A.

Pneuma, *n.* प्राण; आत्मन् *m.*

Pneumatic, *a.* वायुविषयक, वायव; वायुप्रेरित.

Pneumonia, *n.* पुप्फुसपाक.

Poach, (1) *vt.* पच् 1 P.

Poach, (2) *vi.* विनानुज्ञां अतिक्रम् 1 U. 4 P *or* उल्लंघ् 1 A. 10 P। *vt.* कपटेन ग्रह् 9 P। –er, *n.* कूटग्राहिन् *m.*। –y, *a.* अनूप; आर्द्रमृदु.

Pock, *n.* पिटिका। –mark, *n.* पिटिकाव्रण, ०चिह्नं.

Pocket, *n.* कोश-ष। *vt.* कोशे निधा 3 U *or* निविश् *c*; कपटेन आत्मसात्कृ 8 U; (अवमानं) तितिक्षते *Den or* सह् 1 A.

Poculiform, *a.* चषकाकार.

Pod, *n.* बीजकोश, ०पुट.

Podagra, *n.* वातगुल्म, वातरक्तं। –l, (*also* Podagric, Podagrous), *a.* वातग्रस्त.

Podal, *a.* पादविषयक.

Podge, *n.* पीनवामन। Podgy, *a.* पीनखर्व.

Poem, *n.* काव्यं, काव्यप्रबंध.

Poephagous, *a.* तृणभक्षक.

Poesy, *n.* काव्यशास्त्रं ; कविता, काव्यसंग्रह.

Poet, *n.* कवि *m.*, काव्यकृत् *m*। -aster, *n.* कुकवि *m*। -ic, -ical, *a.* काव्यमय, ०पूर्ण, काव्यात्मक, काव्योचित ; पद्यमय, वृत्तबद्ध। -ics, *n. pl.* साहित्यं, काव्यशास्त्रं, काव्यानुशासनं। -icule, *n*, कुकवि *m.*। -ize, *vi.* काव्यं रच् 10 U। -ry, *n.* कविता, काव्यं ; पद्यं; काव्यसंग्रह; प्रतिभोत्तेजकगुण.

Pogrom *a.* उपप्लव, बृहद्धत्या.

Poignant, *a.* तीक्ष्ण, तीव्र, प्रखर ; अरुंतुद, मर्मभेदिन् ; हृदयंगम।

Poignancy, *n.* तीव्रता ; अरुंतुदत्वं.

Point, *n.* बिंदु *m.*, अंक, चिह्नं ; अग्रं, आणि *m*, कोटि-टी *f*; (cape) अंतरीप, भूशिरस् *neu*; (of compass) आशा, ककुभ् *f.* दिशा ; प्रकरणं, विषय; समवस्था, स्थिति *f.*; काल, प्रसंग, समय; (mark) गुण ; विशेष ; अभिप्राय, अर्थ, आशय। *vt.* उत्तिज् *c.*, क्ष्णु 2 P, तीक्ष्णीकृ 8 U., निशो 4 P. ; बिंदुभिः *or* चिह्नैः अंक् 10 U ; उद्दिश् 6 P, दृश् *c*, निर्दिश् 6 P; अभिसंधा 3 U., लक्षीकृ 8 U। *vi.* उद्देशं *or* निर्देशं कृ 8 U। At all p.s, समंततः, समग्रतः। At, on the p. of, आसन्न०, उन्मुख *in comp.*। In P., to the P., उपपन्न, प्रस्तुत, प्रास्ताविक। P. at issue, विवादपदं, ०विषय। P. of view, मतभेद, दृष्टिविशेष। To make a p. of, गुर्वर्थकमिव मन् 4 A। To come to the P., प्रस्तुतं अनुसंधा 3 U। -blank, *adv.* ऋजुतया, सरलं। -ed, *a.* साग्र; तीक्ष्णाग्र, निशित; मर्मभेदिन् ; स्पष्टवादिन्; -ly, *adv.* स्पष्टं, स्पष्टोद्देशेन। -er, *n.* दर्शक। -less, *a.* निरग्र ; अतीक्ष्ण; कुंठित, मुंड ; अनुपपन्न , अप्रस्तुत.

Poise, *vt.* तुल् 10 U ; विचर् *c*। *vi.* तुल् *Pass* ; (आकाशे) डयमान *a.* *or* परिभ्रमत् *a.* स्था 1 P। *n.* समतोलनं, समभारता ; समवृत्ति *f* ; अंगसौष्ठवं.

Poison, *n.* क्ष्वेड, गर *mn*, गरल *mn.* जांगुलं, विषं ; (a particularly deadly p.) कालकूटं, हालाहलं। *vt.* विषेण दिह् 2 U *or* संमिश्र् 10 U ; विषं पा *c*; विषप्रयोगेण हन् *c* ; अतीव कलुषीकृ 8 U *or* दुष् *c*। -ous, *a.* विषमय, विषाक्त, सगर ; घातुक.

Poitrel, *n.* (अश्वस्य) उरस्त्राणं.

Poke, (1) *n.* प्रसेव, स्यूत। A pig in a p., अदृष्टवस्तुक्रय.

Poke, (2) *vt.* (तीक्ष्णाग्रवस्तुना) निष्पीड् 10 U ; उत्तिज् *c*, प्रज्वल्

c; व्यध् 4 P । *vi.* अन्वेषणं कृ 8 U; कालक्षेपं कृ 8 U । *n.* निष्पीडनं; आघात । -r, *n.* अंगारशलाका । Poky, *a.* अविस्तीर्ण, संकुचित, संबाध; क्षुद्र, तुच्छ; मलिन.

Polar, *a.* ध्रुवविषयक; ध्रुवस्थ; अतिविपरीत; मार्गदर्शक.

Pole, (1) *n.* ध्रुव, ध्रुवक । P. -star, *n.* औत्तानपाद-दि *m*, ज्योतीरथ, ध्रुवतारा.

Pole, (2) *n.* दंड, यष्टि *f*; (of vehicle) धुर् *f*, धुर्वी । *vt.* दंडेन *or* दंडैः सनाथीकृ 8 U *or* प्रेर् *c.*

Pole-axe, *n.* परशु *m*, परश्वध.

Pole-cat, *n.* गंधमार्जार.

Polemic, *n.* वाद, विवाद; (*pl.*) वादविद्या, वादानुवाद । *a.* (*also* -al), विवादात्मक; वादविषयक वादकुशल, ०प्रिय.

Red, *a*. कषाय, फल्गुन, रक्त, रोहित,लोहित शोण, शोणित; सर्वसत्ताद्रोहिन् । *n*.रक्तवर्ण; सर्वशासनद्वेषिन्, क्रांतिकार (modern) । -den, *vt*. रक्तीकृ 8 U; *vi*. लोहितायते *Den* । -dish, *a*. आरक्त ईषद्रक्त । -handed, *a*. अस्तग्लिप्तहस्त; कृत्ये निर्वर्त्यमाने एव । To draw a r. herring across the track, अप्रस्तुतविवादेन संभ्रम् *c* । -hot, *a*. उत्तप्त; अतिसंक्षुब्ध । R. lead, *n*. नागोद्भवं, सिंदूरं । R. -letter day, मंगलदिनं, चिरस्मरणीयदिनं । -ness, *n*. रक्तिमन् *m*, लौहित्यं । R. rag. क्रोधकारणं । R. sanders, रक्तचंदनं रंजनं·

Redact, *vt*. प्रकाशनार्थं शुध् *c or* संपद् *c or* परिष्कृ 8 U । -ion, *n* परिष्करणं, संशोधनं, संपादनं, संस्करणं; संशोधितावृत्ति *f* । -or, *n*. संस्कर्तृ *m*.

Redeem, *vt*. पुनः क्री 9 U; निष्क्री 9 U, परिक्री 9 A; निस्तॄ *c*, प्रत्यादा 3 A, उपनी 1 P, मूल्यदानेन मुच् 6 P. *c*; मोक्ष् 10 U, उद्धृ 1 P; पूर् 10 U, संपद् *c*; (प्रायश्चित्तादिकेन) परिशुध् *c*, निष्कृतिं कृ 8 U.

Redemption, *n*. उद्धार, तारणं, मुक्ति *f*, मोक्ष; निष्कृति *f*, निस्तार; निष्क्रय, परिक्रय

Redintegrate, *vt*. पुनः समग्रं *or* संपूर्णं *a*. कृ 8 U.

Redolent, *a*. उत्कटगंध; सुरभि; सूचक, स्मारक। Redolence, *n*. उत्कटगंध *m*; सौरभ्यं.

Redouble, *vt*. (पुनः) द्विगुणीकृ 8 U; (पुनः) एध् *c* वृध् *c* । *vi*. द्विगुणीभू 1 P; (पुनः) वृध् 1 A.

Redoubt, *n*. दुर्गपिंडल·

Redoubtable, *a*. भयावह, भीम; भीषण; दुर्धर्ष; वीर शूर·

Redound, *vt*. आवह् 1 P, कॢप् 1 A, संपद् *c*, साध् *c*; परिणम् 1 P; प्रतिक्रमेण व्यवहृ 1 P.

Redress, *vt*. प्रतिसमाधा 3 U; प्रतिविधा 3 U; निर्यत् 10 U । -ment, *n*. प्रतिसमाधानं·

Reduce, *vt*. (पूर्वस्थितिं) प्रत्यानी 1 P; परिवृत् *c* ०सात् कृ 8 U; (conquer) अभिभू 1 P, पराजि 1 A, पराभू 1 P; अल्पीकृ 8 U, न्यूनीकृ 8 U, लघयति *Den*; अवनम *c*, लघूकृ 8 U; अवसद् *c* । Reducible, *a*. परिवर्तनीय; ह्रसनीय । Reduction, *n*. प्रत्या-

नयनं; परिवर्तनं; पराजय; अपचय, ह्रास.

Redundant, *a.* अतिरिक्त, उद्रिक्त, उद्वर्त; प्रयोजनातिरिक्त, पुनरुक्त। Redundance, -cy, *n.* अतिरेक, उद्रेक, उद्वर्त; पौनरुक्त्यं.

Reduplicate, *vt.* द्विगुणीकृ 8 U; (Grammar) आम्रेडयति *Den*, अभ्यस् 4 P। -ion, *n.* आम्रेडनं, आम्रेडितं, द्विरुक्ति *f* । -ive, *a.* आम्रेडित, द्विरुक्त.

Re-echo, *vi.* पुनः प्रतिध्वन् 1 P *or* प्रतिनद् 1 P। *vt. c of prec.*

Reed, *n.* अंबुवेतस, नड(ल), पारिव्याध, पोटगल, भीरुबाल, वंजुल, वानीर, वेणु *m*, वेतस, वेत्र; (pipe) वंशी, वेणु *m*; ध्वनिनालिका; (pen) कलम । *vt.* वेतसैः सनाथीकृ 8 U। -y, *a.* नडिल, नड्वल; तार, तीव्र.

Reef, (1) *n.* ईषन्निमग्ना शिलापंक्ति *f*.

Reef, (2) *n.* वातवस्त्रविशेष.

Reek, *n.* धूम, बाष्प; दुर्गंध । *vi.* धूमं *or* बाष्पं *or* दुर्गंधं उद्गॄ 6 P *or* उद्वम् 1 P। -y, *a.* धूम्र; बाष्पमय; दुर्गंध.

Reel, (1) *n.* आवापनं; कपालनालिका, तंतुकील। *vt.* आवापने उपसंहृ 1 P; आवापनात् मुच् *c*। To r. off, स्खलनं विना कथ् 10 U.

Reel, (2) *vi.* घूर्ण् 1 A. 6 P, प्रस्खल् 1 P, भ्रम् 4 P, विचल् 1 P; भ्रामरेण पीड् *Pass*। *n.* प्रस्खलनं; भ्रामरं। -ingly, *adv.* प्रस्खलनपूर्वकं.

Refect, *vt.* भोजनेन विश्रम् *c or* सुखयति *Den*। -ion, *n.* अल्पाहार, उपाहार । -ory, *n.* भोजनशाला.

Refer, *vt.* (कारणमिव) अभिसंबंध् 9 P, उद्दिश् 6 P; (to person) ख्या *c*, दृश् *c*; आसंज् *c*; निर्दिश् 6 P. *c*; (कोशादिके) आलोच् 10 U। *vi.* (बोधार्थं) प्रच्छ् 6 P, आलोच् 10 U; उपन्यस् 4 P; प्रमाणीकृ 8 U, उद्दिश् 6 P, संबंध् *Pass*। -ee, *n.* प्रमाणपुरुष, मध्यस्थ । -ence, *n.* उद्देश; निवेदनं, विमर्शार्पणं; संबंध, संपर्क; उल्लेख, निर्देश; (ग्रंथे) आलोचनं; r. book, कोशग्रंथ। -endum, *n.* जनताविमर्शार्पणं.

Refine, *vt.* (वि०)शुध् *c*, उपस्कृ, संस्कृ 8 U; विनी 1 P, शिक्ष् *c*; सूक्ष्मं *a.* कृ 8 U । *vi.* (वि०) शुध् 4 P, विमलीभू 1 P; सूक्ष्मविवेकं कृ 8 U। -d, *a.* (वि०) शुद्ध, शोधित; प्रबुद्ध, ललित, विदग्ध, शिष्ट, संस्कृत। -ment, *n.* शोधनं, संस्कार; विशुद्धि *f*; शिष्टता, संस्कृति *f*; लालित्यं, विनय; सूक्ष्मविवेक। -r, *n.* शोधयितृ *m*.

Refit, *vt.* पुनः सज्जीकृ 8 U *or* उपक्लृप् *c*; प्रतिसमाधा 3 U, संधा 3 U.

Reflect, *vt.* परावृत् *c*, प्रतिक्षिप् 6 P, प्रतिबिंबयति *Den*, प्रत्यावृत् *c*; सदृश *a.* दृश् *Pass or* प्रतिभा 2 P; (कीर्त्या, अपकीर्त्या) उपसृज् 6 P, आसंज् *c*, संबंध् 9 P। *vi.* चिंत् 10 U, ध्यै 1 P, भू *c*, विचर् *c*, विमृश् 6 P, संप्रध् 10 U। To r. on, निंदास्पदं कृ 8 U। -ingly, *a.* साधिक्षेपं। -ion, (*also* Reflexion,) *n.* परावर्तनं, प्रतिक्षेप, प्रतिफलनं, प्रतिबिंबनं; छाया, प्रतिच्छाया, प्रतिफलं, प्रतिमा, प्रतिमूर्ति, *f*, प्रतिरूपं; चिंतनं, चिंता, ध्यानं, विचार, विमर्श; अधिक्षेप, निंदा। -ive, *a.* प्रतिबिंबक, परावर्तक; ध्यानपर, विचारपूर्ण; -ly, *adv.* विचारपूर्वकं। -or, *n.* प्रतिक्षेपक, मुकुर.

Reflex, *a.* प्रत्यावर्तित; अंतर्ध्यायिन्; स्वयंप्रवृत्त। *n.* प्रतिच्छाया, प्रतिरूपं; (स्वयंप्रवृत्तं) असंकल्पितचेष्टनं। -ive, *a.* कर्तृकर्म०, स्वकर्मवाचक.

Refluent, *a.* परावर्तिन्। Reflux, *n.* प्रत्यपसरणं, परावर्तनं.

Reform, *vt.* साधीयसं *a. or* दोषरहितं *a.* कृ 8 U, शुध् *c*, समाधा 3 U। *vi.* उत्पथात् *or* दुराचारात् परावृत् 1 A *or* विरम् 1 P। *n.* (*also* -ation,) गुणवर्धनं, दोषहरणं, प्रतिसमाधानं, शोधनं। -ative, -ory, *a.* दोषहारिन्, संशोधक। -atory, *n.* बालसंशोधनशाला। -er, *n.* दोषहारिन् *m*, संशोधक.

Refract, *vt.* (किरणं) वक्रीकृ 8 U, ऋजुमार्गात् च्यु *c or* व्यावृत् *c*। -ion, *n.* वक्रीभवनं.

Refractory, *a.* दुराग्रह, प्रतिनिविष्ट, प्रतीप; अवश्य, अविनेय, दुर्दम; दुश्चिकित्स्य.

Refrain, (1) *n.* ध्रुवक, ध्रुवपदं.

Refrain, (2) *vt.* निग्रह् 9 P, नियम् 1 P, निवृ *c*। *vi.* निवृत् 1 A, परिहृ 1 P, विरम् 1 P, वृज् 10 U.

Refresh, *vt.* (पुनः) आह्लाद् *c*, उत्सहृ *c*, उल्लस् *c*, नवीकृ 8 U; विश्रम् *c*, सुखयति *Den*; शीतलयति *Den*; (स्मृतिं) प्रबुध् *c*। -er, *n.* पानं। -ing, *a.* आह्लादक, उत्साहवर्धक, श्रमहारिन्, सुखप्रद। -ment, *n.* आह्लादनं, विश्रांति *f*, श्रमहरणं; उपाहार.

Refrigerate, *vt.* शीतलीकृ 8 U; घनीकृ 8 U, श्यै *c*, संहन् 2 P। -ion, *n.* शीतलीकरणं, शीतलता। Refrigerant, *a.* तापहारिन्। Refrigerator, *n.* शीतकारकयंत्रं.

Refuge, *n.* आश्रय, गति *f*, शरणं; आश्रयस्थानं; शरण्य; उपाय। House of r., दीनाश्रय। -e, *n.* त्यक्तदेश; शरणागत.

Refulgent, *a.* उज्ज्वल, देदीप्यमान, भासुर, भास्वत्, भ्राजमान। Refulgence, *n.* औज्ज्वल्यं, अतिद्युति *f.*

Refund, *vt.* प्रतिदा 3 U, प्रत्यृ *c.*

Refuse, *vt.* अपाकृ, निराकृ 8 U, न अंगीकृ 8 U *or* ग्रह् 9 P, प्रत्याख्या 2 P, प्रत्यादिश् 6 P, विहन् 2 P। *vi.* निराकरणं *or* प्रत्याख्यानं प्रकटयति *Den*। *a.* परित्यक्त; उच्छिष्ट; तुच्छ, निरर्थक। *n.* परित्यक्तशेष, उच्छिष्टं। Refusal, *n.* निराकरणं, निषेध, प्रत्याख्यानं.

Refute, *vt.* अप्रमाणीकृ 8 U, खंड् 10 U, निरस् 4 U, निराकृ 8 U, प्रतिक्षिप् 6 P, प्रत्याख्या 2 P, बाधृ 1 A। Refutable, *a.* खंडनार्ह, प्रत्याख्येय। Refutal, Refutation, *n.* खंडनं, निरसनं, निराकरणं, निरास, प्रत्याख्यानं। Refutatory, *a.* खंडनात्मक, बाधक.

Regain, *vt.* पुनः प्राप् 5 P *or* लभ् 1 A *or* समासद् *c.*

Regal, *a.* राजकीय; राजयोग्य। -ia, *n. pl.* राजचिह्नानि *pl.*, राज्याभिषेकसज्जा, राजोपकरणानि *pl.*। -ity, *n.* राजत्वं, राजपदं, राजाधिकार, राज्यं.

Regale, *vt.* भृशं *or* सम्यक् रंज् *c or* विनुद् *or* संतृप् *c*; आनंद् *c*; आह्लाद् *c*, प्रमुद् *c*। *vi.* (oneself) सम्यक् भुज् 7 U। -ment, *n.* संतर्पणं, आनंदनं; भोजनोत्सव.

Regard, *vt.* अवलोक् 1 A. 10 U, आलोच् 10 U, निरीक्ष् 1 A; अवधा 3 U, आदृ 6 A, पा *c*, भज् 1 U, विमृश् 6 P, मह् 10 U, संमन् *c*, सेव् 1 A; अवधृ 10 U, गण् 10 U, चिंत् 10 U, मन् 4 A; उद्दिश् 6 P, संबंध् 9 P। *n.* निरीक्षणं, स्थिरदृष्टि *f*; अवधानं, विमर्श; आदर; विषय। As r.s, with, in r. to, अपेक्षया, अपेक्ष्य, उद्दिश्य। -ful, *a.* सावधान, अप्रमत्त। -ing, *prep.* विषये *with Gen.*; उद्दिश्य। -less, *a.* अनवधान, अविमर्शिन्, निरपेक्ष, उपेक्षक.

Regatta, *n.* नौकास्पर्धा.

Regency, *n.* राजप्रतिनिध्यधिकार; आधिपत्यं.

Regenerate, *vt.* साकल्येन निर्दोष *a.* कृ 8 U *or* शुध् *c*; पुनः उत्सह् *c*, उद्धृ 1 P; पुनः जन् *c*। -ion, *n.* उद्धार; पावनं; पुनर्जन्मन् *neu.*। -ive, *a.* उद्धारक.

Regenesis, *n.* पुनर्जन्मन् *neu*, पुनरुत्पत्ति *f.*

Regent, *n.* राजप्रतिनिधि *m*, राजाधिकारधारिन् *m*; अधिपति *m*, ०नाथ, ०पाल *in comp.*

Regicide, *n.* राजहत्या; राजघातक.

Regime, *n.* शासनं; राज्यतंत्रं.

Regimen, *n.* पथ्यापथ्यनियम; राजतंत्रं.

Regiment, *n.* सैन्यगुल्मं, ०दलं। *vt.* वर्गीकृ 8 U। -als, *n. pl.* सैनिकवेष.

Region, *n.* देश, प्रदेश, विषय। The infernal, lower, *or* nether r.s, नरक, निरय। The upper r.s, अंतरिक्षं, नभस् *neu*। -al, *a.* प्रादेशिक.

Register, *n.* लेख, लेख्यं; गणनापत्रं, सूची; स्वरग्राम। *vt.* लेखे निविश् *c*, गणनापत्रे *or* सूच्यां लिख् 6 P; दृश् *c*। Registrar, *n.* लेखक, लेखाधिकारिन् *m*। Registration, *n.* गणनापत्रे लेखनं। Registry, *n.* लेखशाला.

Regnal, *a.* राज्यविषयक.

Regnant, *a.* राज्याधिकारिन्, शासक.

Regorge, *vt.* उद्गृ 6 P, उद्वम् 1 P; पुनः निगॄ 6 P.

Regress, *n.* प्रतिगमनं, परावर्तनं; प्रतिगमनमार्ग। *vi.* प्रतिगम् 1 P, परावृत् 1 A। -ion, *n.* प्रत्यावर्तनं; (पूर्वरूपस्य) पुनःप्रतिपत्ति *f*.

Regret, *vt.* (अमुकाविरहेण) अनुतप् *Pass*, पीड् *Pass*; अनुशुच् 1 P, परिदेव् 1 P; अनुशी 2 A। *vi.* अनुतापं प्राप् 5 P। *n.* अनुताप, अनुशय, अनुशोक; उद्वेग, खेद। -ful, *a.* अनुतप्त, अनुशयिन्, उद्विग्न। -table, *a.* अनुतापकारिन्, अनुशोचनीय.

Regular, *a.* नियमानुसारिन्, नियत, नैयमिक; यथाक्रम; व्यवस्थित; अविकारिन्, एकरूप; नित्य; आचारिक; संपूर्ण। -ity, *n.* नैयमिकता; यथाक्रमत्वं; व्यवस्था। -ize, *vt.* नियतं *a. or* नियमानुसारिणं *a.* कृ 8 U.

Regulate, *vt.* यथानियमं *or* यथाक्रमं व्यवस्था *c or* नियम् 1 P. *c*; नियंत्र् 10 U; समाधा 3 U। -ion, *n.* नियतत्वं; नियमनं, व्यवस्थापनं; नियम, विधि *m*। -ive, *a.* नियामक; व्यवस्थापक। -or, *n.* नियंतृ *m*, व्यवस्थापक.

Regulus, *n.* शुद्धधातु *m*.

Regurgitate, *vt.* पुनः उद्गृ 6 P *or* उत्सृज् 6 P। *vi.* प्रतिसृ 1 P.

Rehabilitate, *vt.* (पूर्वपदे) पुनः स्था *c or* नियुज् 7 A. 10 U। -ion, *n.* पुनर्नियोजनं.

Rehash, *vt.* पुनः (असम्यक्) विधा 3 U। *n.* प्रतिनिर्मिति *f*.

Rehearse, *vt.* उदीर् *c*, पठ् 1 P; यथाक्रमं कथ् 10 U *or* निर्दिश् 6 P; प्रागेव अभ्यस् 4 U *or* नट् 10 U। Rehearsal, *n.* पूर्वनटनं; पूर्वप्रयोग.

Reign, *n.* अधिकार, आधिपत्यं, शासनं, साम्राज्यं; शासनकाल; राज्यं, विषय। *vi.* (राज्यं) शास् 2 P; प्रभू 1 P। -ing, *a.* राजपदारूढ.

Reimburse, *vt.* (कृतव्ययाय) प्रतिदा 3 U । -ment, *n.* प्रतिदानं, प्रत्यर्पणं.

Rein, *n.* अभीशु-षु *m*, अवक्षेपणी, कुशा, प्रग्र(ग्रा)ह, रश्मि *m*, वल्गा । *vt.* रश्मिभिः विरम् *c*, प्रग्रह् 9 P; नियम् 1 P. *c*.

Reinforce, *vt.* अधिकं उत्तंभ् 9 P *or* दृढीकृ 8 U, अधिकबलिनं *a.* कृ 8 U । -ment, *n.* उत्तंभनं; दृढीकरणं; सैन्यवर्धकदलं.

Reins, *n. pl.* गुदौ, वृक्कौ, वृक्यौ *all dual.*

Reinstate, *vt.* (पूर्वपदे) पुनः नियुज् 7 A. 10 U *or* स्था *c*; पुनः आरोग्यं प्राप् *c* । -ment, *n.* पुनर्नियोजनं.

Reiterate, *vt.* पुनः पुनः वद् 1 P *or* आम्रेड् *c* । -ion, *n.* पुनर्वचनं, आम्रेडनं । -ive, *a.* पुनर्वाचक; आम्रेडित.

Reject, *vt.* अपाकृ 8 U, अपास् 4 U, निराकृ 8 U, प्रत्याख्या 2 P, प्रत्यादिश् 6 P; प्रतिनुद् 6 U; उद्वम् 1 P । -ion, *n.* निराकरणं, निरास, प्रत्याख्यानं । Rejectamenta, *n. pl.* उच्चार, पुरीषं.

Rejoice, *vt.* आनंद्, तुष्, मुद्, हृष् *all c* । *vi.* प्री 4 A, मुद् 1 A, रम् 1 A, संतुष् 4 P, हृष् 4 P । -ing, *n.* प्रमोद, हर्ष; उत्सव; -ly, *adv.* सहर्षं.

Rejoin, *vt.* पुनः संयुज् 7 A. 10 U *or* संधा 3 U; पुनः संगम् *c* । *vi.* पुनः संगम् 1 P *or* संमिल् 6 P; प्रतिभाष् 1 A, प्रतिवच् 2 P, व्याहृ 1 P । -der, *n.* उत्तरं, प्रतिवचनं, प्रतिवाक्यं, प्रत्युक्ति *f*, प्रत्युत्तरं.

Rejuvenate, *vt.* पुनः तरुणं *a. or* नववीर्यं *a.* कृ 8 U । *vi.* पुनः तरुणायते *Den* । -ion, पुनस्तारुण्यसाधनं, नववीर्यप्राप्ति *f*.

Relapse, *vi.* (सदाचारात्, आरोग्यात्) पुनः पत् 1 P *or* भ्रंश् 1 A. 4 P, पुनः प्रमद् 4 P *or* स्खल् 1 P, पुनः ज्वरातुर *a. or* रोगातुर *a.* भू 1 P । *n.* पुनःपतनं, पुनर्भ्रंश; पुनर्ज्वरागम.

Relate, *vt.* आख्या 2 P, कथ् 10 U, निविद् *c*, वर्ण् 10 U; संबंध् 9 P. *c* । *vi.* उद्दिश् 6 P, संबंध् *Pass* । -d, *a.* सगोत्र, सजातीय; कृतसंबंध; संबंधिन् । Relation, *n.* कथनं, वर्णनं; आख्यानं, कथा, वृत्तांत; संबंध, संपर्क, संसर्ग, भाव; बंधुता, सजातीयता, ज्ञातिभाव; गोत्रज, सगोत्र, बंधु *m*, बांधव । Relational, *a.* संबंधिन् । Relationship, *n.* ज्ञातित्वं, बंधुता, सगोत्रता; संबंध । Relative, *a.* सबंधिन्; परस्परसंबद्ध; सापेक्ष; अनैकांतिक; संबंधवाचक; -ly, *adv.* अन्यापेक्षया, अपेक्ष्य.

Relax, *vt.* शिथिलयति *Den*, श्रथ 10 U, श्लथ् 10 U, स्रंस् *c*; (यत्नं) अल्पीकृ 8 U; विरिच् 7 P. *c*; दुर्बलीकृ 8 U । *vi.* शिथिलीभू 1 P,

स्रंस् 1 A; मंदायते *Den*; उद्यमात् विश्रम् 4 P। -ation, *n.* प्रश्रंथ, शिथिलता, शैथिल्यं, स्रंस; विनोद, विश्रांति *f*, विश्राम। -ative, *a.* रेचक, सारक.

Relay, *n.* (पूर्वाश्वविश्रामार्थमुपयोजितः) नवाश्वगण; नवसंभार.

Release, *vt.* मुच् 6 P. *c*, मोक्ष् 1 P. 10 U; उद्धृ 1 P; उत्सृज् 6P, त्यज् 1 P । *n.* उद्धार, मोक्ष, मोचनं, मुक्ति *f*; निस्तार। Releasor, *n.* अधिकारत्यागिन् *m*.

Relegate *vt.* निर्वस्, निष्कस्, विवस् *all c*; निक्षिप् 6 P, विसृज् 6 P; संप्रेष् *c*; समृ *c*। -ion, *n.* निर्वासनं; समर्पणं, विसर्जनं.

Relent, *vi.* क्रोधं *or* पारुष्यं अल्पीकृ 8 U *or* त्यज् 1 P; मृष् 4 P; अनुकंप् 1 A; द्रु 1 P। -less, *a.* अदय, निर्घृण, निर्दय, निष्ठुर, कठोर; दृढाग्रहिन्, प्रतिनिविष्ट; -ly, *adv.* निर्दयं; दृढाग्रहेण.

Relevant *a.* उचित, उपपन्न, औपयिक, प्रस्तुत, प्राप्त, प्रासंगिक, प्रास्ताविक, यथार्थ, संगत। -ly *adv.* उपपन्नं। Relevance, -cy, *n.* औचित्यं, उपपत्ति *f*, याथार्थ्यं, संगति *f*, प्रस्तुतानुसार.

Relic, *n.* (अव०) शेष, शेषभाग; मृतजनस्य देहावशेष; स्मारकं; (*pl.*) कुणप, शव *mn*.

Relict, *n.* विधवा, गतभर्तृका.

Relief; (1) *n.* क्लेशप्रशमनं, दुःखपरिहार, स्वास्थ्यं; उद्धार, मोचनं; उपकार, साहाय्यं; प्रतिसमाधानं; व्यवसायविश्राम; विनोद.

Relief (2) *n.* प्रलंबशिल्पं, प्रलंबालेख्यं; प्रलंबता.

Relieve, *vt.* (क्लेशं) अल्पीकृ 8 U, शम् *c*, अपहृ 1 P; (दुःखात्) उद्धृ 1 P, मुच् 6 P. *c*, मोक्ष् 1 P. 10 U; (व्यवसायात्) मुच् 6 P. *c*, विश्रम् *c*; परित्रै 1 A, उद्धृ 1 P, साहाय्यं कृ 8 U; अपहृ 1 P, विनाकृ 8 U, वियुज् 7 A. 10 U.

Religion, *n.* धर्म, भक्ति *f*। -ism, *n.* धर्मनिर्बंध; धर्मोपधा। Religiose, *a.* धर्मोद्रेकाविष्ट। Religious, *a.* धर्मनिष्ठ, धार्मिक, भक्तिपरायण; धर्मविषयक; नियत, दृढनियमबद्ध; r. house, मठ, विहार; -ly, *adv.* धर्मनिष्ठया; दृढनियमानुसारेण, आस्थापूर्वकं.

Relinquish, *vt.* उज्झ्, उत्सृज्, मुच्, विसृज्, समुज्झ् *all* 6 P, (परि०)त्यज् 1 P, हा 3 P। -ment, *n.* उत्सर्ग, त्याग, विसर्जनं.

Reliquary, *n.* अवशेषकरंडक.

Relish, *n.* आस्वाद, रस, रुचि *f*, स्वाद, स्वादु *m*; उपदंश, उपस्कर, वेशवार, व्यंजनं; अभिरुचि *f*, अभिलाष; अत्यल्पसंसर्ग। *vt.* स्वद् *c*, स्वादूकृ 8 U; अतीव रुच् 1 A (*Dat. of subject*) *or* प्री *Pass. or* तुष् 4 P। *vi.* स्वद् 1 A;

ईषत् सूच् 10 U *or* प्रकटीकृ 8 U । -able, *a.* रुचिकर, स्वादु.

Reluctant, *a.* अनिच्छु, पराङ्मुख, विमुख । -ly, *adv.* अनिच्छया, असंतोषेण, अकामतः । Reluctance, *n.* अनिच्छा, अप्रवणता, अरुचि *f*, पराङ्मुखता.

Rely, *vi.* अवलंब् 1 A, आलंब् 1 A; विश्वस् 2 P । Reliable, *a.* विश्वसनीय ; अवलंबनार्ह । Reliance, *n.* अवलंबनं ; प्रत्यय, विश्वास । Reliant, *a.* आत्मप्रत्ययिन् ; स्वावलंबिन्.

Remain, *vi.* (अव०, उत्०, परि०) शिष् *Pass*; स्था 1 P, अवस्था 1 A, वृत् 1 A, आस् 2 A । *n.* (*pl.*) (अव०, परि०)शेष ; उच्छिष्टं; कुणप, शव *mn*; (मृतग्रंथकारस्य) पूर्वाप्रकाशितग्रंथाः *pl* । -ing, *a.* अवशिष्ट । Remainder, *n.* (अव०, परि०)शेष, उद्वृत्त ; (*math.*) अंतरं, शेष; अवशिष्टाधिकार.

Remanation, *n.* प्रतिसंहार, प्रतिसंचर.

Remand, *vt.* (अभियुक्तं) गुप्त्यां परावृत् *c.*

Remark, *vt.* अधिगम् 1 P, अवबुध् 1 P, अवेक्ष् 1 A, निरूप् 10 U; वच् 2 P, वद् 1 P । *n.* अवेक्षणं, उपलब्धि *f*; उक्ति *f*, वचनं । -able, *a.* परीक्षणार्ह ; असामान्य, विशिष्ट ; सुस्पष्ट ; -y, *adv.* असामान्यतया, सविशेषं.

Remarried, *a.* पुनरूढ.

Remedy, *n.* रोगशमनं ; अगद, उपचार, औषधं, भेषजं ; प्रतिकार, प्रतिक्रिया ; प्रतिसमाधानं । *vt.* उपशम् *c*, चिकित्सते *Den.*, प्रतिकृ 8 U, प्रशम् *c*, प्रतिसमाधा 3 U, शुध् *c* । Remediable, *a.* प्रतिविधेय, साध्य । Remedial, *a.* आतंकहर; प्रतिकारक । Remediless, *a.* अप्रतिकार्य, असाध्य, निरुपाय.

Remember, *vt.* (अनु०)स्मृ 1 P; न विस्मृ 1 P, मनसि कृ 8 U, अनुचिंत् 10 U । Remembrance, *n.* स्मरणं, स्मृति *f*; स्मारकं; (*pl.*) अभिवंदनं; -r, *n.* राजर्णग्राहक; स्मारकं.

Remind, *vt.* (सं) स्मृ *c* । -er, *n.* उद्बोधक, स्मारक.

Reminiscence, *n.* स्मरणं, स्मृति *f*; स्मारकं । Reminiscent, *a.* स्मारक; स्मृतिपर; -ly, *adv.* स्मरणपूर्वकं.

Remise, *n.* अधिकारविसर्जनं.

Remiss, *a.* अनवधान, प्रमत्त, प्रमादिन् ; अदक्ष, निरुत्साह, मंद । -ly, *adv.* सप्रमादं, अनवधानेन, अदक्षतया.

Remission, *n.* (पापस्य) क्षमा, मर्षणं; (ऋणस्य) उद्धार, निस्तार, अपचय, ह्रास.

Remissive, Remissory, *a.* मर्षणात्मक; निस्तारक.

Remit, *vt.* पुनः प्रहि 5 P *or* प्रेष् *c*; *c*; प्रतिनिवृत् *c*; शिथिलीकृ 8 U, अल्पीकृ 8 U; मुच् 6 P; विरम् *c*; मृष् 4 P. 10 U। *vi.* अल्पीभू 1 P, शिथिलीभू 1 P। -tance, *n.* (मूल्य०) प्रेषणं, प्रेषितधनं। -tal, *n.* विसर्जनं; मर्षणं। -tent, *a.* क्षयवृद्धिमत्; r. fever, विषमज्वर.

Remnant, *n.* (अव०) शेष; खंड *mn*, शकल *mn*.

Remonstrance, *n.* प्रत्यादेश, निवारणं। Remonstrate, *vi.* साग्रहं प्रत्यादिश् 6 P, निवारणार्थं विवद् 1 A। Remonstratingly, *adv.* प्रत्यादेशपूर्वकं.

Remorse, *n.* अनुताप, अनुशय, पश्चात्ताप; आत्मनिर्वेद, मनस्ताप। -ful, *a.* अनुतप्त, पश्चात्तापिन्, सानुशय। -less, *a.* निर्घृण, निर्दय; -ly, *adv.* निर्दयं.

Remote, *a.* दूर, दूरवर्तिन्, विप्रकृष्ट, असंनिकृष्ट, असंनिहित; विविक्त; अप्रासंगिक, असंबद्ध। -ly, *adv.* दूरं; मनाक्.

Remount, *vt.* पुनः आरुह् 1 P; पुनः अश्वैः सनाथी कृ 8 U। *n.* नवाश्व.

Remove, *vt.* अपनी 1 P, अपहृ 1 P; दूरीकृ 8 U, स्थानांतरं नी 1 P; (प्र०, वि०) चल् *c*; (पदात्) अपकृष् 1 P *or* च्यु *c or* भ्रंश् *c*। *vi.* अपया 2 P, अपे 2 P; गृहांतरं गम् 1 P। *n.* भेदक्रम; वर्ग; अपसरणं। Removal, *vt.* अपहरणं, अपनयनं; स्थानांतरगमनं, विचलनं, अपोह, खंडनं, निरास.

Remunerate, *vt.* (धनार्पणेन) प्रत्युपकृ 8 U, परितुष् *c*; कृतार्थयति *Den*; पारितोषिकाय *or* प्रत्युपकाराय क्लृप् 1 A। Remunerative, Remuneratory, *a.* अर्थकर, फलप्रद, लाभकर, वित्तवर्धक। Remuneration, *n.* पारितोषिकं, प्रतिफलं.

Renaissance, *n.* पुनरुज्जीवनं, पुनरुद्भव, पुनर्जन्मन् *neu.*

Renascent, *a.* पुनर्भविष्णु, पुनर्वर्धिष्णु.

Rencounter, *n.* आहव, विग्रह, संमर्द; अकांडमिलनं। *vi.* (युद्धे) संमिल् 6 P.

Rend, *vt.* (वि०)दल् *c*, (वि०)दॄ 9 P. *c*, विपट् 10 U, भिद् 7 P; खंड् 10 U; प्रमंथ् 9 P, व्यथ् *c*। -ing, *a.* मर्मच्छिद्.

Render, *vt.* प्रतिदा 3 U, प्रत्यृ *c* ऋ *c*, प्रतिपद् *c*; (आज्ञापालनं) विधा 3 U; (प्र०) दृश् *c*; नद् 10 U; वर्ण् 10 U; भाषांतरं कृ 8 U; कृ 8 U. *c*। -ing, *n.* अनुवाद, भाषांतरं; वादनं; प्रयोग.

Rendezvous, *n.* संकेतस्थानं, संमिलनस्थानं.

Rendition, *n.* विसर्जनं, त्याग; अनुवाद, भाषांतरं.

Renegade, *n.* स्वधर्म॰, स्वपक्ष-त्यागिन् *m.*

Renew, *vt.* नवीकृ 8 U; पूर्ववत् कृ 8 U, पूर्वावस्थां प्राप् *c*; पुनः उज्जीव् *c*; प्रतिसमाधा 3 U; पुनः लभ् 1 A; पुनः कृ 8 U, पुनः आरभ् 1 A, आवृत् *c*; प्रतन् 8 U । -able, *a.* आवर्तनार्ह । -al, *n.* नावीन्यसाधनं; पूर्ववत्करणं; प्रत्युज्जीवनं; प्रत्युद्धार; प्रतिसमाधानं; प्रत्युपक्रम.

Renounce, *vt.* उत्सृज् 6 P, त्यज् 1 P, विसृज् 6 P, समुज्झ् 6 P, हा 3 U; न अंगीकृ, निराकृ 8 U, प्रत्याख्या 2 P । -ment, *n.* त्याग, विसर्जनं; निराकरणं, प्रत्याख्यानं.

Renovate, *vt.* पुनः नवीकृ 8 U; पुनः सुस्थितिं प्राप् *c*, प्रतिसमाधा 3 U । -ion, *n.* नावीन्यसाधनं; पुनर्बलवर्धनं.

Renown, *n.* कीर्ति, (प्र॰, वि॰)-ख्याति, प्रसिद्धि, विश्रुति *all f*, यशस् *neu*, विश्राव, श्लोक । *vt.* प्रख्यातं *a.* कृ 8 U । -ed, *a.* कीर्तित, कीर्तिमत्, प्रख्यात, प्रसिद्ध, यशस्विन्, लोकविश्रुत.

Rent, (1) *n.* भेद, विदर-ल; भंग, रंध्रं, विच्छेद, विवरं.

Rent, (2) *n.* भाटं, भाटकं । *vt.* भाटकेन दा 3 U; भाटकेन ग्रह् 9 U *or* उपयुज् 7 A. 10 U, भद् 1 P । -al, *n.* भाटकागम; भाटकं । -er, *n.* भाटकदातृ *m.*

Renunciation, *n.* विसर्जनं, त्याग; संन्यास । Renunciatory, *a.* त्यागात्मक.

Renverse, *vt.* विपर्यस् 4 U, व्यत्यस् 4 U; निपत् *c.*

Reorganize, *vt.* पुनः *or* नूतनप्रकारेण घट् *c or* व्यवस्था *c.*

Repair, (1) *vi.* गम् 1 P, या 2 P, प्रपद् 4 A । *n.* नित्याश्रितस्थानं.

Repair, (2) *vt.* प्रतिसमाधा 3 U, संधा 3 U; उद्धृ 1 P; (हानिं) पूर् 10 U, प्रतिकृ 8 U । *n.* प्रतिसमाधानं; उद्धार; (good, bad) सुस्थिति *f*, जीर्णावस्था.

Reparable, *a.* प्रतिसमाधेय; पूरणीय । Reparation, *n.* प्रतिसमाधानं; हानिपूरणं, निस्तार.

Repartee, *n.* कुशलं प्रत्युत्तरं.

Repartition, *n.* अंशनं, परिकल्पनं, विभजनं; पुनर्विभजनं.

Repast, *n.* भोजनं, अभ्यवहार, आहार । *vi.* भोजनं कृ 8 U.

Repatriate, *vt.* स्वदेशं पुनः प्रेष् *c or* प्राप् *c.*

Repay, *vt.* प्रतिदा 3 U, प्रत्यृ *c*; निस्तॄ *c*, निर्यत् 10 U । -ment, *n.* प्रतिदानं, प्रत्यर्पणं; निस्तार, निष्कृति *f*, शोधनं, निर्यातनं.

Repeal, *vt.* प्रत्यादिश् 6 P, निवृत् *c*; खंड् 10 U, निराकृ 8 U विलुप् *c* । *n.* निराकरणं, प्रत्यादेश, विलोप.

Repeat, *vt.* अभ्यस् 4 U, आवृत् *c*; पुनः पठ् 1 P, वद् 1 P, *etc.*, आम्रेडयति *Den*; पुनः कृ 8 U, *etc.*, । *vi.* पुनः भू 1 P, समापद् 4 A, *etc.* । -edly, *adv.* अभीक्ष्णं, पुनःपुनः, मुहुर्मुहुः । Repetition *n.* आवृत्ति, पुनरावृत्ति, प्रत्यावृत्ति *all f*; द्विरुक्ति *f*, पुनरुक्ति *f*, पुनर्वचनं; आम्रेडनं; पठनं । Repetitional, -ary, Repetitious, Repetitive, *a.* आवृत्त्यात्मक.

Repel, *vt.* पराणुद् 6 U, परावृत् *c*; प्रतिरुध् 7 U; निवृ *c*, प्रतिहन् 2 P, उद्विज् *c* । -lence, *n.* पराणोदनं; प्रतिवारणं; उद्वेजनं । -lent, *a.* पराणोदिन्: प्रतिवारक, प्रतिघातिन् ; उद्वेजक, अरुचिकारिन्.

Repent, *vi.* अनुतप् 4 A, अनुशी 2 A, पश्चात्तापं कृ 8 U *or* प्राप् 5 P । *vt.* अनुशुच् 1 P, परिदेव् 1 P । -ance, *n.* अनुताप, अनुशय, आत्मनिर्वेद, पश्चात्ताप, मनस्ताप । -ant, *a.* अनुतप्त, अनुतापिन्, अनुशयान, अनुशयिन् ; -ly, *adv.* सानुतापं, पश्चात्तापेन.

Repercussion, *n.* पराणोदनं; परावर्तनं; प्रतिपतनं; प्रतिध्वनि *m.* । Repercussive, *a.* पराणोदक; प्रतिध्वनिकारिन् .

Repertoire, *n.* गीतसंग्रह.

Repertory, *n.* कोष्ठ, भांडारं; संग्रह.

Repine, *vi.* आत्मानं पीड् 10 U; व्यथ् 1 A, संतापं कृ 8 U, तप् *Pass*; असंतोषं वच् 2 P, परिदेव् 1 P । -ingly, *adv.* सखेदं, सनिर्वेदं.

Replace, *vt.* पूर्वस्थाने निधा 3 U, पुनः न्यस् 4 U, प्रतिनिधा 3 U । -ment, *n.* प्रतिनिधानं; प्रतिनिधि *m*, प्रतिनिहितवस्तु *neu.*

Replenish, *vt.* पुनः पूर् 10 U, वैपुल्येन प्रतिपूर् 10 U । -ment, *n.* पूरणं; विपुलसंग्रहणं.

Replete, *a.* परिपूर्ण, संपूर्ण; ०आढ्य, ०मय *in comp.*, प्रचुर, प्रभूत, विपुल; आकंठपूर्ण, अतितृप्त । -ion, *n.* परिपूर्णता, पर्याप्ति *f*; अतिभक्षणं; सौहित्यं; रुधिरोद्रेक.

Replica, *n.* प्रतिकृति *f*; प्रतिलिपि *f*.

Replication *n.* उत्तरं, प्रत्युत्तरं, प्रतिशब्द । Replicant, *n.* प्रतिवादिन् *m.*

Reply, *vi.* प्रतिभाष् 1 A, प्रतिवच् 2 P, व्याहृ 1 P, प्रत्युत्तरं दा 3 U । *n.* उत्तरं, प्रतिवचनं, प्रातिवाक्यं, प्रत्युत्तरं: उत्तरपक्ष.

Report, *vt.* आख्या *c*, आविद् *c*, कथ् 10 U, निगद् 1 P, निविद् *c*, वर्ण् 10 U, श्रु *c*; लेखे वर्ण् 10 U । *n.* उपश्रुति *f*, किंवदंति-ती *f*, जनप्रवाद; उदंत, वार्ता, वृत्तं, वृत्तांत, समाचार; (repute) ख्याति *f*, प्रतिष्ठा, प्रथा, वर्णनं, निवेदनं, ०लेख; स्फोटनशब्द -er, *n.* वृत्तांतलेखक.

Repose, *vt.* निक्षिप् 6 P, निधा 3 U, न्यस् 4 U, स्था *c*; विश्रम् *c*, संविश् *c* । *vi.* शी 2 A, संविश् 6 P, विश्रम् 4 P; निद्रा 2 P, निली 4 A, स्वप् 2 P; अवलंब्, आलंब् 1 A । *n.* विश्राम, विश्रांति *f*, श्रमोपशम; शांति *f*, अक्षोभ, निराकुलता । –ful, *a.* विश्रामप्रद; शांतिपूर्ण.

Reposit, *vt.* निक्षिप् 6 P, निधा 3 U । –ory, *n.* आश्रय, पात्रं, भाजनं; कोष्ठ, भांडारं, संग्रहालय.

Reprehend, *vt.* अवक्षिप् 6 P, उपालभ् 1 A, गर्ह् 10 A, दुष् *c*, निंद् 1 P, निर्भर्त्स् 10 A । Reprehensible, *a.* गर्हणीय, गर्ह्य, दूषणीय, निंद्य । Reprehension, *n.* उपालंभ, गर्हणं, दूषणं, निंदा.

Represent, *vt.* निरूप् 10 U, वर्ण् 10 U, विवृ 5 U; उपक्षिप् 6 P, उपन्यस् 4 U, निविद् *c*, प्रतिपद् *c*; अभिनी 1 P, नट् 10 U, प्रयुज् 7 A. 10 U; विडंब् 10 U; प्रतिनिधिः भू 1 P । –ation, *n.* निरूपणं, वर्णनं; नाट्यप्रयोग; निवेदनं, प्रतिपादनं; प्रतिनिधिव्यवहार, ०संस्था । –ative, *a.* निरूपक; आदर्शभूत, प्रतिरूपक; प्रतिनिध्यात्मक । *n.* प्रतिनिधि *m*, प्रतिपुरुष.

Repress, *vt.* निग्रह् 9 P, नियंत्र् 10 U, निरुध् 7 U; दम् *c*, वशीकृ 8 U; प्रशम् *c* । –ion, *n.* निग्रह, निरोध; वृत्तिनिरोध । –ive, *a.* नियामक, निरोधक, निग्रहात्मक.

Reprieve, *vt.* दंडं व्याक्षिप् 6 P; विश्रम् *c* । *n.* दंडव्याक्षेप; विश्राम, विश्रांति *f*.

Reprimand, *n.* अवक्षेप, उपालंभ, निर्भर्त्सना । *vt.* उपालभ् 1 A, दुष् *c*, निर्भर्त्स् 10 A.

Reprisal, *n.* बलाद्ग्रहणं; प्रतिपीडनं, प्रत्यपकार, प्रत्यपहरणं.

Reproach, *vt.* अधिक्षिप् 6 P, गर्ह् 10 A, दुष् *c*, निंद् 1 P, निर्भर्त्स् 10 A, परिवद् 1 P । *n.* उपालंभ, गर्हणं, दूषणं, निंदा, निर्भर्त्सना, परिवाद; अपकीर्ति *f*, अपयशस् *neu*; कलंक, दूषणं । –able, *a.* गर्हणीय, निंद्य । –ful, *a.* निंदात्मक, निर्भर्त्सक, सापवाद; अपकीर्तिमत्, निंद्य; –ly, *adv.* सापवादं, सोपालंभं.

Reprobate, *a.* क्ष्वेड, दुराचार, दुर्वृत्त, धर्मभ्रष्ट, भ्रष्टाचार । *n. m.* *of prec.* । *vt.* तीव्रं अधिक्षिप् 6 P *or* गर्ह् 1. 10 A *or* निंद् 1 P; (स्वर्गमुक्त्यादिकात्) बहिष्कृ 8 U । –ion, *n.* तीव्रगर्हणं; (भक्तिहीनानां) अनुद्धार, बहिष्कार । –ive, *a.* तीव्रनिंदात्मक.

Reproduce, *vt.* पुनः निर्मा 2 P. 3 U *or* उत्पद् *c or* रच् 10 U; अनुकृ 8 U, प्रतिलिपिं *etc.*, कृ. 8 U । Reproduction, *n.* पुन-

निर्माणं; पुनरुत्पात्ति *f*; प्रतिलिपि *f*, प्रतिकृति *f*। Reproductive, *a.* पुनरुत्पादक.

Reproof, *n.* अधिक्षेप, उपालंभ, गर्हा, दूषणं, निर्भर्त्सना । Reprove, *vt.* अवाक्षिप् 6 P, उपालभ् 1 A, दुष् *c*, निर्भर्त्स् 10 A। Reprovingly, *adv.* सोपालंभं.

Reptant, *a.* सर्पिन्.

Reptile, *a.* सर्पिन्; नीच, श्ववृत्ति। *n.* सरीसृप.

Republic, *n.* जन०, प्रजासत्ताक-राज्यं। -an, *a.* प्रजासत्ताविषयक, प्रजासत्तात्मक । -anism, *n.* प्रजासत्तावाद.

Republish, *vt.* पुनः प्रकाश् *c or* मुद्रयति *Den.*

Repudiate, *vt.* धिक्कृ 8 U, निराकृ 8 U, प्रत्याख्या 2 P, प्रत्यादिश् 6 P; (भार्यां) अपास् 4 U, विप्रयुज् 7 A. 10 U। -ion, *n.* निराकरणं, प्रत्याख्यानं; परित्याग, विप्रयोग.

Repugn, *vt.* प्रतिकृ 8 U, प्रतिरुध् 7 U, प्रत्यवस्था 1 A, विरुध् 7 U। -ance, -cy, *n.* प्रातिकूल्यं, विरोध, वैपरीत्यं; अनिच्छा, अप्रीति *f*, अरुचि *f*, घृणा, जुगुप्सा, विद्वेष, विमुखता । -ant, *a.* प्रतिकूल, विपरीत, विरुद्ध; अननुरूप, असंगत; अनिष्ट, अप्रिय, अरुचिकारक, जुगुप्सित.

Repullulate, *vi.* पुनः अंकुरयति *Den or* पल्लवयति *Den*; पुनः उद्भू 1 P.

Repulse, *vt.* पराणुद् 6 P, परावृत् *c*, प्रत्यावृत् *c*; अवधीर् 10 P, धिक्कृ 8 U; वादे पराजि 1 A। *n.* पराणोदनं, प्रत्यावर्तनं, विद्रावणं; अवधीरणा, धिक्कार; पराजय, पराभव । -ion, *n.* प्रत्यावर्तनं । -ive, *a.* परावर्तक; अप्रीति०, अरुचिकर, जुगुप्सित, बीभत्स.

Repute, *vt.* गण् 10 U, मन् 4 A। *n.* कीर्ति, ख्याति, प्रतिष्ठा, प्रथा, प्रसिद्धि *all f*, यशस् *neu*, विश्रुति *f*। -able, *a.* प्रशस्त, सुप्रतिष्ठ; आदरणीय, संमाननीय । -ation, *n.* आदर, लोकमतं; कीर्ति *etc.*। -d, *a.* ख्यात, (अभि०) मत, प्रसिद्ध.

Request, *n.* अभ्यर्थना, प्रार्थना, याचना, यांचा, विज्ञप्ति *f*; इच्छा, ईप्सितं। *vt.* अभ्यर्थ् 10 A, प्रार्थ् 10 A, याच् 1 A.

Requiem, *n.* मृतशांतिकर्मन् *neu.*

Requiescat, *n.* मृतात्मशांतिप्रार्थना.

Require, *vt.* आज्ञा *c*, आदिश् *c*, नियुज् 10 U, प्रचुद् 10 U; अभियुज् 7 A. 10 U, साधिकारं प्रच्छ् 6 P; अपेक्ष्, व्यपेक्ष् 1 A, आकांक्ष् 1 P। *vi.* आवश्यक *a.* अस् 2 P। -ment, *n.* आवश्यकं; कार्यं, प्रयोजनं; आवश्यकोपाधि *m.*

Requisite, *a.* अपरिहार्य, अवश्य, अहार्य, आवश्यक। *n.* आवश्यक-वस्तु *neu*, ०उपाधि *m*, *etc.*

Requisition, *n.* आदेश, नियोग, शासनं; आज्ञापत्रं, ०लेख। *vt.*

साधिकारं आज्ञा *c or* नियुज् 7 A. 10 U; उपयुज् 7 A. 10 U.

Requite, *vt.* प्रतिदा 3 U, प्रत्यृ *c*; निस्तॄ *c*; निर्यत् 10 U; प्रत्यपकृ, प्रत्युपकृ 8 U। Requital, *n.* प्रत्यर्पणं; प्रत्युपकार; प्रत्यपकार, निस्तार, निष्कृति *f*, निर्यातनं; प्रतिफलं, पारितोषिकं.

Rescind, *vt.* प्रत्याख्या 2 P, प्रत्यादिश् 6 P, विलुप् *c*। Rescission, *n.* प्रत्याख्यानं, विलोप। Rescissory, *a.* विलोपक, प्रत्यादेशात्मक॰

Rescript *n.* प्रत्युत्तरं, निर्णय.

Rescue, *vt.* अव् 1 P, उद्धृ 1 P, परित्रै 1 A, मुच् 6 P, रक्ष् 1 P। *n.* उद्धार, तारणं, परित्राणं, मोचनं, रक्षणं। -r, *n.* उद्धर्तृ, परित्रातृ, रक्षक *all m.*

Research, *n.* सूक्ष्ममीमांसा, ॰परीक्षा, ॰विचार। *vi.* सूक्ष्मपरीक्षां कृ 8 U। -er, *n.* सूक्ष्मपरीक्षक.

Resemble, *vt.* तुल्य, *a.*, सम *a. etc.* अस् 2 P, विडंब् 10 U, संवद् 1 P। Resemblance, *n.* तुल्यत्वं, सादृश्यं, साम्यं, सारूप्यं; औपम्यं, संवाद, साधर्म्यं, सावर्ण्यं। Resembling, *a.* सदृश, समान.

Resent, *vt.* सरोषं मन् 4 A *or* वृत् 1 A। -ful, *a.* वितुष्ट, सरोष, सासूय। -ment, *n.* मन्यु *m*, रोष.

Reserve, *vt.* (भाविकालार्थं पृथक्) धा 3 U, संग्रह् 9 P, संचि 5 U, रक्ष् 1 P, व्याक्षिप् 6 P, निग्रह् 9 P, अवशिष् 7 P. *c*; विशिष् 7 P. *c*। *n.* पृथक्संग्रह, ॰संचय; वाक्संयम, परिमितभाषणं, अवाचालत्वं। -ation, *n.* पृथक्संग्रहणं; पृथग्रक्षणं; पृथग्रक्षितप्रदेश; परिच्छेद, अपवाद, व्यावृत्ति *f*। -d, *a.* मितालापिन्, मौनवृत्ति, संयतवाच्, अल्पभाषिन्; पृथग्रक्षित; -ly, *adv.* मितालापेन, गूढभावेन.

Reservoir, *n.* आशय, बृहद्भाजन; जलाशय, तडाग, दीर्घिका.

Reside, *vi.* (अधि॰, नि॰, प्रति॰) वस् 1 P; आश्रि 1 A, वृत् 1 A, स्था 1 P। -nce, *n.* वसति *f*, वास; अधिष्ठानं; आलय *mn*, आवसथ, निलय, निवास, गृहं, मंदिरं, सदनं। -nt, *a.* अधिवासिन्, अनुषंगिन्, समवायिन्; *n.* निवासिन् *m*; प्रतिनिधि *m*। -ntial, *a.* वासोचित, वसतियोग्य.

Residue, *n.* (अव॰, परि॰) शेष, ॰शिष्टं। Residual, Residuary, *a.* अवशेषरूप, अवशिष्ट। Residuum, *n.* (शोषणादिकानंतरं स्थितः) शेष; कल्क *mn*, किट्टकं.

Resign, *vt.* उत्सृज् 6 P, (परि॰)-त्यज् 1 P, विसृज् 6 P, समुज्झ् 6 P; (अमुकस्य वशे) आत्मानं समृ *c or* उत्सृज् 6 P (मनः) अनुनी 1 P। *vi.* अधिकारं त्यज् 1 P। -ation, *n.* अधिकारविसर्जनं, ॰लेख; उत्सर्ग, परित्याग; क्षांति *f*, तितिक्षा, ईश्वरेच्छा॰,

भवितव्यतावलंबनं, ०प्रपत्ति *f*। -ed, *a*. तितिक्षु, सहिष्णु, ईश्वरेच्छा०, भवितव्यताप्रपन्न.

Resile, *vi*. उत्पत् 1 P; पूर्वस्थितिं प्राप् 5 P। Resilient, *a*. पूर्वस्थिति०, प्रकृतिप्रापक, उत्पतिष्णु; क्षिप्रोल्लासिन्। Resilience, *n*. उत्पतिष्णुता, पूर्वस्थितिप्रापकता.

Resin, *n*. सर्जरस, राल। -ous, *a*, रालोत्पादित; रालविषयक.

Resipiscence, *n*. पश्चाद्बोध.

Resist, *vt*. प्रतिकृ 8 U, प्रतिबंध् 9 P, प्रतिरुध् 7 U, प्रतिष्टंभ् 9 P, प्रत्यवस्था 1 A, विरुध् 7 U। *vi*. प्रतिरोधं आचर् 1 P *or* कृ 8 U। -ance, *n*. प्रतिकार, प्रतिबंध, प्रतियत्न, प्रतिरोध, प्रत्यवस्थानं, विरोध। -ible, *a*. प्रत्यवस्थेय। -less, *a*. अप्रतिकार्य, अप्रत्यवस्थेय.

Resolute, *a*. कृतनिश्चय, दृढ, धीर, निश्चित, स्थिर। -ly, *adv*. निश्चयपूर्वकं, स्थिरमत्या। -ness, *n*. अध्यवसाय, अभिनिवेश, दृढमति *f*.

Resolution, *n*. पृथक्करणं, व्यवच्छेद, व्याकृति *f*; उपक्षेप, उपन्यास, निर्णय, प्रतिज्ञा; अध्यवसाय, निश्चय, संकल्प; अभिनिवेश, दृढाग्रह, स्थिरमति *f*.

Resolve, *vt*. पृथक्कृ 8 U, व्याकृ, 8U, विश्लिष् *c*; विद्रु *c*; विशदयति *Den*, विशदीकृ 8 U, स्पष्टीकृ 8 U, प्रतिसमाधा 3 U; (convert) परिवृत् *c*, विकृ 8 U; अवधृ 10 U, निर्णी 1 P, निश्चि 5 U, व्यवसो 4 P, संक्लृप् *c*। *vt*. निश्चयं कृ 8 U। *n*. अध्यवसाय, अवधारणं, निर्णय, निर्धारणा, निश्चय, निष्पत्ति *f*, व्यवसाय, व्यवस्थिति *f*, संकल्प। -d, *a*. कृतनिश्चय, निश्चयपूर्वक, दृढमति। -nt, *a*. विश्लेषक; विद्रावक.

Resonant, *a*. अनुनादिन्, प्रतिध्वनिकर; ध्वनिवर्धक। Resonance, *n*. अनुनाद, प्रतिध्वनि *m*; ध्वनिवर्धनं.

Resort, *vi*. गम् 1 P, या 2 P; आश्रि 1 U, सेव् 1 A; आलंब् 1 A। *n*. समागमस्थानं, नित्यसेव्यस्थानं; आश्रयणं, सेवनं; उपाय; अवलंबनं, आश्रय.

Resound, *vi*. अनुनद्, अनुस्वन्, प्रतिध्वन्, प्रतिनद् *all* 1 P; प्रतिध्वनिना पूर् *Pass*; प्रथ् 1 A। *vt*. *causals of prec*.। -ing, *a*. प्रतिस्वनान्वित.

Resource, *n*. शरणोपाय, तारणोपाय; उपाय, (प्र०) युक्ति *f*; (*pl*.) द्रव्यसाधनानि; चातुर्य, पाटवं, वैचक्षण्यं, सुकल्पकमति *f*; (*pl*.) (राष्ट्रस्य) रक्षणसामग्री। -ful, *a*. चतुर, प्रत्युत्पन्नमति, विचक्षण। -less, *a*. अशरण, निरुपाय.

Respect, *n*. संबंध, अपेक्षा, उद्देश, विषय; अनुसंधानं, अवधानं, विमर्श;

आदर, पूजा, प्रश्रय-यं, संभावना, संमान; (*pl.*) अभिवंदनं, आभिवाद-नं, नमस्कार, प्रणाम । *vt.* आदृ 6 A, पुरस्कृ 8 U, पूज् 10 U, मह् 10 U, संमन् *c*; उद्दिश् 6 P, संबंध् *Pass* । With r. to, उद्दिश्य, अपेक्ष्य, विषये । In this r., अत्रविषये । To pay one's r., अभिवादनं कृ 8 U, प्रणम् 1 P । -able, *a.* आदरणीय, पूज्य, संमाननीय; अनल्प, मध्यम; -y, *adv.* यथार्ह, मान्यप्रकारेण । -ability, *n.* पूज्यता; प्रतिष्ठा । -ful, *a.* विनीत, सप्रश्रय, सविनय; -ly; *adv.* आदरेण, सप्रश्रयं । -ing, *n.* अपेक्ष्य, उद्दिश्य.

Respective, *a.* (प्रत्येकस्य) निज, स्वकीय; पृथक्; साक्षेप । -ly, *adv.* प्रत्येकं; पृथक्.

Respire, *vi.* अन् 2 P, प्राण् 2 P, श्वस् 2 P; पुनः उत्साहं प्राप् 5 P । *vt.* उच्छ्वस् 2 P; उद्गॄ 6 P । -ation, *n.* श्वास, श्वासोच्छ्वास । -atory, *a.* श्वासिन्.

Respite, *n.* (किंचित्कालिकः-का) विश्राम, विश्रांति *f*, विराम, अवकाश, विलंब, व्याक्षेप । *vt.* किंचित्कालं विश्रम् *c*; व्याक्षिप् 6 P.

Resplendent, *a.* अत्युज्ज्वल, देदीप्यमान, भास्वत्, महाद्युतिमत् । -ly, *adv.* अतितेजसा । Resplendence, -cy, *n.* अत्यौज्ज्वल्यं, अतिभास्वरता.

Respond, *vi.* प्रतिभाष् 1 A, प्रतिवच् 2 P, प्रतिवद् 1 P, प्रत्युत्तरं कृ 8 U; (अन्याक्रियादिवशेन) आचर् 1 P, प्रवृत् 1 A, सानुकंपं वृत् 1 A । -ent, *a.* उत्तरदायिन्; *n.* आभियुक्त, उत्तरवादिन्, प्रतिवादिन्, प्रत्यर्थिन् *all m.*

Response, *n.* प्रतिभाषणं; उत्तरं, प्रतिवचनं, प्रतिवाक्यं, प्रतिवाद, प्रत्युत्तरं; उत्तरात्मकः स्तोत्रांश । -ible, *a.* अनुयोज्य, अभियोक्तव्य, प्रतिवाच्य, प्रष्टव्य; विवेकिन्, सदसज्ज्ञ; विश्वसनीय, सुप्रतिष्ट । -ibility, *n.* प्रतिवाच्यता, प्रष्टव्यता; भार । -ive, *a.* उत्तरदायिन्; प्रत्युत्तरात्मक; क्षिप्र.

Rest, (1) *n.* विश्राम, विश्रांति *f*, श्रमोपशम; अक्षोभ, निराकुलता, शांति *f*; निश्चलता, स्थिरता; निद्रा, स्वास्थ्यं, विरामस्थानं; आश्रय; अवष्टंभ, आधार, उपघ्न; (cæsura) विच्छेद, विराम । *vi.* विश्रम् 4 P, (उद्योगात्) विरम् 1 P; शी 2 A, संविश् 6 P; निश्चलं *or* निश्चेष्टं आस् 2 A *or* वृत् 1 A; (आधारे) स्था 1 P, उपाश्रि 1 U; अवलंब्, आलंब्, अपेक्ष *all* 1 A; श्रद्धा 3 U । *vt.* विश्रम् *c*, विरम् *c*, संविश् *c*; निक्षिप् 6 P, निधा 3 U, निविश् *c*; स्था *c* । At r., विश्रांत, विरतव्यापार; निश्चल, निश्चेष्ट, स्तब्ध; अक्षुब्ध, निराकुल, शांत; मृत । -day, *n.* विश्रांतिदिनं ।

–ful, *a.* विश्रांतिकर; निराकुल, शांत। –less, *a.* अविश्रांतिमत्; अशांत, अस्वस्थ, चंचल, चपल, पर्याकुल; उन्निद्र, विनिद्र; –ly, *adv.* अस्वस्थतया, चंचलतया.

Rest, (2) *n.* (अव०) शेष, ०शिष्टं; अन्य, अपर, इतर *all in pl*; ०आदि, ०प्रभृति *in comp.*। *vi.* वृत् 1 A, स्था 1 P, आस् 2 A। For, As for the r., शेषे.

Restaurant, *n.* विश्रांति०, भोजन-गृहं.

Restitution, *n.* प्रतिदानं, प्रत्यर्पणं; निष्क्राति *f*; हानिपूरणं; पूर्वस्थिति-साधनं.

Restive, *a.* अप्रचलत्, गतिविमुख, निश्चल, रुद्धगति; अवश, अविनेय, दुर्दम, प्रतीप; अशांत, अस्वस्थ, लोल। –ly, *adv.* प्रतीपं; अस्वस्थ-तया.

Restore, *vt.* प्रतिदा 3 U, प्रत्यृ *c*; पूर्वस्थितिं *or* पूर्वपदं प्राप् *c or* साध् *c*; प्रकृतिं *or* आरोग्यं पुनः प्राप् *c*। –ation, *n.* प्रत्यर्पणं; पूर्वस्थितिसाधनं; जीर्णोद्धार, उद्धार। –ative, *a. n.* पुनर्बल-साधक (कं), ०वर्धक (कं), तेजस्कर (रं).

Restrain, *vt.* निग्रह् 9 P, नियम् 1 P, निरुध् 7 U, निवृ *c*, प्रतिबध् 9 P, विरम् *c*; कारागृहे निरुध् 7 U। –t, *n.* निग्रहणं, निरोध, प्रतिबंध; आत्मसंयम, अनुत्सेक; नियम; आसेध, नियंत्रणं.

Restrict, *vt.* निबंध् 9 P, नियंत्र् 10 U, निरुध् 7 U; परिच्छिद्, 7 P, परिमा 2 P. 3 A। –ion, *n.* नियंत्रणं, नियम, प्रतिबंध; परि-च्छेद, मर्यादा। –ive, *a.* नियामक, प्रतिबंधक; परिच्छेदक, व्यावर्तक.

Result, *vi.* उत्पद् 4 A, जन् 4 A, निष्पद् 4 A, परिणम् 1 U, प्रसंज् *Pass*, फल् 1 P, समापद् 4 A, संभू 1 P; अवसो, पर्यवसो 4 P, समाप् *Pass.*। *n.* उदर्क, कार्यं, निष्पत्ति *f*, परिणाम, फलं। –ant, *a.* परिणामात्मक, फलरूप। –less *a.* निष्फल.

Resume, *vt.* प्रत्यादा 3 U, पुनः लभ् 1 A, पुनः ग्रह् 9 P; पुनः आरभ् 1 A *or* उपक्रम् 1 A। Resumption, *n.* प्रत्यादानं, पुनर्ग्रहणं; पुनःप्रारंभ.

Resume, *n.* संक्षेप, संग्रह, सार.

Resupinate, *a.* विपर्यस्त, व्यत्यस्त.

Resurge, *vi.* पुनः उत्था 1 P, प्रत्युत्था 1 P, पुनः जीव् 1 P, –nce, *n.* प्रत्युत्थानं; मृतोत्थानं, पुनरुज्जीवनं, पुनरुद्भव। –nt, *a.* प्रत्युत्थायिन्.

Resurrect, *vt.* (मृतस्य) पुनः उत्था *c or* उज्जीव् *c*; पुनः प्रचल् *c*; (शवं) उत्खन् 1 P। –ion, *n.* See "Resurgence"; पुनःप्रचालनं, पुनःप्रवर्तनं.

Resuscitate, *vt.* पुनः उज्जीव् *c*, प्रत्युज्जीव् *c*। –ion, *n.* प्रत्यु-ज्जीवनं.

Retail, *n.* पृथग्विक्रय, अल्पविक्रय। *vt.* अल्पशः *or* पृथक् विक्री 9 A; सविस्तरं कथ् 10 U *or* निविद् *c*। –er, *n.* अल्प०, पृथग्विक्रेतृ *m*.

Retain, *vt.* ग्रह् 9 U, धा 3 U, धृ 10 U, भृ 3 U, रक्ष् 1 P; (भृत्यान्) उपनी 1 A, व्यापृ *c*; स्मृतौ भृ 3 U *or* धृ 10 U। –er, *n.* अनुचर, परिचारक, भृत्य, सेवक.

Retaliate, *vt.* निर्यत् 10 U, प्रतिकृ 8 U। *vi.* निर्यातनं कृ 8 U। –ion, *n.* निर्यातनं, प्रतिकार, प्रतिक्रिया। –ive, *a.* निर्यातक, प्रतिकारात्मक.

Retard, *vt.* (गतिं) मंदीकृ 8 U; विलंब् *c*, व्याक्षिप् 6 P; प्रतिबंध् 9 P, धृ 1 A, रुध् 7 U, स्तंभ् 9 P। *vi.* चिरायति-ते *Den*। –ation, –ment, *n.* विलंब; प्रतिरोध। –atory, –ative, *a.* प्रतिरोधक; विलंबकारिन्.

Retch, *vi.* वमने यत् 1 A.

Retention, *n.* ग्रहणं, धारणं; निरोधः धारणा, मेधा; मूत्र-निरोध। Retentive, *a.* धारक, धारणक्षम; R. faculty, *n.* मेधा.

Retiary, *a.* जालकारिन्; जालाकार.

Reticent, *a.* मितवाच्, मितालापिन्, मौनिन्। Reticence, *n*, मितालाप, मौनं; संवृति *f*, संवरणं.

Reticle, *n.* सूक्ष्मजालकं.

Reticulate, *vt.* जालीकृ 8 U। *vi.* जालीभू 1 P। *a.* जालाकार.

Reticule, *a.* जालकोश.

Retiform, *a.* जालाकार.

Retina, *n.* दृष्टिशिरापटलं.

Retinue, अनुचराः *pl*, परिग्रह, परिचारकवर्ग, परिच्छद, परिजन, परिवार, परिस्पंद.

Retire, *vi.* अपया 2 P, अपे 2 P; निवृत् 1 A, परावृत् 1 A; अधिकाराद् विरम् 1 P। *vt.* निवृत् *c*, परावृत् *c*। –d, *a.* त्यक्तसंसर्ग; विविक्तसेविन्, ०वासिन्; विविक्त; त्यक्तव्यवसाय। –ment, *n.* परावर्तनं; अधिकारत्याग, व्यवसाय-विसर्जनं; एकांतवास, रहस् *neu*, विविक्तं। Retiring, *a.* अधृष्ट, अप्रगल्भ, विनीत; विविक्तप्रिय; –room, *n.* प्रक्षालनस्थानं, शौचस्थानं.

Retort, (1) *n.* बकयंत्रं.

Retort, (2) *vt.* निवृत् *c*, परावृत् *c*; प्रत्यभियुज् 7 A; निर्यत् 10 U। *vi.* प्रत्युत्तरं *or* प्रत्याक्षेपं *or* प्रतिवादं कृ 8 U। *n.* प्रतिवाद, प्रत्युत्तरं, प्रत्याक्षेप, प्रत्यभियोग.

Retrace, *vt.* पुनः *or* प्रतिक्रमेण आक्रम् 1 U; पुनः स्मृ 1 P.

Retract, *vt.* उपसंहृ 1 P, प्रतिसंहृ 1 P; प्रत्याख्या 2 P, प्रत्यादिश् 6 P। *vi.* प्रतिसंहृ *Pass*, परावृत् 1 A; प्रतिज्ञां निराकृ 8 U *or* न अंगीकृ 8 U। –ation, *n.* प्रतिसंहार; प्रत्याख्यानं। –ile, *a.* परावर्तिन्, प्रतिसंहारक्षम। –ion,

n. प्रतिसंहरणं,परावर्तनं;प्रत्याख्यानं; पूर्वोक्तनिराकरणं.

Retreat, *n.* अपसरणं, परावर्तनं, परावृत्ति *f*, प्रतिनिवर्तनं, विद्रव; परावृत्तिसूचकं; आश्रय, विविक्तस्थानं, निलय; एकांतवास । *vi.* निवृत्, परावृत्, प्रतिनिवृत् *all* 1 A, विद्रु 1 P; विविक्ते स्था 1 P, विविक्तं गम् 1 P.

Retrench, *vt.* अवच्छिद् 7 P, कृत् 6 P; अल्पीकृ 8 U, लघयति *Den*, ह्रस् *c*; व्यवकल् 10 U । –ment *n.* अवच्छेद; अपचय; व्ययच्छेद.

Retribution, *n.* निर्यातनं; प्रतिफलं; निष्कृति *f*, प्रतिक्रिया; (आमुष्मिकं) फलपरिकल्पनं । Retributive, –tory, *a.* निर्यातक; प्रतिफलात्मक.

Retrieve, *vt.* अन्विष्य आनी 1 P *or* आहृ 1 P *or* विद् 6 P; अनुस्मृ 1 P; पुनः लभ् 1 A; उद्धृ 1 P; पूर्ववत् कृ 8 U, प्रतिसमाधा 3 U.

Retrocede, *vt.* प्रत्यृ *c*, प्रतिदा 3 U । *vi.* परावृत् 1 A प्रत्यावृत् 1 A । Retrocession, *n.* प्रत्यावर्तनं.

Retroflexion, *n.* प्रत्यानमनं.

Retrograde, *a.* परावर्तिन्, प्रतिगामिन्, प्रतीपगामिन्; प्रतिलोम, विपर्यस्त; अधोगामिन्, अवनत्युन्मुख । *vi.* प्रत्यावृत्, परावृत् 1 A, प्रतिगम् 1 P, प्रतिक्रमेण गम् 1 P; अधः *or* अस्तं गम् 1 P, अवसद् 1 P, ह्रस् 1 P । –ation, *n.* प्रत्यावृत्ति *f*, प्रतीपगमनं; (astr.) वक्रगति *f*.

Retrogress, *vi.* *See* "Retrograde" । –ion, *n.* परावर्तनं, प्रतीपगमनं; अवनति *f* । –ive, *a.* प्रत्यावर्तिन्, प्रतीपगामिन्; अधोगामिन्; अवनतिपर.

Retrospect, *n.* अतीतावलोकनं, सिंहावलोकनं, पूर्ववृत्तांतविमर्श, पूर्वानुदर्शनं । –ion, *n.* पूर्वानुचिंतनं । –ive, *a.* पूर्वानुचिंतक; पूर्वसंबंधिन्, ०संबद्ध.

Retrovert, *vt.* प्रत्यावृत् *c*.

Return, *vi.* प्रतिगम्, प्रत्यागम् 1 P, प्रतिनिवृत् 1 A, पुनः गम् 1 P *or* आगम् 1 P; प्रतिवृत् 1 A । *vt.* पुनः नी 1 P *or* आनी 1 P, प्रत्यानी 1 P; प्रतिदा 3 U, प्रत्यृ *c*; प्रतिनिर्यत् 10 U; प्रतिभाष् 1 A: प्रतिवद् 1 P; (elect) वृ 5 U, वृ 9 U । *n.* प्रतिगमनं, प्रत्यागमनं, प्रत्यावृत्ति *f*, पुनरागमनं; प्रतिदानं, प्रत्यर्पणं; प्रतिनिर्यातनं; वरणं; उत्पन्नं, फलं, लाभ । In r., प्रत्युत्तर०, प्रतिफलरूपेण.

Reunion, *n.* पुनर्मिलनं; संमेलनं.

Reveal, *vt.* (दिव्योपायेन) निविद् *c*; अपावृ 5 U, आविष्कृ 8 U, ख्या *c*, प्रकटयति *Den*, प्रकाश् *c*, विवृ 5 U; (रहस्यं) भिद् *c or* स्फुट् *c* । –ment, *n.* आविष्करणं, प्रकटनं । Revelation, *n.*

(दिव्यतत्त्व०) प्रकाशनं, ०प्रकटनं, ०दर्शनं; मंत्र, वेद, श्रुति *f*; रहस्यभेद, सत्यप्रकटनं.

Revel, *vi.* अतीव क्रीडोत्सवं *or* संपीतिं *or* भोजनोत्सवं कृ 8 U; अत्यंतं रम् 1 A *or* भुज् 7 U। *n.* क्रीडोत्सव, संपीति *f*। -ry, *n.* अतिभोग, विलास.

Revenant, *n.* प्रतिवर्तिन् *m*; भूत.

Revenge, *vt.* (प्रति०) निर्यत् 10 U; प्रतिकृ 8 U, प्रतिहिंस् 7 P। *n.* (प्रति०) निर्यातनं, प्रतिद्रोह, प्रत्यपकार; जिघांसा। -ful, *a.* निर्यातनेच्छु, जिघांसु, प्रतिद्रोहपर। -ment, *n.* प्रतिनिर्यातनं। -r, *n.* प्रतिनिर्यातक.

Revenue, *n.* आगम, आय, उदय, राजस्वं.

Reverberate, *vt.* प्रतिनद्, प्रतिशब्द्, प्रतिस्वन् *all c*। *vi.* प्रतिध्वन्, प्रतिनद्, प्रतिस्वन् *all* 1 P, प्रतिशब्द् 10 U। -ion, *n.* अनुनाद, प्रतिध्वनि, प्रतिस्वन। -ary, *a.* प्रतिध्वनिमत्.

Revere, *vt.* आदृ 6 A, पूज् 10 U, भज् 1 U, मह् 10 U, संमन् *c*। -nce, *n.* आदर, पूजा, संमान; आराधना, उपासना, भक्ति *f*; अभिवंदनं, नमस्कार, प्रणाम; *vt.* मह् 10 U। -nd, *a.* महनीय, संमाननीय, पूजार्ह। -nt, -ntial, *a.* पूजात्मक, संमानपूर्ण; भक्तिमत्; नम्र, विनीत, सप्रश्रय.

Reverie, *n.* चिंतनं, ध्यानं, ध्यानमग्नता.

Reverse, *a.* विपर्यस्त, व्यत्यस्त, व्यस्त, पर्यस्त; प्रतीप, विपरीत। *n.* प्रतिपक्ष, विपर्यय, विपर्यास; पृष्ठं, ०भाग; पराभव, अंतराय, प्रत्यूह, विपद् *f*। *vt.* पर्यस्, विपर्यस्, व्यत्यस् *all* 4 U, अधोमुखीकृ 8 U, परावृत् *c*, परिवृत् *c*; प्रत्याख्या 2 P, प्रत्यादिश् 6 P। -al, *n.* परिवर्तनं, विपर्यास। -ion, *n.* पूर्वस्थितिप्राप्ति *f*, ०लाभ; प्रतिदेयमूल्यं; उत्तराधिकार (रिक्थस्य) प्रत्यादानं, प्रत्यावर्तनं। -ly, *adv.* प्रतिक्रमेण, विपर्ययेण.

Revert, *vt.* परिवृत् *c*, प्रत्यावृत् *c*। *vi.* प्रतिगम् 1 P, प्रत्यावृत् 1 A; (पूर्वस्थितिं) पुनः प्राप् 5 P *or* लभ् 1 A.

Review, *vt.* पुनः आलोच् 10 U; सूक्ष्मतया अवलोक् 1 A. 10 U, निरीक्ष्, परीक्ष् 1 A; (गुणदोषं) विचर् *c or* विविच् 7 U। *n.* सूक्ष्मपरीक्षा, ०पर्यालोचनं; प्रत्यालोचनं, पुनर्विचार; (ग्रंथस्य) गुणदोषविवेचनं, परीक्षणं, परीक्षालेख; सेनाव्यूहनं, ०निरीक्षा। -er, *n.* विवेचक, ग्रंथपरीक्षक.

Revile, *vt.* (अतीव) अपभाष् 1 A, अपवद् 1 U, अवक्षिप् 6 P, कुत्स् 10 A, निंद् 1 P। -ment, *n.* अपभाषा, उपालंभ, कुत्सनं, गालि *f*, निंदा। -r, *n.* अपभाषिन् *m*, निंदक.

Revise, *vt.* पुनः परीक्ष् 1 A; परिशुध् c, संशुध् c । -al, -ion, *n.* पुनर्निरीक्षणं; संशोधनं; संशोधितावृत्ति *f.*

Revive, *vi.* पुनः जीव् 1 P, उज्जीव् 1 P, समुत्था 1 P; प्रकृतिं *or* संज्ञां लभ् 1 A *or* प्राप् 5 P; पुनः स्मृ *Pass* । *vt. c of prec.*; पुनः प्रवृत् c *or* प्रचल् c । -al, *n.* उज्जीवनं, संजीवनं; संज्ञालाभ; पुनरुत्थानं, पुनःप्रवर्तनं, पुनरुद्धार.

Revivify, *vt.* पुनः उज्जीव् c; पुनः प्रोत्सह् c.

Revoke, *vt.* प्रत्याख्या 2 P, प्रत्यादिश् 6 P । Revocable, *a.* प्रत्याख्येय । Revocation, *n.* प्रत्याख्यानं, खंडनं.

Revolt, *vi.* (अभि०) द्रुह् 4 P, (अमुकस्य) अधिकारं निराकृ 8 U, वशात् परावृत् 1 A, राजद्रोहं कृ 8 U; अतीव जुगुप्सते *Den* । *vt.* उद्विज् c, जुगुप्सया पीड् 10 U । *n.* प्रजाक्षोभ, राजद्रोह, राजविरोध, राज्यविप्लव । -er, *n.* राजद्रोहिन् *m* । -ing, *a.* अप्रीतिकर, बीभत्स.

Revolution, *n.* परिवर्तनं, परिवृत्ति *f*; आवर्त, चक्रं, परिवर्त, पर्याय; क्रांति *f*, परिवर्तनं; राज्यविप्लव । -ary, *a.* क्रांतिविषयक, ०कारिन्; राज्यविप्लवकारिन्; *n.* (*also* -ist), क्रांति०, राज्यविप्लवकारिन् *m* । -ize, *vt.* अत्यंतं *or* सर्वथा परिवृत् c.

37

Revolve, *vi.* आवृत् 1 A, (परि०)-भ्रम् 1. P, परिवृत् 1 A; चक्रवत् गम् 1 P । *vt. c of prec.*; परिचिंत् 10 U, विचर् c । -er, *n.* लध्वग्न्यस्त्रं.

Revue, *n.* संगीतकं.

Revulsion, *n.* आकस्मिकं *or* सरभसं वृत्त्यंतरं *or* चित्तपरिवर्तनं, विराग । Revulsive, *a.* चित्तपरिवर्तक.

Reward, *vt.* पारितोषिकं दा 3 U, परितुष् c; कृतार्थयति *Den*, सफलीकृ 8 U, । *n.* पारितोषिकं, उपायनं, प्रतिफलं.

Reynard, *n.* जंबूक, मृगधूर्त, शृगाल.

Rhampoid, *a.* चंच्वाकार.

Rhapsode, *n.* कीर्तनकार । Rhapsodic, -al, *a.* कीर्तनविषयक; असंगत, साडंबर । Rhapsody, *n.* महाकाव्यं; असंगत०, साडंबरप्रबंध, °काव्यं.

Rhetoric, *n.* साहित्यशास्त्रं, अलंकारशास्त्रं; वाग्मिता, वाग्विलास । -al, *a.* साहित्यविषयक, आलंकारिक; वाक्तांडवपूर्ण । -ian, *n.* अलंकारशास्त्रज्ञ.

Rheum, *n.* कफ, श्लेष्मन् *m*; (of eye) अक्षिमल, दूषिका; अश्रूणि *pl.* । -atic, *a.* वातकिन्, वातग्रस्त, वातुल । -atism, *n.* वात, वातरोग, वातव्याधि *m*; संधिवात । -y, *a.* श्लेष्मल; (eye) चिल्ल; (weather) आर्द्र, शीतल.

Rhinal, *a.* नासिक्य.

Rhinitis, *n.* नासापाक.

Rhino, (1) *n.* द्रविणं, धनं, वित्तं.

Rhino (2), Rhinoceros, *n.* खड्ग, खड्गिन् *m*, गणोत्साह, गंड(क), तैतिल, वाध्री(ध्री)णस ; (female) खड्गधेनु(का).

Rhomboid, *n.* विषमचतुर्भुज.

Rhyme, *n.* यमकं ; मित्राक्षरं ; (*pl.*) कविता, काव्यं, पद्यं। *vi.* पद्यरचनां कृ 8 U ; संवद् 1 P। *vt.* (पद्यं) रच् 10 U। Without r. or reason, निर्विवेक, निष्प्रयोजन। -less, *a.* अयमक। -r, -ster, *n.* पद्यकार, (कु०)कवि *m*.

Rhythm, *n.* ताल, लय। -ic, -ical, *a.* लयबद्ध, लयानुसारिन्.

Rib, *n.* पर्शु *m*, पर्शुका, पार्श्वकं, पार्श्वास्थि *neu* ; पार्श्वस्थूणा ; शलाका ; रेखा.

Ribald, *a.* अश्लील, असभ्य, ग्राम्य। -ry, *n.* अश्लीलवचनानि *pl* ; ग्राम्यचेष्टा.

Riband, Ribbon, *n.* पट्ट *mn*, पट्टिका.

Rice, *n.* (Grain) तंडुल ; व्रीहि *m*, शालि *m*, स्तंबकरि *m* ; (plant) कलम, नीवार ; (large) सुगंधिक ; (black) सांवत्सर ; (boiled) ओदन *mn* ; (oblation) वाजं। R. porridge, पायसं। Parched r., झिल्ली, भिष्मिका, भिस्स (स्सि)-टा, धानाः *pl*, धानाकाः *pl*.

Rich, *a.* अर्थवत्, धनसंपन्न, धनिक, धनिन्, श्रीमत्, श्रील, समृद्ध ; आढ्य, प्रचुर, प्रभूत, विपुल (*in comp.*); उर्वर, फलप्रद, बहुफल ; बहुमूल्य, महार्घ ; सुघटित, सुविभूषित ; अतिस्वादु, सुरस ; मधुर, सुस्वन। -es, *n. pl.* अर्थ, धनं, वित्तं ; ऐश्वर्यं, लक्ष्मी *f*, विभव, श्री *f*, समृद्धि *f*, संपत्ति *f*। -ly, *adv.* प्रभूतं, अत्यंतं। -ness, *n.* प्राचुर्यं, वैपुल्यं ; बहुफलत्वं ; धनिकत्वं ; संपत्ति *f*.

Rick, *n.* राशि *m*, संचय.

Rickets, *n.* बालग्रह। Rickety, *a.* अस्थिरोगग्रस्त ; अदृढसंधि ; जर्जर, जीर्ण.

Rictus, *n.* विजृंभणं.

Rid, *vt.* मुच् 6 P. *c* ; अपनी 1 P, दूरीकृ 8 U। -dance, *n.* मोक्ष, मोचनं ; परिहार.

Riddle, (1) *n.* कूटं, कूटप्रश्न, प्रवह्लिका, प्रहेलिका, वाचनकं ; गूढं.

Riddle, (2) *n.* चालनी, तितउ *m*, शोधनी। *vt.* चालन्या शुध् *c* ; (अनेकरंध्रैः) छिद्रयति *Den*, व्यध् 4 P ; विवादेन प्रतिक्षिप् 6 P.

Ride, *vi.* अश्वारूढ *a.* *or* अश्वेन गम् 1 P, चल् 1 P, *etc.*। *vt.* अश्वं आरुह् 1 P *or* अधिष्ठा 1 P *or* चल् *c*। *n.* अश्वचालनं ; अश्वविहरणं। -r, *n.* अश्ववाह(क), अश्वारोह, सादिन् *m* ; परिशिष्टं ; उपसिद्धांत। Riding, *n.* अश्वचालनं, अश्वारोहणं.

Ridge, *n.* कटक *mn*; गिरिपृष्ठं; अद्रिमाला । *vt.* कर्षणेन विदॄ 9 P. *c.*

Ridicule, *n.* अवहास, उपहास; अवहेलना । *vt.* अवहस् 1 P, उपहस् 1 P; सोपहासं अवमन् 4 A । Ridiculous, *a.* उपहास्य, हासकर, हास्य; –ly, *adv.* उपहास्यरूपेण, ०प्रकारेण; अत्यंतं.

Riem, *n.* नद्ध्री.

Rife, *a.* प्रचुर, प्रभूत, विपुल, प्रचलित.

Riffraff, *n.* नीच०, प्राकृतजनाः *pl.*

Rifle, *vt.* (वि०)लुंठ् 1 P; अपहृ 1 P । *n.* अग्न्यस्त्रं । -r, *n.* लुंठ(टा)क.

Rift, *n.* भंग, रंध्रं, विवरं, स्फोट । *vt.* विदल् *c*, विदॄ 9 P. 10 U, विपट् 10 U.

Rig, (1) *vt.* सज्जीकृ 8 U; उपक्लृप् *c*, प्रसाध् *c*; युज् 7 A. 10 U । *n.* (*also*—ging) नौकोपकरणानि *pl*; परिवेष; सज्जा, सामग्री.

Rig, (2) *n.* कपटं, छलोपाय, वंचना; क्रीडा, लीला । *vt.* सकपटं युज् 7 A. 10 U *or* साध् *c*.

Right, *a.* धर्म्य, न्याय्य, यथार्थ; अनुरूप, उचित, उपपन्न, युक्त, योग्य, समीचीन; सुस्थ, निरामय, अक्षत; सत्य, अवितथ, तथ्य; दक्षिण, अपसव्य; ऋजु, सरल, अकुटिल; (angle) सम । *adv.* यथान्यायं, यथार्थं, धर्मानुसारेण; उपपन्नं, युक्तं, साधु, सुष्ठु, सम्यक्; नितरां, साकल्येन; दक्षिणतः; सरलं, ऋजु । *n.* धर्म, न्याय; न्याय्यता, याथार्थ्यं; अधिकार, सत्ता; दक्षिण *m*, दक्षिणपार्श्व, ०दिश् *f* । *vt.* सम्यक् स्था *c or* न्यस् 4 U; प्रतिसमाधा 3 U, शुध् *c*; निर्दोषीकृ 8 U । All r., साधु, बाढं, भद्रं । R. and left, सर्वतः, सर्वशः । R. away, off, तत्कालं, सद्यः, सपदि । R. angle, समकोण । -eous, *a.* धर्मानुसारिन्, न्यायिन्, सदाचार, सद्वृत्त; धर्म्य, न्याय्य । –ful, *a.* यथार्थ, धर्म्य, न्याय्य; अधिकारमूलक, साधिकार । –ly, *adv.* यथान्यायं, यथार्थं, न्यायेन; उचितं, युक्तं । –ward, *adv.* दक्षिणतः, दक्षिणात्, दक्षिणेन.

Rigid, *a.* दृढ, अशिथिल, अनम्य; अनुल्लंघनीय, अविशंकनीय, नियमनिष्ठ; कठोर, परुष, रूक्ष । –ity, *n.* दृढता; नियतत्वं; पारुष्यं.

Rigmarole, *n.* असंगतजल्पनं.

Rigor, *n.* ज्वरकंप.

Rigour, *n.* नियमनिष्ठता, ०बद्धता, निर्बंधपरता, दृढता, अशैथिल्यं; कठोरता, पारुष्यं । Rigorous, *a.* नियमबद्ध, निर्बंधपर, दृढ, अशिथिल; कठोर, परुष, रूक्ष; असौम्य, उग्र; सूक्ष्म; –ly, *adv.* दृढं, सनिर्बंधं; सूक्ष्मतया.

Rile, *vt.* क्रुध् *c*, क्षुभ् *c*, प्रकुप् *c*.

Rill, *n.* उत्स, कुल्या, झर-रा-री, निर्झर.

Rim, *n.* अंत, कंठ, कर्ण, धार-रा, प्रांत, मुखं । *vt.* प्रांतयति *Den.* कंठेन, कर्णेन *etc.*, सनाथीकृ 8 U.

Rime, (1) *n.* तुषार, नीहार । *vt.* नीहारेण आवृ 5 U । Rimy, *a.* नीहारपूर्ण; शीत.

Rime, (2) *n.* यमकं; *See* 'Rhyme'.

Rimose, Rimous, *a.* छिद्रमय, रंध्रपूर्ण.

Rimple, *n.* वलि-ली *f*, भंग.

Rind, *n.* चोचं, चोलक *mn*, छल्लि *f*, त्वच् *f*, वल्क *mn*, वल्कल *mn*, वल्कुटं.

Ring, (1) *n.* अंगुली(री)यं, अंगुली-(री)यकं, ऊर्मिका, मुद्रा; चक्रं, मंडलं, वर्तुलं, वलयं, वृत्तं; परिषद् *f* । *vt.* अंगुलीयकेन *or* मंडलेन सनाथीकृ 8 U; परिवेष्ट् 1 A. *c*; सर्वतः निरुध् 7 U । -ed, *a.* अंगुलीयक०, वर्तुलवत्; वर्तुलाकार । -leader, *n.* मुख्यप्रवर्तक, अग्रेसर, नायक । -let, *n.* क्षुद्रांगुलीयकं; अलक, कुरल, चूर्णकुंतल । -worm, *n* दद्रु *m*.

Ring, (2) *vi.* क्वण् 1 P, झणझणायते *Den*, रण् 1 P, रस् 1 P, शिंज् 1 A; प्रतिध्वन्, प्रतिनद्, प्रतिस्वन् *all* 1 P । *vt.* *c of prec.*; वद् *c*, स्वन् *c* । *n.* क्वणनं, झणत्कार, शिंजितं; अनुनाद; स्वरवैशिष्ट्यं । -ing, *a.* क्वणत्; अनुनादिन्; ध्वनिकर, विराविन्; स्पष्ट.

Rinse, *vt.* धाव् 1. 10 U, प्रक्षल् 10 U, धावनेन शुध् *c*; उपस्पृश् 6 P.

Riot, *n.* कोलाहल, डमर, तुमुल *mn*, विप्लव, संक्षोभ; अतिभोग, दुराचार, भोगासक्ति *f*, लांपट्यं, विलासोद्रेक; क्रीडोत्सव; प्रजाविप्लव, अधिकार-भंग । *vt.* अधिकारविप्लवं कृ 8 U; लांपट्येन वृत् 1 A । *vt.* विलासोद्रेकेण गम् *c* *or* ह्रस् *c* । -er, *n.* संक्षोभकारिन् *m* । -ous, *a.* तुमुल०, संक्षोभकारिन्; अतिविलासपूर्ण.

Rip, (1) *vt.* विदॄ 9 P. *c*, निर्भिद् 7 P । *vi.* *Pass of prec.* । -per, *n.* क्रकच *mn*, पत्रदारण; जनोत्तम, उत्तमवस्तु *neu* । -ping, *a.* उत्कृष्ट, उत्तम, वरेण्य, श्रेष्ठ.

Rip, (2) *n.* कितव, धूर्त, वंचक, हारक.

Rip, (3) *n.* जलावर्त, पुटभेद, भ्रमि *f*.

Riparian, *a.* कच्छ०, कूलविषयक.

Ripe, *a.* पक्व, परिणत; निष्पन्न, परिपूर्ण, प्रौढ; मिष्ट, सुरस । -n, *vi.* पच् *Pass*, परिपक्व *a.* भू 1 P, पाकं प्राप् 5 P: *vt.* पच् 1 P, परिपक्वं *a.* कृ 8 U । -ness, *n.* पक्वता, पाक; परिणति *f*.

Ripost, *n.* क्षिप्रोत्तरं; प्रत्याघात.

Ripple, *vi.* तरंगायते *Den*, सतरंगं वह् 1 P । *vt.* तरंगरूपेण क्षुभ् *c* । *n.* उत्कलिका, ऊर्मि *f*, तरंग, भंग,

वीचि *f* । -ing, -y, *a.* उत्तरंग, ऊर्मिन्, ऊर्म्य.

Rise, *vi.* अधिरुह् 1 P, आरुह् 1 P, उत्था 1 P, उत्पत् 1 P, उदि 2 P, उद्गम् 1 P, उद्वृत् 1 A; (सभायाः) विरम् 1 P; उपचि *Pass*, वृध् 1 A; उत्पद् 4 A, जन् 4 A, प्रादुर्भू 1 P; अधिकारभंगं कृ 8 U, अभिद्रुह् 4 P, प्रत्यवस्था 1 A। *n.* अधिरोहणं, उत्थानं; आरोह; उदय, उद्गम, प्रभव, प्रादुर्भाव; उन्नतभूमि *f*, ०प्रदेश, उत्सेध; वृद्धि *f*, समृद्धि *f*, उन्नति *f*, पदोत्कर्ष । Rising, *n.* आरोहणं; उदय; जनतोपप्लव, प्रकृतिकोप, ०क्षोभ; शोफ, श्वयथु *m*.

Risible, *a.* हास्यकर; हास्यशील.

Risk, *n.* अपायभयं, संशय, संदेह। *vt.* संशये पत् *c*; साहसं कृ 8 U। To run a r., संशयास्पदं भू 1 P। -y, *a.* सांशयिक, संकटाक्रांत.

Rite, *n.* कर्मन् *neu*, कल्प, कृत्यं, विधि *m*, संस्कार.

Vex, *vt.* कुप् *c*, क्लिश् 9 P, (सं॰)-तप् *c*, पीड् 10 U, बाध् 1 A, रुष् *c*, व्यथ् *c*, हेठ् 1 P; विलुड् *c*, संक्षुभ् *c* । -ation, *n.* प्रकोपनं; कोप, (सं)ताप, पीडा, बाधा, व्यथा; पीडाकारणं । -atious, *a.* उद्वेजक, कष्टप्रद, पीडावह, संतापक । -ed, *a.* प्रकोपित; उद्विग्न, पीडित, संतापित; विवाद-मूल; -ly, *adv.* सोद्वेगं, संतापेन.

Via, *adv.* (अमुक॰) मार्गेण.

Viable, *a.* जीवनक्षम । Viability, *n.* जीवनसामर्थ्यं.

Viaduct, *n.* सेतु *m*.

Vial, *n.* लघुकूपी । To pour out the v.s of wrath, निर्यातनां साध् *c*; क्रोधं आविष्कृ 8 U.

Viand, *n.* (*usually pl.*) अन्न-सामग्री, भक्ष्यजातं.

Viaticum, *n.* पाथेयं.

Vibrate, *vi.* क्षिप्रं दोलायते *Den or* कंप् 1 A, स्पंद् 1 A, स्फुर् 6 P । *vt.* c *of prec.* । -ion, *n.* क्षिप्र-कंप, स्पंद(नं); स्फुरणं । Vibrant, *a.* कंपमान, स्पंदमान; अनुनादिन् । Vibratile, Vibrative, Vibratory *a.* स्पंदमान; स्फुरत्.

Vicar, *n.* धर्मोपदेशक, पुरोहित । -age, *n.* धर्मोपदेशकाधिकार; ॰गृहं.

Vicarious, *a.* परार्थकृत, ॰सोढ, ॰व्यवहारिन् । Vicariate, *a.* परार्पिताधिकारसंपन्न.

Vice, (1) *n.* अधर्म, अनीति, दुराचार, दुश्चरितं, पापं, पापकर्मन् *neu*, पापाचार, व्यभिचार; दुर्व्यसनं; दुर्गुण, दोष । Vicious, *a.* अधर्म्य, अनीतिमत्, असत्, दुराचार, दुर्वृत्त, पाप, व्यभिचारिन्; दोषपूर्ण, सदोष; कोपन, दुष्प्रकृति, प्रतीप; -ly, *adv.* दुराचारेण; सेर्ष्यं; -ness, *n.* अनीति *f*, असाधुत्वं; सदोषत्वं.

Vice, (2) *n.* दृढग्राहयंत्रं.

Vice, (3) *prep.* (अमुकस्य) स्थाने । *prefix, exp. by* उप॰ *in comp.* । -president, *n.* उपाध्यक्ष । -regent, a. परार्पिताधिकार-संपन्न; *n.* प्रतिनिधि *m* । -roy, *n.* राजप्रतिनिधि *m*.

Vice versa, *adv.* विपर्ययेण, व्युत्क्रमेण.

Vicinage, *n.* उपांत, परिसर, प्रति-वेश, सामंतं । Vicinal, *a.* प्रति-वेशिन्.

Vicinity, *n.* नैकट्यं, प्रत्यासत्ति *f*, संनिकर्ष, संनिधानं, संनिधि *m*; उपांत, परिसर, प्रतिवेश, सामंतं.

Vicissitude, *n.* अवस्थांतरं, परि-वर्त, परिवर्तनं । Vicissitudinary, Vicissitudinous, *a.* परिवर्तिन्.

Victim, *n.* उपहार, बलि *m*, वध्य; प्रतारित, वंचित । -ize, *vt.* बलिं कृ 8 U; प्रतृ *c*, वंच् *c* । -ization, *n.* उपहरणं; प्रतारणं, वंचना.

Victor, *n.* (वि०)जेतृ *m*, विजयिन् *m* । -ious, *a.* जित्वर, जिष्णु, जैत्र, विजयिन् ; -ly, *n.* सविजयं । -y, *n.* (वि०)जय, विजिति *f*; (defeating) पराभव.

Victual, *n.* (*usually pl.*) अन्नं, अन्नसामग्री । *vt.* अन्नसामग्रीं उपक्लृप् *c or* उपपद् *c* । *vi.* अन्नसामग्रीं संग्रह् 9 P । -ler, *n.* अन्नविक्रयिन् *m*, भोजनगृहपति *m*.

Vidimus, *n.* संख्यानपरीक्षा; संक्षेप, सार.

Vie, *vi.* विजिगीषते *Desid*, स्पर्ध् 1 A.

View, *n.* निरीक्षणं, समालोचनं; दर्शनं, दृष्टि *f*; आलोक, दृश्यं, दृश्यप्रदेश, दृष्टिविषय; मतं, मति *f*; अभिप्राय, आशय, उद्देश, भाव, हेतु *m* । *vt.* दृश् 1 P, निरीक्ष् 1 A, समालोच् 10 U, समीक्ष् 1 A, आकल् 10 U, ईक्ष् 1 A, मन् 4 A । In v., दृष्टिगोचर । In v. of, अपेक्षया, अपेक्ष्य, उद्दिश्य । P. of view, मतभेद, दृष्टिविशेष । With a v. to, उद्दिश्य; ०अर्थं, ०अर्थाय, कृते, हेतोः । -able, *a.* दृश्य । -less, *a.* अदृश्य, अप्रत्यक्ष, अलक्ष्य । -y, *a.* छंदिन् , विचित्रमत; कल्पनामात्रप्रचुर.

Vigesimal, *a.* विंश, विंशतितम.

Vigil, *n.* (प्र०)जागर, जागरणं, जागर्ति *f*, जागर्या, जाग्रिया; जागरूकता; पूर्वप्रदोष; (*pl*) नक्तव्रतं । -ance, *n.* जागरूकता; सूक्ष्मावधानं । Vigilant, *a.* जागरू(र)क, जागरितृ(त), जागरिन् , जागृवि, जाग्रत् , अवहित, सावधान, अप्रमत्त; -ly, *adv.* जागरूकतया; सावधानं.

Vignette, *n.* पर्णालंकार; शून्यकोणचित्रं; स्वभावचित्रं.

Vigour, *n.* प्रभाव, प्राबल्यं, बलं, वीर्यं, शक्ति *f*, सामर्थ्यं; ऊर्जस् *neu*, ओजस् *neu* । Vigorous, *a.* प्रबल, बलिन् , समर्थ, सामर्थ्यमत् ; ऊर्जस्विन् , ओजस्विन् ; -ly, *adv.* प्रबलं, बलवत् ; सोत्साहं.

Vile, *a.* अधम, अपकृष्ट, कुत्सित, जघन्य,तुच्छ,नीच,पामर;अतिदोषपूर्ण, सदोष । -ly, *adv.* कुत्सितं, नीचतया । -ness, *n.* अधमता, नीचता, जघन्यत्वं । Vilify, *vt.* अपवद् 1 P, अभ्यसूयति *Den*, आक्षिप् 6 P, कलंकयति *Den*, निंद् 1 P, परिवद् 1 P । Vilification, *n.* अपभाषणं, अपवाद,

आक्षेप, निंदा, परिवाद । Vilipend, *vt.* सावज्ञं निर्दिश् 6 P, लघयति *Den*, अवमन् 4 A.

Villa, *n.* ग्रामगृहं, नगरोपकंठगृहं.

Village, *n.* खेट, ग्राम, निवसथ, प्रतिवसथ । *a* ग्रामिक, ग्रामिन्, ग्रामीण, ग्रामी(मे)य, ग्राम्य, जानपद । Head of a v., ग्रामणी *m*, ग्रामाध्यक्ष । -r, *n.* ग्रामिक, ग्रामिन् *m*, ग्रामीण.

Villain, *n* अधम, खल, दुर्जन, दुष्टात्मन् *m*, नराधम, पापात्मन् *m*; कितव, धूर्त, शठ; ग्राम्यजन; दास । -ous, *a.* दुर्जनोचित; अधम, कुत्सित, जघन्य, नीच; अतिदोषपूर्ण, असम्यकृत; -ly, *adv.* नीचतया; अतीव असम्यक् *or* सदोषं । -y, *n.* अशिष्टता, असभ्यता, ग्रामाचार; दुराचार, दुर्वृत्तं, पापकर्मन् *neu*; कैतवं, दौर्जन्यं, शाठ्यं.

Villatic, *a.* ग्रामगृह०, क्षेत्रगृहविषयक; ग्रामीण, जानपद; गृहजात, गृह्य, छेक.

Villegiatura, *n.* ग्रामवास.

Villein, *n.* दास.

Vim, *n.* ऊर्जस् *neu*, उत्साह, बलं, सामर्थ्यं.

Viminal, *a.* अंकुर०, प्ररोहविषयक, प्ररोहात्मक; अंकुर०, प्ररोहोत्पादक.

Vinaceous, *a.* सुराविषयक, ०वर्ण.

Vinaigrette, *n.* गंधकूपी.

Vincible, *a.* पराजेय.

Vindicate, *vt.* प्रमाणीकृ 8 U, समर्थ् 10 U, स्था *c*; निर्दोषीकृ 8 U, शुध् *c* । -ion, *n.* समर्थनं, स्थापनं; दोषमोचनं, (परि०)-शोधनं, दोषमुक्ति *f* । -ive, -ory, *a.* समर्थक; शोधक, दोषहर.

Vindictive, *a.* निर्यातनपर, प्रत्यपकारेच्छु, जिघांसु, प्रतिद्रोहपर; दंडात्मक । -ly, *adv.* प्रतिद्रोहेण, निर्यातनेच्छया.

Vine, *n.* कालमेषिका, गोस्तनी, द्राक्षा, प्रियाला, मृद्वी(का), स्वाद्वी, हारहूरा । -ry, *n.* मृद्वीकाकुटी । -yard, *n.* द्राक्षावाटिका । Viny, *a.* मृद्वीकापूर्ण, द्राक्षाकीर्ण.

Vinegar, *n.* शुक्तं, अम्लसुरा । -y, *a.* अम्ल; रुष्ट, अप्रसन्न.

Vinous, *a.* मदिराविषयक; मदिरावर्ण; क्षीब, उन्मद.

Vintage, *n.* द्राक्षासंग्रह, ०काल; सुरा । -r, *n.* द्राक्षासंग्राहक । Vintner, *n.* सुराविक्रयिन् *m*.

Viol, Violin, *n.* पिनाकी, सारंगी । -ist, *n.* सारंगीवादक । Violoncello, *n.* बृहत्सारंगी.

Violate, *vt.* अतिक्रम् 1 U. 4 P, उल्लंघ् 1 A. 10 U, भंज् 7 P; पावित्र्यं खंड् 10 U, दुष् *c*, सावमानं आचर् 1 P; (आ०)

धृष् *c*, बलात्कारेण अभिगम् 1 P *or* भुज् 7 U; (एकांतं) खंड् 10 U । –ion, *n.* अतिक्रम, उल्लंघनं, भंग, लोप ; धर्ष, धर्षणं, प्रसह्यगमनं, बलात्कार, हठभोग । –r, *n.* (आ०) धर्षक.

Violence, *n.* प्रसभ, रभस् *neu*, रभस, संरंभ; प्रचंडता; बलं; बलात्कार; अपाय, हानि *f*; धर्षणं, हठभोग.

Violent, *a.* संरंभिन्, सरभस; प्रचंड, प्रबल, महावेग, तुमुलकारिन्; आवेशयुक्त; तीव्र; (death) अनैसर्गिक, बाह्यनिमित्त, दुर्घटनाकारित । –ly, *adv.* सरभसं, प्रसभं.

Violet, *a.* नीललोहित, पाटल । *n.* पुष्पविशेष.

Viper, *n.* आशीविष, दंदशूक, विषधर; विश्वासघातक । –ish, *a.* आशीविषोपम; द्वेषिन्, पिशुन, विश्वासघातिन्

Virago, *n.* कर्कशा, कलहप्रिया, चंडी.

Virescent, *a.* हरित, हरितप्राय । Virescence, *n.* हरितत्वं.

Virgate, *a.* सरल, याष्टिसम.

Virgin, *n.* कन्या, कुमारी, अक्षता, अक्षतयोनि *f*; कन्याराशि *m* । *a.* कौमार; अदूषित, अक्षत, शुद्ध, कुमार्युचित, सव्रीड, शालीन; अफालाहत, अकृष्ट । –al, *a.* कुमार्युचित; सव्रीड, शुद्ध ।–hood, –ity, *n.* कौमार्य.

Virgo, *n.* कन्याराशि *m*.

Virgule, *n.* प्रशाखा; यष्टिका.

Viridescent, *a.* ईषद्धरित । Viridescence, *n.* ईषद्धरितत्वं । Viridity, *n.* हरितत्वं.

Virile, *a.* वीर्यवत्, जननक्षम; पौरुष, पौरुषेय; प्रौढ, सामर्थ्यवत् । Virility, *n.* पुंस्त्वं, पुरुषत्वं; प्रौढि *f*, ओजस् *neu*; सामर्थ्य.

Virose, Virous, *a.* विषमय, विषाक्त, सक्ष्वेड; पूतिगंध.

Virtu, *n.* ललितकलाप्रियता । –oso, *n.* सुशिल्पतज्ज्ञ; कलावत्, (अमुक०) कलाविशारद.

Virtue *n.* धर्म्यता, नीति *f*, सदाचार, साधुता, सुशीलत्वं, सौजन्यं; गुण, सद्गुण ; सतीत्वं; प्रभाव, शक्ति *f*, सामर्थ्य । By, in v. of, प्रभावात्, बलेन । Virtual, *a.* वास्तविक; –ly, *adv.* वस्तुतः । Virtuous, *a.* धर्मिन्, धार्मिक, नीतिमत्, साधु, सुकृतिन्, सुशील; धर्म्य, पुण्य; –ly, *adv.* धर्मेण; –ness, *n.* धार्मिकता, साधुता.

Virulent, *a.* अतिविषदग्ध; अतिकटु, अत्युग्र; अतिपरुष, अरुंतुद । –ly, *adv.* अत्युग्रं; अतिपरुषं । Virulence, *n.* अत्युग्रता, अतिपारुष्यं.

Virus, *n.* रोगविषं; दोष; अतिपारुष्यं.

Visage, *n.* आननं, आस्यं, मुखं, वदनं; वदनरूपं, ०आकृति *f.*

Vis-à-vis, *adv.* मुखामुखि, संमुखं । *n.* संमुखवर्तिन् *m,* संमुखजन.

Viscera, *n. pl.* अंत्राणि *pl,* पुरीतत् *neu* । -l, *a.* आंत्र । -te, *vt.* अंत्राणि उद्धृ 1 P *or* अपहृ 1 P.

Viscid, *a.* चिक्कण, श्यान, सांद्र, संलग्नशील । -ity, *n.* श्यानता.

Viscous, *a.* संलग्नशील । Viscosity, *n.* संलग्नशीलता.

Visible, *a.* दृश्य, दृष्टिगोचर; व्यक्त, स्पष्ट । -y, *adv.* प्रत्यक्षं, साक्षात् । Visibility, *n.* दृश्यता, व्यक्तता.

Vision, *n.* दृष्टि *f,* दर्शनं, आलोक, दृश्यं, दृष्टिविषय; आभास, जागर, स्वप्न(दर्शनं); कल्पना, चित्तसृष्टि *f* । *vt.* मनसा क्लृप् *c,* निरूप् 10 U *or* भू *c* । -al, *a.* दर्शनविषयक । -ary, *a.* दर्शनमात्ररूप; जागर०, स्वप्नदृष्ट; अवास्तविक, काल्पनिक; अविधेय, असाध्य; स्वप्नैकदृश्, कल्पनामात्रप्रचुर.

Visit, *vt.* दर्शनाय गम् 1 P, अभ्यागम् 1 P; परीक्षार्थं अभी 2 P; नित्यं आश्रि 1 U *or* सेव् 1 A; आसद् *c,* पीड् 10 U, बाध् 1 A । *n.* अभ्यागमनं, दर्शनं । -ant, -or, *n.* अभ्यागत, गृहागत । -ation, *n.* अभ्यागमनं; दिव्यबाधा, ०विप्लव.

Visor, Visard, *n.* वदनत्राणं.

Vista, *n.* (अंतर्वृक्ष०)दृश्यं, दृष्टिविषय; आलोक.

Visual, *a.* चाक्षुष, दृष्टिविषयक; दर्शन० *in comp.* । -ize, *vt.* दृष्टिगोचरं *a.* कृ 8 U; प्रत्यक्षयति *Den.*

Vital, *a.* जीवनविषयक, ०मूलक, जीवनावश्यक; ऊर्जस्विन्, सोत्साह; आवश्यक, अपरिहार्य; गुर्वर्थक । -ity *n.* चेतनत्वं; सजीवत्वं; ऊर्जस् *neu,* वीर्यं, सत्त्वं, सामर्थ्यं; उत्साह, उल्लास; चिरस्थायित्वं । -ize, *vt.* चेतनीकृ 8 U, जीव् *c;* -ation, *n.* उज्जीवनं । -s, *n. pl.* मर्माणि *pl.*

Vitellus, *n.* अंडगर्भ.

Vitiate, *vt.* दुष् *c,* अवपत्, *c,* भ्रंश् *c,* मलिनीकृ 8 U; अप्रमाणीकृ 8 U । -ion, *n.* दूषणं, पातनं, भ्रंश; भ्रष्टता, दुष्टता, दुष्टि *f.*

Vitreous, *a.* काचमय, काचोपम, काचोत्पन्न.

Vitriol, *n.* तुत्थकं, दार्विका; तीव्राक्षेप; पैशुन्यं, मात्सर्यं । -ic, *a.* तुत्थकजात, ०विषयक, ०सम; अरुंतुद, परुष, मर्मभेदक.

Vitular, *a.* वत्सविषयक, ०सदृश.

Vituperate, *vt.* अपभाष् 1 A, अपवद् 1 U, कुत्स् 10 A, गर्ह्

1. 10 A, निंद् 1 P। -ion, *n.* अपभाषा, कुत्सनं, गालि *f*, निंदा। -ive, *a.* अपभाषिन्, निंदक.

Viva, *int.* चिरं जीवतु, साधु साधु। *n.* धन्यवाद, स्तुतिघोष.

Vivacious, *a.* आनंदिन्, उल्लसित, उल्लासिन्, प्रफुल्ल, प्रसन्न। -ly, *adv.* सोल्लासं। Vivacity, *n.* उल्लास, प्रफुल्लता.

Vivarium, *n.* पशुरक्षणोद्यानं.

Viva voce *adv.* वाचैव, संभाषणद्वारा.

Vivid, *a.* उज्ज्वल, देदीप्यमान; परिस्फुट, सुव्यक्त, सुस्पष्ट; सुनिरूपक। -ly, *adv.* उज्ज्वलं, सुस्पष्टं। -ness, *n.* सुनिरूपकता; सुस्पष्टता.

Vivificate, *vt.* जीव् *c*। Vivification, *n.* उज्जीवनं.

Vivify, *vt.* उज्जीव् *c*, चेतनीकृ 8 U, जीव् *c*; उल्लस् *c*, प्रमुद् *c*.

Viviparous, *a.* जीवत्तोकप्रसू.

Vivisection, *n.* जीवत्प्राणिच्छेद। Vivisect, *vi.* जीवत्प्राणिच्छेदं कृ 8 U.

Vixen *n.* जंबूकी, शिवा, शृगालिका; कर्कशा, चंडी। -ish, -ly, *a.* कलहप्रिय.

Viz., *phrase* यथा, तद्यथा.

Vocable, *n.* पदं, शब्द.

Vocabulary, *n.* शब्दसंग्रह, ०सूची; शब्दकोश.

Vocal, *a.* वाग्विषयक; वाचिक; वाक्संपन्न; मुखर; (Phon.) मृदु; (Grammar) स्वरलक्षण। -ic, *a.* स्वरविषयक; स्वरात्मक। -ism, *n.* स्वरोपयोग; (Grammar) स्वरवर्ग। -ist, *n.* गायक। -ize, *vt.* स्वरयुक्तं *a.* कृ 8 U; *vi.* गै 1 P। -ly, *adv.* वाचा, वाग्द्वारा.

Vocation, *n.* दिव्याज्ञा; औचित्यं, योग्यता; नैपुण्यविषय; उपजीविका, वृत्ति *f*, व्यवसाय, व्यवहार, व्यापार। -al, *a.* व्यवसायविषयक, ०योग्य.

Vocative, *a.* संबोधक। *n.* संबुद्धि *f*, संबोधनं.

Vociferate, *vt.* उत्क्रुश् 1 P, उद्घुष् 10 U, उच्चैः वद् 1 P। *vi.* उत्क्रोशं कृ 8 U। Vociferance, *n.* उत्क्रोश, उद्घोष, कलकल, कोलाहल। Vociferant, Vociferous, *a.* उत्क्रोशत्, आक्रोशपूर्ण, घोषण, मुखर; तार, महाघोष; -ly, *adv.* उत्क्रोशपूर्ण, महानादेन, मुखरं.

Vogue, *n.* प्रचार, लोकप्रियता, प्रवृत्ति *f*। In v., प्रचलित.

Voice, *n.* वाच् *f*, वाणी, गिरा; स्वर, शब्द; उच्चारणं, उदीरणं; (Grammar) वाच्यं, प्रयोग। *vt.* उदीर् *c*, (उदीरणेन) प्रकटयति *Den or* व्यंज् 7 P. *c*। Active,

passive, neuter v. कर्तृ°, कर्म°, भाववाच्यं । With one v., ऐकमत्येन । -d, *a.* (Phon.) मृदु । –less, *a.* वाणीरहित, स्तब्धवाच्, निःशब्द; (Phon.) स्वर.

Void, *a.* रिक्त, शून्य; अप्रमाण, असिद्ध; रहित, वर्जित, विरहित, शून्य, हीन । *vt.* शून्यं, °स्थलं, स्थानं । *vt.* अप्रमाणीकृ 8 U, निरर्थीकृ 8 U; उच्चर् *c*, उद्गृ 6 P; (excrement) हद् 1 A । –able, *a.* विलोपनीय, विवर्जनीय । –ance, *n.* उच्चार, उद्गार; हदनं.

Volant, *a.* उड्डयमान, उत्पतत्; उड्डयनक्षम; क्षिप्र, चपल, द्रुत.

Volatile, *a.* बाष्पीभवनशील, सुबाष्पीभवत्; आनंदिन्, उल्लासिन्; चंचल, लोल ; Volatilize, *vt.* बाष्पीकृ 8 U; *vi.* बाष्पीभू 1 P । Volatility, *n.* चंचलता.

Volcano, *n.* अग्निपर्वत, ज्वालामुखिन् *m* । Volcanic, *a.* ज्वालामुख्युपम; प्रचंड, सरभस.

Vole, *n.* छुछुंदरी.

Volery, *n.* विमानशाला; उत्पतत्पक्षिमाला.

Volitant, *a.* उड्डयमान, उत्पतत्.

Volition, *n.* इच्छा°, संकल्पप्रवृत्ति *f* । –al, –ary, *a.* संकल्पविषयक, °रूप.

Volley, *n.* उत्क्षेप, पात, वृष्टि *f*; उत्क्षिप्तास्त्राणि *pl*, (अग्न्यस्त्रेभ्यः) उत्क्षिप्तगुलिकाः *pl*; (शब्दादिकानां) ओघ । *vt.* उत्क्षिप् 6 P, उत्सृज् 6 P, वृष् 1 P.

Volte-face, *n.* व्यावर्तनं; विरुद्धमतांगीकार, विरुद्धपक्षालंबनं.

Voluble, *a.* जल्प(ल्पा)क, मुखर, वाचाट-ल; अस्खलितवाच् । –y, *adv.* मुखरं । Volubility, *n.* वाचालता.

Volucrine, *a.* पक्षिविषयक.

Volume, *n.* पत्रपुंज; पुस्तकं; (ग्रंथस्य) खंड; भाग; घनफलं; घन, पिंड, परिमाणं । Voluminous, *a.* (Book) बहुभागात्मक; बहुग्रंथकारिन्; विस्तीर्ण, विशाल; –ly, *adv.* सविस्तरं.

Voluntary, *a.* ऐच्छिक, याट्टच्छिक, सांकल्पिक, बुद्धिपूर्वक, स्वयंकृत । Voluntarily, *adv.* इच्छापूर्वकं, कामतः.

Volunteer, *n.* कामयोधिन् *m*, स्वयंनियुक्त । *vt.* स्वयमेव अंगीकृ 8 U *or* कृ *c* । *vi.* स्वयमेव सेवादिकस्य पुरस्कारं कृ 8 U.

Voluptuary *a.* भोगलंपट, भोगासक्त, विलासिन्, विषयासक्त.

Voluptuous, *a.* इंद्रियतर्पण, भोगावह.

Volute, *a.* संवेष्टित । -ion, *n.* व्यावर्तनं.

Volvulus, *n.* अंत्रव्यावर्तनं.

Vomit, *vt.* उद्वम् 1 P, छर्द् 10 U, वम् 1 P; उद्‍दृ 6 P । *n.* वमनोद्गार, वांतं; वमनं. वांतिकरं, वामकं। -ing, *n.* छर्दिका, वमनं, वम, वामि *f*। -nut, *n.* वरस्वरा । -ory, *a.* वांतिकर । -urition, *n.* मुहुर्वमनं.

Voodoo, *n.* अभिचार.

Voracious, *a.* अतिभक्षक, अघ्नर, उदरंभरि, औदरिक, गृध्नु, घस्मर । -ly, *adv.* गृध्नुतया । -ness, *n.* (*also* Voracity), अतिभक्षणं, गृध्नुता, घस्मरत्वं.

-vorous, *suffix* ०भक्षक.

Vortex, *n.* आवर्त, तानूर, भ्रमि *f*, वायुगुल्म । Vortical, भ्रमिरूप, ०सम । Vorticose, Vortiginous, *a.* आवर्तिन्, भ्रमिन्.

Votary, *n.* उपासक, पूजक, भक्त, व्रतिन् *m*; अनुरक्त, व्यासक्त.

Vote, *n.* मतं, मतदर्शनं, मतदर्शनाधिकार । *vi.* मतं दृश् *c*; संमतिं प्रकाश् *c* । *vt.* मतप्रकाशनेन संपद् *c*, उत्सृज् 6 P, *etc.* । -r, *n.* मतदर्शक, मतदर्शनाधिकारिन् *m*.

Votive, *a.* संकल्पार्पित, संकल्पानुष्ठित.

Vouch, *vt.* दृढीकृ, प्रमाणीकृ, साक्षीकृ 8 U । *vi.* प्रमाणं *or* साक्ष्यं दा 3 U । -er, *n.* प्रमाणपत्रं, ०लेख.

Vouchsafe, *vt.* अनुग्रहरूपेण दा 3 U, कृ 8 U, *etc.*, वितॄ 1 P, अर्ह् 1 P.

Vow, *n.* संकल्प, प्रतिज्ञा, व्रतं, शपथ, वाचा । *vt.* सशपथं प्रतिज्ञा 9 U *or* प्रतिश्रु 5 P *or* ऋ *c* । *vi.* संकल्पं *or* प्रतिज्ञां कृ 8 U.

Vowel, *n.* स्वर, (Pāṇini) अच् *m*.

Voyage, *n* जल°, समुद्रयात्रा । *vi.* समुद्रयात्रां कृ 8 U । *vt.* नौकया आक्रम् 1 U. 4 P । -able, *a.* नाव्य । -r, *n.* जलयात्रिक, सांयात्रिक.

Vraisemblance, *n.* सत्याभास.

Vulgar, *a.* प्राकृत, साधारण, सामान्य; अशिष्ट, अश्लील, असभ्य, ग्राम्य । -ian, *n* अशिष्ट (धनिक)। -ism, *n.* ग्राम्यशब्दप्रयोग । -ity, *n.* अशिष्टता, असभ्यता, ग्राम्यता । -ize, *vt.* अशिष्टाचारं शिक्ष् *c*; सामान्यतया दुष् *c or* अपकृ 8 U । -ly, *adv.* सामान्यतः, लोकेषु; असभ्यप्रकारेण, ०रीत्या.

Vulnerable, *a.* भेद्य, वेध्य; असम्यग्रक्षित । V. point, मर्मन् *neu.* । Vulnerability, *n.* भेद्यता.

Vulnerary, *a. n.* क्षतिरोपण(णं).

Vulpine, *a.* शृगालविषयक, ०सदृश; कपटिन्, कुटिल.

Vulture, *n.* गृध्र, दाक्षाय्य, दूरदर्शन, दूरदृश् *m*; अतिभक्षक । -ish, *a.* गृध्रसम; गृध्नु, घस्मर.

Vulva, *n.* जर्तु *m*, धारका । Vulvitis, *n.* जर्तुपाक.

W

Wabble, Wobble, *vi.* पार्श्वात् दोलायते *Den*; प्रस्खल् 1 P; द्वैधीभू 1 P, विक्लृप् 1 A । *n.* असमगति *f*; दोलायितं; प्रस्खलनं; अनिश्चय, द्वैधीभाव, विकल्प.

Wad, *n.* चूर्णरोधनी, ०स्तंभनी.

Waddle, *vi.* हंसकगत्या *or* हंसकवत् गम् 1 P *or* चल् 1 P । *n.* हंसकगति *f*.

Wade, *vi.* (जलपंकादिके) कष्टेन गम् 1 P *or* चल् 1 P । *vt.* कष्टेन पारं गम् 1 P; पद्भ्यां तॄ 1 P.

Wadi, y, *n* (नद्याः) शुष्कपात्रं.

Wafer, *n.* तनुपिष्टक *mn*.

Waft, *vt.* वह् 1 P. *c*; प्रेर् *c*; उत्क्षि 6 P । *vi.* वह् *Pass*; प्लु 1 A । *n.* (गंध°) प्रसरणं.

Wag, *vt.* विधू 5. 9 U, संचल् *c* । *vi.* उपर्यधस्तात् विचल् 1 P । *n.* विधूननं; परिहासकारिन् *m* । -gery, *n.* नर्मालाप, विनोद । -gish, *a.* नर्मगर्भ, विनोदिन्.

Wage, (1) *n.* (*usually pl.*) कर्मण्या, तुलिका, निर्वेश, निष्क्रय, पण, भरणं, भरण्यं, भर्मण्या, भर्मन् *neu*, भर्म, भाटं, भाटि *f*, भृति *f*, भृत्या, मूल्यं, वेतनं, हात्रं; निष्कृति *f*, निस्तार; प्रतिफलं । *vt.* वेतनेन उपयुज् 7 A. 10 U.

Wage, (2) *vt.* (युद्धं) आरभ् 1 A *or* प्रवृत् *c*.

Wager, *n.* ग्लह, पण । *vt.* ग्लह् 1. 10 U, दिव् 4 P, पण् 1 A.

Waggle, *vt.* अभीक्ष्णं विधू 5. 9 U । *vi.* अभीक्ष्णं चल् 1 P.

Wagon, *n.* यानं, प्रवहणं, वहनं, शकट *mn*; (four-wheeled) चातुरं । -age, *n.* वहनमूल्यं । -er, *n.* चातुरिक, शाकटिक । -ful, -load, *n.* शकटभार, शाकटीन.

Wagtail *n.* कणाटीन-र, खंजखेट-(ल), खंजन(क), खंजरीट(क), खंजलेख, तातन.

Waif, *n.* अनाथजन, ०बालक; अस्वामिकं (द्रव्यादिकं).

Wail, *vt.* परिदेव्, परिशुच्, विलप् *all* 1 P । *vi.* क्रंद् 1 P, क्रुश् 1 P, रुद् 2 P, शोकं कृ 8 U । *n.* क्रंदनं, रुदनं, रुदितं; विलाप, शोक । -ful, *a.* शोकपूर्ण.

Wain, *n.* चातुरं, प्रवहणं, शकट *mn* । -wright, *n.* रथकार.

Wainscot, *n.* दारुमयं भित्तिच्छदनं.

Waist, *n.* ककुद्मती, कटि-टी *f*, कटितटं, ०शीर्षकं, कांचीपदं,

मध्य *mn*, वलग्न *mn* । -cloth, *n.* परिकर । -deep, -high, *a.* कटिदघ्न.

Wait, *vi.* प्रतीक्ष् 1 A, प्रतिपा *c*, कियत्कालं स्था 1 P ; (at table) परिविष् *c* । *vt.* विलंब् *c*, व्याक्षिप् 6 P । *n.* प्रतीक्षणं, प्रतीक्षा । To w. on, upon, उपस्था 1 A, परिचर् 1 P, शुश्रूषते *Desid*, सेव् 1 A; दर्शनाय सप्रश्रयं वृत् 1 A *or* स्था 1 P । -er, *n.* परिवेषक, परिवेष्टृ *m* । -ress, *n.* परिवेष्ट्री । W.ing-maid,-woman, परिचारिका.

Waive, *vt.* (परि॰) त्यज् 1 P, वृज् 10 U; आग्रहेण *or* निर्बंधेन न वृत् 1 A *or* धृ 10 U.

Wake, (1) *vi.* जागृ 2 P, निद्रां त्यज् 1 P, प्रबुध् 4 A, विबुध् 4 A । *vt.* (*also* waken) जागृ *c*, प्रबुध् *c* ; प्रत्युज्जीव् *c*; उत्था *c*, उद्दीप् *c* । *n.* जागर, जागरणं । -ful, *a.* जागरूक, दक्ष, सावधान, अप्रमत्त; जागरित, जागरिन् ; उन्निद्र, निर्णिद्र, विनिद्र; -ly, *adv.* निर्णिद्रं, जागरूकतया, सावधानं; -ness, *n.* जागर, जागरूकता; उन्निद्रता.

Wake, (2) *n.* पश्चान्मार्ग । In...wake, फल॰, परिणामरूपेण.

Waldhorn, *n.* मृगयाशृंगं.

Walk, *vi.* (पद्भ्यां) इ 2 P, गम् 1 P, चल् 1 P, या 2 P, *etc* । *vt.* (पद्भ्यां) (आ॰) क्रम् 1 U. 4 P; क्रम् *c*; नी 1 P । *n.* (परि॰)-क्रमणं; गतं, गति *f*, गमनं; विहरणं; परिक्रमण॰, विहरणमार्ग, पद्या; वृत्ति *f*, व्यवसाय । To w. away with, अपनी 1 P, अपहृ 1 P । To w. away from, स्पर्धायां अनायासेन अतिधाव् 1 P । To w. in, प्रविश् 6 P । To w. into, सत्वरं भक्ष् 10 U; अधिक्षिप् 6 P, निर्भर्त्स् 10 U । To w. off with, अपहृ 1 P; चुर् 10 U । -able, *a.* आक्रमणीय । -er, *n.* पादग, ॰चारिन् *m* । -ing, *n.* परिक्रमणं, चलनं; W.ing-tour, विहरणयात्रा । -over, *n.* सुलभजय.

Wall, *n.* कंथा, कुड्यं, भित्तं, भित्ति *f*, भित्तिका; (outer) निरवहानि-(लि)का, प्राकार, प्राचीरं, वरण, साल । *vt.* भित्त्या *or* भित्तिभिः परिवृ 5 U. *c or* परिवेष्ट् 1 A. *c or* रक्ष् 1 P । To run one's head against a w. अशक्यं चिकीर्षति-ते *Desid.* । With one's back against a w., अंतिमावस्कंद-प्रत्यवस्थायिन् । To go to the w., निरस् *Pass*, निराकृ *Pass* । -eye, *n.* नेत्रपटलकालुष्यं; -d, *a.* कलुषितनेत्रपटल.

Wallet, *n.* प्रसेव; भस्त्रा, भस्त्रि *f*, कोश.

Wallop, *vi.* सबुद्बुदं कथ् *Pass*; अकौशल्येन धाव् 1 P । *vt.* तड् 10 U, प्रहृ 1 P । -ing, *n.* ताडनं; *a.* बृहत्, महाकाय, विशाल.

Wallow, *vi.* (पंकादिके) लुट् 6 P; (दुर्व्यसनादिके) अत्यासक्त्या वृत् 1 A *or* रम् 1 A.

Walnut, *n.* अक्षोट-ड; (fruit) अक्षोटं.

Walrus, *n.* यादोविशेष.

Waly, *a.* सुंदर, रम्य, चारु; उत्कृष्ट, साधु; प्रबल, बलिन्.

Wamble, *vi.* विवमिषया पीड् *Pass.*

Wampum; *n.* कपर्दिकामाला.

Wan, *a.* पांडु(र), निस्तेजस्, मंद-प्रभ, विवर्ण । -ly, *adv.* मंदप्रभया, विवर्ण । -ness, *n.* पांडुरता, वैवर्ण्य.

Wand, *n.* दंड, यष्टि *f.*

Wander, *vi.* परिभ्रम् 1. 4 P, पर्यट् 1 P, विचर् 1 P; परिव्रज् 1 P; मार्गात् प्रचल् 1 P *or* भ्रंश् 1 A. 4 P; प्रमद् 4 P; स्खल् 1 P; असंगतं जल्प् 1 P; प्रस्तुतं त्यज् 1 P; अनवहित *a.* भू 1 P । -er, *n.* पर्यटक, पर्यटनकृत् *m*; (religious) परिव्राजक.

Wane, *vt.* तेजः ०, गौरवक्षयं, *etc.* प्राप् 5 P, लभ् 1 A, *etc*, (परि०) क्षि 1 P *or Pass*, क्षै 1 P, ग्लै 1 P, ह्रस् 1 P । *n.* क्षय, ह्रास; (moon) कलाक्षय.

Wangle, *vt.* व्यपदेशेन लभ् 1 A *or* संपद् *c.*

Want, *n.* अपर्याप्ति *f*, ऊनता, न्यूनता, अभाव, राहित्यं, विरह; अपेक्षा, आकांक्षा; अकिंचनत्वं; दारिद्र्यं, दुर्गति *f*, दैन्यं, निराश्रयत्वं, निर्धनता; (*pl.*) इष्टं, इष्टार्थाः, आवश्यकवस्तुजातं । *vt.* (lack) *Exp. by* ०शून्य, ०विरहित, *etc.* with अस् 2 P, भू 1 P *etc.*; *e. g.* "He lacks strength, सामर्थ्यविरहितोऽस्ति"; (require) अपेक्ष्, व्यपेक्ष् 1 A, आकांक्ष् 1 U; इष् 6 P; ईह् 1 A, वांछ् 1 P., स्पृह् 10 U; (ought) अर्ह् 1 P; *also exp. by potential forms*; द्रष्टुं इष् 6 P, । *vi* ०ऊन, ०विरहित, *etc.* with अस् 2 P, भू 1 P, *etc*; अकिंचनत्वं प्राप् 5 P; प्राप्तुं अक्षम *a.* अस् 2 P । -ing, *a.* ऊन, न्यून, रहित, विरहित; गुणहीन; अनुपस्थित; *prep.* अंतरेण (Acc.) ऋते (Acc.), विना (Acc., Instr).

Wanton *a.* केलिपर, क्रीडाप्रिय, लीलापूर्ण; अनियंत्रित, उच्छृंखल, उद्दाम, कामचारिन्, स्वैरिन्, स्वैर, चेष्ट; आतिवृद्ध, उद्रिक्त; अहेतुक, निष्प्रयोजन, अविमृश्यकृत; कामुक, भ्रष्टाचार, व्यभिचारिन् । *n.* असती, कुलटा, पुंश्चली, बंधकी,

लालिनी, व्यभिचारिणी, पंडाली, स्वैरिणी । *vt.* स्वैरं क्रीड् 1 P, खेल् 1 P *or* रम् 1 A; सेंद्रिकं वृध्, 1 A । -ly, *adv.* स्वैरं; निर्हेतुकं.

War, *n.* आयोधनं, आहव, मृधं, युद्धं, विग्रह, संख्यं, संग्राम, संप्रहार, सांपरायिकं; विरोध, वैरं, सापत्न्यं । *vi.* युध् 4 A, विग्रह् 9 P; विरुध् 7 U, स्पर्ध् 1 A; विप्रतिपद् 4 A, विप्रलप् 1 P, विवद् 1 A । Civil w., आंतर्देशीययुद्धं । To declare w. विग्रहारंभं ख्या *c* । To go to the w.s, सैनिकवृत्तिं स्वीकृ 8 U । To be, go on the w.-path, युद्धाय सज्जीभू 1 P; आतिक्रुद्ध *a.* भू 1 P । -cry, *n.* क्ष्वेडा, सिंहनाद । -horse, *n.* युद्धाश्व, वारकीर । -like, *a.* सांग्रामिक, युद्धप्रिय, युयुत्सु, रणोत्सुक; युद्धसूचक । Warfare, *n.* युद्धं, विग्रह, सांपरायिकं । Warring, *a.* विप्रतिपन्न, विवदमान । Warrior, *n.* भट, योद्धृ *m*, योध, वीर; महायोध.

Warble, *vi.* कल् 1 P. 10 U, कूज् 1 P, विरु 2 P । *n.* कूजनं, कूजितं.

Ward, *n.* रक्षणं, रक्षा; (अप्राप्तव्यवहारत्वात्) नियंत्रितावस्था; रक्षक; रक्षित०, रक्ष्यबालक; (नगर०) विभाग; (रुग्णालयस्य) कक्षा, शाला । *vt.* रक्ष् 1 P; (off) निवृ *c* प्रतिवृ *c*, अपवृ *c*, परिहृ 1 P । -en, *n.* पालक, रक्षक; अध्यक्ष । -er, *n.* कारारक्षक, ०पालक । -ship, *n.* रक्षकत्वं.

Wardrobe, *n* वस्त्रकोश; वस्त्रसंभार, ०सामग्री, वासांसि *pl.*

Ware, (1) *n.* पात्रजातं, उपकरणजातं, *etc*; (*pl.*) पणसाः *pl*, पण्यजातं, भांडानि *pl*, क्रय्यद्रव्याणि *pl* । -house, *n.* पण्यागारं, भांडारं; *vt.* भांडारे निक्षिप् 6 P.

Ware, (2) *a.* जागरूक, सावधान । *vt.* सावधानं वृत् 1 A.

Warlock, *n.* अभिचारिन् *m*, ऐंद्रजालिक, मांत्रिक.

Warm, *a.* उष्ण; उष्णतावह; आस्थापूर्ण, सोत्साह; प्रेमिन्, स्निग्ध; चंड, संक्षुब्ध, संरंभिन्; दुष्कर; (colour) लोहित०, पीतप्राय; (scent) नव, स्पष्ट; समृद्ध । *vt.* तप् *c*; उल्लस् *c*, उद्दीप् *c* । *vi.* तप् *Pass* । W. work, आयासकर्मन् *neu*; संकटाक्रांतव्यवहार । W. corner, संकटाक्रांतस्थानं । W. reception, तीव्रपरामर्श । To make it, things w. for a person, विरोधोत्पादनेन पीड् 10 U । To w. to one's work, कार्ये व्यग्रतां प्राप् 5 P । -blooded *a.* उष्णरक्त; सुक्षोभ्य, संरंभिन् ।

–hearted, *a.* कारुणिक, दयालु, सदय । –ing, *n.* तापनं; ताडनं । –ish, *a.* अनत्युष्ण । –ly, *adv.* सोत्साहं, स्नेहपूर्ण । –th, *n.* उष्णता; अभिनिवेश, आस्था; सौहार्द, स्नेह.

Warn, *vt.* प्रागेव निविद् *c*, विज्ञा *c*, *or* निर्दिश् 6 P; प्रागेव प्रबुध् *c*; अनुयुज् 7A. 10U, उपालभ् 1 A । –ing, *n.* पूर्वनिवेदनं, पूर्वनिर्देश; पूर्वप्रबोधनं; उद्बोध, उपदेश.

Warp, *n.* अन्वानाहतंतवः *pl*; चित्तवैलक्षण्यं, प्रतीपवृत्ति *f* । *vt.* साचीकृ, वक्रीकृ 8 U; संकुच् *c*, आवृत् *c*; दुष् *c*, अवकृ 8 U । *vi.* साचीभू 1 P; संकुच् 1 P. 6 P.

Warrant, *vt.* न्याय्यतां प्रतिपद् *c*, समर्थ् 10 U, प्रमाणीकृ 8 U । *n.* अधिकार, प्रमाणं, प्रत्ययकारकं; प्रमाणपत्रं, ०लेख । –able, *a.* समर्थनीय । –y, *n.* अधिकार०, प्रमाणपत्रं, ०लेख.

Warren, *n.* शशप्रचार.

Wart, *n.* चर्मकील *mn* । –y, *a.* चर्मकीलाकीर्ण.

Wary, *a.* अप्रमत्त, जागरूक, दक्ष, सावधान.

Wash, *vt.* (प्र०)क्षल् 10 U, धाव् 1 P. 10 U, निर्णिज् 3 U, मृज् 2 P. 10 U; शुध् *c*; (mouth) उपस्पृश् 6 P; प्लु *c*, स्ना *c*; वह् 1 P; (लेपेन) आच्छद् 10 U । *vi.* प्रक्षालनं *or* वस्त्रधावनं कृ 8 U; (पटवर्णस्य) धावनं सह् 1 P । *n.* (प्र०)क्षालनं, धावनं, निर्णेक; धावनीयवस्त्राणि *pl.*; ओघ, प्रवाह; आलेप, वर्ण; अभ्यंजनं । –basin, *n.* प्रक्षालनपात्रं । –ed, *a.* (out) क्षीण, नष्टबल । –er, *n.* बंधवलयं । –house, *n.* वस्त्रधावनशाला । –out, *n.* असिद्धि *f*, फलभंग । –y, *a.* जलप्राय, नीरस; आजोरहित । Washerman, *n.* धावक, निर्णेजक, रजक । Washerwoman, *n.* रजकी.

Wasp, *n* इडाचिका, गंधोली, गृहकारिका, वरटा । –ish, *a.* कोपन, दुष्प्रकृति, वक्रवृत्ति; –ly, *adv.* वक्रवृत्त्या.

Wassail, *n.* पानोत्सव, संपीति *f* । *vi.* पानोत्सवं कृ 8 U.

Waste, *a.* अप्रहत, खिल, निर्जन, विजन; उग्र, भीषण; स्पष्टलक्षणहीन; उद्वर्त, उच्छिष्ट । *n.* खिलं, धन्वन् *m*; अवसाद, क्षय, व्यय, ह्रास; अपव्यय; उच्छिष्टं, परित्यक्तशेष, उद्वर्त । *vt.* अवसद् *c*, उद्ध्वंस् *c*, खिलीकृ 8 U, निर्जनीकृ 8 U; (estate) अपकृ 8 U, विप्रकृ 8 U; अपव्यय् 10 U; वृथा क्षै *c or* ह्रस् *c* । *vi.* अपचि *Pass*, अल्पीभू 1 P, क्षि 1 P, क्षै 1 P, ह्रस् 1 P । To lay w., अवसद् *c*, उद्ध्वंस् *c* । –ful, *a.* अपव्ययिन्,

अमितव्यय । -less, *a.* अक्षयव्य । -pipe, *n.* उच्छिष्टजलप्रणाली । -r, *n.* अतिव्ययिन्, अपव्ययिन्; अर्थनाशिन् *all m*; दुर्वृत्त, भ्रष्टाचार । Wastage, *n.* अपचय, हानि *f*, ह्रास । Wastrel, *n.* विप्रकृतवस्तु *neu*; दुर्वृत्त, पतित.

Watch, *n.* (प्र०)जागर, जागरणं, रक्षा; रक्षक, रक्षापुरुष; प्रहर, याम; घटीयंत्रं । *vi.* जागृ 2 P; स्पश् 1 U, सावधानं निरीक्ष् 1 A; रक्ष् 1 P, रक्षां कृ 8 U । *vt.* दक्षतया दृश् 1 P *or* आलोच् 10 U; प्रतिपा *c*, प्रतीक्ष् 1 A । On the w., जागरूक । To w. over, रक्ष् 1 P । -ful, *a.* जागरूक, जागरिन्, सावधान, अप्रमत्त; -ly, *adv.* सावधानं । -house, *n.* उद्घाट । -maker, *n.* घटीयंत्रकार । -man, *n.* प्रहरिन् *m*, वैबोधिक, रक्षक, रक्षापुरुष, रक्षिन् *m* । -word, *n.* प्रत्ययवाच् *f*; आदर्शवचनं.

Watchet, *a.* श्वेतनील.

Water *n.* अपः *f. pl.*, अंबु, अंभस्, अर्णस् *all neu*, उदकं, कं, कबंधं, कमलं, कीलालं, कुलीनसं, घनरस, जलं, जीवनीयं, तोयं, दकं, नीरं, पयस् *neu.*, पाथस् *neu.*, पानीयं, पुष्करं, मेघपुष्पं, वनं, वार् *f*, वारि *neu*, विषं, शंबरं, संबलं, सरिलं, सर्वतोमुखं, सलिलं; (रत्नस्य) प्रभा । *vt.* जलेन (प्र०) उक्ष् 1 P, सृष् 1 P, *or* (नि०)सिच् 6 P; जलेन क्लिद् *c or* आप्लु *c*; जलं दा 3 U *or* पा *c*; जलेन मिश्र् 10 U; तीव्रतां अल्पीकृ 8 U । *vi.* जलं पा 1 P; जलं आदा 3 U; (अश्रु०) जलेन *or* लालया पूर् *Pass* । Strong w.s, मद्यं । In deep, smooth w.s, संकटापन्न, समृद्ध । To get into hot w., कष्टं आपद् 4 A । To go through fire and w., महाक्लेशान् सह् 1 A । To hold w., प्रामाण्यं धृ 10 U । To throw cold water on, न अनुमुद् 1 A, निरुत्साहं *a.* कृ 8 U । To make, pass w., मूत्रोत्सर्गं कृ 8 U । Of the first w., अत्युत्तम, अत्युत्कृष्ट; अतिमात्र, अत्यर्थ । To make one's mouth w., अभिलाषपूर्ण *a.* कृ 8 U । W. on the brain, मस्तिष्कशोफ । Place where water can be had, प्रपा, पानीयशालिका । -closet, *n.* शौचकूप । W. craft, नौकादयः *pl.* । -course, *n.* उत्स, कुल्या, निर्झर, स्रोतस् *neu*; जलप्रणाली । -cure, *n.* जलोपचार । -fall, *n.* जलप्रपात, प्रस्रवणं । -finder, *n.* गुप्तजलदर्शिन् *m* । W.ing-place, *n.* प्रपास्थानं । W.ing-pot, *n.* सेकपात्रं । W.ing-trough, *n.* जलद्रोणी । -ish, *a.* ईषज्जलमिश्र । -lily, *n.* अंबुजं, सरोजं ।

–logged, *a.* अतिक्लिन्न, जलाप्लुत। –man, *n.* औडुपिक, नाविक, पोतवाह, मार्गर। –melon, *n.* कालिंग, तरंबुजं, सेट्ठ *m*। –mill, *n* जलयंत्रं। –nymph, *n.* अप्सरस् *f*, जलदेवता। –pot, *n.* कलश, कुंभ, घट, माणिक *mn*। –proof, –tight, *a.* जलाभेद्य। –way, *n.* नाव्यः जलमार्ग। –wheel, *n.* अरघट्ट(क), उद्घाटनं, घटीयंत्रं, पादावर्त। –works, *n. pl.* जलसंग्रहविभजनरचना ; to turn on the w., रुद् 2 P। –y, *a.* जलमय, जलाढ्य; अतिक्लिन्न; बाष्पाप्लुत; जलमिश्र; नीरस; पर्जन्यसूचक.

Wattle, *n.* वेत्रजालकद्वारं; (पक्षीणां) गलस्तन। *vt.* संग्रंथ् 9 P.

Waul, *vi.* मार्जारवत् क्रंद् 1 P.

Wave, *vi.* इतस्ततः विधू *Pass*; दोलायते *Den*; हस्तविधूनेन संकेतं कृ 8 U। *vt.* इतस्ततः चल् *c or* (वि)धू 5. 9 U; हस्तविधूनेन अपस् *c or* अपास् 4 U; भंगुरयति *Den*, कुरलीकृ 8 U। *n.* उत्कलिका, उल्लोल, ऊर्मि *mf*, ऊर्मिका, कल्लोल, तरंग, भंग, लहरि-री *f*, वीचि *mf* ; भंगि-गी *f*; कुरल; विधूननं; आवेश, प्रवृत्ति *f*। Wavy, *a.* दोलायमान; उन्नतानत; भंगिमत्.

Waver, *vi.* क्षिप्रं इतस्ततः चल् 1 P *or* कंप् 1 A; स्खल् 1 P; दोलायते *Den*, द्वैधीभू 1 P, अनिश्चयेन वृत् 1 A। –er, *n.* अस्थिरमति *m*, अनिश्चयिन् *m*। –ing, *a.* कंपमान, लोल; अनिश्चित, दोलायमान; –ly, *adv.* अनिश्चयेन, द्वैधीभावपूर्वं.

Wax, (1) *n.* द्रवकं, मक्षिकामल *mn*, मक्षिकाश्रय, मधुजं, मधुशेषं, मधूच्छिष्टं, मधूत्थं, मधूलं, मध्वाधार, विघसं, सिक्थं,सिक्थकं; (sealing) लाक्षा; (cerumen) कर्णमलं, तोक्मं, पिंजूष। *a.* सिक्थमय। *vt.* सिक्थेन अंज् 7 P *or* लिप् 6 P। –chandler, *n.* सिक्थदीपिकाविक्रेतृ *m*। –en, *a.* सिक्थमय, ०सदृश; श्लक्ष्ण; विवर्ण, पांडुर; सुवश्य। –work, *n.* सिक्थप्रतिमा। –y, *a.* सिक्थविषयक, ०सम; विवर्ण.

Wax, (2) *vi.* उपचि *Pass*, एध 1 A, वृध् 1 A; (become) भू 1 P.

Wax, (3) *n.* क्रोधावेश। To be in, get into a w., क्रोधाविष्ट *a.* भू 1 P। –y, *a.* क्रुद्ध, रुष्ट.

Way, *n.* अध्वन् *m*, पथिन् *m*, पदवी, पद्धति *f*, मार्ग, वर्त्मन् *neu*; अंतरं; प्रगमनं, प्रगति *f*; (mode) प्रकार, रीति *f*, विधा, शैली; क्रम, प्रचार, नित्यव्यवहार;

वृत्ति *f*, स्वभाव; अवस्था, दशा। Milky w., आकाशगंगा, मंदाकिनी। A good, bad way, सत्पथ; कदध्वन् *m*, कुपथ। To pave the w. for, (अमुकस्य) पुरस्कारं साध् 5 P. *c*। To take one's w., गम् 1 P, अपया 2 P। A place where four w.s meet, चतुष्पथ *mn*, शृंगाटकं। By w. of, (अमुक॰) मार्गेण, ॰रूपेण, °अर्थं *in comp*। To go out of one's w. to, विशिष्टयत्नं कृ 8 U। To go the w. of all flesh, of all the earth, मृ 6 A, पंचत्वं गम् 1 P। The parting of the w.s, निर्णयसमय, ॰अवसर। Out of the w. असामान्य, विलक्षण, विचित्र। Out-of-the-way, *a.* दुर्गम; दूरवर्तिन्। To make the best of one's w., शक्यवेगेन गम् 1 P। To make, gather, lose w., प्रगतिं वृध् *c*, अल्पीकृ 8 U। To be under w., प्रगम् 1 P, प्रचल् 1 P। To make w. for, मार्गं दा 3 U, मार्गात् अपसृ 1 P। To be in the w., मार्गं प्रतिरुध् 7 U। To put one out of the w., हन् 2 P. *c*, मृ *c*। To put one in the w. of, योग्यावसरकालिनं *a.* कृ 8 U। To give w., वशं गम् 1 P, न प्रत्यवस्था 1 A। To have one's own w., इष्टं साध् *c*। To my w. of thinking, मम मते। The w. of the world, लोकाचार। To be in a bad w., दुर्दशां प्राप् 5 P। In the family w., आपन्नसत्त्वा, गर्भवती। In every w., सर्वथा। -bill, *n.* वाहितजन॰, वाहितभांडसूची। -farer, *n.* अध्वग, पथिक, पांथ। -faring, *a.* अध्वगामिन्; पर्यटनकृत्। -lay, *vt.* मार्गे अवस्कंदार्थं प्रतीक्ष् 1 A। -leave, *n.* गतागताधिकार। -mark, *n.* अध्वमानशिला। -side, *n.* अध्वकक्ष; *a.* अध्वकक्षस्थित। -ward, *a.* अवश, दुराग्रहिन्, दुर्दम, प्रतिनिविष्ट, प्रतीप; -ly, *adv.* दुराग्रहेण, प्रतीपवृत्त्या। -worn, *a.* अध्वायनश्रांत.

We, *pron.* वयं.

Weak, *a.* अशक्त, दुर्बल, निःसत्त्व, निर्वीर्य, बलहीन; अदृढ; सुपराजेय, वशंगम; भेद्य; क्षीण, ॰बल; अतीक्ष्ण; (wit) जड, मंद, विकल; जडमति, विकलबुद्धि, अनिश्चयिन्, अस्थिरमति, दोलायमान; अनुपपन्न; अनिपुण, अनिष्णात; अतिजलमिश्र, नीरस। W. point मर्मन् *neu*, मर्मस्थानं, रंध्रं। -en, *vt.* दुर्बलीकृ 8 U; दृढत्वं, उपपन्नत्वं *etc.* अल्पीकृ 8 U; *vi.* दुर्बलीभू 1 P; दृढत्वं, चित्तस्थैर्यं त्यज् 1 P। -kneed, *a.* अनिश्चयिन्, अस्थिरमति। -ling, *n.*

दुर्बलजन। -ly, *a.* अशक्त, सदातुर, सदारुग्ण; *adv.* क्षीणबलेन, अनिश्चयेन। -minded, *a.* विकलमति। -ness, *n.* दुर्बलता, दौर्बल्यं, बलहानि *f*; असामर्थ्यं; जाड्यं, मांद्यं; वैकल्यं, दोष; अभिरुचि *f*, प्रवणता; अभिरुचिविषय; अपचार, न्यूनता, सदोषता; अनुपपत्ति *f*.

Weal, (1) *n.* (त्वचि) प्रहारचिह्नं.

Weal, (2) *n.* कल्याणं, कुशलं, क्षेमं। The public, general, common w., लोककल्याणं; ०क्षेमं.

Wealth, *n.* प्राचुर्यं, बाहुल्यं, वैपुल्यं; अर्थ, ऐश्वर्यं, धनं, लक्ष्मी, वित्तं, विभव, श्री, समृद्धि *f*, संपत्ति *f*; कल्याणं। -y, *a.* अर्थवत्, धनिक, विभवशालिन्, श्रीमत्, समृद्ध.

Wean, *vt.* स्तन्यात् विमुखीकृ 8 U, स्तन्यं त्यज् *c*; दुर्व्यसनादिकात् विमुखीकृ 8 U। -ing, *n.* स्तन्यत्याग। -ling, *n.* अचिरत्यक्तस्तन्य.

Weapon, *n.* अस्त्रं, आयुधं, प्रहरणं, शस्त्रं, शस्त्रं, हन्तु *m*, हेति *mf*; (lethal) वधत्रं। -less, *n.* निःशस्त्र.

Wear, (1) *vt.* धृ 10 U, परिधा 3 U, भृ 3 U, वस् 2 A; आविष्कृ 8 U, प्रकटयति *Den*; घर्षणादिकेन अल्पीकृ 8 U, क्षै *c* or ह्रस् *c*; जीर्णीकृ 8 U; आयस्, खिद्, श्रम् *all c*। *vi.* (last) अवस्था 1 A, न जॄ 1.4 P; (day) अती 2 P, गम् 1 P। *n.* परिधानं; उपयोग; जीर्णता। To w. one's heart on one's sleeve, ऋजुतया or निःशंकं इंगितं प्रकाश् *c*; सुक्षोभ्यवृत्ति *a.* अस् 2 P। To w. away, *vt.* घर्षणादिकेन अपामृज् 2 P. 10 U; *vi.* (शनैः) अती 2 P। To w. down, *vt.* घर्षणादिकेन or नित्यविवादादिकेन अल्पीकृ 8 U। To w. off, *vt.* घर्षणादिकेन प्रमृज् 2 P. 10 U; *vi.* (घ०) अल्पीभू 1 P, अती 2 P। To w. out, *vt.* जीर्णीकृ 8 U, जॄ *c*; परिहृ 1 P; अत्यंतं खिद् *c* or श्रम् *c*; *vi.* जीर्णीभू 1 P, जॄ 1. 4 P.। -able, *a.* परिधानार्ह। -ing, *a.* आयासक, श्रमावह; ०धर, ०धारिन्, ०भृत् *in comp.*

Wear, (2) *vt.* (नावं) व्यावृत् *c*.

Wearisome, *a.* आयासक, उद्वेजक, श्रमावह, अरुचिकर। -ly, *adv.* आयासकप्रकारेण.

Weary, *a.* क्लांत, श्रांत; उद्विग्न, खिन्न, निर्विण्ण; उद्वेजक, खेदकर। *vt.* आयस्, क्लम्, खिद्, ग्लै, श्रम् *all c*; उद्विज् *c*, निर्विद् *c*। *vi.* क्लम् 4 P, खिद्, 4 A; उद्विज् 6 A, निर्विद् 4 A। To w. for,

उत्कंठते *Den* । Wearily, *adv.* सायासं । Weariness, *n.* क्लांति *f*, खेद, ग्लानि *f*, निर्वेद.

Weasand, *n.* श्वासनालिका.

Weasel, *n.* अंगूष, नकुल.

Weather, *n.* काल । *vt.* (जलादिकेन) जर्जरीकृ 8 U; तॄ 1 P, (संकटादिकसहनेन) अवस्था 1 A । Under the w., अस्वस्थ, आतुर । –beaten, *a.* वाताहत । –glass, *n.* वायुभारयंत्रं.

Weave, *vt.* वप् 1 U, वे 1 U; गुंफ् 6 P, संग्रंथ् 9 P, मनसा क्लृप् *c or* रच् 10 U । *n.* वयनप्रकार, तंतुरचना । –r, *n.* कुविंद, तंतुवाय, तंत्रवाप, पटकार.

Web, *n.* तांतवं; जालं, जालकं; लूताजालं । –bed, *a.* (foot) त्वगावृत । –footed, *a.* जालपाद.

Wed, *vt.* उद्वह् 1 P, उपयम् 1 P, परिग्रह् 9 P, परिणी 1 P, विवह् 1 P; विवाहे दा 3 U, पाणिं ग्रह् *c*, उद्वह् *c*; संयुज् 7. A. 10 U । –ded, *a.* ऊढ, परिणीत; वैवाहिक; अत्यासक्त, दृढनिष्ट । –ding, *n.* उद्वाह, परिणय, पाणिग्रह, विवाह, विवाहोत्सव; silver, golden, diamond w., विवाहस्य पंचविंशी, पंचाशी, षष्टितमी सांवत्सरी । –lock, *n.* परिणय, विवाह.

Wedge, *n.* कील(क) । *vt.* कीलकेन विपद् 10 U *or* विभिद् 7 P; कीलकेन दृढीकृ 8 U; संबाध् 1 A, संमृद् 9 P । The thin end of the w., महाफलसाधकः अल्पारंभ.

Wednesday, *n.* बुधवार.

Wee, *a.* अतिलघु, अत्यल्प । A w. bit, ईषत्, मनाक्.

Weed, *n.* कुतृणं, अनिष्टोद्भिज्ज; अंतरायमात्रं । *vt.* (कुतृणादिकं) उन्मूल् 10 U; (भूमिं) कुतृणमुक्तां *a.* कृ 8 U; अंतरायेभ्यः मुच् 6 P. *c*; यथागुणं रच् 10 U *or* वर्गीकृ 8 U । –y, *a.* कुशप्रांशु.

Weeds, *n. pl.* विधवावेश-ष.

Week, *n.* सप्ताह । –ly, *a.* साप्ताहिक; *n.* साप्ताहिकपत्रं; *adv.* प्रतिसप्ताहं.

Weem, *n.* आंतर्भौमशाला.

Ween, *vi.* चिंत् 10 U, मन् 4 A.

Weep, *vi.* रुद् 2 P, अश्रुपातं कृ 8 U; (trees, *etc.*) बाष्पादिकोद्गारं कृ 8 U । *vt.* परिदेव् 1 A, विलप् 1 P, शुच् 1 P । –ing, *n.* रुदनं, रुदितं, रोदनं, शोक.

Weevil, *n.* धान्य॰, फलकीट.

Weft, *n.* तिर्यक्तंतवः *pl.*

Weigh, *vt.* तुल् 1 P. 10 U, तोलनेन (परि॰) मा 2 P. 3 A;

०तोल *a.* अस् 2 P; (w.s little, 12 māṣas, अल्पतोलोऽस्ति, द्वादशमाषतोलोऽस्ति); भृशं परिचिंत् 10 U *or* विचर् *c or* विमृश् 6 P। *vi.* गुर्वर्थक *a.* भू 1 P। To w. anchor, लांगलं उत्तुल् 10 U। To w. down, अवनम् *c*; खिद् *c*, निर्विद् *c*। To w. out, यथातोलं विभज् 1 U। To w. upon, पीड् 10 U, बाध् 1 A। To w. with, गुर्वर्थक, *a.* भू 1 P। –age, *n.* तोलनमूल्यं.

Weight, *n.* तोल, भार, गुरुत्वं; भारमानं, माड, मात्रं, परिमाणं; गौरवं, महत्त्वं । *vt.* गुरुभारं *a or* भारवत्तरं *a.* कृ 8 U; भारेण दृढं स्था *c*। –less, *a.* भारहीन; अल्पभार, लघु, लघुभार.

Weighty, *a.* गुरु, भारवत्, भारिक, भारिन्; गुर्वर्थक; सुप्रतिष्ठ । Weightily, *adv.* गुर्वर्थपूर्णं । Weightiness, *n.* गुरुत्वं, गुर्वर्थकता; महत्त्वं.

Weir, Wear, *n.* धरण, सेतु *m.*

Weird, *n.* दैवं, भाग्यं । *a.* दैवविषयक; अतिमानुष, अद्भुत, अमानुष, अलौकिक; असामान्य, विचित्र, विलक्षण । To dree one's w., कर्मभोगं अनुभू 1 P.

Welch, *vi.* ग्लहधनं आदाय पलाय् 1 A.

Welcome, *a.* स्वागत; अभिमत, इष्ट, प्रिय, सुखप्रद; कालानुरूप; प्राप्तानुज्ञ । *n.* स्वागतं; सत्कार, सत्कृति *f*, सत्क्रिया; अंगीकार । *vt.* स्वागतं वद् 1 P *or* व्याहृ 1 P, सत्कृ 8 U, संभू *c*, संमन् *c*; सानंदं स्वीकृ 8 U.

Weld, *vt.* (तापेन द्रवीकृत्य) संयुज् 7 A. 10 U; सुसंहतं *a.* कृ 8 U.

Welfare, *n.* कल्याणं, कुशलं, क्षेमं, भद्रं, श्रेयस् *neu*, समृद्धि *f.*

Welkin, *n.* अंतरिक्षं, अंबरं, आकाश *mn*, गगनं, नभस् *neu.*

Well, (1) *adv.* सम्यक्, साधु, सुष्ठु; भृशं; पूर्णं, *etc.*। *a.* कुशलिन्, निरामय, स्वस्थ । *int.* साधु, बाढं; अहो; (very w.) भवतु, अस्तु । *prefix*, सु० *in comp.* । –acquainted, *a.* सुपरिचित । –advised, *a.* युक्त, विमृश्यकृत । –being, *n.* कुशलं, क्षेमं, स्वास्थ्यं । –born, *a.* अभिजात, कुलीन । W. done, साधु साधु । –favoured, *a.* सुदर्शन । –read, *a.* बहुश्रुत, व्युत्पन्न । –set, *a.* दृढकाय, मांसल । –spoken, *a.* वाग्मिन्; सुजन, सुशील । –to-do, *a.* (also w. off), समृद्ध, सुखभागिन् । –wisher, *n.* कुशलैषिन्, सुखैषिन्, हितैषिन् *m.*

Well, (2) *n.* अंधु *m*, आवाह, कूप, दीर्घिका, चुंटा-डा-डी, चूतक, चौंड, निपानं, प्रहि *m*, वापी; उत्स; उद्गम। *vi.* उत्सात् (इव) उद्गम् 1 P, उद्भू 1 P.

Welladay, Wellaway, *int.* अहह, कष्टं, हंत.

Welsh, *vi.* ग्लहधनमादाय पलाय् 1 A.

Welt, *n.* पादूसीवनं; (त्वचि) आघातचिह्नं। *vt.* तड् 10 U, प्रहृ 1 P.

Welter, (1) *vi.* घूर्ण् 1 A, (वि०) लुठ् 6 P। *n.* संकुलं, संक्षोभ.

Welter, (2) *a.* गुरुभार.

Wen, *n.* मांसार्बुदं.

Wench, *n.* तरुणी, युवती; पुंश्चली; वारांगना। *vi.* व्यभिचारं कृ 8 U.

Wend, *vt.* (मार्गं) क्रम् 1 U. 4 P। To w. one's way, गम् 1 P.

Werwolf, *n.* नरवृक.

West, *adv.* पश्चिमेन, पश्चिमाभिमुखं, पश्चिमदिशि। *a.* (*also* Western) अपर, चरम, पश्चिम, पाश्चात्य, प्रतीच्य; पश्चिमाभिमुख। *n.* पश्चिमा, प्रतीची, वारुणी। –ering, *a.* पश्चिमाभिमुख। –erly, *a.* पाश्चात्य; पश्चिमाभिमुख; पश्चिमोद्गत। –erner, *n.* पाश्चात्य *m*, प्रतीच्य *m*। –ernize, *vt.* पाश्चात्यसंस्कृत्या संमृज् 6 P। –most, *a.* पश्चिमतम। –ward, *adv.* पश्चिमाभिमुखं, पश्चिमदिशि.

Wet, *a.* आर्द्र, उत्त, उन्न, क्लिन्न, तिमित, सद्रव; जलपूर्ण, ०मय; प्रावृषिक; क्षीब, मदिरोत्कट। *n.* क्लेद, स्तेम, द्रव; वर्षाः *pl*। *vt.* आर्द्रीकृ 8 U, उंद् 7 P, क्लिद् *c*। To w. one's whistle, पा 1 P। W. blanket, उत्साहहारिन् *m*। –ness, *n.* आर्द्रता, क्लेद.

Wether, *n.* छिन्नमुष्कः मेष.

Whack, *vt.* गुर्वाघातेन तड् 10 U; (लोष्ट्रं) विभज् 10 U। *n.* गुर्वाघात। –ing, *n.* ताडनं; *a.* उत्कृष्ट, उत्तम.

Whale, *n.* तिमि *m*, तिमिंगिल। –r, *n.* तिमिघ्न; तिमिमृगयानौका.

Whang, *vt.* महाशब्देन आहन् 2 P *or* तड् 10 U.

Wharf, *n.* उत्तरणस्थानं, घट्ट, घट्टी। *vt.* घट्टे (नावं) बंध् 9 P *or* (भांडजातं) न्यस् 4 P। –age, *n.* घट्टमूल्यं। –inger, *n.* घट्टपाल, ०रक्षक.

What, *pron.* (*interrog.*) किं; (*rel.*) यद्। *int.* कथं, किं। W. for, किमर्थं। –ever, –soever, *pron.* यद् यद्.

Wheat, *n.* गोधूम, प्रवट, म्लेच्छभोज्य, सुमन । -en, *a.* गोधूम० *in comp.*

Wheedle, *vt.* चाटूक्त्या अनुनी 1 P *or* उपच्छंद् 10 U, प्रतृ *c or* वंच् *c*; उपच्छंदनेन प्राप् 5 P । Wheedlingly, *adv.* उपच्छंदनपूर्वकं.

Wheel, *n.* चक्रं, रथांगं; (पक्षीणां) परिडीनं । *vt.* चल् *c*, प्रेर् *c* । *vi.* व्यावृत् 1 A । To put a spoke in one's w., प्रतिरुध् 7 U । -barrow, *n.* हस्तशकट *mn* । -er, -wright, *n.* चक्रकार, रथकार.

Wheeze, *vi.* सशब्दं श्वस् 2 P । *n.* घर्घरश्वसनं । Wheezy, *a.* (breathing) घर्घर; घर्घरश्वासोपेत.

Whelk, (1) *n.* शंबूक.

Whelk, (2) *n.* पिट(टि)का, वरंड(क), स्फोटक । -ed, *a.* पिटिकावृत.

Whelm, *vt.* अवगाह् *c*, आप्लु *c*, निमस्ज् *c*.

Whelp, *n.* (कुक्कुरवृकादिकानां) पोत, शावक; अविनीतयुवन् *m*, ०बालक । *vt.* प्रसू 2 A.

When, *adv.* (*interrog.*) कदा; (*rel.*) यदा । *pron. Exp. by* कदा, यदा । -ever, -soever, *adv.* यदा यदा.

Whence, *adv.* (*interrog.*) कुतः, कस्मात्; (*rel.*) यतः, यस्मात्.

Where, *adv.* (*interrog.*) कुत्र, क्व; (*rel.*) यत्र । -abouts, *adv.* कुत्र प्रायेण; *n.* शक्यस्थानं । -as, *conj.* यतः । -ever, soever, यत्र यत्र । -fore, *adv.* किमर्थं; यतः । -in, *adv.* कुत्र; यत्र । -upon, *adv.* यदनंतरं.

Wherry, *n.* तर, तरणि-णी *f*, तरि-री *f*.

Whet, *vt.* क्ष्णु 2 P, तिज् *c* तीक्ष्णीकृ 8 U, (नि०)शो 4 P; उत्तिज् *c*, उद्दीप् *c* । -stone, *n.* शाण-णी, सामक; (small) झामर.

Whether, *conj. Exp. by* वा, आहोस्वित् *etc.*

Whey, *n.* दधिमंड, दधिवारि *neu*, प्राग्राढं, मस्तु *neu.*

Which, *pron.* (*interrog.*) किं, कतम, यतम; (of two) कतर, यतर; (rel.) यद् । -ever, -soever, *pron.* यद् यद्.

Whiff, *n.* आकस्मिक धूमोद्गार; अल्पवात; अल्पगंध.

While, *n.* काल, समय । *conj.* (*also* whilst) यदा, यावत्; *also exp. by pres. part., loc. abs.,*

etc. । *vt.* (कालं) सुखेन क्षि *c or* गम् *c* । Once in a w., कदा कदा, कर्हिचित्, क्वचित् । For a w., कंचित्कालं । In a little w., अचिरात्, अचिरेण । (Not) worth (one's) w., लाभप्रद, व्यर्थ·

Whilom, *a.* पूर्व, पूर्वकालीन·

Whim, *n.* कामचार, छंद, छंदस् *neu*, लहरी । -sical, (*also* Whimmy) *a.* कामचारिन्, चंचलवृत्त, छंदानुवर्तिन्, स्वच्छंद, स्वैर, स्वैराचार; विचित्र(दर्शन), विलक्षण; -ity, *n.* छंदानुवर्तनं, स्वैरता; -ly, *adv.* स्वैरं, कामचारेणैव । -sy, *n.* छंद, लहरी । -wham, *n.* क्रीडनकं·

Whimper, *vi.* मंदं क्रंद् 1 P *or* रुद् 2 P । *n.* मंद्रक्रंदनं, ०रुदितं·

Whine, *vi.* दीर्घं क्रंद् 1 P; असंतोषं प्रकाश् *c* । *n.* दीर्घक्रंदनं; असंतोषवचनं·

Whinny, *vi.* मंदं हेष् 1 A *or* ह्रेष् 1 A । *n.* मंदहेषा, ०हेषितं·

Whip, *n.* कश-शा; प्रतिष्कश, प्रतोद । *vt.* सहसा अपहृ 1 P *or* आच्छिद् 7 P *or* उद्धृ 1 P; कशया तड् 10 U *or* प्रहृ 1 P; सूत्रवेष्टनेन बंध् 9 P । *vi.* सहसा चल् 1 P, निर्गम् 1 P, *etc.* । To have the w.hand of नियंत्र् 10 U, नियम् 1 P । -stock, *n.* कशादंड । Whipper-snapper, *n.* वियातपामर । Whipping, *n.* कशाताडनं·

Whir, *vi.* सशब्दं घूर्ण् 1 A *or* (परि०)भ्रम् 1 U. 4 P । *n.* भ्रमणशब्द·

Whirl, *vt.* सरभसं घूर्ण् *c or* (परि०) भ्रम् *c*; सत्वरं नी 1 P *or* वह् 1 P; प्रसभं क्षिप् 6 P । *vi.* सरभसं घूर्ण् 1 A *or* (परि०)भ्रम् 1 U. 4 P; भ्रामरेण पीड् *Pass.* सत्वरं गम् 1 P *or* चल् 1 P । *n.* घूर्णनं, भ्रमणं । -pool, *n.* अवघूर्ण, आवर्त, कूलहुंडक, जलगुल्म, जलावर्त, तानूर, पुटभेद, भ्रमि *f* । -wind, *n.* चक्रवात, वातालि-ली *f*, वातावर्त, वात्या, वायुगुल्म; to sow wind and reap whirlwind, दुष्कर्मणः दारुणतमफलं भुज् 7 U । Whirligig, *n.* भ्रमरक *mn*; परिभ्रमणयंत्रं; परिवर्तनं·

Whish, (1) *int.* शांतं, तूष्णींभव·

Whish, (2) *vi.* जले सशब्दं चल् 1 P.

Whisk, *vt.* चामरेण (इव) अपास् 4 U; सहसा अपनी 1 P *or* अपहृ 1 P; सत्वरं (वि०) धू 5. 9. 10 U । *vi.* सहसा गम् 1 P *or* चल् 1 P । *n.* चामरं, मशकवरणं·

Whisker, *n.* गंडरोमन् *neu*, श्मश्रु.

Whisky, *n.* (1) यवसुरं । (2) जव-नयानं.

Whisper, *vi.* उपांशु भाष् 1 A; कर्णे जप् 1 P । *vt.* उपांशु वद् 1 P *or* कथ् 10 U । *n.* उपांशु-भाषणं, ०वाद; किंवदंती; गुप्त-निवेदनं; मर्मरध्वनि *m* । -er, *n.* कर्णेजप । -ingly, *adv.* उपांशु.

Whist, *int.* शांतं, तूष्णींभव.

Whistle, *n.* शीश्शब्द; वंशी । *vi.* शीश्शब्दं कृ 8 U । To w. for, प्राप्तुं न शक् 5 P.

Whit, *n.* अणु *m*, कण, अल्पिष्टांश । Not a w., no w., न मनागपि.

White, *a.* अमल, अर्जुन, अवदात, अवलक्ष, गौर, धवल, धौत, व(ब)-लक्ष, रजत, विमल, विशद, शुक्र, शुक्ल, शुक्लल, शुचि, शुभ्र, श्येत, श्येन, श्वित, श्वित्य, श्वेत, सित; पांडु, पांडुर, विवर्ण; निर्मल । *n.* श्वेतवर्ण, गौर *m*, शुक्ल *m*, *etc.*; गौरमुख, ०जन; (*pl.*) श्वेतप्रदर । W. ant, उपदीका, उपदेहिका । W. elephant, अनिष्टव्ययकारणं । W. slave, वैशिकार्थे अपहृता स्त्री । -beard, *n.* वृद्ध. स्थविर । -livered, *a.* कातर, भीरु । -n, *vt.* धवलयति *Den*, शुक्लीकृ 8 U; *vi.* धवलीभू 1 P । -ness, *n.* धवलता, शुभ्रता, शौक्ल्यं । -ning, *n.* (*also* Whiting) कठिका-चूर्णं । -smith, *n.* रजतकार । -wash, *n.* सुधा; दोषगोपक-निरूपणं, ०वर्णनं, *etc.*; *vt.* सुधया लिप् 6 P; (दोषगोपनेन) अप-वादात् मुच् 6 P. *c* । Whitish, *a.* आपांडु, ईषदुज्ज्वल, धूसर.

Whither, *adv.* (*interrog.*) कुत्र, क्व; (*rel.*) यत्र । -soever, *adv.* यत्र यत्र.

Whitlow, *n.* चिप्प, चिप्य, नख-व्रण.

Whittle, *n.* कृपाणी, शस्त्री । *vt.* छेदनेन अल्पीकृ 8 U; क्रमेण अल्पीकृ 8 U.

Whiz, *vi.* सीत्कारेण गम् 1 P *or* पत् 1 P । *n.* सीत्कार.

Who, *pron.* (*interrog.*) किं *masc.* & *fem. forms*; (*rel.*) यद् *masc.* & *fem. forms* । -ever, -soever, *pron.* यद् यद् *masc.* & *fem. forms* । Whose, कस्य, कस्याः *etc.*; यस्य, यस्याः, *etc.*

Whole, *a.* कुशलिन्, निरामय, स्वस्थ; अक्षत, अखंड; अशेष, कृत्स्न, सकल, समग्र, संपूर्ण; (number) अभिन्न । *n.* समष्टि *f*, समास, साकल्यं, कार्त्स्न्यं । To go the w. hog, संपूर्णतया कृ 8 U *or* संपद् *c* । -hearted, *a.* अनन्यवृत्ति, अभिनिविष्टचित्त;

-ly, *adv.* साभिनिवेशं । -ness, *n.* साकल्यं, सामग्र्यं । -sale, *a.* सामासिकविक्रयाविषयक, ०कारिन्; (liar) पूर्ण; महत् । Wholly, *adv.* एकांततः, सर्वथा, साकल्येन.

Wholesome, *a.* आरोग्यावह, पथ्य, स्वास्थ्यकर; हित, हितकर, हितावह। -ness, *n.* पथ्यता; हितावहत्वं.

Whoop, *vi.* उच्चैः आक्रुश् 1 P *or* उद्घुष् 10 U । *n*, आक्रोश, घोषणा; क्ष्वेडा, सिंहनाद.

Whop, *vt.* तड् 10 U, प्रहृ 1 P; पराभू 1 P । *vi.* सशब्दं पत् 1 P.

Whore, *n.* गणिका, छिन्ना, पण्यस्त्री, वारांगना, वेश्या; पुंश्चली, व्यभिचारिणी । *vi.* व्यभिचारं कृ 8 U । -dom, *n.* जारकर्मन् *neu*, व्यभिचार । -monger, *n.* औपस्थिक, जार, व्यभिचारिन् *m*.

Whorl, *n.* आवर्त, व्यावर्तनं.

Why, *adv.* (*interrog.*) कस्मात्, किमर्थं, कुतः; (*rel.*) यतः । *n.* निमित्तं, प्रयोजनं.

Wick, *n.* झिल्ली, तूला, तूलिका, तैलिनी, दशा, वर्ति-र्ती *f*, वर्तिका.

Wicked, *a.* अघायु, अधर्मिन्, एनस्विन्, दुराचार, पातकिन्, पाप; खल, दुष्ट, पिशुन, शठ । -ly, *adv.* पैशुन्येन, शाठ्येन । -ness, *n.* पापात्मकता; दौरात्म्यं, दौर्जन्यं, पैशुन्यं; दुराचार, पापं, पापकर्मन् *neu*.

Wicker. *n.* वेणु०, वेत्रजालकं । *a.* वैणव, वैदल । -work, *n.* वैणवं, वैदलं.

Wicket, *n.* अंगणद्वारं ; उपद्वारं.

Wide, *a.* आयत, उरु, पृथु; वितत, विशाल, विस्तीर्ण ; व्यापक ; अपलक्ष्यपातित । *adv.* अतीव, बहुशः ; भृशं । To give a w. berth to, दूरे स्था 1 P, संनिकर्षं परिहृ 1 P । To have one's eyes w. open, जागरूक *a.* *or* सावधान *a* वृत् 1 A. । W. open (eyes) विस्फारित । W. of the mark, अप्रस्तुत, अप्रास्ताविक । -awake, *a.* जागरूक, दक्ष, सावधान । -ly, *adv.* विस्तीर्णं, सर्वत्र, भृशं । -n, *vt.* पृथूकृ 8 U, प्रथ् 10 U, विस्तृ *c*; *vi.* पृथुलीभू 1 P, विस्तृ *pass* । -spread, *a.* व्यापक, विस्तीर्ण, विस्तृत । Width, *n.* आयाम, परिणाह, पृथुता, विस्तार ; व्यापकता.

Widgeon *n.* कादंब, वरट.

Widow, *n.* विधवा, गतभर्तृका, रंडा, विश्वस्ता, (elderly, dressed in red clothes) कात्यायनी । *vt.* पतिहीनां *a.* *or.* पत्नीहीनं *a* कृ 8 U; विनाकृ 8 U, वियुज् 7 A. 10 U. । -er, *n.* गतभार्य । -hood, *n.* वैधव्यं.

Wield, *vt.* धृ 10 U, भृ 3 U; उपयुज् 7 A. 10 U। To w. the sceptre, राज्यं कृ 8 U, प्रशास् 2 P। To w. the pen, लिख् 6 P.

Wife, *n.* कलत्रं, कांता, कुटुंबिनी, क्षेत्रं, गृहाः *pl.* गृहिणी, गेहिनी, जाया, दयिता, दाराः *pl*, द्वितीया, पत्नी, परिग्रह, पाणिगृहीती, प्रिया, भार्या, वधू, सधर्मचारिणी, सहचरी, सहधार्मिणी ; (rival w.) सपत्नी। –ly, *a.* भार्योचित.

Wig, (1) *n.* कृत्रिमालक.

Wig, (2) *vt.* अधिक्षिप् 6 P, उपालभ् 1 A, गर्ह् 1. 10 A.

Wight, *n.* जन, पुरुष ; अपदेवता.

Wigwag, *vi.* इतस्ततः चल् 1 P। –*vt.* *c of prec.*

Wigwam, *n.* उटज, कुटी, कुटीर *mn.*, गर्गरी.

Wild, *a* आरण्य, वन्य ; उच्छृंखल, निरंकुश ; सुक्षोभ्य, भीरु ; अव्यवस्थित ; सरभस, संरंभिन् ; व्याकुल, संक्षुब्ध ; प्रचंड ; अविमृश्यकृत, निर्विवेक, साहासिक ; अनुपपन्न। W.–goose chase, निरर्थकव्यवहार। To run w. अनियमेन *or* शिक्षणं विना वृध् 1 A,। –erness, *n.* खिलं, निर्जनप्रदेश, अरण्यं ; संकुलं, अव्यवस्था। –ing, *n.* वन्य०, स्वयंजातवृक्ष। –ly, *adv.* उच्छृंखलं ; संरंभेण; निर्विवेकं। –ness, *n.* वन्यता ; निरंकुशता ; संरंभ.

